The *Arthaśāstra* distinguishes the courts as *Dharmasthīya* and *Kaṇṭakaśodhana*, and the third and fourth books of the *Kauṭilīya* are devoted to them. In regard to the treatment of subjects, there is little difference between Kauṭilya and the *smṛtis*, and it may be therefore assumed that he followed only the *Dharmaśāstra*. The differences between him and Yājñavalkya are for instance inconsiderable. The *Dharmasthīya* courts dealt not only with the civil matters included in the usual "eighteen titles of law," but also *sāhasam* (violent crime) and assault (*daṇḍa-pāruṣya*). Theft

had a great extension given to it by construction, so as to include abduction, on the principle that it is the theft of a human being, (*Manu*, VIII, 317) cheating in trade, (*Yājñavalkya*, II, 257) substitution of an article in deposit (*ib*. 246-247), and combinations of traders to raise prices (held again to be deceitful, *ib*. 249-250). The *Kaṇṭakas'odhana* courts dealt with such civil matters as the affairs of artisans, labourers and merchants, and offences against police regulations such as those relating to prostitutes. Capital punishment cases came under them, as did all police and magisterial enquiries and investigations. It is clear that roughly the difference was that between the courts of a judge and a magistrate in British India today. The differentiation was not made on the ground of secularity or religion. (vide, Jayaswal, *Manu and Yājñavalkya*, pp. 116-7) and V. R. Ramachandra Dikshitar, *Mauryan Polity*, pp. 160-164.

Not only therefore is there no clear distinction between religious and secular law, which in the circumstances we can not expect, but the lines of demarcation between crime and civil wrong is not clear. In most crimes, the offender has not only to undergo punishment by fine etc. but he incurs the liability to pay to the injured party due compensation. The underlying idea is that they are not public offences but private injuries. Offences against the spirit of religion take the place of grave crimes against the state. This is the ground of the serious view taken of adultery and offences against women. The original punishment for adultery had been death, but Kauṭilya reduced it to imprisonment and fine (*op. cit.*, p. 228). The rule in *Sukranīti* making adultery and offences against women crimes in which the king prosecutes (IV, v, 83 ff.) is the result of viewing them as grave moral offences, likely to lead to *varṇa-samkara*. It would appear superficially that, (as suggested by Mr. C. S'ankararāma S'āstri, *Fictions in the Hindu Law Texts*, 1926, p. 35,) contrary to Sir Henry Maine's generalisation, criminal law in India was the creature of civil law. The correct view is to regard both as the creatures of *Dharma*.

17

13, *ll.* 9-11. DIVINITY OF PUNISHMENT OR DAṆḌA

This is indicated in *Manusmṛti*, VII, 14 and Yājñavalkya, I, 353.

Taysārthe sarva-bhūtānāṁ goptāram dharmamātmajam ।
Brahmatejomayam Daṇḍamasṛjat pūrvam Is'varaḥ ॥
and *Dharmo hi Daṇḍa-rūpeṇa Brahmaṇā nirmitaḥ purā* ।

18

13, *ll.* 13—14. VEDIC BASIS OF HINDU LAW

The assumption that not only all law and usage but all knowledge is enshrined in the Veda, leads to the conclusions that (1) there should be internal consistency in law, (2) the differences which appear are resolvable by enquiry, and (3) for every rule of law a vedic basis *can* be discovered. As the Veda is eternal, omniscient and infallible, and the Vedas have no limit (*anantā vai vedāḥ*), it should be possible to say of them what was claimed for the *Mahābhārata* (I, lxii, 26) *viz.*, 'what is not here is nowhere else' (*yan nehāsti na kutracit*). The Mīmāmsa school held 'the Vedas entirely and exclusively concern themselves with Dharma,' *Dharma* being defined by Jaimini in his second aphorism as 'that which is signified by a direction and leads to a benefit' (*Codanālakṣaṇārtho dharmaḥ*). When one is unable to find Vedic authority for a rule, he would assume that the *s'ruti* had passed out of view (*utsanna*, lost) or is hidden (*pracchanna*), and the *s'ruti* text will come to view if diligently searched for. A *bhāṣyakāra's* skill and learning are shown by his discovery of the texts which refer to the matters dealt with. Medhātithi and Vis'varūpa display the capacity, and particularly the latter, of whose work a modern writer has remarked that it "seems to have been written with the set purpose of establishing the Vedic origin of the Smṛtis." (*Fictions in Hindu Law Texts*, p. 79).

"When it is said that the Vedas are the source of *Dharma*, it is not meant that the Vedas lay down precepts or injunctions

(*vidhi*) on points of Hindu Law, as later works like *Manusmṛti* or *Yājñavalkyasmṛti* do. All that is meant is that the Vedas contain incidental references to matters that are of interest to students of Hindu Law, that they take certain facts as well-known and make use of them for various purposes. The information that is contained in the Vedas on matters of Hindu Law is in the nature of what are known as *arthavādas* in the Mimāmsa system. As *arthavādas* form a syntactical unity with the positive injunctions (*vidhis*) laid down in the Vedas, they are authoritative. They indicate with sufficient clearness what the state of things then was. If one were to collect together the scattered Vedic texts on such topics of Hindu Law as marriage, adoption, joint family, partition, inheritance, *strīdhana*, he would find that the information is of considerable importance and is not quite so meagre as one is apt to suppose. The conclusion will irresistibly force itself upon us that the foundations of the Hindu Law are deeply laid in the Vedic age itself, that the peculiar characteristics that distinguish the Hindu Law of modern times from other systems of law had their germ in the Vedic period and that later Hindu jurists were not wrong when they relied upon the Veda as the first source of *Dharma*." Mr. P. V. Kane, who has made the above observations, has collected a number of illustrations in justification of the conclusions in a valuable paper on the *Vedic Basis of Hindu Law*, published in 1939.

19

13, *ll.* 14-15. DOCTRINE OF OPTION (VIKALPA)

The option or *vikalpa* can only be when there is a conflict between two vedic passages, and not when a *smṛti* rule runs against a *sṛuti*, because the latter over-rides the former. But it is open to argue that with due diligence a *sṛuti-pramāṇa* may be discovered for the *smṛti* rule in question. To assume otherwise will lead to the summary and easy rejection of many *smṛti* rules on the ground of their not being traced to *sruti*. This is the

orthodox Mīmāmsaka standpoint, which further is that action in such a case should be suspended pending the discovery (*Fictions in Hindu Law Texts*, p. 116).

20

13, *ll.* 16-27. CONFLICTS OF LAW NOT REAL

Strict interpretation according to *Mīmāmsa* will hold all conflict to be apparent only and not real, because of the canonical authority claimed for both *Arthas'āstra* and *Dharmas'āstra*. But such a possibility is envisaged in the *smṛti* texts on conflicts of laws. *e.g.* Yājñavalkya's dictum (II, 21) :

Arthas'astrāt-tu balavad dharmas'āstram iti sthitih |

The same principle is enunciated by *Nāradasmṛti* (I, 99) :

Yatra vipratipattis-syāt dharmas'āstrā-rthas'āstrayoḥ |
Arthas'āstroktamutsṛjya dharmas'āstroktamācaret ||

The doctrine of infallibity of the common source of both *s'āstras* might justify the conclusion that *s'ruti* can not be opposed to equity and logic (*nyāya*) and the position taken by Kauṭilya in the following passage :

S'āstram vipratipadyetā dharma-nyāyena kenacit |
Nyāyas-tatra pramāṇam syāt, tatra paṭho hi nas'yati ||

See *Ancient Indian Polity*, pp. 164-172.

The facile assumption that *Arthas'āstra* is an inferior authority and should therefore be overlooked when it runs counter to *Dharmas'āstra* is repugnant to the orthodox tradition. Accordingly, in explaining the dictum of Yājñavalkya (II, 21) the *Mitākṣarā* maintains that the word "*arthas'āstra*" in the rule is not to well-known writers like Us'anas (S'ukra) but to the *arthas'āstra* contained in *Dharmas'āstra* works. If there is a conflict *within* the *Dharmas'āstra* between the two classes of rules, the *Dharma* rule should

prevail. He illustrates it by two cases. (1) Manu (VIII, 350-351) enjoins the summary killing of an *ātatāyin* (manifest assassin, and his like) even if he be a learned Brāhmaṇa. To act on the direction will be to go against a rule of Manu (XI, 89) that there is no expiation for the deliberate killing of a Brāhmaṇa. The former is an *artha* text, which should give way to the latter, a *Dhārma* rule. The reconciliation comes from taking the reference to the learned Brāhmaṇa *ātatāyin* as a rhetorical statement emphasising the force of the injuction on the treatment of assassins, patent and constructive, and applying the dictum to cases *other than* those of Brāhmaṇas. (2) Yājñavalkya, I, 352 gives a rule of prudence, *viz.* that the making of a friend is better than the acquisition of land and wealth, but he has also the high moral rule (II, 1) that free from anger and covetousness the judge should decide in accordance with *Dharmas'āstra.* If a wealthy suitor is to be unjustly favored, the first rule may be observed, but it should not, being an *artha* precept opposed to a *dharma* rule.

Vijñānes'vara in discussing the texts dealing with gains of science, etc. (II, 118-119), which, if acquired without detriment to ancestral property (*pitṛ-dravyāvirodhena*), belong to the acquirer and cannot be claimed by co-parceners, states that the section of the code is full of texts based on worldly experience :

> *Lokasiddhasya anuvādakānyeva prāyeṇa asmin prakaraṇe vacanāni.*

21

14, *l.* 10. SCHOOLS OF ARTHAS'ĀSTRA

There was no appreciable development of the subject after Kauṭilya. He cites seventeen authorities. See *Ancient Indian Polity*, p. 50. Among them are writers with names which became famous in *smṛti* literature, like Kātyāyana, Nārada, Parās'ara and Bṛhaspati. It is not improbable that the same writers could have written on both *s'āstras*.

22

14, *l.* 11. APPLICATION OF MĪMĀMSA TO DHARMAS'ĀSTRA AND ARTHAS'ĀSTRA

Bhaṭṭasvāmin's commentary on the *Kauṭilīya* of which a fragment has been edited (Jayaswal and Banerji-Sastri, Patna, 1926) shows familiarity with Mimāmsa methods of interpretation. Saṅkarārya's commentary on *Kāmandakīya Nītisāra* (ed. Gaṇapati S'āstri, 1912) shows similar training. But they are inferior to great commentators like Medhātithi, Vis'varūpa and Vijñānes'vara, and even to men like Nandapaṇḍita.

23

14, *ll.* 17-18. ARTHAS'ĀSTRA CORE OF SMṚTIS

There is a good deal of *Arthas'āstra* in Manu, and even more of it in Yājñavalkya, with whose code Jolly made a detailed comparison of the *Kautilīya* (*Z. D. M. G.*, 1913, pp. 43-96) collecting in an appendix parallels from the *smṛtis* to over 200 passages of the *Arthas'āstra*. Kautilya's doctrines are not merely more like those of Yājñavalkya than those of any other *smṛti*, but the points of verbal identity are greater between the two. Jolly held that Kauṭilya was the borrower. I have shown grounds for thinking otherwise. See *Ancient Indian Polity*, pp. 34-37.

24

14, *ll.* 14-16. BRAMANICAL REACTION FROM THE FIRST CENTURY A.D. FAVORS DHARMAS'ĀSTRA

In an epoch of Vedic revival and sacrifices, the *Mīmāmsaka* finds the attraction of the *smṛti* and the *Kalpasūtras* greater than that of the *Arthas'āstra*. He specializes in Vedic exegesis (*e.g.* S'abarasvāmin, Kumārila). He states emphatically that as "the Veda is the only source of Dharma, so Dharma is the only topic dealt with by the Veda, (S'aṅkararama S'āstri, *op. cit.*, p. 52). *Bhāṣya*, *Samgraha*, and *Nibandha* forms of composition rapidly progress with the means supplied by Mīmāmsa for subtle and exact analysis and interpretation. The comparative study of *smṛtis* gains ground.

25

14, *ll.* 20-22. KĀMANDAKA'S NĪTISĀRA

Kāmandaka attempts to write his book in *Kāvya* style. In fact, his commentator, S'ankarārya regarded it as a *mahā-kāvya* and made his comments on the assumption. Not only does Kāmandaka use the ordinary *anuṣṭhuṗ* metre, but he tries more ornate metres also. Though he begins with a panegyric on Viṣṇu-gupta (*i.e.* Kauṭilya), his book is not a summary of the *Kauṭilīya*, of which not over-much use is made. Kāmandaka apparently intended his work to be an *artha-samhitā*, just as the *Manusmṛti* is a *dharma-samhitā*. The *Nītisāra* is divided into *sargas* or cantos like a classical poem. It begins with the praise of the king, and was apparently not familiar with other forms of Government:

Rājās'ya jagato hetur vṛddher-vṛddhābhisammataḥ ।
Nayanānḍajananaḥ s'as'ānka ive toyadheḥ ॥

The second line, which states that the king delights the eye as the moon gladdens the ocean, appears to contain a half-veiled reference to Candragupta II, the son and successor of Samudragupta. *Sas'ānka* is Candra, and *Toyadhi* is Samudra.

The *Nītisāra* is generally supposed to be a work of the Gupta epoch. Formichi (cited in Sarkar's *Hindu Positivism*, p. 385) would assign its composition to the third or fourth century A. D. He regards it as anterior to the *Bṛhat-samhitā* of Varāhamihira (sixth century). Formichi's estimate will fit in with my suggestion that the *Nītisāra* is a work of the time of Candragupta II.

Kāmandaka's simile will recall to one's mind Kālidāsa's verse (*Raghuvamsa*, III, 41).

Nivātapadmastimitena cakṣuṣā nṛpasya kāntam
ṗibataḥ sutānanam ।
Mahodadheḥ ṗūra ivendu-dars'anāt guruḥ ṗraharṣaḥ
ṗrababhūva nātmani ॥

See below the note to p. 56, *ll* 29-30.

26

17, *ll.*, 8-9. SŪTRA FORM OF COMPOSITION

Dr T. W. Rhys Davids pointed out in the introduction to his translation of the *Dialogues of the Buddha* (I, pp. xx-xxii) that the chief characteristic of the *sūtra* was that it was not intended to be *read* but to be memorised. See also, E. J. Rapson, *Ancient India*, 1914, pp. 76-77 and my *Ancient Indian Polity*, pp. 19-20. The use of the *sūtra* form was dictated by considerations of economy, oral transmission, and secrecy.

27

17, *ll.* 21-25. FORMAL PUBLIC RECITATIONS OF SŪTRAS

The Buddhists having adopted the *sūtra* form for their sacred canon were obliged, like the Brahmanas when they devised means for the accurate preservation and transmission of the Veda, to resort to public recitations in their convocations of the *suttas* of the *Tripiṭaka*. The permutations of syllables in different forms (*pāṭha*) by which the Vedas were conserved, were not adopted by the Buddhists as their *suttas* would not lend themselves, by lack of accentuation, to such devices. A *sūtra* work will be often nothing more than a list of headings. The late Mahāmahopādhyāya T. Gaṇapati S'āstri suggested that in the *Kauṭilīya* the *sūtras* were all in the *adhikaraṇa-samuddes'a* in the first chapter, and that the rest of the book was Kauṭilya's own commentary on them, as he had declared that in order to avoid in the case of his work the errors of commentators he had himself composed both the *sūtra* and the commentary.

28

18, *ll.* 7-10. LOST SMṚTI-BHĀṢYAS

Vide, Kane, *op. cit.*, p. 724 (Yajñasvāmin's bhāṣya on *Vāṣiṣṭha-Dharmasūtra* mentioned by Govindasvāmi in his commentary on

Bodhāyana-Dharmasūtra, II, 2, 51); p. 248 and p. 680 on Asahāya's *bhāṣyas* on Gautama and Manu; the loss of the other commentaries is inferential.

29

18, *ll.* 10-15. DISTANCE OF TIME BETWEEN SMṚTIS AND COMMENTARIES

Karka, the commentator on the *sūtras* of Pāraskara is a writer of about A.D. 1000, while his text belongs to the *sūtra* age. Maskarin, the commentator of *Gautamadharmasūtra* (one of the oldest) belongs probably to the same period as Karka. Haradatta, who wrote commentaries on the *sūtras* of Āpastamba and the *Gṛhyasūtra* of Āś'valāyana and the *Dharmasūtra* of Gautama, must have been separated by over twelve centuries atleast from his originals.

30

19, *ll.* 5-10. KAUṬILYA'S OWN BHĀṢYA ON THE ARTHAS'ĀSTRA

See Note 27 *supra*. The search for a lost *bhāṣya* of Kauṭilya is unnecessary in view of Dr. Gaṇapati Sāstri's convincing explanation. The declaration of Kauṭilya occurs at the end of his work; (p. 429).

Drṣṭvā vipratipattim bahudhā s'āstreṣu bhāṣyakārāṇām |
Svayameva Viṣnuguptas'-cakāra sūtram ca bhāṣyam ca ||

Even if this verse is not Kauṭilya's, it will have to be accepted as representing an authentic tradition.

31

20, *ll.* 1-5. MĀDHAVA'S TREATMENT OF VYAVAHĀRA AND RĀJADHARMA

This portion of his commentary stands out of the main *bhāṣya* like an appendix, which it is. It is virtually a separate *nibandha* A similar South Indian *nibandha* on *Vyavahāra*, not tacked on to

smṛti like Mādhava's, is Varadarāja's *Vyavahāraniṛṇaya*, which I am about to publish.

32

20, *ll.* 6-7. RECENT BHĀṢYAS AND NIBHANDHAS

Mahārāja S'arabhoji of Tanjore (A.D. 1798-1833), who had left himself no kingdom to govern, compiled a digest on civil law named *Smṛtisāra-samuccaya*. The second Maharājā of Kāṣmir and Jammu, Ranbīr Singh (A.D. 1857-1885) commissioned a *nibandha* of which the Prāyasccitta-kāṇḍa was completed and published. It contains over 40,000 *granthas*. *Ācarendu* of Nārāyaṇa (printed by the Ānandās'ṛama) was written in A.D. 1838 (Kane, *op. cit.*, p. 514).

The famous *Bālambhaṭṭīya* on the *Mitakṣarā* was composed by Balakṛṣṇa *alias* Bālambhaṭṭa Pāyaguṇḍe at Benares towards the end of the eighteenth century. The date of the writer is given by the late Babu Govinda Das as 1740-1830. He was known to Colebrooke. Kes'avadāsa composed between 1770 and 1830 the digest *Ahalyā-kāmadhenu*, so named so after Ahalyā Bai Holkar. Warren Hastings, Sir William Jones and H. T. Colebrooke were responsible for getting written the *Vivādārṇavasetu*, (1773), *Vivādasārārṇava* (1789) and *Vivāda-bhangārṇava* (before 1796) by a board of pandits, Sarvorus'arman Trivedi and Jagannātha Tarkapañcānana respectively.

33

20, *ll.* 26-29. NON-INCLUSION OF YĀJÑAVALKYASMṚTI IN "THE SACRED BOOKS OF THE ĒAST" SERIES

A translation of *Yājñavalkyasmṛti* was advertised in the series in 1876 (p. xlvi of Vol I.) and it is not clear why it was dropped. Max Müller's Life and *Autobiography* throw no light on the cause of the omission. Perhaps it was dropped owing to the publication of V. N. Mandlik's translation in 1880.

पाण्डुः—युक्तमुक्तं भवद्भिः ।

अतीसाराः—स्वामिनः कृपयैव भुजप्रतापं दर्शयन्तो वयं विजेष्यामह इति किमत्र चित्रम् । अतो वयं किमपि ब्रूमः । विदांकरोतु स्वामी ।

व्याप्नोतीति वेलालङ्घि; ताच्छील्ये णिनिः ; वेलालङ्घि यथा तथा प्रसर्पन्ति प्रकर्षेण वहन्तीति वेलालङ्घिप्रसर्पन्तः ; तथा तटविटपिनां-वेलारूढवृक्षाणाम्, समुत्पाटनेन-उन्मूलनेन यः आटोपः-संरम्भः तेन सह मूर्च्छन्तः-अतीवाभिवृद्धाः, ये कल्लोलाः-महोर्मयः (एतेन वेलालङ्घिप्रसर्पन्तश्च ते तटविटपिसमुत्पाटनाटोप-मूर्छन्तश्च ये कल्लोलाः इति द्विकर्मककर्मधारयः) तैः आक्रान्तः-अभिव्याप्तः यः पृथ्वीवलयः-भूमण्डलम्; तत्र यो जनलयः-जलनिधिकल्लोलकृतः प्रजापरि-क्षयः, तस्य उल्लेखेन-उद्वमनेन, संक्षोभेणेत्यर्थः; सन्त्रस्ताः-सुतरां भयाकुली-कृताः, (अन्तर्भावितण्यर्थोऽयम्) लेखाः-देवाः येन सः । "आदितेया दिविषदो लेखा अदितिनन्दनाः" इत्यमरः । एतादृशविप्लवजनकः मा जनि मा भूत्; माङि लुङ्; "न माङ्योगे" इत्यडागमप्रतिषेधः । इति हेतोः । विघ-टितं-विदारितम्, यत् बडबाया वक्त्रं-अन्तस्समुद्रं विद्यमानाया महत्या अश्वाया आस्यम्, तदेव रन्ध्रं-कुहरं तस्मात् । उदञ्चन्-सुमहतीभिर्ज्वालाभिः उद्गच्छन् । वह्निः- बाडबाग्निः । प्रतिकलं प्रतिक्षणम् । उदयत्-समुद्भवत् । किञ्च भूरीभवि-ष्यत्-वर्धिष्यमाणम् । वारि-सागराम्भः । अह्नाय-झटिति । चूषति-पिबति । अनु-क्षणमुद्वेलतया प्रवर्धमानमम्भोधिसलिलं उदर्चिषा रसातलस्थेन बडबामुखाग्निना यद्यनुपदं नाचूषितमभविष्यत्, तर्हि भूमण्डलमखिलमपि सागराम्भःपूरैरावृतम-भविष्यत्; तद्वदेव वर्धिष्णोः शात्रवबलस्य निग्रहाय यदि न समुचितः समुद्यमः क्रियते, तर्हि स्वयूथस्याशेषस्यापि सुलघु शत्रुजनैरभिवृद्धैराक्रमणं निधनं च स्यादिति तात्पर्यम् ॥ २० ॥

स्वामिन इति । भुजप्रतापं-स्वकीयं विशिष्टं बलमिति यावत् । पाण्डोः कृपाबलेनैव परपक्षप्रतिक्षेपे स्वात्मनां दक्षत्वम् अभिदधन्तः स्वात्मनां नैच्या-

नेत्रे मज्जयितुं मुखं ग्लपयितुं जत्रुद्वयं व्यञ्जितुं
पार्श्वास्थ्नां गणनीयतां गमयितुं सत्त्वं भृशं लुण्ठितुम् ।
सप्तत्वेऽपि निजे स्थिते घटयितुं पञ्चत्वमेवाङ्गिनां
शक्तान्नः प्रहिणोषि यत्र तरसा तत् साधयामो वयम् ॥ २१ ॥

नुसन्धानं प्रभोः प्रशंसां च प्रकटयन्त इमेऽतिसाराः स्वाम्यनुग्रहः स्वेषां तेन विशिष्य भवेदिति प्रतीक्षन्ते । विदांकरोतु-अस्माभिरभिधीयमानमपि सम्यगाकर्ण्य भवान् विमृशत्वित्यर्थः ।

स्ववक्तव्यांशमेव स्वप्रभावप्रकटनपुरस्सरं प्रस्तौति नेत्रे मज्जयितुमिति । अङ्गिनां-प्राणिनाम् । नेत्रे-अक्षिगोलकौ । मज्जयितुं-अधो गमयितुम् । मुखं-वदनम् । ग्लपयितुं-विम्लापयितुम् । जत्रुद्वयं-वामदक्षिणभागयोः विद्यमानम् अक्षकास्थि-सहितम् अस्थ्नां सन्धिद्वयम् । व्यञ्जितुं-उन्नमय्य व्यक्तीकर्तुम् । पार्श्वास्थ्नां-उरस उभयोर्भागयोरवस्थितानां पर्शुकाख्यानाम् अस्थ्नाम् । गणनीयतां-एकैकशो गण-नार्हताम् । गमयितुं-प्रापयितुम् । मांसले तु शरीरे प्रतिपार्श्वं विद्यमानानि द्वादश-संख्याकानि एतान्यस्थीनि न व्यक्तानि भवन्ति । सत्त्वं-शारीरं मानसं च बलम् । भृशं लुण्ठितुं-अपहर्तुम् । किं बहुना । निजे-आत्मीये । सप्तत्वे सप्तसङ्ख्या-कत्वे । स्थितेऽपि-विद्यमानेऽपि । पञ्चत्वं-पञ्चसङ्ख्याकत्वमेव ; इति विरोधाभासः ; अन्यत्र मरणमेवेत्यर्थः । घटयितुं-प्रापयितुम् । शक्तान्-समर्थान् । नः-अतीसारा-निति यावत् । यत्र-यस्मिन् कार्ये ; यत् कार्यं निर्वोढुमिति भावः । तत्-कर्म । तरसा-बलात् सहसा च । वयं साधयामः-निर्वर्तयामः । तस्मात् सैनिकान्तरा-पेक्षया वयं वीर्येण चाशुकारित्वेन च बलवत्तरा इति भावः । अत्र सप्तातीसारा इत्युक्तम् । "एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः" इति माधवकरः षडतीसारान् प्रथमतो निर्दिश्य, पश्चात् "पित्तकृन्ति यदात्यर्थं

पाण्डुः—(सबहुमानम्)

अतिसारा इति स्पष्टं विष्टपत्रयविश्रुतम् ।
युष्मन्नामैव युष्माकं ब्रूतेऽतिशयितं बलम् ॥ २२ ॥

द्रव्याण्यश्नाति पैत्तिके । तदोपजायतेऽभीक्ष्णं रक्तातीसार उल्बणः" इति रक्तातीसारं सप्तमत्वेन अभिदधाति । "न ह्येतावता सप्तत्वं भवत्यतिसारस्य, पैत्तिकस्यायमवस्थाविशेषः" इति विजयरक्षितो यद्यपि षट्त्वमेवास्य रोगस्य निर्धारयितुं प्रयतते, तथापि लोके रक्तातिसारस्य विशिष्य गणनायाः सद्भावात् सप्तातिसारा इत्युक्तौ न कोऽपि विरोधः । किञ्च "पृथक् त्रिदोषैः सर्वैश्च शोकादामाद्भयादपि । अतीसारः सप्तधा स्यात्" इति शार्ङ्गधरादयः प्रकारान्तरेणापि सप्तत्वमतिसारस्य गणयन्ति । अतः सङ्गत एवायं सप्तातिसारा इति ॥ २१ ॥

सबहुमानमिति । स्वाभीष्टकार्यनिर्वहणक्षमत्त्वमेतेषां समालोच्य सबहुमानत्वम् अतिसारेषु । तदेव स्पष्टयति वक्ष्यमाणेन श्लोकेन ।

अतिसारा इतीति । अतिसाराः-निरतिशय बलवन्तः । इति-एवंरूपेण । स्पष्टं यथा तथा । विष्टपत्रयविश्रुतं-लोकत्रयप्रसिद्धम् । युष्मन्नामैव-युष्मदीयं नामधेयमेव । युष्माकम् । अतिशयितं बलं-अनितरसाधरणीं शक्तिम् । ब्रूते । यद्यपीह अतिसारशब्दस्य निरवधिकं बलमिति न विरुद्धोऽयमर्थः तथापि वैद्यतन्त्रेषु 'अतीव सरति गच्छतीत्यतिसारः' इति तस्य दृश्यते निरुक्तिः । इयमेव निरुक्तिः संप्राप्तित्वेन निदाने प्रतिपाद्यते । यथा—"संशम्यापां धातुरग्निं प्रवृद्धः शकृन्मिश्रो वायुनाधः प्रणुन्नः । सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं" इति । "गुदेन बहुद्रवसरणम् अतिसारः" इति व्याख्याने विजयरक्षितश्च । किन्त्वत्र प्रकरणानुरोधेन अतिशयितबलवत्त्वात् अतिसार इति निर्वचनं कवेर्वैदग्ध्यं व्यञ्जयति ॥ २२ ॥

गुल्म-प्लीहानः—श्रूयतां स्वामिना—

अस्मासु प्रविशत्सु शात्रवपुरं पीडाकरेषु द्रुतं
कार्याकार्यविवेक एव न भवेदल्पोऽपि तस्मिन् क्षणे ।
आस्तामेतदिदं वचो निशमय क्षन्तुं व्यथामक्षमो
विज्ञानेन च मन्त्रिणा सह पुराज्जीवः पलायिष्यते ॥ २३ ॥

अस्मास्विति । अस्मासु-गुल्म-प्लीहसु । कथंभूतेषु-द्रुतं पीडाकरेषु-क्षिप्रमेव बाधाजनकेषु । शात्रवपुरम् । प्रविशत्सु-कोष्ठादीनामन्तः स्थानमधिगत्य निविष्टेषु ; नगरस्यान्तः गतिं समधिगतेषु इत्यन्यत्रार्थः । तस्मिन् क्षणे । अल्पोऽपि । कार्याकार्यविवेकः-कर्तव्याकर्तव्येषु विषयेषु परिच्छिन्नं ज्ञानम् । नैव भवेत् । किंकर्तव्यतामूढः सन् जीवः सर्वधा चित्तक्षोभं प्राप्नुयादिति पद्यस्यास्य द्वितीयपादस्थानि पदानि सर्वाण्यपि संभूय सूचयन्ति । न केवलमेतावदेव, परं तु सुमहते जीवराजस्यात्याहितायास्मत्प्रवेशः प्रकल्प्येतेति पुनरभिधीयते आस्तामित्यादिना । आस्तामेतत्-अस्मत्प्रवेशानन्तरमेव जीवस्य कृत्याकृत्यविवेकाभवः संभविष्यतीत्येतत् तिष्ठतु नाम दूरे । इदं वचः-वक्ष्यमाणम् अस्मद्वचनम् । निशमय-आकर्णय । जीवः । व्यथां-अस्मत्कृतां बलवतीं बाधाम् । क्षन्तुम् अक्षमः-सोढुम् अशक्नुवानः सन् । विज्ञानेन मन्त्रिणा सह । पुरात् । पलायिष्यते । गुल्मस्य, विशेषतः सान्निपातिकस्य द्रुतं विदाहित्वम् अतीव पीडाकरत्वम् असाध्यत्वं च वैद्यके प्रतिपादितमेव । यथा—"महारुजं दाहपरीतमश्मवद्घनोन्नतं शीघ्रविदाहि दारुणम् । मनश्शरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥" इति । प्लीहोदरेऽपि "तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः ॥" इत्यादिभिः पीडा दुस्सहा शीघ्रकारिणी च भवत्यातुरस्येति वैद्यजनविदितमिदं तत्त्वम् । इत्यन्ततः प्लीह्ना गुल्मैश्च स्वस्वप्रभावाः सावष्टम्भं आविष्कृता वाचा ॥ २३ ॥

पाण्डुः—अस्मत्सैनिकोपरुद्धे पुरे पिपीलिकापि न प्रसरीसरीति । परं तु सर्वैरिदमाकर्णनीयम् । शास्त्रानुसारिणि मन्त्रिणि, तदनुरक्ते विक्रमाभिमानरक्षणैकपरे द्विजदेवपोषणैकतानमानसे राजनि, तस्मिन् निपुणं किमपि प्रतिविधानमनुसन्धेयम् । अतः प्रागेवातर्कयं किञ्चिदत्याहितहेतुस्तदीयान्तर्मुखतेति ।

कुष्ठेष्वेकः—स्वामिन्, प्रागस्माभिः प्रेषितः शत्रुशिबिरं प्रविष्टः कर्णमूलोऽद्यापि नागतः; किं तैर्गृहीतः स्यात् ।

सर्वेषामपि स्वसैनिकानां वाचोयुक्तीर्विविधाः समाकर्ण्य तदनन्तरं स्वाशयं संक्षिप्याविष्करोति पाण्डुः अस्मदित्यादिना । संख्यया सामर्थ्येन च समधिकैः स्वसैनिकैः उपरुद्धे-समाक्रान्ते । पुरे-शरीराख्ये पत्तने । पिपीलिकापि न प्रसरीसरीति-सूक्ष्मकीटप्रवेशार्होऽप्यवकाशस्तत्र न स्यात् इत्यर्थः । प्रसरीसरीति इति यङ्लुगन्तः प्रयोगः । परंतु-तथापि । सर्वैः-युष्माभिरशेषैरपि । इदमाकर्णनीयं-वक्ष्यमाणं विषयतत्त्वं श्रोतव्यम् । केवलं युष्मद्बलमेव संप्रति भवद्भिः प्रकटितम्; प्रत्यर्थिनां शक्तिः कीदृशीति किञ्चिदपि न विचारितमेकेनापि अस्मदीयेन, यामेवाहं संप्रति चिन्तयन्नस्मीति तद्विषयमेव स्पष्टमाचष्टे । मन्त्रिणि शास्त्रानुसारिणि सति; न तु यथेच्छावर्तिनि । राजनि तदनुरक्ते सति-राजतन्त्रप्रवीणस्य मन्त्रिणो वचसि विहितविस्रम्भे सति च; समाहितप्रीतौ राजनीति यावत् । अनुसन्धेयं-आलोचनीयम् । अतः-अस्मात् कारणात् । तस्य-जीवस्य । अन्तर्मुखता । अत्याहितस्य-महत्या आपदः, हेतुः । इति अतर्कयं-समालोचितवानस्मि । (पिपीलिकापि न प्रसरीसरीति, कुतः पुनरियं तस्य पलायनशङ्का । परं तु सर्वैरिदमाकर्णनीयम् । नीतिशास्त्रानुसारिणि मन्त्रिणि इति पाठान्तरम् ।) **स्वामिन्निति** । प्राक्-पाण्डुसविधं प्रति स्वेषामागमनात् प्रागेवेत्यर्थः । शत्रुशिबिरं-वैरिणः कटकम् । प्रविष्टः-प्रत्यर्थिजनप्रयत्नादिकमपसर्पितुं अन्तर्गतः । (अत्र स्वामिन् इति स्थाने स्वगतम्

(ततः प्रविशति अध्वश्रान्तः कर्णमूलः ।)

कर्णमूलः—(दृष्ट्वा) एतत् खलु—

तत्तत्कार्यनिवेदनार्थमिलितान्योन्यानभिज्ञस्पश-
प्राप्तव्यावसरप्रतीक्षणकृतद्वाःपार्श्ववेद्यासिकम् ।
अन्तर्मन्दिरनिस्सरज्जनवचोविज्ञाप्यमानप्रभु-
व्यापारश्रवणेप्सुबाह्यमनुजं पश्यामि पाण्डोर्गृहम् ॥ २४ ॥

इति पाठान्तरम् ।) कर्णमूलः-कर्णस्याधस्तात् तालुन ऊर्ध्वं जायमानः श्वयथुः । पुट्टालम्मै इति भाषायाम् । अतीव रहस्यविषयाणां निगूढवृत्त्या ज्ञातुं चारत्वेन शत्रुकटके संचरणीयत्वात् कर्णमूलस्तत्कार्योचित इति तत्र निर्दिष्टः ।

तदिति । एतत् खलु इति पूर्ववाक्यमत्रानुवर्तते । एतत्-पुरो दृश्यमानम् । पाण्डोः गृहं खलु पश्यामि । तदेव वर्णयति तदित्यादिना । तत्तत्कार्याणां-यस्य यस्य यानि यानि कार्याणि कर्तव्यत्वेन निर्दिष्टानि तेषां तेषां कार्यविषयाणाम्, निवेदनार्थं-विज्ञापनार्थम्, मिलिताः-एकत्र समागताः, तथा अन्योन्यानभिज्ञाः-परस्परमपरिचिताश्च ये स्पशाः-चारपुरुषाः, तैः प्राप्तव्यस्य-अधिगन्तव्यस्य, अवसरस्य-तत्तदर्थं परिकल्पितावकाशस्य, प्रतीक्षणाय-प्रतिपालनार्थम्, कृता-विहिता, द्वाःपार्श्ववेद्यासिका-गृहद्वारस्य पार्श्वयोर्निर्मितवेदिषूपवेशनं यस्य तत् । (प्रतीक्षककृत इति पाठस्तु न साधीयान् ।) स्वस्वकृतकार्यजातनिवेदनार्थं युवराज-दर्शनावसराकाङ्क्षिणो बहवश्चारपुरुषा यथाकालमन्तर्गन्तुकामा गृहस्य बहिर्वेदि-कायां निषण्णाः सन्तीति भावः । आसिकाशब्द उपवेशार्थः । "दुरीश्वरद्वार-बहिर्वितर्दिकादुरासिकायै रचितोऽयमञ्जलिः" इतिवत् । किञ्च । अन्तर्मन्दि-रात्-गृहस्यान्तःप्रदेशात्, निस्सरन्तः-बहिरागच्छन्तः, ये जनाः तेषां वचनैः-वार्ताभिः, विज्ञाप्यमानाः-निवेद्यमानाः, ये प्रभुव्यापाराः-राजकृत्यविशेषाः, तेषां श्रवणे, ईप्सवः-आसक्ताः, बाह्यमनुजाः-गृहस्य बहिः वीथीषु च विद्यमानाः

(द्वाःस्थं प्रति) गलगण्ड, कथय कर्णमूलं संप्राप्तं माम् ।

(गलगण्डः प्रविश्य निष्क्रम्य कर्णमूलं प्रवेशयति ।)

कर्णमूलः—(आत्मानं दृष्ट्वा स्वगतम्)

श्रमाम्भस्संसिक्तालिकलुलितपुण्ट्राङ्कवदनो
द्रवच्चर्मोपानद्दृढपिहितपार्श्वाञ्चलपदः ।
समुधन्निश्वासप्रसरपरिशुष्काधरपुटो
विलङ्घ्याहं दीर्घां सरणिमगमं पाण्डुसविधम् ॥ २९ ॥

प्रजाः यस्मिंस्तत् । द्वयोः प्रबलयो राज्ञोः परस्परस्पर्धया प्रत्यहं पारस्परिकेषु अभियोगोद्यमेषु सत्सु प्रचलत्सु, राजकृत्यसंबन्धिनो वार्ताविशेषान् राजगृहाभ्यन्तरात् तदा तदा निर्गच्छद्भ्यो जनेभ्यः सर्वेऽप्यवगन्तुं बाह्यजनाः स्युः समुत्सुका इति विदितमिदं सर्वेषाम् । पाण्डोर्गृहमेवं दृश्यमानमास्ते इति कर्णमूलः स्वयं तदवलोक्य वर्णितवान् ॥ २४ ॥

द्वाःस्थमिति । द्वाःस्थं प्रति-द्वारपालकमवलोक्येत्यर्थः । कर्णमूलं-तदाख्यं पुरुषाकारेणागतं रोगम् । मां संप्राप्तं कथय-कर्णमूलोऽहं समायात इति युवराजाय निवेदयेत्यर्थः । (निष्क्रम्य कर्णमूलेन सहान्तः प्रविशति इति पाठो न समुचितः, तस्य पुनर्बहिर्गमनस्य क्वचिदप्यसूचितत्वात् । अनन्तरं कासस्य प्रवेशावसरे गलगण्डस्य बहिरेव स्थितिश्च सूच्यते ।)

दूरदेशागमनश्रमजनितां स्वात्मनोऽवस्थामेव विवृणोति **श्रमाम्भ** इति । अहं-कर्णमूलः । कथम्भूतोऽहम् । श्रमाम्भसा-आयासजनितस्वेदसलिलेन, संसिक्ते-आप्लाविते, अलिके-ललाटे, लुलितः-प्रमृष्टः, पुण्ट्राङ्कः-पुण्ट्रूरूपलाञ्छनम्, वदने यस्य सः । तन्मुखे श्रमजनितेन स्वेदोदकेन ललाटाङ्कितः पुण्ट्रः परिमृष्ट इत्यर्थः । तथा द्रवन्त्यौ-स्वेदजलाप्लावनेन आर्द्रीभवन्त्यौ, चर्मोपानहौ-चर्मनिर्मितपादुके ताभ्याम्, दृढपिहितं-बलवत् संश्लिष्टम्, पार्श्वाञ्चलं-परिसरोपान्तभागः ययोस्तादृशे, पदे-चरणतले यस्य सः । समधिकस्वेदजलार्द्रीकृते चरणस्थोपानहौ

(पाण्डुं दृष्ट्वा) कुमार, विजयी भव ।

पाण्डुः—भद्र किम् । किञ्चिदुपलब्धं तत्र भवता प्रविष्टेन ।

कर्णमूलः—किं सफलो न भविष्यति कुमारनियोगो विशेषोपलम्भेन ।

पाण्डुः—कथय कथय ।

कर्णमूलः—श्रूयताम् । उपरुद्धमस्मत्सैनिकैः पुरम् ।

पाण्डुः—किमेतत्परिज्ञानाय प्रषितोऽसि । विदितं खल्विदं सर्वेषाम् ।

सुदृढं पादतलयोरग्रभागैः सह नीरन्ध्रं संश्लिष्टे इति भावः । (पार्श्वाञ्चलपटः इति पाठे तु—द्रवच्चर्मोपानद्वयां दृढपिहिते-बलवदानद्धे, पार्श्वाञ्चले-पर्यन्तभागौ यस्य सः, तादृशः पटः-परिधानवस्त्रं यस्य स इत्यर्थः ।) किञ्च समुद्यतां-बलवता वेगेनोद्गच्छताम्, निश्वासानां-श्वासपवनानाम्, प्रसरेण-व्याप्त्या ; निरन्तरस्पर्शेनेत्यर्थः, परिशुष्कं-सुतरामनार्द्रीकृतम्, अधरपुटं-अधरयुग्मं यस्य सः । एवंभूतस्सन् । दीर्घां-दवीयसीम् । सरणिं मार्गम् । विलङ्घय । पाण्डुसविधम् । अगमं-आगतोऽस्मि । अतिदूरयात्रां परिक्रमणेन परिसमाप्य सुमहता परिश्रमेण युवराजान्तिकमागतोऽस्मीति भावः ॥ २९ ॥

भद्रेति । सेवकादस्मात् प्रयोजनापेक्षितया भद्र इति वाल्लभ्यसूचकं संबोधनम् । किं-को विशेषः । तत्र-शत्रुपुरे । प्रविष्टेन भवता । किञ्चिदुपलब्धं—यत् किञ्चित् परिपन्थिनां सम्बन्धि रहस्यं किमवगतम् । कुमारनियोगः—युवराजनिर्दिष्टः कार्यविशेषः । विशेषोपलम्भेन-असाधारणानां वृत्तान्तानामधिगमेन । किं सफलो न भविष्यति-भृत्यजनः कुमारस्य नियोगं अशून्यमेव करिष्यतीत्यर्थः । कथय कथयेत्यम्रेडितवचनं विपक्षवृत्तान्तविशेषश्रवणे समुत्पन्नमौत्सुक्याधिक्यं सूचयति । उपरुद्धं समन्ततश्चाक्रान्तम् । कर्णमूलेन निवेदितस्य विदितपूर्वस्य सर्वसामान्यस्य विषयस्याकर्णनानन्तरमेव भग्नोत्साहः पाण्डुः सनिर्वेदं सावज्ञं च पृच्छति कर्णमूलम्, किमेतत्परिज्ञानायेत्यादिना ।

उचथ्यः । पर्यषे परिक्षर कलशमभि । युक्षं दीप्तम् । सनद्रयिं दीयमानं धनम् । वाजं बलम् । भरत् बिभ्रत् । नः अस्मदर्थम् । अन्वसा रसेन । स्वानः सुतः । पवित्रे आ आसिक्तः त्वम् ॥ (१०)

इति षष्ठे प्रथमा दशती ।

अचिक्रदद्वृषा हरिर्महान् मित्रो न दर्शतः । सं सूर्येण दिद्युते ॥

विनियोगोऽस्य षष्ठेऽहनि । अचिक्रदत् शब्दं कृतवान् । वृषा सेक्ता । हरिः हरितवर्णः महान् । मित्रो न मित्र इव । दर्शतः द्रष्टा । सं सूर्येण दिद्युते दीप्यते ॥

मेधातिथिः । अचिक्रदत् क्रन्दति शब्दायते पवमानः । वृषा वर्षकः । हरिः हरितवर्णः महान् । मित्रो न मित्र इव । दर्शतः दर्शनीयः । सं सह । दिद्युते द्योतते सूर्येण ॥ (१)

आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् ॥

विनियोगोऽस्य सप्तमेऽहनि । ते दक्षं शीघ्रम् । मयोभुवं सुखभवम् । वह्निं वोढारम् । अद्य आवृणीमहे । पान्तं पालयन्तम् । पुरुस्पृहं बहुभिः स्पृहणीयम् ॥

भृगुः । आवृणीमहे प्रार्थयामहे । ते त्वदीयं रसम् । दक्षं समर्थयितारम् । मयोभुवं सुखस्य भावयितारम् । वह्निं वोढारं विश्वस्य । पान्तं पातव्यम् । आ

आवृणीमहे । पुरुस्पृहं बहुभिः स्पृहणीयम् । अद्य अस्मिन् अहनि आ आवृणीमहे ॥ (२)

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आनय । पुनाहीन्द्राय पातवे ॥

विनियोगोऽस्याष्टमेऽहनि । अध्वर्यो अद्रिभिः सुतं ग्रावभिरभिषुतं सोमम् । पवित्रे अविमये आनय । पुनीहि पूतं कुरु । इन्द्राय पातवे इन्द्रस्य पानार्थम् ॥

उचथ्यः । हे अध्वर्यो अद्रिभिः ग्रावभिः । सुतं अभिषुतं सोमम् । पवित्रे आनय आधेहि । पुनाहि पुनीहि । इन्द्राय इन्द्रार्थम् । पातवे पानार्थं इन्द्रस्य ॥ (३)

तरत् स मन्दी धावति धारा सुतस्यान्धसः । तरत् स मन्दी धावति ॥

विनियोगोऽस्य षष्ठेऽहनि । चतुर्ऋचो भवति प्रतिष्ठायै । प्रतिष्ठायै यजमानाय । ध्वस्रे वै पुरुषं तीतरन्त । ध्वस्रावेभ्यः स्त्रियः पुरुषन्त्यो बहुसम्भजन्त्यो बहुपुरुषं तीतरन्त । पुरुमीढाभ्यां ऋषिभ्यां वैददश्विभ्यां सहस्राणि अदित्सतां दातुमिच्छताम् । तौ तरन्तौ पुरुमीढौ ईक्षेतां मनसा ग्राह्यमग्राह्य कथं केन प्रकारेण नौ आवामिदं आत्तमप्रतिगृहीतं स्यादिति । तौ प्रत्येताम् । चतुर्ऋचः प्रत्यर्थं ध्वस्रयोः पुरुषन्त्योः रमन्त्योः आदद्महे सहस्राणि आत्तवन्तौ तरत् । तरत् प्रतिग्रहदोषः सः मन्दी सोमः । धावति शोधयति । ततौं वैकृतयोः आत्तं गृहीतमप्रतिगृहीतं भवति । अन्यत्रापि आत्तमस्य अप्रतिगृहीतं भवति । गृहीतमपि यः एवं विजानाति विनाशं सोऽनुभवति । तरन्त पुरुमीढौ उभयस्य अन्नाद्यस्यावरुद्धयै । मानुष्यस्य च दैवस्य च । मानुष्यस्य च अन्नस्य दैवस्य च अवने धनार्थम् । तथा च गौतमः

अप्रतिग्राह्यं प्रतिजिघ्रक्षत् प्रतिगृह्य वा चतुऋचं तरत्समन्दीत्यप्सु जपेत् । तरत् सः मन्दी सोमः । धावति गच्छति वा शोधयति वा पापम् । न केवलं सोमः । धारा अपि । सुतस्य अन्धसः अन्नस्य सोमलक्षणस्य । तरत् तरति । स पापं यस्य मन्दी धावति शोधयति । उस्रा माध्यमिका वाक् धारा वा । वेद विजानाति । वसूनां मर्त्यस्य देवी अवसः । एवंगुणविशिष्टा धारा । ध्वस्रयोरिति व्याख्याता । आ ययोः पुरुषन्त्योः । त्रिंशतं त्रिंशच्छतानि धनानां सहस्राणि च । आदद्महे । तरत् स मन्दी धावति ॥

अवत्सारः । तरत् अतरत् प्राप्नुवन् लोकान् त्रीन् । उक्तं हि पूर्वमस्माभिः—पवित्रं द्युलोको मध्यं अन्तरिक्षं कलशः पृथिवीति । अथवा तरत् तारयत् पापात् । स सोमः । मन्दी मदकरः । धावति पवते । कथं सोमः पवते । धारारूपेण इत्याह । धारा पवते सुतस्य अन्धसः अन्नभूतस्य सोमस्य । तरत् स इति पुनरुक्तिरादरार्था ॥ (४)

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् । अस्मे श्रवांसि धारया ॥

आ पवस्व सहस्रिणं रयिं धनम् । सुवीर्यं हे सोम । अस्मे अस्मासु । श्रवांसि अन्नानि यशांसि वा धारया ॥

निध्रुविः । आ अभि उद्दिश्य पवस्व । सहस्रिणं सहस्रसंख्याकम् । रयिं धनं हे सोम । सुवीर्यं शोभनवीर्ययुक्तम् । अस्मे अस्मासु । श्रवांसि अन्नानि धारया ॥ (५)

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् ॥

अनु प्रत्नासः पुरातनाः । आयवः मनुष्याः वसिष्ठादयः । पदं पद्यते उत्पाद्यते संसाख्यम् । नवीयो नवतरं अस्मिन् कल्पे । अक्रमुः क्रमितवन्तः । रुचे दीप्त्यर्थम् । जनन्त जनयन्ति सूर्यम् ॥

असितः । प्रत्नासः पुराणाः । आयवः गन्तारः सोमाः । अनु आनुपूर्वम् । नवीयः नवतरं पदम् । अक्रमुः आक्रामन्ति निदधति कलशे च । रुचे दीप्त्यै । जनन्त जनयन्ति सूर्यम् ॥ (६)

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् । सीदन् योनौ वनेष्वा ॥

विनियोगोऽस्य पञ्चमेऽहनि । अर्ष क्षर सोम द्युमत्तमः । अभि द्रोणानि कलशादीनि अभियास्यसि । रोरुवत् शब्दं कुर्वन् । सीदन् योनौ स्थाने । वनेषु आ उदकेषु अधि ॥

भृगुः । द्रोणानि द्रोणकलशं अभि । अर्ष क्षर । हे सोम द्युमत्तमः दीप्तितमः त्वम् । रोरुवत् शब्दायमानः । आसीदन् योनौ स्थाने कलशे । वनेषु वृक्षेषु ॥ (७)

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दध्रिषे ॥

वृषा सेक्ता । सोम । द्युमान् द्युतिमान् । असि भवसि । वृषा सेक्ता देव वृषव्रतः सेक्तृकर्मन् । वृषा सेक्ता । धर्माणि धारणानि । दध्रिषे धारयसि ॥

काश्यपः द्वयोः । वृषा असि त्वं हे सोम । द्युमान् दीप्तिमान् । वृषासि हे देव । वृषव्रतः वृषकर्मा । वृषा त्वं धर्माणि धारकाणि कर्माणि । दध्रिषे विदधिषे विधत्से ॥ (८)

इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥

विनियोगोऽस्य तृतीयेऽहनि । इषे अन्नार्थम् । पवस्व धारया मृज्यमानः शोध्यमानः । मनीषिभिः मनसा एषणशीलैः । इन्दो रुचा दीप्त्या । अभि गा आ इहि आगच्छ ॥

इषे अन्नार्थम् । अस्मभ्यं पवस्व धारया । मृज्यमानः पीड्यमानः । मनीषिभिः ऋत्विग्भिः । हे इन्दो रुचा रोचमानया धारया । अभीहि अभिगच्छ । गाः गोचर्माणि ॥ (९)

मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्या वारेभिरस्मयुः ॥

मन्द्रया मदनीयया । सोम धारया । वृषा सेक्ता । पवस्व देवयुः देवान् कामयते । अव्या वारेभिः अव्यैः वालैः पवस्व । अस्मयुः अस्मानपि कामयते ॥

असितः । मन्द्रया मादयित्र्या धारया । पवस्व हे सोम वृषा त्वम् । देवयुः देवकामः । अव्या मेष्या । वारेभिः वारैः दशापवित्रगतैः । अस्मयुः अस्मत्कामश्च सन् ॥ (१०)

अया सोम सुकृत्यया महान्त्सन्नभ्यवर्धथाः । मन्दान इद्वृषायसे ॥

अया अनया । सोम सुकृत्यया शोभना कृतिः करणम् । तया । महान् सन् अभ्यवर्धथाः । मन्दान इत् एव वृषायसे सेक्तायसे ॥

कविः भार्गवः । अया अनया । सुकृत्यया शोभनेन कर्मणा अभिषवणादिना होमान्तेन । हे सोम महान् सन् महतो देवान् । अभ्यवर्धथाः अभिवर्तसे । मन्दानः मादयन् देवान् । वृषायसे वृषवदाचरसि । वर्षसीत्यर्थः । इत एव ॥ (११)

अयं विचर्षणिर्हितः पवमानः स चेतति । हिन्वान आप्यं बृहत् ॥

अयं सोमः । विचर्षणिः सर्वं पश्यति । हितः निहितः । पवमानः पूयमानः । स चेतति जानाति सम्यक् नयति वा । हिन्वानः गमयन् । आप्यं अप्सु भवम् । बृहत् महत् ॥

जमदग्निः । अयं स पवमानः । विचर्षणिः विद्रष्टा । हितः प्रहितः ऋत्विग्भिः । चेतति ज्ञायते । हिन्वानः प्रेरयन् । आप्यं आप्तव्यम् । बृहत् ब्रह्मान्नं वा ॥ (१२)

प्र न इन्दो महे तुन ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥

प्र न इन्दो महे महते । तुने ऊर्मिं न बिभ्रत् धारयत् । अर्षसि क्षरसि । अभि देवान् देवान् लक्षयित्वा । अयास्यः ऋषिराह ॥

अयास्य आङ्गिरसः । प्रार्षसि हे इन्दो । नः अस्माकम् । महे महते । तुने धनाय । तने इति बह्वृचाः । तना इति च धननामसु पठितम् । ऊर्मिं रसं बिभ्रत् । नेति संप्रत्यर्थं । देवानभि तान् प्रीणयितुम् । अयास्यः गमनशील इति वा गन्तव्य उपगन्तव्यः इति वा ॥ (१३)

अपघ्नन् पवते मृधोऽप सोमो अराव्णः । गच्छन्निन्द्रस्य निष्कृतम् ॥

विनियोगोस्याष्टमेऽहनि । अपघ्नन् मृधः सङ्ग्रामं पाप्मनो वा । सोमः अराव्णः अभिशस्तारः । तान् सोम अपजहि । गच्छन् इन्द्रस्य निष्कृतं सम्यक् संस्कृतं स्थानम् । समवायन् पूतमेवैनं यज्ञीय इन्द्रस्य निःकृतं गमयति ॥

अमहीयुः । मृधः हिंसकान् शत्रून् । अपघ्नन् पवते सोमः । अपघ्नन् अराव्णः अदातॄंश्च पवते । गच्छन्निन्द्रस्य निष्कृतं संस्कृतं द्रोणकलशम् ॥ (१४)

इति षष्ठे द्वितीया दशती ।

इत उत्तरं बृहत्यः ।

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥

विनियोगोऽस्य ज्योतिष्टोमे । पुनानः सोम धारया अपः वसानः उदकानि आच्छादयमानः । अर्षसि क्षरसि । रत्नधाः रत्नं धारयन् । योनौ स्थाने । ऋतस्य यज्ञस्य । आसीदसि । उत्सः कूपः । देवः हिरण्ययः अमृतमयः ॥

पुनानः सोमेति या द्वादशर्चः सप्तर्षयो बृहतीस्ता अपश्यन् ।
भरद्वाजः काश्यपो गौतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठः ॥

पुनानः पूयमानः त्वं हे सोम । धारया अर्षसि क्षरसि । अपः वसतीवरीः । वसानः आच्छादयन् । आसीदसि ऋतस्य यज्ञस्य । योनिं कलशम् । रत्नधाः रत्नप्रदः । उत्सः उत्सारयिता रसस्य । देवो दीप्तः । हिरण्ययः हितरमणीयः ॥ (१)

परितो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥

विनियोगोऽस्य नवमेऽहनि । हे स्तोतारः परिषिञ्चत सुतम् । सोमः यः उत्तमं हविः दधन्वान् दधाति । योऽसौ दधन्वान् । यः नर्यः नृभ्यो हितः । अप्सु अन्तः मध्ये । आसुषाव सोमम् । अद्रिभिः ग्रावभिः ॥

परिषिञ्चत इतः इह पवित्रे । सुतं सोमम् । सोमो य उत्तमं हविः उत्तमं उत्कृष्टतमं हविः भवति । दधन्वान् धारयिता विश्वस्य । नर्यो नरेभ्यः यजमानेभ्यः हितः । अप्सु वसतीवरीषु । अन्तः मध्ये । आ आविष्टः । यः सुषाव सोमं अद्रिभिः ग्रावभिः अध्वर्युभिः ॥ (२)

आ सोम स्वानो अद्रिभिः तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥

विनियोगोऽस्य तृतीयेऽहनि । स्वानः आभिमुख्येन अभिषूयमाणः सोमः । तिरः अधः । वाराणि अव्यया अविमयानि वालानि । जनो न । नशब्द उपमार्थीयः । परि उपरि । चम्वोः अधिषवणफलकयोः आनडुहचर्मणोः । विशत् प्रविशत् । हरिः हरितवर्णः । सदः यज्ञसदः । वनेषु उदकेषु । दध्रिषे ददाति ॥

अत्र तृतीयः पादः परोक्षकृतः । इतरत् प्रत्यक्षकृतम् । आपवसे त्वं हे सोम । स्वानः सुतः अद्रिभिः । तिरः तिरस्कुर्वन् । वाराणि अव्यया अव्ययानि अविमयानि । जनो न जन इव । पुरि नगर्याम् । चम्वोः अधिषवणफलकयोः । तदुपरि स्थिते कलशे । विशत् विशति । हरिः सोमः । हे सोम सदः स्थानम् । वनेषु वार्क्षेषु । दध्रिषे विधत्से त्वम् ॥ (३)

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥

विनियोगोऽस्य प्रथमेऽहनि । देववीतये देवतर्पणाय । सिन्धुर्न । न-शब्द उपमार्थीयः । सिन्धुरिव । प्रपिप्ये प्रवर्धते पूर्यते वा । अर्णसा उदकेन । अंशोः पयसा रसेन । मदिरो मदनीयः । न सम्प्रति । जागृविः जागरणशीलः अप्रमत्तः । अच्छ आसुम् । कोशं द्रोणकलशम् । मधुश्चुतं मधुस्राविणं रसतां गतम् ॥

प्रपिप्ये प्रप्याय्यसे हे सोम । अंशोः अंशेन सुखकरस्य तव । पयसा रसेन । देववीतये यज्ञार्थम् । सिन्धुर्न सिन्धुरिव । अर्णसा उदकेन । मदिरः त्वम् । न सम्प्रति । जागृविः प्रबुद्धः । अच्छ अभिगच्छसि । कोशं स्थानं द्रोणकलशम् । मधुश्चुतं मदस्य क्षरणम् ॥ (४)

सोम उ ष्वाणः सोतृभिरधिष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥

विनियोगोऽस्य पञ्चमेऽहनि । स्वानः सूयमानः सोतृभिः । अधि उपरि । स्नुभिः अभिषोतृभिः । अवीनां वालानाम् । अश्वया इव अश्वया यथा गन्ता शीघ्रं गच्छति तद्वच्छीघ्रगामिन्या । हरिता हरितवर्णया । धारया मन्द्रया बहुलया । याति धारया ॥

सोमः स्वानः सुतः । सोतृभिः अध्वर्युभिः । उ अधि इतीमौ पादपूरणौ । अवीनां सम्बन्धिभिः । स्नुभिः सानुभिः उच्छ्रितप्रदेशैः पवित्रैः । पूयमान इति शेषः । अश्वयेव वेगवत्या इव । हरिता हरितवर्णया । धारया याति मन्द्रया मादयित्र्या । याति धारया इति पुनरुक्तिरादरार्था ॥ (९)

तवाहं सोम रारण सख्य इन्दो दिवे दिवे ।
पुरूणि बभ्रो निचरन्ति मामव परिधीँ रति ताँ इहि ॥

विनियोगोऽस्य चतुर्थेऽहनि । सोम रारण रमयामि । अथवा रणतिः स्तुतिकर्मा । तव स्तुतिं करोमि । सख्ये सखित्वे । हे इन्दो दिवे दिवे अहन्यहनि । पुरूणि बहूनि । बभ्रो बभ्रुवर्ण । निचरन्ति अभिचरन्ति दुष्कृतानि बहूनि । अथवा बहूनि यजमानकुले निचरन्ति । मामव पालय तेभ्यः परिधीन् अति । तान् इहि ये अन्ये यजमानाः परिचरन्ति तेभ्यः परिधींस्तरणं अतीत्य आ इहि मदीयं यज्ञमायाहि । अथवा दुष्कृतानि ये कुर्वन्ति अतीत्यैतेषां परिधीनायाहि ॥

तव सख्ये अहं रारण रमये । हे इन्दो दिवे दिवे प्रतिदिनं अहर्गणेषु । पुरूणि बहूनि रक्षांसि । मां अवनिचरन्ति हे बभ्रो भर्तः विश्वस्य । तान् परिधीन् परितो निहितान् । अति अतिक्रम्य । इहि आगच्छ । परिधिशब्दस्य पुंलिङ्गत्वात् तानिति पुंलिङ्गता ॥ (६)

मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥

विनियोगोऽस्य षष्ठेऽहनि । मृज्यमानः शोध्यमानः । सुहस्त्य सुहस्त शोभनहस्त । समुद्रे अन्तरिक्षे । वाचमिन्वसि व्याप्नोषि । अथवा समुद्रे द्रोणकलशे । रयिं धनम् । पिशङ्गं पिशङ्गवर्णं सुवर्णम् । बहुलं प्रभूतम् । पुरुस्पृहं बहुभिः स्पृहणीयम् । पवमान शोध्यमान । अभि अर्षसि क्षरसि ॥

मृज्यमानः पूयमानः त्वम् । हे सुहस्त्य शोभनहस्तानां योग्य । समुद्रे अन्तरिक्षे पवित्रादधोभागे । वाचं शब्दम् । इन्वसि प्रेरयसि । स त्वं अस्मभ्यं रयिं धनम् । पिशङ्गं नानारूपं हिरण्यरजतादिभिः । बहुलं प्रभूतम् । पुरुस्पृहं बहुभिः स्पृहणीयम् । अभि उद्दिश्य । अर्षसि क्षर हे पवमान ॥ (७)

अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥

विनियोगोऽस्य तृतीयेऽहनि । सोमासः आयवः मनुष्याः । अभि पवन्ते मद्यं मदनीयं मदम् । समुद्रस्य अन्तरिक्षस्य । अथवा समुद्रस्य द्रोणकलशस्य । अधि उपरि विष्टपे स्थाने । मनीषिणः मत्सरासः मदच्युतः मदस्राविणः ॥

सोमासः सोमाः । आयवः गमनशीलाः । अभिपवन्ते अभिक्षरन्ति । मद्यं स्तुत्यम् । मदमभि देवानां मदार्थं इत्यर्थः । समुद्रस्य अन्तरिक्षस्य । अधि विष्टपे उच्छ्रिते देशे । सिक्ताः इति शेषः । मनीषिणः मनस ईशितारः । मत्सरासः मदकराः । मदच्युतः शत्रूणां मदस्य च्यावयितारः ॥ (८)

पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥

पुनानः सोमः जागृविः जागरणं कुरु । अव्या अवेः वारैः । परि सर्वतः । प्रियः प्रियतरः भूतानाम् । त्वं विप्रः मेधावी । अभवः भवसि । अङ्गिरस्तम । मध्वा मधुना रसेन यज्ञमस्मदीयम् । मिमिक्ष सिञ्च नः । अथवा मिश्रं कुरु ॥

पुनानः त्वं हे सोम जागृविः प्रबुद्धः । अव्याः मेष्याः वारैः । पवित्रे परि परिषिच्यसे । प्रियः देवानाम् । त्वं विप्रः प्राज्ञः । अभवः भवसि । हे अङ्गिरस्तम गन्तृतम । अङ्गेः गतिकर्मणः अङ्गिराः । स त्वं मध्वा रसेन । यज्ञं नः अस्मदीयम् । मिमक्ष सिञ्च । अथवा यजमानं वृष्ट्युदकेन सिञ्च ॥ (९)

इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमीं सृजन्त्यायवः ॥

सुतः सोमः । मदः मदकरः । इन्द्राय मरुत्वते पवते । सहस्रधारः बहुधारः । अव्यं पवित्रम् । अति अतीत्य अर्षति । तं ईं एनम् । सृजन्ति पुनन्ति । आयवः मनुष्याः ॥ (१०)

पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्रः प्रथमे विधर्मन् देवेभ्यः सोम मत्सरः ॥

पवस्व वाजसातम अभि विश्वानि सर्वाणि । वार्या वरणीयानि उदकानि । त्वं समुद्रः समुद्रस्थानीयः । प्रथमे अग्र्ये । विधर्मन् विधर्मणि विविधकर्मधारणे । देवेभ्यः सोम मत्सरः । मदेस्तृप्तिकर्मणः । मदनीयः ॥

पवस्व वाजसातमः अन्नप्रदतमः । अभि उद्दिश्य । विश्वानि वार्या वरणीयानि धनानि । त्वं समुद्रः समुन्दनः वर्षिता । प्रथमे मुख्ये श्रेष्ठे । विधर्मन् विधारके यज्ञे । देवेभ्यः पवस्व हे सोम मत्सरः त्वम् ॥ (११)

पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥

पवमानाः असृक्षत क्षरन्ति पवित्रमतीत्य धारया । मरुत्वन्तः मरुद्भिः तद्वन्तः सोमाः । मत्सराः मदनीयाः । इन्द्रियाः इन्द्रियवन्तः । मेधां प्रज्ञाम् । अभि प्रयांसि गच्छ ॥

पवमानाः सोमाः । असृक्षत सृष्टाः उद्युक्ता गच्छन्ति । धारया पवित्रं अति अतीत्य । मरुत्वन्तः स्तोतृमन्तः । महत् रुवन्तीति मरुतः स्तोतारः ।

मत्सराः इन्द्रियाः इन्द्रियस्य हेतवः । हयाः गन्तारः । हि गतौ । मेधां प्रज्ञाम् । प्रयांसि अन्नानि च । अभि उभयं यजमानेभ्यः कर्तुम् ॥ (१२)

इति षष्ठे तृतीया दशती ।

इत उत्तरं त्रिष्टुभः ।

प्र तु द्रव परि कोशं निषीदन् नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्हीं रशनाभिर्नयन्ति ॥

विनियोगोऽस्य ज्योतिष्टोमे । प्रद्रव रसेन । परि सर्वतः । कोशं द्रोणकलशं निषीदन् । नृभिः मनुष्यैः । पुनानः पूयमानः । अभ्यर्ष क्षर । वाजं अन्नं तव । अश्वं न त्वा अश्वमिव त्वाम् । वाजिनमन्नवन्तम् । मर्जयन्तः शोधयन्तः । अच्छ आसुम् । बर्हिः प्रवृद्धम् । रशनाभिः नयन्ति प्रापयन्ति । यूपनियोजनी रशना ॥

त्रिष्टुभो विंशतिर्द्वे च प्र तु द्रव परीत्यृचः ।
ऋषींस्तु विप्रकीर्णत्वात् तत्र तत्राभिदध्महे ॥

उशनाः । प्र तु द्रव प्रक्षरतु क्षिप्रम् । कोशं कलशम् । परि उपरि निषीद । नृभिः अध्वर्युभिः । पुनानः पूयमानः । वाजं अन्नम् । अभि उद्दिश्य । यजमानस्य अर्ष गच्छ । अश्वं न अश्वमिव । वाजिनं वेगवन्तम् । त्वा त्वाम् । मर्जयन्तः शोधयन्तः । बर्हिः यज्ञम् । अच्छ अभि नयन्ति नराः । रशनाभिः अङ्गुलीभिः ॥ (१)

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥

विनियोगोऽस्य सप्तमेऽहनि । काव्यं उशना इव प्रब्रुवाणः । देवः सोमः देवानां जनिमा जनिमानि जननानि कर्माणि वा विवक्ति । महिव्रतः महतः कर्मणः अन्नस्य वा धारयिता । शुचिबन्धुः शोभनबन्धुः शुद्धबुन्धुर्वा । पावकः शोधयिता । पदा वराहः सोमः । अभ्येति रेभन् स्तुवन् ॥

वृषगणः वासिष्ठः । प्रविवक्ति प्ररौति । देवः सोमः । देवानां जनिमा जन्मानि । शेश्छन्दसि (पा. ६. १. ७०) इति लुक् । जनान् समूहान् अभि । काव्यं स्तोत्रं ब्रुवाणः ऋषिः । उशनेव महिव्रतः महाकर्मा । शुचिबन्धुः दीप्तस्तोत्रकः । पावकः सोमः । पदा पदं स्थानं कलशम् । अभ्येति रेभन् शब्दायमानः । वराहः वराणां धनानां आगमयिता सोमः ॥ (२)

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥

विनियोगोऽस्य तृतीयेऽहनि । तिस्रो वाचः ऋग्यजुःसामानि । ईरयति प्रेरयति । वह्निः वोढा सोमः । ऋतस्य धीतिं कर्म । ब्रह्मणो मनीषां मन्त्राणि वेदोक्तानि प्रेरयन्ति । गावः यन्ति गोपतिं यजमानम् । दक्षिणासम्बन्धेन पृच्छमाना इव वृषभं वा । सोमं यन्ति मतयः बुद्धयः । वावशानाः कामयमानाः । यद्यपि पावमानीषु सोमं मुक्त्वा अन्या देवता न संभवति तथाप्यष्टादशे व्याख्यातेति कृत्वा तेनापि आत्मनानुस्मरणार्थमालिख्यते । तिस्रो वाचः । ऋग्यजुःसामानि । अथवा तिस्रो वाचः सत्वरजस्तमांसि । अथवा जाग्रत्स्वप्नसुषुप्तिवृत्तयः । ईरयति प्रेरयति । उदकं रश्मींश्च वहतीति वह्निरादित्यः । ऋतस्य आदित्यस्य धीतिम् । अथवा ऋतस्य सत्यब्रह्मणः । अथवा ऋतस्यान्नस्य धीतिं यज्ञस्य वा आदित्यस्य वा । हया इव

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते इति । ब्रह्मणो मनीषां गावः रश्मयः तेन विसृष्टाः । अथवा उदकानि । एतमेव गोपतिं रश्मिस्वामिनं वा । पृच्छन्त इव सोमं यन्ति । पृथिवीं वावशानाः आदित्यं यन्ति प्रविशन्ति । अध्यात्मं वा । वह्निरात्मा भवति वश्यादिगुणसंयोगात् । सः तिस्रो वाचः प्रेरयति विद्याबुद्धिमनांसि । विद्या महान् । बुद्धिरहङ्कारो मन इति प्राधान्याद्भूतेन्द्रियाणि । ऋतस्यात्मनः । धीतिम् । मनसः इष्टानि कर्माणि प्रेरयन्ति । ब्रह्मणः आत्मनः । गावः यन्ति आत्मानं इन्द्रियाणां स्वामिनं पृच्छमानाः आत्मानम् । तदभिप्रायेण शब्दाद्यनुगमनात् । एतमेवमात्मानं सोमं कामयमाना इव यन्ति मतयः तदर्थं प्रादुर्भवन्ति ॥

पराशरः । तिस्रः त्रिविधाः मन्द्रमध्यमोत्तमाः । वाचः प्रेरयन्ति । वह्निः वोढा यज्ञस्य । ऋतस्य यज्ञस्य । धीतिं विधानं अनुष्ठानं च प्रेरयन्ति । सोमे अभिषुते कर्माणि प्रवर्त्यन्ते । ब्रह्मणः ब्राह्मणानाम् । मनीषां स्तुतिं च प्रेरयन्ति । सामान्यवाची ब्रह्मशब्दः नपुंसकलिङ्गः । गावः यन्ति अभिगच्छन्ति । गोपतिं सोमम् । पृच्छमानाः अन्विच्छन्त्यः । सोमं यन्ति मतयः स्तुतयः । वावशानाः कामयमानाः ॥ (३)

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमन्ति होता ॥

विनियोगोऽस्याभिप्लवे । प्रेषा प्रकर्षेच्छया । हेमना सुवर्णेन । पूयमानः देवः समपृक्त रसम् । देवेभ्यः सुतः अभिषुतः । पवित्रं पूतम् । पर्येति रेभन् आविशति । मितेव सद्म उदकानि । पशुमन्ति होता । अथवा अस्य सोमस्य । प्रेषा प्रकर्षेण इच्छया । हेम्ना सुवर्णेन । पूयमानः क्षाल्यमानः । देवः सोमः देवेभ्यो वस्वादिभ्यः । संपृच्यते निष्पाद-

यति रसम् । सुतः अभिषुतः दशापवित्रं परि समन्तात् । एति रेभन् सोमः । मिता इव सद्म । मिता कर्ता । सद्म आत्मीयानि गृहाणि । पशुमन्ति होता देवानामाह्वाता ॥

वसिष्ठः । अस्य आत्मनः । प्रेषा प्रेरयित्रा । हेमना गन्त्रा अध्वर्युणा । पूयमानः देवः सोमः देवेभिः देवैः । समपृक्त रसं योजयति रसं स्वम् । सुतश्च अयं पवित्रं परि वर्जयित्वा अतिक्रम्य । एति कलशम् । रेभन् रुवन् । मितेव मितानीव । सद्म सद्मानि यज्ञगृहान् । पशुमन्ति नियुक्तपशुकानि । होता यथा अध्रिगुः प्रेषादीन् वदति यज्ञगृहे स्थितः तद्वत् शब्दायते ॥ (४)

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥

विनियोगोऽस्य चतुर्थेऽहनि । सोमः पवते । अधियज्ञपक्षे पर्णसोमस्य पृथिव्यादीनां जनयितृत्वेन सम्भवात् यज्ञद्वारेण स्थितिहेतुत्वात् जनयतीति जनिता । मतीनां जनयिता । दिवः जनयिता । अग्नेर्जनयिता । सूर्यस्य जनयिता । इन्द्रस्य जनयिता । उत अपि च विष्णोर्व्यासिमत इति । जनयिता पृथिव्यादिभ्यः रसेन वर्धयिता । अधिदेवेन इन्द्रः सोमः यदात्मनि तदायमर्थः । सर्वमिदं भवति । आत्मा सोमः पवते साधयति । भोक्तृत्वादात्मा सत्कारणं वा प्रधानभूतेन्द्रियाणां जनिता पृथिव्यादीनां च । द्वयोर्ग्रहणेऽन्तरिक्षस्यापि । अग्न्यादीनां चतुःस्थानानां तिसृणां विष्णोश्च व्यासिमतः ॥

प्रतर्दनः । सोमः पवते । जनिता जनयिता वर्धयिता । मतीनां स्तोतृणाम् । जनिता दिवः द्युलोकस्य । जनिता पृथिव्याश्च । हवीरूपेण दिवः

वृष्टिरूपेण पृथिव्या इति । जनिता अग्नेः । जनिता सूर्यस्य । जनिता इन्द्रस्य । उत अपि च । विष्णोः जनिता । सोमेन हि देवा आप्याय्यन्ते ॥ (५)

अभि त्रिपृष्ठं वृषणं वयोधामङ्गोषिणमवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥

विनियोगोऽस्याभिप्लवे । त्रयाणां पृष्ठानि सवनानि लोकः देवा वेदा वा । वृषणं सेक्तारम् । वयोधां अन्नानां दातारं यशसां वा । अङ्गोषिणं मतिसमूहम् । अभिवावशन्त अभिकामयन्त । वाणीः वाचः । वना वसानः उदकानि आच्छादयमानः । वरुणः सोमः । न सिन्धुः समुद्र इव । वि रत्नधा विविधानां रत्नानां धाता दाता स्थापिता वा । दयते वार्याणि वरणीयानि धनानि ॥

वसिष्ठः । अभि अवावशन्त अभिकामयन्ते । त्रिपृष्ठं त्रिस्थानं सवनानि त्रीणि द्रोणकलशापूतभृदाहवनीयाख्यानि वा स्थानानि । वृषणं वर्षितारम् । वयोधां वयसः अन्नस्य दातारं सोमम् । अङ्गोषिणं आघोषिणम् । वाणीः वाण्यः स्तुतयः । वना वनानि उदकानि वसानः । वरुणो न वरुण इव । सिन्धुः स्यन्दनात् । स्यन्दयिता । विदयते प्रयच्छति । वार्याणि वरणीयानि । रत्नधाः रत्नप्रदः सोमः ॥ (६)

अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानौ अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥

विनियोगोऽस्य नवमेऽहनि । अक्रान् क्रान्तवान् समुद्रः । प्रथमे परमे उत्कृष्टे । विधर्मणि धारणे । जनयन् प्रजाः । प्रजायन्ते इति प्रजा देवाद्याः । भुवनस्य गोपाः भूतानां रक्षिता । वृषा सेक्ता । पवित्रे वालमये ।

अधि उपरि । सानौ समुच्छ्रिते । अव्ये अविमये । बृहत्सोमः वावृधे वर्धते । स्वानः अद्रिः आदरणः वज्रः । अक्रान् समुद्रः सामर्थ्यात् अत्यक्रमीत् । अतीत्य गच्छत्युदयादस्तं सदा समुद्रः आदित्यः । प्रथमे प्रकृष्टे व्योमन् सामर्थ्यादन्तरिक्षे । प्रजा जनयन् वर्षकर्मणा । भुवनस्य त्रैलोक्यस्य । गोपा रक्षिता । वृषा वर्षणशीलः । पवित्रे व्याप्तिमये । अधि सानौ अधिषिच्यमानः सोम्यैः । वावृधे वर्धते । बृहदिति सोमविशेषणम् । स्वानः सुतः । अद्रिरादित्यः आदरणः । अत्यक्रमीत् अधिष्ठितवान् । समुद्रः आत्मा । अभिद्रवन्ते तं भूतानि परमेभ्यः धने । भूतेन्द्रियमिश्रं शरीरे जनयन् । ज्ञानकर्मणा बोध्यमुत्पादयन् । प्रज्ञा वर्धयन् । भुवनस्य गोप्ता प्रकाशरूपत्वात् । वृषा पवित्रे सत्यमये । आत्मा वर्षिता भवति । शरीर-रूपेण पवित्रे ज्ञानमये । अवतेर्गत्यर्थस्य । गत्यर्थाश्च बुद्ध्यर्थाः । अधि सानौ सम्बध्यमानशब्दादिषु । महद्बावृधे सुष्ठु वर्धते । पवित्रे अद्रिः आदरणः ॥

पराशरः । अक्रान् क्रन्दति । समुद्रः समुन्दनः सोमः । प्रथमे श्रेष्ठे यज्ञे । विधर्मन् विधारके । जनयन् प्रजाः सर्वाः । भुवनस्य गोपाः रक्षकः । वृषा वर्षिता । सानौ उच्छ्रिते । अव्ये अविमये पवित्रे अधि परिषिक्तः सन् । बृहत् अत्यर्थम् । वावृधे सोमः । स्वानः सुतः । अद्रिः आदारयिता असुर-रक्षसाम् ॥ (७)

कनिक्रदन्ति हरिरा सृज्यमानः सीदन् वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयन्त स्वधाभिः ॥

कनिक्रदन्ति । क्रन्दिः शब्दे । एकवचनम् । शब्दं करोति । हरिः हरितवर्णः । सृज्यमानः संसूयमानः । आसीदन् वनस्य उदकस्य । जठरे

उदरे द्रोणकलशस्य । पुनानः पूयमानः । नृभिर्यतः मनुष्यैः संयमितः । कृणुते कारयति । निर्णिजं रूपम् । गां गवां रश्मीनां उदकानां वा । अतः मतिं प्रज्ञां जनयन्त स्वधाभिरन्नैस्तर्पित्वा ॥

प्रस्कण्वः । कनिक्रदन्ति भृशं शब्दायते । क्रन्दतेः चर्करीते रूपं इदम् । हरिः सोमः । सृज्यमानः पवित्रे आसीदन् । वनस्य वार्क्षस्य जठरे । पुनानः पूयमानः । नृभिः ऋत्विग्भिः । यतः गृहीतः । गां गव्यं आशिरम् । निर्णिजं रूपं कृणुते । अतः एतस्माद्धेतोः । मतिं स्तुतिं जनयन्त सोमाय हे जनाः । स्वधाभिः बलैः ॥ (८)

एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रदाः शतदा भूरिदावा शश्वत्तम बर्हिरा वाज्यस्थात् ॥

एष स्य ते तव । मधुमान् स्वादुमान् । इन्द्रः सोमः वृषा सेक्ता । वृष्णः सेक्तुस्तव । परि सर्वतः । पवित्रे अक्षाः क्षरितवान् । किंविशिष्टः । सहस्रदाः शतदा अनेकदाता । भूरिदावा बहु प्रभूतं ददाति । शश्वत्तम नित्य । बर्हिः वाजी अन्नवान् । आ अस्थात् स्थितवान् ॥

उशनाः । एष स्य सः । मधुमान् रसवान् सोमः । हे इन्द्र ते तुभ्यम् । वृष्णः वर्षित्रे । चतुर्थ्यर्थे षष्ठी । पवित्रे परि परितः । अक्षाः इति क्षरतेः लङर्थे लुङि रूपम् । क्षरति । वृषा सोमः । सहस्रदाः शतदाः । किं बहुना भूरिदावा प्रभूतप्रदः । शश्वत्तमं पुराणतमम् । बर्हिः यज्ञम् । आ जस्थात् अधितिष्ठति । वाजी बलवान् ॥ (९)

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानौ अव्ये ।
अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥

पवस्व सोम मधुमान् स्वादुमान्। ऋतावा सत्यवान्। अपः वसानः आच्छादयमानः। अधि सानौ समुच्छ्रिते। अव्ये अविमये। द्रोणानि द्रोणकलशादीनि। घृतवन्ति उदकवन्ति अवरोह। मदिन्तमः अतिशयेन मदनीयः। मत्सरः सोमः। इन्द्रपानः इन्द्रेण पातव्यः॥

प्रतर्दनः। पवस्व हे सोम मधुमान् मधुरः। ऋतवा यज्ञवान् यज्ञहेतुः। अपो वसानः अव्ये सानौ उपरि सक्तः। अवसीद द्रोणानि कलशं इत्यर्थः। घृतवन्ति दीप्तिमन्ति। मदिन्तमः मदयिता अतिशयेन। मत्सरः हर्षकरः। इन्द्रपानः इन्द्रेण पातव्यः॥ (१०)

इति षष्ठे चतुर्थी दशती।

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना।
भद्रान् कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते॥

प्र सेनानीः। सेनां नयति इति सेनानीः। शूरः विक्रान्तः। अग्रे रथानां ये देवरथाः। गव्यन् इच्छन् धनं पृथिव्यां भवम्। प्रैति प्रयाति। हर्षते अस्य सेना। भद्रान् भन्दनीयानि। कृण्वन् कुर्वन्। इन्द्रहवान् इन्द्राह्वानानि। सखिभ्यः ऋत्विग्भ्यः। एवंगुणविशिष्टः सोमः वस्त्राणि रभसानि पतन्ति। आदत्ते परसैन्येभ्यः। अथवा सेनानीः स्कन्दः। शूरः विक्रान्तः। अग्रे पुरतः देवरथानाम्। गव्यन् इच्छन् पृथिव्यां भवं धनम्। एति गृह्णाति ददाति सैन्येभ्यः। सोम इव रश्मीन् वस्त्राणि सैन्येभ्यो ददाति॥

प्रतर्दनः। प्रैति गच्छति। सेनानीः सेनानां नेता सन्। शूरः सोमः यजमानार्थं युध्यन्। अग्रे प्रमुखे रथानाम्। गव्यन् गा इच्छन् शत्रूणाम्।

हर्षते हृष्यति। अस्य सेना यां असौ नयति सा। सः सोमः यज्ञेषु भद्रान् कल्याणान्। इन्द्रहवान् इन्द्रस्य आह्वानानि। कृण्वन् कुर्वन्। सखिभ्यः यजमानेभ्यः। आहूतो हि इन्द्रः सोमं पीत्वा कामान् प्रयच्छति। आदत्ते सोमः वस्त्रा वस्त्रस्थानीयानि वयांसि। रभसानि वेगकराणि इन्द्रस्य ॥ (१)

प्र ते धारा मधुमतीरसृग्रन् वारं यत् पूतो अत्येष्यव्यम्।
पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः ॥

प्र ते धाराः। मधुमतीः रसवतीः असृग्रन्। अव्यं वालं क्षरसि। पवमान पूयमान। पवसे क्षरसे। धाम गोनां गवां रश्मीनामुदकानां वा। जनयन् उत्पादयन्। कम्। सूर्यम्। अपिन्वः अतर्पयः। अर्कैरन्नैर्मन्त्रैर्वा ॥

पराशरः। प्रासृग्रन् प्रसृज्यते। ते तव। धाराः मधुमतीः मधुराः। अव्यं अविमयम्। वारं पवित्रम्। यत् यदा। पूतः त्वं अत्येषि अतीत्य गच्छसि। हे पवमान त्वं पवसे। धाम। धीयते पीयते इति धाम पयः। गोनां गवां पयः अभिकामयमानः पवसे। जनयन् सूर्यं अपिन्वः पूरयसि। अर्कैः स्तोत्रैः ॥ (२)

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय।
स्वादुः पवतामतिवारमव्यमा सीदतु कलशं देव इन्दुः ॥

प्र गायत अभ्यर्चामः देवान् स्तोत्रैरन्नैश्च। सोमं हिनोत गमयत। महते धनाय। स्वादुः स्वादुमान्। पवतामतीत्य वारम्। अव्यं अविमयम्। आसीदतु कलशं द्रोणकलशम्। देवः इन्दुः सोमः ॥

इन्द्रप्रमितिः वासिष्ठः। प्रगायत सोमम्। अभ्यर्चाम अभिष्टुम वयं देवान्। पवमानो हि प्रथमं स्तूयते। पश्चात् अन्ये देवाः स्तूयन्ते। सोमं

हिनोत प्रेरयत पवित्रे। महते धनाय अस्माकम्। अयं च स्वादुः पवतां अति अतिक्रम्य। वारं अव्यं पवित्रम्। आसीदतु कलशम्। देवः दीप्तः इन्दुः ॥ (३)

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत्।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥

प्र हिन्वानः प्रीणानः गच्छन् वा। जनिता रोदस्योः द्यावा-पृथिव्योः। रथः न रथः इव। वाजं अन्नम्। सनिषन् सम्भजमानः। अयासीत् गतवान्। इन्द्रं गच्छन् आयुधा आयुधानि। संशिशानः तीक्ष्णानि कुर्वाणः। विश्वा विश्वानि। वसु वसूनि धनानि। हस्तयोः आदधानः ॥

वसिष्ठः। प्रायासीत् प्रयातः सोमः। हिन्वानः प्रेर्यमाणः। जनिता जनयिता रोदस्योः। रथो न रथ इव। वाजं युद्धम्। सनिषन् सेवमानः। इन्द्रं गच्छन् गमिष्यन्। आयुधा आयुधानि। संशिशानः संशितानि कुर्वन्। विश्वा विश्वानि। वसु वसूनि। हस्तयोः आदधानः दानार्थम् ॥ (४)

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य धर्म द्युक्षोरनीके।
आदीमायन् वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥

तक्षत् करोति। यदि मनसः चेतसः। वेनतः। वेनतेः कान्ति-कर्मणः। वाक् सखित्वम्। ज्येष्ठस्य प्रशस्तस्य। धर्म धर्मणः कर्मणः। द्युक्षोः अनीके मुखे। आत् ईं आ आयन् वरं वरणीयम्। वावशानाः कामय-मानाः। जुष्टं पतिं पत्नीव। कलशे द्रोणकलशे। गावः रश्मयः उदकानि वा। इन्दुं सोमम् ॥

मृडीकः वासिष्ठः । तक्षत् अतक्षत् संस्करोति । यदि यदा सोमम् । मनसः । मन्यतेः स्तुतिकर्मणः मनः । स्तोत्रस्य । वेनतः कामयमानस्य । वाक् स्तुतिः । ज्येष्ठस्य प्रशस्यस्य । धर्मं कर्मणि यज्ञे । द्युक्षोः दीप्तस्तुतिकस्य । टुक्षु शब्दे इत्यस्मात् क्षुः । अनीके प्रमुखे सवनस्य । यदा यज्ञेषु सवनमुखे स्तोतारः स्तुवन्ति सोममित्यर्थः । आत् अनन्तरम् । ईं एनं सोमम् । आ आयन् अभियन्ति । वरं वरणीयम् । वावशानाः कामयमानाः गावः । जुष्टं पर्याप्तं पतिम् । कलशे स्थितं इन्दुम् । आशीरागच्छतीति वा आशीर्दुहो गाव आगच्छन्तीति वा ॥ (९)

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥

विनियोगोऽस्याभिप्लवे । साकमुक्षः सह वहतोः द्वयोः । मर्जयन्तः स्वसारः भगिन्यः दश । धीरस्य धीतयः धीमत्यः अङ्गुलयः । धनुत्रीः । धनुः त्रायन्त्यः । हरिः हरितवर्णः । पर्यद्रवत् रसभावेन । जाः अपत्यं सूर्यस्य । द्रोणं द्रोणकलशम् । ननक्षे व्याप्नोति । अश्व इव वाजी वेगवान् । वेगवान् अश्वः यथा व्याप्नोति ग्रामं तद्वत् ॥

नोधाः । साकमुक्षः साकं सिञ्चन्त्यः । दश स्वसारः अङ्गुलयः । मर्जयन्त शोधयन्ति सोमम् । धीरस्य नोधसः । धीतयः विधात्र्यः कर्मणाम् । धनुत्रीः । धिनोतेर्धनुत्र्यः । प्रीणयित्र्यः । धन्वतेर्वा गतिकर्मणः । प्राप्नुवन्त्यः प्राप्तव्यानि । हरिः सोमः । पर्यद्रवत् परितो धावति पवित्रम् । जाः जनयिता सूर्यस्य । जन जनने इत्यस्मात् धातोर्विट्प्रत्यये विड्वनोः इत्यनुनासिकः स्यात् इति आकारः ।

जनिताग्नेर्जनिता सूर्यस्य (ऋ. वे. ९. ९६. ९)

इति च भवति । द्रोणं द्रोणकलशम् । ननक्षे व्याप्नोति । नक्ष व्याप्तौ । अत्यो न अश्व इव । वाजी वेगवान् ॥ (६)

अधि यदस्मिन् वाजिनीव शुभः स्पर्द्धन्ते धियः सूरे न विशः ।
अपो वृणानः पवते कवीयान् व्रजं न पशुवर्धनाय मन्म ॥

अधि यदस्मिन् वाजिनी अन्नवती इव यज्ञे । शुभः शोभनाः । धियः प्रज्ञाः कर्माणि वा । स्पर्धन्ते अन्योन्यातिशयेन । विशः न प्रजा इव स्पर्धन्ते मां प्रति उदेति । अपः वृणानः आच्छादयमानः । पवते कवीयान् कवितरः । व्रजं मार्गम् । पशुवर्धनाय पशुवृद्ध्यर्थम् । मन्म मन्त्रः ॥

कण्वः । अस्मिन् सोमे अधि । यत् यदा । स्पर्धन्ते धियः स्तुतयः अहमहमिकया अभिगच्छन्ति । वाजिनीव अश्वे इव । शुभोऽलङ्कारः । सूरे न सूर्य इव । विशो जनाः उपस्थाने । अयं च सोमः अपः वसतीवरीः । वृणानः आच्छादयन् । पवते कवीयान् कवीन् स्तोतॄन् कामयमानः । व्रजं न व्रजमिव । पशुवर्धनाय । यथा व्रजं गोष्ठं गोपः पशूनां वर्धनाय गच्छति तद्वत् । मन्म अभिमतं यजमानस्य उद्दिश्य ॥ (७)

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन् वृजनस्य राजा ॥

विनियोगोऽस्य पञ्चमेऽहनि । इन्दुः वाजी अन्नवान् पवते । गोन्योघाः गवां न्योघाः सङ्घाः । इन्द्रे सोमः सह इन्वन् प्रीणयन् । मदाय मदार्थम् । हन्ति रक्षः रक्षांसि हिंसति । परिबाधते अरातिं अकर्माणं शत्रुम् । वरिवः धनानि कृण्वन् वरिष्ठानि । वृजनस्य । व्यत्ययेन सप्तम्यर्थे षष्ठी । सङ्ग्रामे । राजा दीप्यन्ते शोभन्ते ॥

मन्युः वसिष्ठः । इन्दुः दीप्तः । वाजी वेगवान् । गोन्योघाः । गमनशीलः नीचीनोऽवाङ्मुखः ओघः प्रवाहः यस्य स गोन्योघाः । सोमः पवते इन्द्रे सहः

अष्टादश्यास्तृतीयायां निषादो द्विश्रुतिस्ततः ॥ १६ ॥
एकविंश्या द्वितीयायां वीणैका ऽत्र ध्रुवा भवेत् ।

इति श्रुतीनामानन्त्यं दर्शितमिति । अस्मिन्पक्षे रणनानुरणनात्मकयोः श्रुतिस्वरयोर्भेदाङ्गीकारे ऽप्यनुरणनरूपाणामपि ध्वनीनां श्रुतित्वमभिधायो-भयेषामपि वीचीतरङ्गन्यायेनोत्पद्यमानानां तेषामतिसूक्ष्मभागकल्पनया प्रति-ध्वन्यवयवभूतध्वनिबहुत्वविवक्षया ऽऽनन्त्यं दर्शितम् । तदनुपपन्नमिति मन्तव्यम् । यद्यपि श्रवणयोग्यस्य ध्वनेरिन्द्रियग्राह्यत्वाक्षिप्तेन सावयवत्वेन त्रसरेणुवदवयवाः सन्ति, तथा ऽपि तेषां श्रोत्रप्रत्यक्षमूलेनानुमानेनार्था-पत्त्या वा ऽन्यतरेणैव त्रसरेणुगतपरमाणुवद्गम्यतया श्रोत्रग्राह्यत्वाभावात्, स्वतः स्वराभिव्यक्तिहेतुत्वाभावेनाश्रुतित्वादिति । द्वाविंशतिश्रुतिपक्षे षट्-षष्टिश्रुतिपक्षे च यद्यपि श्रुतिस्वरयोर्भेदाङ्गीकारः समान एव, तथा ऽपि द्वाविंशतिश्रुतिपक्षे द्वाविंशतिः श्रुतय एव मन्द्रस्थाः स्थानान्तर-योरपि द्विगुणद्विगुणत्वेनावर्त्यन्त इति । षट्षष्टिश्रुतिपक्षे तु तावत्य एव श्रुतयः स्थानत्रये ऽप्यनावृत्ताः परस्परं भिन्ना इति च वैषम्यम् । तत्रा-नावृत्तिपक्षस्वीकारे षड्जादीनामपि स्वराणामावृत्त्यभावान्मध्यतारस्थाश्च-तुर्दश स्वराः पृथग्व्यपदेशभाजो भवेयुः । नैव तथा व्यवहारः । अत एव मतङ्गादिदर्शितेषु नवसु पक्षेषु द्वाविंशतिश्रुतिपक्षमेव रणनानुरणनात्मना साक्षादनुभूयमानश्रुतिस्वरभेदानपह्नवेनावृत्त्या सप्तानामेव स्वराणां गुणभिन्नानां व्यवहारोपयोगित्वसिद्धेश्च सारतमं निश्चित्य निःशङ्को वीणयोर्निदर्शितानां तासां द्वाविंशतिश्रुतीनां मध्ये चतुर्थीप्रभृतिषु शास्त्रानुसारेण पूर्वोत्तरावधि-प्रदर्शनपूर्वकं षड्जादिसप्तस्वरस्थापनं विदधाति—**वीणाद्वय** इत्यादिना । **चतुःश्रुतिरिति** । स्वाभिव्यक्तिकरणत्वेन चतस्रः श्रुतयो यस्येति स तथोक्तः । एवं त्रिश्रुतिरित्यादौ द्रष्टव्यम् ॥ -१०—१६- ॥

(सु०) दृष्टान्तेन विनैते नादविशेषा दुरवबोधाः, कण्ठे ऽपि दर्शयितुमशक्याः; तस्माद्वीणाद्वंद्वे दृष्टान्तकथनं प्रतिजानीते—व्यक्तय इति। ताः प्राकट्येन दर्शयितुमित्यर्थः। तदुक्तं संगीतसमयसारे—

'ते तु द्वाविंशतिर्नादा न कण्ठेन परिस्फुटाः।
शक्या दर्शयितुं तस्माद्वीणायां तन्निदर्शनम्॥'

इति। प्रतिज्ञातमर्थं कथयति—द्वे वीणे इति। सदृशौ समाने। आकारसाम्यं नात्रोपयुज्यत इत्याह—यथा नादः समान एव भवतीति। तदुक्तम्—

'द्वे वीणे तुलिते कार्ये समस्तावयवैस्तथा।
एकवीणेव भासेते यथा द्वे अपि शृण्वताम्॥'

इति। तयोः प्रत्येकं द्वाविंशतिस्तन्त्र्यः स्थापनीयाः। तास्वाद्या मन्द्रतमध्वाना कर्तव्या। स मन्द्रतमो यस्माद्वीनो मन्द्रो ऽन्यो नादो रञ्जको न निष्पद्यते। द्वितीया तस्याः सकाशान्मनाक्किंचिदुच्चध्वनिः। किंचिदित्यनेनैवोक्तमर्थं विशदयति—मध्ये ध्वन्यन्तराश्रुतेरिति। यथा मध्ये विसदृशं ध्वन्यन्तरं नोत्पद्यते तथा नैरन्तर्यं विधेयम्। तदुक्तम्—

'द्वितीया तु ततस्तीव्रध्वनिस्तन्त्रीर्विधीयते।
यथा यथा तयोर्मध्ये न तृतीया ध्वनिर्भवेत्॥'

इति। तास्तन्त्र्यो ऽधोऽधःस्थातस्तीव्रनादा भवन्ति। ताभ्यस्तन्त्रीभ्यो जातो नादः श्रुतिरित्युच्यते। श्रुतेः प्रमाणमुक्तं मतङ्गेन—ननु श्रुतेः किं मानम्? उच्यते, पञ्चमस्तावद् ग्रामद्वयस्थो लोके प्रसिद्धः। [1]तस्योत्कर्षापकर्षाभ्यां मार्दवादायतत्वाद्वा यदन्तरं तत्प्रमाणा श्रुतिरिति। स्थानत्रये षट्षष्टिसंख्याकानां श्रुतीनां नामान्युक्तानि संगीतसमयसारे—

'मन्द्रा चैवातिमन्द्रा च घोरा घोरतरा तथा।
मण्डना च तथा सौम्या सुमनाः पुष्करा तथा॥
शङ्खिनी चैव नीला च उत्पला चानुनासिका।
घोषावती लीननादा आवर्तन्यपि चापरा॥

[1] तस्य श्रुत्युत्कर्षापकर्षाभ्यां.

चलवीणा द्वितीया तु तस्यां तन्त्रीस्तु सारयेत् ॥ १७ ॥
स्वोपान्त्यतन्त्रीमानेयास्तस्यां सप्त स्वरा बुधैः ।

रणदा चैव गम्भीरा दीर्घतारा च नादिनी ।
मन्द्रजा सुप्रसन्ना च निनदा मन्द्रसप्तके ॥
नादान्ता निष्कला गूढा सकला मधुरा गली ।
एकाक्षरा भृङ्गजाती रसगीती सुरञ्जिका ॥
पूर्णा ऽलंकारिणी चैव वांशिका वैणिका तथा ।
त्रिस्थाना सुस्वरा सौम्या भाषाऽङ्गी वार्त्तिका तथा ॥
संपूर्णा च प्रसन्ना च सर्वव्यापनिका तथा ।
द्वाविंशतिः समाख्याताः श्रुतयो मध्यसप्तके ॥
ईश्वरी चैव कौमारी सवराली तथा परा ।
भोगवीर्या मनोरामा सुस्निग्धा च तथा परा ॥
दिव्याङ्गा ऽथो सुललिता विद्रुमा च तथा परा ।
महार्का शङ्किनी राका लज्जा चैव तथा परा ॥
काली सूक्ष्मा ऽतिसूक्ष्मा च पुष्टा चैव सुपुष्टिका ।
विस्पष्टा काकली चैव कराली च तथा परा ॥
विस्फोटान्तर्भेदिनी च इत्येतास्तारसप्तके ।'

इति । श्रुतिभ्यः स्वरोत्पत्तिप्रकारं कथयति—**वीणाद्वय** इति । वीणाद्वये स्वराः स्थापनीयाः । तत्र चतस्रः श्रुतयो यस्य संबन्धिन्यः स चतुःश्रुतिः षड्जस्तुरीयायां चतुर्थ्यां तन्त्र्यां स्थाप्यः । त्रिश्रुतिर्ऋषभः सप्तम्याम् । द्विश्रुतिर्गांधारो नवम्याम् । चतुःश्रुतिर्मध्यमस्त्रयोदश्याम् । चतुःश्रुतिः पञ्चमः सप्तदश्याम् । त्रिश्रुतिर्धैवतो विंशतितम्याम् । द्विश्रुतिर्निषादो द्वाविंश्याम् ॥ -१०-१६- ॥

(क०) अत्र वीणयोः । एका ध्रुवा भवेदिति । अनयोश्चलत्वध्रुवत्वे सारणाऽन्वयव्यतिरेकानुविधायिनी । **द्वितीये**ति । ध्रुवत्वेन कल्पिताया अन्येत्यर्थः । अत्र तुशब्दो व्यपदेशान्तरपरिग्रहार्थः । श्रुतिगतेयत्तापरिज्ञानार्थं

ध्रुववीणास्वरेभ्यो ऽस्यां चलायां ते स्वरास्तदा ॥ १८ ॥
एकश्रुत्यपकृष्टाः स्युरेवमन्या ऽपि सारणा[1] ।

चलवीणायां सारणां विदधाति—**तस्यामिति** । तन्त्रीस्तु सारयेदिति । तुशब्दो भिन्नक्रमः । तस्यां त्विति योजना ध्रुवातो वैषम्यप्रदर्शनार्था । सारयेत्सारणां कुर्यात्; स्वस्वतन्त्रीस्थितान्स्वरांस्तत्तच्छ्रुतिस्थानात्प्रच्याव्य श्रुत्यन्तराणि तन्त्रीः प्रापयेदित्यर्थः ॥ सारयेदित्यनेनानियमेन श्रुत्यन्तर-प्रापणे प्राप्ते, प्रथमादिसारणासु श्रुत्यन्तरनियममाह—**स्वोपान्त्येति** । तस्यां प्रथमायां सारणायाम् । ननु श्रुत्यन्तरप्राप्त्या स्वरान्तरत्वं किं न स्यादित्यत आह—ध्रुववीणास्वरेभ्य इति । ते स्वरास्तदैकश्रुत्यपकृष्टाः स्युरित्यत्र त इति ध्रुवायामिव चतुःश्रुतिकत्वादिलक्षणानां षड्जादीनां परामर्शाच्छ्रुत्यन्तर-प्राप्त्या स्वरान्तरत्वप्राप्तावप्येकश्रुत्यपकर्षेण तेषामेव नीचत्वमात्रप्रतीतेर्विशेष-लाभाभावात्स्वरान्तरत्वं न स्यादित्यर्थः । उक्तं प्रकारं सारणाऽन्तरे ऽप्यति-दिशति—**एवमिति** । पूर्वत्र सारणायामेकश्रुत्यपकृष्टान्स्वरान्प्रकृतिं कृत्वा तेषां ततो ऽप्युपान्त्यतन्त्र्यानयनमिहान्यशब्दार्थः ॥ -१७—१८- ॥

(सु०) अत्र वीणाद्वय एका चलवीणैका ध्रुववीणा । यस्यां स्वराः स्वस्थानं परित्यज्यापकृष्यन्ते सा चलवीणा, यस्यां तु नापकृष्यन्ते सा ध्रुववीणा । श्रुतिनिश्चयार्थं चलवीणायां यत्कर्तव्यं तदाह—**तस्यामिति** । तस्यां चलवीणायां तन्त्रीः सारयेदपकर्षयेत् । प्रथमसारणाप्रकारमाह—**स्वोपान्त्येति** । तस्यां चल-वीणायां सप्तापि स्वरा यत्र स्थापितास्ता अन्त्यास्तन्त्र्यः, तत्समीपवर्तिन्यो ऽपकृष्टा उपान्त्याः, तासु सप्त स्वरा आनेयाः स्थापनीयाः । एवं प्रथमसारणायां कृतायां किं स्यात्? तदाह—**ध्रुववीणेति** । अस्यां चलायां चलवीणायां ते षड्जादयः स्वरा ध्रुववीणास्वरेभ्यस्तदपेक्षयैकश्रुत्या ऽपकृष्टाः स्युः । एवमेव

[1] ०मन्याश्च सारणाः

श्रुतिद्वयलयादस्यां चलवीणागतौ गनी ॥ १९ ॥
ध्रुववीणोपगतयो रिधयोर्विंशतः क्रमात् ।
तृतीयस्यां सारणायां विंशतः सपयो रिधौ ॥ २० ॥
निगमेषु चतुर्थ्यां तु विंशन्ति समपाः क्रमात् ।
श्रुतिद्वार्विंशतावेवं सारणानां चतुष्टयात् ॥ २१ ॥

द्वितीयतृतीयचतुर्थ्यः सारणाः कर्तव्या इत्याह—एवमिति । प्रतिसारणं स्वराणां ततो ऽपि पुनरेकैकश्रुत्यपकर्षः कर्तव्यः ॥ -१७–१८- ॥

(क०) द्वितीयादिषु सारणासु ज्ञेयं दर्शयति—**श्रुतिद्वयेत्य**.दिना । अस्यां द्वितीयसारणायां चलवीणागतौ चलवीणायां स्वस्वोपान्त्यतन्त्रीस्थितौ गनी गांधारनिषादौ ध्रुववीणोपगतयोर्ध्रुववीणायां स्वस्वाधारश्रुतिस्थयो रिधयो-र्ऋषभधैवतयोः क्रमाद्दषभे गांधारो धैवते निषादश्च श्रुतिद्वयलयात्प्रातिस्विक-श्रुतिद्वयपरित्यागाद्विंशतो लीनौ भवतः । ध्वनिसाम्यादेकाकारतां भजत इति यावत् । एवं तृतीयचतुर्थसारणयोरपि स्वरान्तरप्रवेशो द्रष्टव्यः । ननु चतुर्थसारणायां मन्द्रषड्जस्य निषादे प्रवेश उच्यते ; तत्कथमुप-पद्यते ? 'कार्या मन्द्रतमध्वाना' इति षड्जादिमश्रुतेरारम्भात्तत्पूर्वध्वन्य-संभवेनोपान्त्यतन्त्र्यभावात् । सत्यं ध्वन्यसंभवात्तन्त्र्यभावः ; तथा ऽपि मन्द्रस्वरसप्तकस्यावृत्तौ षड्जनिषादयोः संनिधानान्निषादाधारश्रुतेरुपान्त्यत्वं कल्पयित्वा प्रवेशः पर्यवस्यतीत्युपपन्नम् । अथ वा, स्थानान्तरावृत्तस्य तस्यैव षड्जस्य पूर्वं निषादसंभवात्तस्मिन्प्रवेशो द्रष्टव्यः । सारणानां फलमाह—**श्रुतिद्वाविंशतावि**ति । यद्येवं स्यादेतदनावृत्तिमतानुसारेण सार-णापञ्चकेनापि सप्तानामपि स्वराणामेकोनत्रिंशच्छ्रुतीयत्तानिश्चयः कर्तुं शक्यत इति । नैवम् । स्वरास्तावच्छ्रुत्यनुरणनात्मकाः । ते च षड्जादयो

ध्रुवाश्रुतिषु लीनायामियत्ता ज्ञायते स्फुटम् ।
अतः परं तु रक्तिघ्नं न कार्यमपकर्षणम् ॥ २२ ॥
श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः ।

लोके शास्त्रे च चतुर्थ्यादिश्रुतिषु मयूरादिस्वरसंवादित्वेनाभिव्यक्ताः सिद्धाः । तेषां तदुक्तरीत्योत्कर्षणेन पञ्चम्यादिषु श्रुतिषु प्रापणे कृते तादृशानुरणनाभावान्मन्द्रमध्ययोरुत्तरोत्तरस्थानाक्रमणे तारमन्द्रव्यवस्थितेरपायाच्च यतो रक्तिघातः, अतः सारणाऽन्तरं न कर्तव्यमित्यभिसंधायोक्तम्—**अतः परं त्विति** ॥ -१९–२२ ॥

(सु०) द्वितीयसारणायां कृतायां यत्सिध्यति तदाह—**श्रुतिद्वयेति** । अस्यां चलवीणायां द्वितीयसारणायां कृतायां श्रुतिद्वयस्य लयादपकर्षाच्चलवीणायां वर्तमानौ गांधारनिषादौ ध्रुववीणागतयोर्ऋषभधैवतयोः प्रविशतः । **क्रमादिति** । गांधार ऋषभं निषादो धैवतमित्यर्थः । तयोः प्रविशत इति तत्सममाननादौ भवत इत्यर्थः । तृतीयसारणायां सिद्धं कथयति—**तृतीयस्यामिति** । सपयोः षड्जपञ्चमयोर्ऋषभधैवतौ विशतः । ऋषभः षड्जं प्रविशति, धैवतः पञ्चमं प्रविशति । चतुर्थ्यां तु सारणायां मध्यषड्जो मन्द्रनिषादं प्रविशति, मध्यमो गांधारं प्रविशति, पञ्चमो मध्यमं प्रविशति । उपसंहरति—**श्रुतिद्वाविंशताविति** । एवं सारणाचतुष्टयाच्छ्रुतिद्वाविंशतौ ध्रुवाश्रुतिषु लीनायां सत्यां द्वाविंशतिरेव श्रुतय इतीयत्तैतावत्संख्याकत्वं ज्ञायते । द्वितीयसारणायां श्रुतिचतुष्टयलाभः, तृतीयायां षट्श्रुतिलाभः, चतुर्थ्यां द्वादशश्रुतिलाभः । ननु पुनरप्यपकर्षणं कर्तव्यम्; नेत्याह—**अतः परमिति** । अतः परमपकर्षणं न कार्यम् । कुतः ? यतो **रक्तिघ्नमिति** । अतः परमपकर्षणे कृते स्वराणां रञ्जकत्वाभावात्स्वरत्वमेव नश्यति, 'स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते' इति वक्ष्यमाणत्वात् ॥ -१९–२२ ॥

(क०) इत्थमियत्तया निश्चिताभ्यः श्रुतिभ्यः स्वराणां निष्पत्तिमाह—**श्रुतिभ्यः स्युः स्वरा** इति । चतसृभ्यस्तिसृभ्यो द्वाभ्यां च

पञ्चमो धैवतश्चाथ निषाद इति सप्त ते ॥ २३ ॥
तेषां संज्ञाः सरिगमपधनीत्यपरा मताः ।

यथायोगं द्वाविंशतेः श्रुतिभ्यः सप्त स्वरा भवन्तीत्यर्थः । अत्र पञ्च पक्षाः संभवन्ति—श्रवणैकेन्द्रियग्राह्यत्वाद्विशेषस्पर्शशून्ययोः स्वरश्रुत्योर्जातिव्यक्त्योरिव तादात्म्यमिति प्रथमः पक्षः । दर्पणे मुखविवर्तवच्छ्रुतिषु स्वरा विवर्तन्त इति द्वितीयः । यथा घटस्य मृत्पिण्डदण्डादिकार्यत्वं तथा स्वराणां श्रुतिकार्यत्वमिति तृतीयः । क्षीरं दधिरूपेणेव श्रुतयः स्वररूपेण विपरिणमन्त इति चतुर्थः । प्रदीपादन्धकारस्थितघटाद्यभिव्यक्तिवच्छ्रुतिभ्यः स्वराणामभिव्यक्तिरिति पञ्चमः । नाद्यः, स्वरश्रुत्योर्भिन्नबुद्धिग्राह्यत्वादाश्रयाश्रयित्वभेदाच्च जातिव्यक्त्योरपि 'निर्विशेषं न सामान्यम्' इति न्यायेन भेदस्य सिद्धत्वाच्च । न द्वितीयः, विवर्तत्वे हि स्वराणां भ्रान्तत्वं स्यात्; न च तथा, तेषामबाधितप्रयोगहेतुत्वदर्शनात् । तृतीयोऽपि न परीक्षाक्षमः । स्वरव्यतिरेकेण श्रुतिसद्भावे प्रमाणाभाव इति वक्तुं हि न युक्तम्, 'स्वरस्य हि श्रूयमाणमनुरणनात्मकत्वं रणनमन्तरेण नोपपद्यते' इत्यार्थापत्त्या वा, 'अयं स्वरो रणनपूर्वको ऽनुरणनात्मकत्वाद्दण्डाहतजयघण्टाऽनुरणनशब्दवत्' इत्यनुमानेन वा तत्सिद्धेः । सत्यम् । यद्यपि स्फुटपौर्वापर्येण कार्यकारणभावप्रतीतिरस्ति, तथाऽप्युपादानस्य मृत्पिण्डादेर्यथा घटादिकार्यनिष्पत्तौ भेदेनानुपलब्धिर्न तथेह स्वरनिष्पत्तौ श्रुतीनामनुपलम्भ इति तासामकारणत्वात् । चतुर्थपञ्चमावदुष्टत्वेन मतङ्गादिसंमतत्वाद् ग्राह्यौ । अथ शुद्धस्वरानन्वर्थतया प्रसिद्धैर्नामभिः परिगणयति—**षड्जेति** । षड्जादिनाम्नामन्वर्थता मतङ्गादिभिरुक्ता । तद्यथा—

'षण्णां स्वराणां जनकः षड्भिर्वा जन्यते स्वरैः ।
षड्भ्यो वा जायते ऽङ्गेभ्यः षड्ज इत्यभिधीयते ॥'

षडपि स्वराञ्जनयति प्रकाशयतीति जनेरन्तर्भावितण्यर्थात् 'अन्येष्वपि दृश्यते' इति डप्रत्यये टिलोपे च सति षड्ज इति रूपम्। षड्भिः स्वरैरङ्गभावेन प्रविष्टैर्जन्यते प्रकाश्यत इति वा षड्जः। पूर्ववद्रूपसिद्धिः। षड्भ्यो नासाकण्ठोरस्तालुजिह्वादन्तस्थानेभ्यो जायत इति वा 'पञ्चम्याम-जातौ' इति डप्रत्यये षड्ज इति।

'प्राप्नोति हृदयं शीघ्रमन्यस्माद्दषभः स्मृतः।
स्त्रीगवीषु यथा तिष्ठन्विभाति ऋषभो महान्॥
स्वरग्रामे समुत्पन्नः स्वरो ऽयमृषभस्तथा।'

ऋषति गच्छति हृदयमन्यस्वरेभ्य इति 'ऋष गतौ' इत्यस्माद्धातो-रौणादिके ऽभच्प्रत्यये ऋषभ इति रूपम्। यथा गोसमूहे बलीवर्दस्तथा स्वरसमूहे राशौ द्वितीयो बलवान्। ऋषभवन्नदतीति वा ऋषभः।

'वाचं गानात्मिकां धत्त इति गांधारसंज्ञकः'

गां गानात्मिकां वाचं धत्त इति 'धृ धारणे' इत्यस्माद्धातोर्गोशब्दे कर्मण्युपपदे ऽण्प्रत्यये पृषोदरादित्वाद्बहुलग्रहणाद्वा ऽलुकि गांधार इति रूपम्। गान्धर्वसुखहेतुत्वाद्वा गांधारः।

'स्वराणां मध्यमत्वाच्च मध्यमः स्वर इष्यते।'

सप्तानां स्वराणां चतुर्थो यः स्वरस्तस्य मध्यस्थत्वात् 'मध्यान्मः' इति भवार्थे मप्रत्यये मध्यम इति रूपम्। अथ वा मद्धियो ऽमो रोग इति मद्धयमः। यद्वा मम धियो रोग इति मद्धयमशब्देन सप्तानां स्वराणां श्रूयमाणो रुचिरत्वाशङ्कया पीडयतीत्यर्थः।

'स्वरान्तराणां विस्तारं यो मिमीते स पञ्चमः।
पाठक्रमेण गणने संख्यया पञ्चमो ऽथ वा॥'

'पचि विस्तारे' इत्यस्माद्धातोर्भावे धञि पञ्चं विस्तारं मिमीत इति 'आतो ऽनुपसर्गे कः' इति कप्रत्यये पञ्चम इति रूपम् । 'ह्रावामश्च' इत्यण्युक् च संज्ञात्वादुपेक्ष्येते । यद्वा पृषोदरादित्वाद्युगभाव आलोपश्च । स्वराणां क्रमेण गणने पञ्चमत्वाद्वा पञ्चमस्थानसंभूतत्वाद्वा पञ्चमः ।

'धीरस्यास्तीति धीवांस्तत्संबन्धी धैवतः स्मृतः ।'
यद्वा, 'षष्ठस्थाने धृतो यस्मात्ततो ऽसौ धैवतो मतः ।'

धीरस्यास्तीति धीवान्, तत्संबन्धित्वेन 'तस्येदम्' इत्यणि धैवत इति रूपम् । संबन्धित्वं चानेकप्रकारं निरूप्यनिरूपकलक्षणमास्वाद्यास्वादक-लक्षणं जन्यजनकलक्षणं चेति । तत्रोत्तरस्वरेण संसृष्टश्रुतित्वात्स्थूलमतीनां दुर्विवेकत्वाद्धीमतः सूक्ष्ममतेरेव निरूप्यत्वाद्धैवतः । षष्ठस्थाने ललाटस्थाने धृतत्वाद्वा धैवतः ।

'निषीदन्ति स्वराः सर्वे निषादस्तेन कथ्यते ।'

'षदॢ विशरणे' इत्यस्माद्धातोः, निषीदन्ति पर्यवस्यन्त्यस्मिन्स्वरा इति 'अकर्तरि च' इति सूत्रेण घञि निषाद इति रूपम् । इत्युक्तप्रकारेण ते स्वराः सप्तैवेति नियमे सप्तधात्वाश्रितत्वं सप्तचक्राश्रितत्वं वा निमित्तं मतङ्गोक्तमनुसंधेयम् ॥ प्रयोगसौकर्यार्थं तेषामाद्याक्षराण्युद्धृत्य संज्ञाऽन्तरा-ण्याह—**तेषां संज्ञा** इति । सरिगादीनां मतङ्गाभिमत उद्धारक्रम उच्यते —अत्राकचटतपयशा अष्टौ वर्गाः । तत्राष्टमस्य तृतीयं हरिबीजयुक्तमाद्य-स्वरमुद्धरेत् । हरिबीजमकारः । सप्तमस्य द्वितीयं कामबीजयुक्तं द्वितीयस्व-रमुद्धरेत् । कामबीजमिकारः । द्वितीयस्य तृतीयं हरिबीजयुक्तं तृतीयस्वर-मुद्धरेत् । षष्ठस्य पञ्चममकारयुक्तं [1]चतुर्थस्वरमुद्धरेत् । षष्ठस्य प्रथमम-

[1] मध्यमस्वरं समुद्धरेत्.

श्रुत्यनन्तरभावी यः स्निग्धो ऽनुरणनात्मकः ॥ २४ ॥
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ।

कारयुक्तं पञ्चमस्वरमुद्धरेत् । पञ्चमस्य चतुर्थमकारयुक्तं षष्ठस्वरमुद्धरेत् । पञ्चमस्य पञ्चमं कामबीजयुक्तं सप्तमस्वरमुद्धरेत् । अत्र सरिगादिष्वाद्याक्षराणां व्यञ्जनत्वात्कथं स्वरत्वमित्याक्षिप्याचार्यपरिभाषया संकेतमात्रमेतदिति प्रत्याह मतङ्गः ॥ २३, २३- ॥

(सु०) एवं श्रुतीर्निरूप्य स्वरान्निरूपयति—**श्रुतिभ्य** इति । षड्जर्षभेत्यादीनामाद्याक्षरैर्व्यवहारार्थं संज्ञान्तराणि कथयति—तेषामिति । सरिगमपधनीत्येताः प्रथमं स्वरोपादानात्तेषां पूर्वाभ्यो ऽपराः संज्ञाः । यद्यपि षऋगमपधनीति संज्ञाघोषणं युक्तं तथा ऽपि सरिगेत्यपभ्रंशः पाठः ॥ २३, २३- ॥

(क०) स्वराणां सामान्यलक्षणं स्वरशब्दस्य निरुक्तिं चाह—**श्रुत्यनन्तरे**ति । श्रुत्यनन्तरभावी, श्रुतेश्चतुर्थ्यादेर्मारुताद्याहत्युत्पन्नप्रथमध्वनेरनन्तरं भाव्याविर्भवनशीलः, स्निग्धो ऽरूक्षः सन्दूरसंश्राव्यः, अनुरणनात्मको ऽनुस्वानरूपः, स्वतः सहकारिकारणनिरपेक्षं श्रोतृचित्तं रञ्जयत्यनुरक्तं करोति । स्वतःशब्दोपपदात् 'रञ्ज रागे' इत्यस्माद्धातोः 'अन्येभ्यो ऽपि दृश्यते' इति डप्रत्यये टिलोपे पूर्वपदस्थतकारादेः पृषोदरादित्वाल्लोपे च स्वर इति रूपसिद्धिः ॥ -२४, २४- ॥

(सु०) स्वरस्य लक्षणं निर्वचनं च कथयति—श्रुत्यनन्तरेति । श्रुतेरनन्तरं भवतीति श्रुत्यनन्तरभावी । प्रथमतन्त्र्यामाहतायां यो ध्वनिरनुरणनशून्य उत्पद्यते स श्रुतिः, यस्तु ततो ऽनन्तरमनुरणनरूपः श्रूयते स स्वरः । कथं तस्य स्वरत्वमित्यत आह—**स्वत** इति । स्वतो ऽन्यानपेक्षतया यस्माच्छ्रोतृचित्तं रञ्जयति तस्मात्स्वर इति निरुक्तिः । कथं तस्य रञ्जकत्वम्? अतो हेतुगर्भं

विशेषणं स्निग्ध इति। यद्यपि स्निग्धत्वमपामेव धर्मः, 'स्नेहो ऽपां विशेषगुणः' इत्युक्तत्वात्, न तस्य श्रवणेन्द्रियगम्यता; तथा ऽप्यौपचारिकं स्निग्धत्वं स्वरेषु गृह्यते। अत्र बहुधा विप्रतिपत्तिः—केचित्स्वरश्रुत्योस्तादात्म्यं वर्णयन्ति। यदाहुः—

'विशेषस्पर्शशून्यत्वाच्छ्रवणेन्द्रियगम्ययोः।
स्वरश्रुत्योस्तु तादात्म्यं जातिव्यक्त्योरिवानयोः॥'

इति। केचित्स्वरश्रुत्योर्विवर्त्यविवर्तकतामाचक्षते। यदाहुः—

'नराणां तु मुखं यद्वद्दर्पणेषु विवर्तते।
प्रतिभान्ति स्वरास्तद्वच्छ्रुतिष्वेव विवर्तिनः॥'

इति। केचित्स्वरश्रुत्योः कार्यकारणभावं वदन्ति। यदाहुः—

'स्वराणां श्रुतिकार्यत्वमिति केचिद्वदन्ति हि।
मृत्पिण्डदण्डकार्यत्वं घटस्येह यथा भवेत्॥'

इति। केचित्परिणामपक्षमाद्रियन्ते। यदाहुः—

'श्रुतयः स्वररूपेण परिणामं व्रजन्ति हि।
परीणमेद्यथा क्षीरं दधिरूपेण सर्वथा॥'

इति। केचित्पुनरभिव्यक्तिपक्षमङ्गीकुर्वते। यदाहुः—

'षड्जादयः स्वराः सप्त व्यज्यन्ते श्रुतिभिः सदा।
अन्धकारस्थिता यद्वत्प्रदीपेन घटादयः॥'

इति। एतेषु पक्षेषु परिणामाभिव्यक्तिपक्षावेव स्वीकृतौ मतङ्गेन। यदाह—

'भेदः स्वलक्षणानां सामान्येनान्यवस्तुवत्सिद्धः।
तद्धि विशेषैः शून्यं भवति नभःपुष्पसंकाशम्॥
नानाबुद्धिगृहीतत्वात्स्वरश्रुत्योस्तु भिन्नता।
आश्रयाश्रयिभेदाच्च तादात्म्यं केन सिध्यति॥

यदभाणि विवर्तत्वं स्वराणां तदसंगतम् ।
विवर्तत्वे स्वराणां हि भ्रान्तिज्ञानं प्रसज्यते ॥
तथा च कारणत्वं च श्रुतीनां नैव संभवेत् ।
कार्येषु विद्यमानेषु कारणस्योपलम्भनात् ॥
घटादौ विद्यमाने हि मृत्पिण्डो नोपलभ्यते ।
परिणामोऽप्यभिव्यक्तिर्न्याय्यः पक्षः सतां मतः ॥'

इति । मतङ्गेन त्वन्यथा स्वरशब्दो व्युत्पादितः । यदाह—

'राजृ दीप्तावस्य धातोः स्वशब्दपूर्वकस्य च ।
स्वयं हि राजते यस्मात्तस्मात्स्वर इति स्मृतः ॥'

इति । षड्जादीनां निरुक्तिरुक्ता संगीतसमयसारकारेण—

'नासा कण्ठ उरस्तालु जिह्वा दन्तास्तथैव च ।
षडभिः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः ॥
नाभेः समुत्थितो वायुः कण्ठशीर्षसमाहतः ।
नदत्यृषभवद्यस्मात्तस्मादृषभ ईरितः ॥
नाभेः समुत्थितो वायुः कण्ठशीर्षसमाहतः ।
गन्धर्वसुखहेतुः स्याद्गांधारस्तेन हेतुना ॥
वायुः समुत्थितो नाभेर्हृदये च समाहतः ।
मध्यस्थानोद्भवत्वात्तु मध्यमत्वेन कीर्तितः ॥
वायुः समुत्थितो नाभेरोष्ठकण्ठशिरोहृदि ।
पञ्चस्थानसमुद्भूतः पञ्चमस्तेन कीर्तितः ॥
नाभेः समुत्थितो वायुः कण्ठतालुशिरोहृदि ।
तत्तत्स्थानधृतो यस्मात्ततो ऽसौ धैवतो मतः ॥
नाभेः समुत्थिते वायौ कण्ठतालुशिरोहते ।
निषीदन्ति स्वराः सर्वे निषादस्तेन कथ्यते ॥

इति ॥ -२४, २४- ॥

ननु श्रुतिश्चतुर्थ्यादिरस्त्वेवं स्वरकारणम् ॥ २५ ॥
त्र्यादीनां तत्र पूर्वासां श्रुतीनां हेतुता कथम् ।
ब्रूमस्तुर्यातृतीयाऽऽदिः श्रुतिः पूर्वाऽभिकाङ्क्षया ॥ २६ ॥
निर्धार्यते ऽतः श्रुतयः पूर्वा अप्यत्र हेतवः ।
दीप्ता ऽऽयता च करुणा मृदुर्मध्येति जातयः ॥ २७ ॥
श्रुतीनां पञ्च तासां च स्वरेष्वेवं व्यवस्थितिः ।
दीप्ता ऽऽयता मृदुर्मध्या षड्जे स्यादृषभे पुनः ॥ २८ ॥
संस्थिता करुणा मध्या मृदुर्गांधारके पुनः ।
दीप्ताऽऽयते मध्यमे ते मृदुमध्ये च संस्थिते ॥ २९ ॥
मृदुर्मध्या ऽऽयताऽऽख्या च करुणा पञ्चमे स्थिता ।
करुणा चायता मध्या धैवते सप्तमे पुनः ॥ ३० ॥
दीप्ता मध्येति तासां च जातीनां ब्रूमहे भिदाः ।
तीव्रा रौद्री वज्रिकोग्रेत्युक्ता दीप्ता चतुर्विधा ॥ ३१ ॥
कुमुद्वत्यायता या ऽस्याः क्रोधा चाथ प्रसारिणी ।
संदीपनी रोहिणी च भेदाः पञ्चेति कीर्तिताः ॥ ३२ ॥

(क०) यद्येवं चतुर्थ्यादेरेव श्रुतेः स्वरकारणत्वमस्तु, न पूर्वपूर्वासामित्याक्षिपति—**नन्विति** । त्र्यादीनामिति । तृतीयाऽऽदीनामित्यर्थः । अत्र वृत्तौ तीयप्रत्ययान्तस्य 'प्रत्ययलोपे ऽपि तदर्थग्रहणम्' इति त्र्यादीनामिति निर्देशोपपत्तिः । समाधत्ते—**ब्रूम** इति । तुर्यातृतीयाऽऽदिः, षड्जमध्यमपञ्चमानां तुर्या, ऋषभधैवतयोस्तृतीया, आदिशब्देन गांधारनिषादयोर्द्वितीया च श्रुतिः, पूर्वाऽभिकाङ्क्षया, आदिशब्दसामर्थ्यात्पूर्वेत्यस्य वीप्सा कर्तव्या पूर्वपूर्वाऽभिकाङ्क्षयेति । उत्तरोत्तरतारूपेण लक्षणेन स्वोत्पत्तौ

दयावती तथा ऽऽलापिन्यथ प्रोक्ता मदन्तिका ।
त्रयस्ते करुणाभेदा मृदोर्भेदचतुष्टयम् ॥ ३३ ॥
मन्दा च रतिका प्रीतिः क्षितिर्मध्या तु षड्विधा ।
छन्दोवती रञ्जनी च मार्जनी रक्तिका तथा ॥ ३४ ॥
रम्या च क्षोभिणीत्यासामथ ब्रूमः स्वरस्थितिम् ।
तीव्राकुमुद्वतीमन्दाच्छन्दोवत्यस्तु षड्जगाः ॥ ३५ ॥
दयावती रञ्जनी च रक्तिका चर्षभे स्थिताः ।
रौद्री क्रोधा च गांधारे वज्रिका ऽथ प्रसारिणी ॥ ३६ ॥
प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ।
क्षिती रक्ता च संदीपन्यालापिन्यपि पञ्चमे ॥ ३७ ॥
मदन्ती रोहिणी रम्येत्येतास्तिस्रस्तु धैवते ।
उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती ॥ ३८ ॥

संख्यया तुर्याऽऽदिव्यपदेशे च पूर्वपूर्वस्यां साकाङ्क्षतया यतो निर्धार्यते ऽत इत्यर्थः । श्रुतीनामन्योऽन्यमसंकीर्णतया स्वरूपपरिज्ञानाय क्वचित्तासां साजात्येन संगत्या रक्तिलाभाय चावान्तरभेदसहितानां जातीनां स्वरेषु व्यवस्थानं दर्शयति—**दीप्ता ऽऽयतेत्यादिना** । स्वरविनियोगानन्तरमुद्दिष्टानामपि श्रुतिजातीनामिह निरूपणं श्रुतिस्वरविवेचनरूपार्थसंगतिवशादुपपन्नम् । व्युत्क्रमेणोद्देशस्तु क्वचित्क्रमस्याविवक्षितत्वज्ञापनार्थम् । एतेन ' कुलानि जातयः—' इत्यादिक्रमस्त्वविवक्षित इति मन्तव्यम् ॥ -२५—३८ ॥

(सु०) ' श्रुतिभ्यः स्युः स्वराः ' इत्युक्तम्; तत्र श्रुतिभ्य इति पञ्चम्या ' जनिकर्तुः प्रकृतिः ' इत्यनेन श्रुतीनां स्वरान्प्रति कारणत्वं प्रतीयते; अयं स्वरश्चतुःश्रुतिरयं स्वरस्त्रिश्रुतिरयं द्विश्रुतिरित्युक्तत्वाच्च सर्वासामपि कारणत्वं

प्रतीयते; तदाक्षिपति—**नन्विति**। ननु यस्यां श्रुतौ स्वरः स्थाप्यते सा चतुर्थ्यादिः श्रुतिः, चतुर्थी सप्तमी नवमी त्रयोदशी सप्तदशी विंशी द्वाविंशी च श्रुतिरभिव्यञ्जकत्वेन परिणामकत्वेन वा स्वराणां षड्जादीनां कारणमस्तु नाम; पूर्वासां त्र्यादीनां श्रुतीनां स्वरं प्रति कथं हेतुत्वम्? त्र्यादीनामित्यत्रादि-शब्देन षड्जमध्यमपञ्चमेषु तिसृणां तिसृणामृषभधैवतयोर्द्वयोर्द्वयोर्गांधारनिषादयोरेक-स्या एकस्याः पूर्वावस्थितायाः श्रुत्याः स्वरं प्रति क उपयोगः? परिहरति—**ब्रूम इति**। तुरीयातृतीयाऽऽदिः श्रुतिः पूर्वापेक्षया निर्धार्यते इयं श्रुतिश्चतुर्थीयं तृतीयेयं द्वितीयेति पूर्वाः श्रुतीरपेक्ष्यायं व्यवहारः। यदि पूर्वाः श्रुतयो न स्युस्तर्हि किमपेक्ष्यायं चतुर्थ्यादिव्यवहारः स्यात्? अतश्चतुर्थीत्वादिनिर्धारणार्थं पूर्वासामपि श्रुतीनां हेतुत्वसिद्धिः। अधुना श्रुतिजातीर्विभजते—**दीप्ता ऽऽयतेति**। श्रुतीनां पञ्च जातयो भवन्ति दीप्ता ऽऽयता करुणा मृदुर्मध्येति। तासु का जातिः कस्मिन्स्वरे निवसतीत्यपेक्षायामाह—**तासां चेति**। षड्जे दीप्ताऽऽदयश्चतस्रः श्रुतिजातयः, प्रथमा श्रुतिर्दीप्ता द्वितीया ऽऽयता तृतीया मृदुश्चतुर्थी मध्या। ऋषभे तु प्रथमा श्रुतिः करुणा द्वितीया मध्या तृतीया मृदुः। गांधारे प्रथमा श्रुतिर्दीप्ता द्वितीया ऽऽयता। मध्यमे ते दीप्ताऽऽयते मृदुमध्ये च संस्थिते। ततश्च मध्य-मस्य प्रथमा श्रुतिर्दीप्ता द्वितीया ऽऽयता तृतीया मृदुश्चतुर्थी मध्या। पञ्चमे प्रथमा श्रुतिर्मृदुर्द्वितीया मध्या तृतीया ऽऽयता चतुर्थी करुणा। धैवते प्रथमा श्रुतिः करुणा द्वितीया ऽऽयता तृतीया मध्या। सप्तमे निषादे प्रथमा श्रुतिर्दीप्ता द्वितीया मध्येति। तासामपि जातीनामवान्तरजातीः प्रतिज्ञाय कथयति—**तासां चेति**। दीप्ता चतुर्विधा तीव्रा रौद्री वज्रिकोग्रेति। आयतायाः पञ्च भेदाः कुमुद्वती क्रोधा प्रसारिणी संदीपनी रोहिणी चेति। करुणाया भेदत्रयं दया-वत्यालापिनी मदन्तिकेति। मृदोश्चत्वारो भेदा मन्दा रतिः प्रीतिः क्षितिरिति। मध्या तु षड्विधा षट्प्रकारा च्छन्दोवती रञ्जनी मार्जनी रक्तिका रम्या क्षोभिणीति। तुशब्देन पूर्वाभ्यो ऽधिकभेदत्वं सूचितम्। एतासां जातीनां स्वरस्थितिं प्रतिज्ञाय कथयति—**आसामथेति**। आसां श्रुतिजातीनां षड्जगाः षड्जे वर्तमानाश्चतस्रो जातयस्तीव्रादयः। ततश्च षड्जे प्रथमा श्रुतिस्तीव्राजात्या-क्रान्ता दीप्ता; द्वितीया कुमुद्वतीजातिका ऽऽयता; तृतीया मन्दाजातिका मृदुः; चतुर्थी च्छन्दोवतीजातिका मध्या। ऋषभे प्रथमा श्रुतिर्दयावतीजातिका

ते मन्द्रमध्यताराख्यस्थानभेदात्त्रिधा मताः ।
त एव विकृतावस्था द्वादश प्रतिपादिताः ॥ ३९ ॥
च्युतो ऽच्युतो द्विधा षड्जो द्विश्रुतिर्विकृतो भवेत् ।
साधारणे काकलीत्वे निषादस्य च दृश्यते ॥ ४० ॥
साधारणे श्रुतिं षाड्जीमृषभः संश्रितो यदा ।
चतुःश्रुतित्वमायाति तदैको विकृतो भवेत् ॥ ४१ ॥

करुणा; द्वितीया रञ्जनीजातिका मध्या; तृतीया रतिजातिका मृदुः । गांधारे प्रथमा श्रुती रौद्रीजातिका दीप्ता; द्वितीया क्रोधाजातिका ऽऽयता । मध्यमे प्रथमा श्रुतिर्वज्रिकाजातिका दीप्ता; द्वितीया प्रसारिणीजातिका ऽऽयता; तृतीया प्रीतिजातिका मृदुः; चतुर्थी मार्जनीजातिका मध्या । पञ्चमे प्रथमा श्रुतिः क्षितिजातिका मृदुः; द्वितीया रक्तिकाजातिका मध्या; तृतीया संदीपनीजातिका ऽऽयता; चतुर्थ्यालापिनीजातिका करुणा । धैवते प्रथमा श्रुतिर्मदन्तीजातिका करुणा; द्वितीया रोहिणीजातिका ऽऽयता; तृतीया रम्याजातिका मध्या । निषादे प्रथमा श्रुतिरुग्राजातिका दीप्ता; द्वितीया क्षोभिणीजातिका मध्येति । ननु किं श्रुतिजातिनिरूपणेन प्रयोजनम्? उच्यते—तत्तज्जातिकां श्रुतिं श्रुत्वा मनसो नामसाम्येन तथा तथा विकार उत्पद्यत इति सूचयितुं श्रुतिजातिनिरूपणम् । ततश्च दीप्तां श्रुतिमाकर्ण्य मनसो दीप्तत्वमिव भवति; आयतां श्रुतिमाकर्ण्यायतत्वमिव; एवं करुणत्वादि ज्ञातव्यम् ॥ -२९—३८ ॥

(क०) प्रसङ्गाच्छ्रुतिजातीरुक्त्वा प्रकृतस्वरपरामर्शपूर्वकं स्थानभेदात्तेषां त्रैविध्यमाह—ते मन्द्रेति । ननु च्युतादयः पृथक्स्वराः स्युः; किं तेषामवस्थाऽन्तरापन्नषड्जादित्वकल्पनयेत्यत आह—त एवेति । द्वादशेति ॥ षड्जमध्यमग्रामद्वयापेक्षया क्रमप्राप्तान्विकृतस्वरान्लक्षयति—च्युतो ऽच्युत इत्यादिना । चतुःश्रुतिः षड्जो द्विश्रुतिर्विकृतः संश्चयुतो ऽच्युत इति द्विधा भवेत् । स च साधारणे स्वसाधारणे च्युतः, निषादस्य काकलीत्वे

इत्यभिगमनं निगमितम्[1] । तद्विवरणं च गद्यादिकमेव । अनुयागपर्यन्तसमाराधनसमनन्तरभाविस्वाध्यायश्च श्रुति-स्मृतीतिहास-पुराण-मन्त्रजप-सत्संवादाध्यात्मशास्त्रश्रवण-प्रवचनाद्यात्मा यथासम्भवं भगवच्छास्त्र-धर्मशास्त्रादिष्वनन्तरभावियोगोपकारकज्ञानसन्धुक्षणप्रयोजनः प्रतिपाद्यत इति तत्कालनित्यः सोऽपि 'द्वयमर्थानुसन्धानेन सह सदैवं वक्ता' इति गद्योक्तस्य द्वयवचनस्य शास्त्रीयकर्मान्तरानुपरोधेन यथावसरमुपनिपातादुपदिष्ट एवेति ज्ञायते । सदावचनं हि न निद्राकाले अशक्यत्वात् । न मौनकाले तद्विधिविरोधात्[2] । न मन्त्रान्तरादिसाध्यसमाराधनादिकाले तैरव[3] तदुपरोधात् । अतो यथावसरं तत्प्राप्तिः । एवं योगोऽपि[4] द्वयार्थानुसन्धानैकाग्र्यरूपः सर्वव्यापारोपरतिसुभगनिद्रापूर्वापरकालयोः "तत्पूर्वापररात्रेषु युञ्जानः" इत्याद्युक्तावसरलब्धयत्नलभ्यः[5] । श्रीवैकुण्ठगद्ये च स्वतन्त्रप्रपत्तिनिष्ठामेव विधाय "ततश्च प्रत्यहमात्मोज्जीवनायैवमनुस्मरेत्" इत्यारभ्य, परमपदपर्यङ्कनिलयस्य भगवतः परिपूर्णध्यानयोगमुक्त्वा, अनुसन्धानविशेषांश्चोपदिश्य, "श्रीमत्पादारविन्दं[6] शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत" इत्यनेनानन्यप्रयोजनो विचित्रो योगः प्रतिदिनकर्तव्यत्वेन विहितः । तदधिकारे च विस्तरेण दर्शयिष्यामः । नित्ये च "एवं शरणमुपगम्य तत्प्रसादोपबृंहितमनोवृत्तिस्तमेव भग-

[1] निर्णीतम्—ङ, छ; निर्दिष्टम्—ज.

[2] तद्विरोधात्—क, ख, ग, झ.

[3] तेनैव—क, ख, ग, च.

[4] अपि—क, ख, ग, ङ, च पुस्तकेषु न दृश्यते.

[5] अवसरयुक्तयत्नलभ्यः—क, झ; अवसरयत्नलभ्यः—घ; अवसरलब्ध्या युक्तयत्नलभ्यः—च, छ.

[6] पादारविन्दयुगलं—क, च, झ.

वन्तं सर्वेश्वरेश्वरमात्मनः स्वामित्वेनानुसन्धाय, अत्यर्थप्रियाविरतविशदतम-प्रत्यक्षतापन्नानुध्यानेन[2] ध्यायन्नासीत" इति समाराधनारम्भोक्तस्यानु-ध्यानस्य स्वादुतमस्य समाराधनवदेव अनन्यप्रयोजनकैङ्कर्यरूपतयावसरे प्राप्तिर्युक्ता, तस्मादनन्यप्रयोजनप्रधानतया परिपूर्णसमाराधनविशेषोप-देशिभिर्भाष्यकारैरर्थतः शास्त्रान्तरैश्च सिद्धमन्यदपि सर्वमनुज्ञातमिति विज्ञायते। अत एव हि तच्छिष्य-प्रशिष्यादयः पञ्चकालविभागेनैव भगवत्सेवां प्रत्यपीपदन्। प्रपत्त्यावृत्तिप्रसङ्गादिचोद्यानि तु निक्षेपरक्षान्ते[3] परिहृतानि।

अत्र यदुक्तं प्रपत्त्यङ्गत्वेनोपदेशाभावात् परित्याज्य इति तदसत्। भाष्यकारोक्तनित्यसमाराधनस्यापि तत एव परित्याज्यत्वप्रसङ्गात्। तच्चे-द्भगवत्प्रीत्येकप्रयोजनतयानुष्ठेयमित्यनुज्ञायेत तर्हि तदनुबन्धि सर्वमपि तद्वदनुज्ञायताम्। प्रपत्त्यङ्गसर्वधर्मस्वरूपत्यागविधिवादिनोऽपि हि[4] स्वामिनि भगवति दासभूतस्य प्रपन्नस्य स्वरूपप्राप्तां किङ्करवृत्तिमनुजानन्ति। यत्तु शातवार्षिकव्रतावधि विलम्बाक्षमत्वमुक्तं तत्तथैव। न ह्यस्य निष्पन्नो-पायस्य शातवार्षिकव्रतमनुष्ठेयं ब्रूमः। यथा हि नदीतरणाय नौकागमनं प्रतीक्षमाणाः पुरुषाः केचिल्लीलाद्यूतेन कालं यापयन्ति। केचित् पणबन्धद्यूतेन। द्यूतमर्यादानुपालनं चोभयेषां समानम्। तत्रानियतकाल-भाविनौकागमनसमये वैहारिका विहारद्यूतविच्छेदेनापि नदीं तरन्ति। बद्धपणास्तु यावद्द्यूतसमाप्ति विलम्बन्ते। तद्वदिहापीति तत्त्वविदां सम्प्रदायः।

[1] स्वामित्वेन सुहृत्त्वेन—क, ख, ग, च, झ.
[2] अनुसन्धानेन—घ, ङ, छ, ज.
[3] निक्षेपरक्षायां—क, ख, ग, च, ज, झ.
[4] हि—क, ख, ग, च, झ पुस्तकेषु नास्ति।

यच्चान्यदुक्तं योगशक्तौ तस्यैवोपायत्वस्वीकारः प्राप्नोतीति तदपि मन्दम्। स्वयोगमहिमप्रत्यक्षिततत्त्वत्रयाणां नाथमुनि-कुरुकेश्वरप्रभृतीनां प्राक्-परिगृहीतप्रपत्त्युपायैकनिष्ठानामेव पश्चादपि भगवत्प्रसादलब्धयौगिकभगवदानन्दास्वादस्य प्रसिद्धत्वात्; अन्यथा तथाविधानुसन्धानपूर्वकभाष्यकारोक्तसमाराधनादिशक्तौ तस्याप्युपायत्वस्वीकार[1]प्रसङ्गात्। तच्चेत् स्वामिकैङ्कर्यरूपमिति स्वादुतमतया[2] स्वयंप्रयोजनत्वेनोपादीयेत समाधावप्ययं समाधिकदरिद्र-सुखसन्दोहात्मनि समः समाधिः। प्रपन्नानुगुणं च यौगिकमनुसन्धानं शाण्डिल्यैस्[3]मृतावुच्यते—

याज्ञकालिकयोग-शक्तौ प्रपत्तिनिष्ठा-विरोधपरिहारः।

"ईदृशः परमात्मायं प्रत्यगात्मा तथेदृशः[4]।
तत्संबन्धानुसन्धानमिति योगः प्रकीर्तितः॥
योगो नामेन्द्रियैर्वश्यैर्बुद्धेर्ब्रह्मणि संस्थितिः।
प्रयुक्तैरप्रयुक्तैर्वा भगवत्कर्मविस्तरे॥" इति।

एतदनुबद्धमेव[5] द्वयार्थानुसन्धानम्। एतद्विरुद्धं तु राहुमीमांसकानां कबन्ध-मीमांसकानां चानुसंधानं वेदबाह्यमिति श्रीकृष्णमुनिभिरुक्तम्—

"चेतनस्त्वेक एवेति मतिर्या केवला क्रिया।
फलतीति मतिस्ते द्वे वेदाप्रामाण्यबुद्धिजे।
'स एनं प्रीतः प्रीणाति'ब्राह्मणस्यानुगे न ते॥" इति।

[1] स्वीकार—क, ख, ग, च, झ पुस्तकेषु नास्ति।
[2] स्वादुतमतया—क, ख, ग, च, झ पुस्तकेषु नास्ति।
[3] शाण्डिल्यस्मृतावपि—क, च, झ.
[4] अयमीदृशः—घ, ङ, छ, ज.
[5] एतदनुसन्धानमेव—क, ख, ग, ज, झ.

यत्त्वपरमुक्तम्, व्यासदक्षाद्युपदिष्टवर्त्मनापि स्ववर्णाश्रमोचितभगवदाज्ञानुपालनरूपदिनचर्यासिद्धिः; अतश्चोभयसंभेदे[1] कर्मणां परस्परोपरोधप्रसङ्गश्चेति, तत्र तावदविदितश्रौत-स्मार्त-वृत्तान्तानामयं परस्परोपरोधचोद्यावतारः। एवं ह्यत्र परिहृतं श्रीकृष्णमुनिभिः—

पाञ्चकालिकधर्मस्य स्मृत्युक्तकर्मभिर्नोपरोधः।

"पञ्चिष्टिर्द्वि[2]र्विहोमानां ससोमानां समुच्चयः।
यथा बहूनामेकस्मिन् तथैवास्यापि कर्मणः॥" इति।

न चात्र तावानप्युपरोधः।

अपि च तत्रापीदमभिगमनादिपञ्चकमनुप्रविष्टं दृश्यते। व्यास-स्तावत्—

व्यासस्मृतौ अभिगमनसंवादनम्।

"ब्राह्मे मुहूर्त उत्थाय धर्ममर्थं च चिन्तयेत्।
कायक्लेशं तदुद्भूतं ध्यायीत मनसेश्वरम्" ॥

इत्यारभ्य प्राभातिकस्नान-सन्ध्योपासनप्रकारमुपदिश्य,

"अथागत्य गृहं विप्रः समाचम्य यथाविधि।
प्रज्वाल्य वह्निं विधिवत्"

इत्यादिना प्रातर्होमं च विधाय, अनन्तरमाह—

"देवादीनां नमस्कुर्यादुपहारं निवेदयेत्।
दद्यात् पुष्पादिकं तेषां वृद्धांश्चैवाभिवादयेत्॥

[1] अतश्चेत्येव सर्वत्र पाठः। पूर्वपक्षानुवादे तु अन्यथेति दृश्यते।
[2] दर्वी—ख, ग, च.

गुरुं[1] चैवाप्युपासीत हितं चास्य समाचरेत् ।
वेदाभ्यासं ततः कुर्यात् प्रयत्नाच्छक्तितो द्विजः ॥
जपेदध्यापयेच्छिष्यान् धारयेच्च विचारयेत् ।
अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तमः ।
वैदिकांश्चैव निगमान् वेदाङ्गानि विशेषतः" ॥ इति ।

अत्र दक्षोक्तप्रक्रियया द्वितीयार्धयामसाध्यवेदाभ्यासादिषु [2]अदृष्टार्थांशो जपस्तोत्रशब्दाभ्यां जयाख्यसंहितायामुपलक्ष्यते । वृत्तिकर्शितस्य कस्यचित् दृष्टार्थांशो[3]ऽस्ति चेदभिगमनकालसङ्कोचेन परस्मिन्नुपादाने समन्वेति । अत्र देवनमस्कारोपहारनिवेदन-पुष्पादिप्रदानवचनादभिगमनं सिद्धम् । देवनमस्कारश्चात्र विष्णुनमस्कार एव स्वरसतः प्राप्तः । निरुपाधिकदेवत्वस्य देवतान्तरनमस्कारस्यापि तत्रैव विश्रमात् । अत एवादौ "ध्यायीत मनसेश्वरम्" इति ध्येयतयोक्त ईश्वरोऽपि जयादिष्विव सर्वेश्वरेश्वरो विष्णुरेव । "ईश्वरो विक्रमी धन्वी" इति च तन्नामसु[4] पठ्यते । उत्तरत्र[5] "न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम्" इति स्वयमेवाभिधानाच्च । इदमेव विष्णुनमस्कारादिरूपमभिगमनं तत्परशास्त्रेष्वपि नानाप्रकारमुपदिश्यते । "देवादीनां" इत्यादिशब्देन पित्रादिसंग्रहः ।

एवं प्रथमकालकर्तव्यमुक्त्वा द्वितीयकालसाध्यं समाराधनोपकरणसम्पादनरूपमुपादानमाह—

व्यासस्मृतौ उपादानसंवादनम् ।

[1] गुरुंश्चैव—क. ख, ग, च, झ.
[2] अदृष्टांशः—ख, ग.
[3] अदृष्टांशः—ख ; दृष्टांशः—क, ग, झ.
[4] इति च नामसु—क, ख, च, ज, झ.
[5] अत एवोत्तरत्र—क, ख, ग, च, झ.

"उपेयादीश्वरं चापि योगक्षेमार्थसिद्धये ।
साधयेद्विविधानर्थान् कुटुम्बार्थे ततो द्विजः" ॥ इति ।

एतच्च लौकिकेश्वराभिगमनं गत्यन्तरहीनस्यापद्विषयम् । स्मरन्ति हि—
"नगरप्रवेशनानि[1] च वर्जयेत्" इति । उक्तं च [2]श्रीशाण्डिल्यस्मृतौ—

"बुद्धरुद्रादिवसतिं श्मशानं शवमेव च ।
अटवीं राजधानीं च दूरतः परिवर्जयेत्" ॥ इति ।

कालपञ्चककृत्यं तत्र प्रपञ्चितं [3]यथायोगं सर्वैर्ग्राह्यम् । इदमेव चोपादानं भगवदर्थत्वेन भगवच्छास्त्रेषु विधीयते । अत्रापि 'कुटुम्बार्थे' इति न केवलं तादर्थ्यं विवक्षितम्[4] । तद्बुद्धेः सर्वत्र प्रतिषेधात् । अगीयत च[5] स्वयं भगवता—

"यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर" ॥ इति ।

अतो भगवदाराधनरूपयज्ञशिष्टेन कुटुम्बसंरक्षणमपि[6] भगवदाज्ञानुपालनरूपमेवेति तद्विवक्षया महर्षिणा 'कुटुम्बार्थे' इत्युक्तम् । 'धर्ममर्थं च चिन्तयेत्' इत्यारम्भोक्तार्थचिन्तनमपि धर्मशेषतया । कायक्लेशचिन्तनं तु क्लेशरहितोपायगवेषणार्थम् । स्मरन्ति हि मन्वादयः—

[1] प्रवेशनादि—क, झ.
[2] श्री—क, ख, ग, च, झ पुस्तकेषु नास्ति.
[3] यथायोग्यं—क, ख, ग, च, छ, ज, झ.
[4] 'कुटुम्बार्थे' इति वचने केवलतादर्थ्यमविवक्षितम्—क, ख, ग. झ.
[5] गीयते च—क, च, झ.
[6] कुटुम्बभरणमपि—क, ख, ग, च, झ ; कुटुम्बरक्षणमपि—ङ, छ.

"अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ।
अप्रयत्नागताः सेव्या गृहस्थैर्विषयाः सदा" ॥

इत्यादि ।

अथ तृतीयकालकृत्यमाह—"ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत्" इत्यादिना । स्नाने चैवं भगवदनुसन्धानमाह—

व्यासस्मृतौ इज्यासंवादनम् ।

"अभिमन्त्र्य जलं मन्त्रैरङ्गैर्वारुणैः शुभैः ।
भावपूतं तदव्यग्रं ध्यायन् वै विष्णुमव्ययम् ॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः" ॥ इति ।

तथा—

"त्रिपदां वात्र सावित्रीं तद्विष्णोः परमं पदम् ।
आवर्तयेद्वा प्रणवं देवं वा संस्मरेद्धरिम्" ॥ इति च ।

तर्पणेऽपि—

"आदावोङ्कारमुच्चार्य नामान्ते[1] तर्पयामि च ।
देवान् ब्रह्म-ऋषींश्चैव तर्पयेदक्षतोदकैः ॥
तिलोदकैः पितॄन् भक्त्या सूत्रोक्तविधिना ततः" ॥ इति ।

अत्र प्रणवपूर्वकत्वेन भगवदात्मकत्वानुसन्धानं विहितम् । एतदेव च नित्ये भाष्यकारैरपि दर्शितम्—"देवानृषीन् पितॄन् भगवदात्मकान् ध्यात्वा

[1] नमोऽन्ते—ग, च, छ.

सन्तर्प्य" इति। तृतीयकालसाध्यं साक्षादिज्यारूपं समाराधनमेवाह

"न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम्।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्॥
तद्विष्णोरिति मन्त्रेण सूक्तेन पुरुषेण च।
नैवाभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि॥
निवेदयीत स्वात्मानं विष्णावमलतेजसि।
तदात्मा तन्मनाः शान्तस्तद्विष्णोरिति मन्त्रतः" ॥ इति।

अत्र तद्विष्णोरित्यादेः स्तुतिः न याज्ञवल्क्यादिविहितप्रणवाद्यपकर्षपर एवं विष्ण्वाराधनस्य सर्वोत्तरत्वकण्ठोक्तेः पूर्वापरग्रन्थेषु सामान्यतो विशेष देवतान्तरार्चनवचनमन्तवत्परिमितफलार्थिप्रतिबुद्धेतराल्पमेधसः पुरुषान कृत्येति मन्तव्यम्। गीयते च "अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम इति। उक्तं च[1] महाभारते—

"ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः।
प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम्॥" इति।

आह च बादरायणः—

"नान्यं देवं नमस्कुर्याद्विष्णुपादाब्जसंश्रयः।" इति।
"कर्मणां परिपाकत्वादाविरिञ्चादमङ्गलम्।
इति मत्वा विरक्तस्य वासुदेवः परा गतिः॥" इति च।

[1] उत्तरत्र च—क, ख, ग, ज, झ.

THE VAISNAVOPANISAD-S

TRANSLATED INTO ENGLISH

(ON THE BASIS OF THE COMMENTARY OF S'RĪ UPANIṢAD-BRAHMA-YOGIN)

BY

T. R. S'RĪNIVĀSA AYYAṄGĀR, B.A., L.T.

(Retired Head Master, Kalyāṇa-sundaram High School, Tanjore)

AND EDITED BY

PAṆḌIT S. SUBRAHMAṆYA S'ĀSTRĪ, F.T.S.

THE ADYAR LIBRARY

1941

THE A-VYAKTOPANIṢAD

[This Upaniṣad, (otherwise known as the A-vyakta-nṛ-siṃhopaniṣad), which is the Sixty-eighth among the 108 Upaniṣad-s and forms part of the Sāma-veda, deals with the cosmogony of the world and the coming into existence of the various orders of creation, all through the potency of the Nṛ-siṃhānuṣṭubh-mantra, which it expounds, expatiates upon the greatness of Dhyāna-yajña, narrates the story of Indra and his achievement of the overlordship of the celestial and the terrestrial worlds and winds up with the demonstration of the means to be adopted for the attainment of the state of the Paramātman.]

KHAṆḌA I

The State of the Non-differentiated Brahman prior to the Creation of the World

In times of hoary antiquity, (long before the phenomenal world came to be and man's mental vision became clouded, through the influence of Māyā), this (world) did not exist at all, even to the slightest extent,

(from the point of view of the knower of the Brahman). Neither the celestial region, nor the mid-ethereal region, nor the terrestrial region was there. There was then (the peerless Brahman) alone, of the form of absolute radiance, that has neither beginning, nor end; that is neither subtle, (like the tiniest atom), nor gross in form; that is devoid of form, and is yet possessed of form, (and is hence known as the A-vyakta); that is imperceptible and yet full of (sentience and) bliss; (that remains as the peerless, non-differentiated Brahman alone, whether the deluded perception relating to the existence of things apart from the Ātman, experienced by one ignorant of the Ātman, persists or not). (1)

The Coming into Existence of the Parame-ṣṭhin

That (peerless radiant Brahman) became split into two parts. One was of a green colour and the other red. Of these, what was red, was of the form of the Parama-puruṣa. What was green, assumed the form of Māyā. (Through the combined influence of Kāla, inexorable time and Karma), they came together. (Through their conjunction,) the virility of the two, (the Puruṣa and the Prakṛti, the primordial vital principle and the primordial originant of the material world), attained satisfaction in this manner. That grew gradually and developed into a golden egg. In course of time it ripened. Thence, (from the lotus-flower, springing out of the navel of Mahā-viṣṇu, which formed the receptacle of the A-vidyā'ṇḍa, the ripe egg of

ignorance), the Parame-ṣṭhin, (Brahman, the creator), came into existence. (2)

The Desire of Parame-ṣṭhin to know the Nature of His Work

He, (the Parame-ṣṭhin), desired to know thus: "What is my origin? What is (the nature of) my work?" Then, a voice from an unseen source addressed him thus: "O Sire! Prajā-pati, thou art sprung from (Nārāyaṇa, that has attained the state of) the A-vyakta, (the non-distinct primary germ, whence all the phenomena of the material world are developed) and thy work is distinct." (Raising his eyes in the direction of the voice), he, (the Parame-ṣṭhin), replied thus: "What, Ho! is that A-vyakta, wherefrom I have originated? What is that distinct work of mine?" The voice made reply thus: "That radiance, (whence thou hast originated), O Good sire! is verily imperceptible. What is verily imperceptible is the (non-distinct) A-vyakta. Shouldst thou desire to know that, then do thou approach me, (that am of the form of Brahma-vidyā)." To which he replied thus: "Who art thou, that speakest with the voice of the Brahman? Announce thyself unto me." Whereupon the voice said thus: "Do thou first seek to know who I am, by performing penance, (with thy senses thoroughly abated and thy mind remaining one-pointed)." Then, the Parame-ṣṭhin applied himself for a thousand years with pertenacity to the acquisition of the knowledge of the Brahman, applied himself with pertenacity. (3)

KHAṆḌA II

THE VISION, (THROUGH THE EYE OF KNOWLEDGE), BY THE PARAME-ṢṬHIN, OF THE ĀNUṢṬUBHĪ-VIDYĀ

Then, (after undergoing severe penance), he, (the Parame-ṣṭhin), saw the exquisite lore of the Ānuṣṭubhī-(mantra, in the metre of that name), whose parts form other Vedic mantra-s, wherein the Brahman is established, as also the Vis've-deva-s, (or all the worlds, as well as the gods and the Veda-s), take their firm stand. He who does not know that Mantra, (it being the mainstay of all other Mantra-s), what shall he do with the other Veda-s ? (1)

THE VISION OF NṚ-SIṂHA, THROUGH THE ĀNUṢṬUBHĪ-VIDYĀ

Having known the said Vidyā, (as the king of the Mantra-s and the quintessence of all the conclusions arrived at by the various systems of Vedānta), he, (the Parame-ṣṭhin), desired to know the red one, (the Parama-puruṣa, from whom he originated). (For that purpose), he resorted to the chanting of the Ānuṣṭubhī-vidyā, (which he had attained through his penance) and for a thousand years he continued the chanting of the (metrical) feet (of the Mantra, with his face turned heavenwards). For a thousand years more, he similarly chanted the same Mantra, syllable by syllable. Thereafter, he saw (the Lord Nṛ-siṃha) full of radiance, in

the embrace of the Goddess Lakṣmī, perched on his vehicle of Su-parṇa, (Garuḍa), with his crest covered by the hood of Ādi-s'eṣa, with the face of a lion and the body of a human being, and three eyes of the character of the Sun, the Moon and fire, the carrier of sacrificial offerings, (standing before him, with his real A-vyakta-form concealed in the distinct, radiant and auspicious form of Nṛ-siṃha, condescending, out of the plenitude of his grace, to reward Parame-ṣṭhin for his penance). (2)

Prayer in Praise of Nṛ-siṃha

Thereupon, Prajā-pati, (the Parame-ṣṭhin), prostrated himself (on Nṛ-siṃha's feet) thus, (muttering the prayer in praise of Nṛ-siṃha, beginning with the words), "Salutation (unto thee, O Lord!) Salutation!" He then praised him with the self-same Anuṣṭubhī Ṛc: "The fierce," said he, (the Parame-ṣṭhin). He, (the Lord Nṛ-siṃha), was verily fierce, he having assumed the form of the king of beasts. "The valiant," said he, (the Parame-ṣṭhin). He, (the Lord Nṛ-siṃha), was verily valiant, he being possessed of valour. "The Great Viṣṇu," said he, (the Parame-ṣṭhin). He, (the Lord Nṛ-siṃha), was verily the greatest among the great, he having established himself entirely pervading heaven and earth. "The blazing," said he, (the Parame-ṣṭhin). He, (the Lord Nṛ-siṃha), verily stands blazing as it were. "Facing all directions," said he, (the Parame-ṣṭhin). He, (the Lord Nṛ-siṃha), has his face verily turned in all directions, assuming a prodigious form comprising

जाग्रतीति । महाराजस्य-यक्ष्मणः, पादपङ्कजयोः रेणौ-रजोभूते । मच्छि-रसि मम मूर्धनि । महाराजचरणयोः सविस्रम्भं सेवातत्परे इत्यर्थः । जाग्रति-सति जागरूके । एतत् स्वामिपोषितस्वकलेबरनिरर्थकत्वादिकम् । कथं भविष्यति। यावताहं सजीवो भवामि तावता स्वामिसेवया स्वशरीरधारणं सार्थमेव करिष्यामीति भावः ।

तथा चेन्द्रियाणां प्रतिनियतस्य समुद्यमस्य प्रदर्शनानन्तरं यदवलोकितं तदेव वदति **ततश्चेति** । ततश्च-पूर्वनिवेदितविषयेभ्योऽनन्तरम् । **तस्मिन् पुरे** इति । तस्मिन् पुरे । अहम् । स्थानं-स्थातुं वृत्तान्तादिकं ज्ञातुं च समुचितं

पाण्डुः—(स्वगतम्) वायुना संचार्यमाणं कफपित्तयोर्युगं तद्भवेत्। (प्रकाशम्) ततस्ततः।

कर्णमूलः—तस्मादन्तःपुरचारिणः पङ्गुयुग्मात् तत्संचारयतः पुरुषाच्च प्रवृत्तिरुपलब्धुं शक्येति तच्च तं चोपासर्पमहम्। स च तच्च मयि दृष्टमात्रे—

देशम्। विचेतुं-अन्वेष्टुम्। (विवेक्तुं इति पाठे तन्नगरस्थस्थानानि विविच्य ज्ञातुमित्यर्थः।) समन्तात्-परितः। चरन् सन्। क्वचित्-कस्मिंश्चित् प्रदेशे। त्रिषु आशयेषु-प्रधानेषु त्रिषु नगरस्थलेषु; अन्यत्र नाभेरधस्तात्, नाभिहृदययोर्मध्ये, हृदयस्योर्ध्वं चेति त्रिषु स्थानेषु। स्थितिमत्-अधिगतास्पदम्। केन च-केनचित् पुरुषेण, केनचित् धातुना च। सशङ्कं-सवितर्कं यथा तथा। सञ्चारितं-नीयमानम्। पङ्गुयुग्मं-द्वौ पङ्गू पुरुषौ। अप्यपश्यम्-अपि चाद्राक्षम्। नियमनिष्ठानां पूर्व-निर्दिष्टानां ज्ञानेन्द्रियादीनाम् अवेक्षणानन्तरं त्रीनप्येतान् पुरुषानद्राक्षमिति भावः। एते च त्रयस्त्रिदोषा एव नान्ये। सर्वशरीरव्यापिनामपि तेषां वात-पित्त-कफानां नाभेरधः, हृन्नाभ्योर्मध्ये, हृदयस्योर्ध्वं च क्रमेण स्थानानि निर्दिष्टानि। "ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः" इति। तेषु दोषद्वयस्य पङ्गुत्वम् इतरस्य वातस्य तयोर्नेतृत्वं च "पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्" इत्यादिना सुप्रसिद्धं वैद्यके। इदं च तत्त्वं वक्ष्यमाणेन वायुनेतिवाक्येन पाण्डुः स्वयं विवृणोति॥ २६॥

तस्मादिति। अन्तःपुरे चरतीति अन्तःपुरचारि तस्मात्। पङ्गु-युग्मात्-स्वतन्त्रचलनासमर्थात् पित्त-कफाख्यदोषद्वयात्। तौ दोषौ सञ्चारयतः-स्वशक्त्या समन्तान्नयतः। पुरुषात्-वाताभिधात दोषाच्च। प्रवृत्तिः-विपक्षसम्बन्धी व्यापारः। सः-संचारयन् पुरुषश्च। तत्-पङ्गुयुग्मं च। मयि-कर्णमूले। दृष्ट-मात्रे सति। यावताहं तेषां दृग्गोचरोऽभवं तदुत्तरक्षण एव तैर्वक्ष्यमाणरीत्या प्रोक्तमिति यावत्।

भद्र गच्छ परिसर्प मा कुतो देशतस्त्वमसि नन्विहागतः ।
कस्य वा वद परिग्रहो भवानित्यपृच्छदथ सोऽपि तच्च माम् ॥ २७ ॥

भो भो भद्रमुखाः परिग्रहतया कस्यापि नाहं स्थितो
रात्रिं नेतुमिहागतोऽस्मि नियतं सायाह्नि भिक्षाटनम् ।
स्थानं मे यदि शक्यतेऽपगतये प्रातस्तदा दीयता-
मित्युक्ते तु मया तदन्तरुदभूदन्योन्यमालोचना ॥ २८ ॥

भद्रेति । भद्र-हे सुमुख । मा परिसर्प-मा समायाहि अत्र । गच्छ-प्रदेशमिमं विहाय बहिर्याहि । भवान् । कस्य वा पुरुषस्य । परिग्रहः-परिजनः । भवसीति शेषः । वद-स्पष्टं ब्रूहि । नन्विति संबोधने । इह-एतत्प्रदेशे । कुतः-कस्मात् । देशतः-देशात् । त्वम् । आगतोऽसि । इति-एवंप्रकारेण । सः-नेता पुरुषोऽपि । तत्-षड्गुयुग्मं च । माम् । अपृच्छत् । तेषामपि त्रयाणां पुरुषाणां जीवराज-तन्मन्त्रिणोः शासनेन नियन्त्रितत्वात् राजद्रोहशङ्कया तस्यापरिचितस्य पुरुषस्य तत्त्वावगमे तस्य बहिः प्रेषणे च त्वरातिशयश्चित्तोद्वेगश्चानेन सूचितः ॥ २७ ॥

तस्य कर्णमूलोक्तमुत्तरप्रकारमपि **भो भो भद्रमुखाः** इत्यादिना विवृणोति । भो भो भद्रमुखाः-हे त्रयः पुरुषाः । अहम् । कस्यापि-कस्यचिदपि । परिग्रहतया-परिजनत्वेन । न स्थितः-न भवामि । नाहं कस्यचित् सेवक इत्यर्थः । सायाह्नि-सायन्दिने । ममेति शेषः । भिक्षाटनं-भिक्षार्जनार्थं संचारः । नियतं-नियमत्वेन विद्यते । अन्वहं सायमहं भिक्षार्थं बहिः पर्यटामीत्यर्थः । इह । रात्रिं-रात्रिकालं । नेतुं-यापयितुत् । आगतोऽस्मि । नान्यत् प्रयोजनमत्रागमनस्येति सूचयन् तेषां स्वविषये शङ्कां निवारयति । प्रातः । अपगतये-निर्गमनाय । मे-मम । स्थानं-अवस्थितये समुचितमवकाशम् । यदि शक्यते-साध्यं भवति चेत् । दातुमिति

अनन्तरं च 'कार्यान्तरव्यापृते च राजनि, नूतनपुरुषपरिमार्गणपरे च नागरिके, भिक्षो रात्रौ नावसरस्त्वादृशामत्र शयितुम्' इत्युक्तवत्सु तेषु, 'क्व कार्ये राजा व्याप्रियते कुत एवं भिक्षुकाणामप्युपरोधः' इति पृष्टवानस्मि।

पाण्डुः—ततस्ततः।

कर्णमूलः—तेऽपि मां भद्रेत्यामन्त्र्य समकथयन्।

शेषः। तदा दीयताम्। प्रातरुत्थाय बहिर्गमिष्यामि, तावत्पर्यन्तं रात्रावत्र स्थीयतामिति यद्यवकाशदानपुरस्सरम् अनुज्ञाप्यते तर्हि तिष्ठामीति भावः। इति। मया। उक्ते सति। तदन्तः-तेषां मध्ये। अन्योन्यं-परस्परम्। आलोचना-मन्त्रणम्। उदभूत्-प्रावर्तत। मदुत्तरदानानन्तरमेव परस्परं ते समालोचनार्थं प्रवृत्ता इति यावत् ॥ २८ ॥

अनन्तरमिति। तेषामालोचनानन्तरमित्यर्थः। उक्तवत्सु तेषु-तैरभिहिते सतीत्यर्थः। तैरुक्तमेव विशदयति **कार्यान्तरेत्यादिना**। राजनि-जीवराजे। कार्यान्तरेषु-राजकीयव्यापारेषु, व्यापृते-समुद्युक्ते सति। नागरिके-नगररक्षाधिकृते पुरुषे। नूतनपुरुषाणां-आगन्तुकत्वेन शङ्कनीयानां नराणाम्, परिमार्गणपरे-अन्वेषणासक्ते सति। नागरिकशब्दस्य 'नगररक्षकाणामधिकारी' इति शाकुन्तलव्याख्यानम्। भिक्षो इति संबोधनेन व्यवस्थादिभिरनियन्त्रितानां नराणाम् अस्मिन् सङ्कटावहे समये विशिष्य रात्रिवेलायां नात्र शयनाद्यर्थम् अवकाशं दातुं शक्यत इति भावः। तपस्विभिः भिक्षुभिः संकटः कोऽपि न भवेत्, ततः कुतो भिक्षुकाणामुपरोधः पुरेऽस्मिन् क्रियत इति पृष्टवान् कर्णमूलः।

तेऽपीति। भद्रेति सौजन्योचितं संबोधनम्, यच्च कर्णमूलस्य रिपुजनपदं प्रविश्य स्थितस्य किञ्चिदिवाश्वासकम् अभिनन्दनीयं चाभवत।

पुण्डरीकपुरे मन्त्रिप्रेरितः परमेश्वरम् ।
आराद्धुं गतवान् राजा मनोद्वारेण तिष्ठति ॥ २९ ॥

किञ्च—

शत्रुनिरुद्धे च पुरे परिसर्पाशङ्क्या नगरगुप्त्यै ।
नागरिकशिक्षणमिति प्रोवाचेमां तदानीं ते ॥ ३० ॥

पुण्डरीकपुर इति । राजा-जीवः । मन्त्रिप्रेरितः-सचिवेन बोधितः सन् । परमेश्वरं-ईशानम् । आराद्धुं संपूजितुम् । गतवान् । (गत्वा च संप्रति) मनोद्वारेण-निदिध्यासनाधिकरणभूतस्य चित्ताख्यस्यान्तःकरणस्य द्वारा । पुण्डरीकपुरे । तिष्ठति । जीवराजो मन्त्युपदेशानुरोधेन मनोद्वारा गत्वा महेश्वरं ध्यानादिना समाराधयन् हृत्पुण्डरीकमधिवसतीति भावः । अनेन श्लोकेन 'क्व कार्ये राजा व्याप्रियते' इत्यस्य कर्णमूलकृतस्य प्रश्नस्य प्रत्युत्तरं दत्तम् ॥ २९ ॥

किञ्च इत्यनेन 'कुत एवं भिक्षुकाणामप्युपरोधः' इत्येष द्वितीयः प्रश्नः समाधीयते । **शत्रुनिरुद्धे चेति** । पुरे-जीवस्य नगरे ; शरीर इति यावत् । शत्रुनिरुद्धे-यक्ष्मपक्षीयैः आमयरूपैः प्रतिपक्षजनैः सति समावृते । परिसर्पाणां-गुप्तचारिणां चारपुरुषाणाम्, शङ्क्या-वितर्कवशात् । नगरगुप्त्यै-जीवराजनिवासार्हस्य पुरस्य शत्रुपक्षीयेभ्यः संरक्षणाय । नागरिकशिक्षणं-नागरिककृतं शिक्षणमिति मध्यमपदलोपी समासः ; नगरपरिपालनकर्माधिकृतेन विहितो नियोगप्रकारोऽयं य एष भिक्षुकाणामप्यत्रोपरोधो नामेति भावः । नागरिक इति रक्षापुरुषाधिकारी य एव नगरगुप्तौ नियमेनाधिकृतो भवति । इति-एवंरीत्या । ते षड्गुप्रभृतयः । तदानीं-मत्कृतप्रश्नावसरे । इमां-वाचमित्यर्थः । प्रोवाचत्-प्रत्यवदत् ॥ ३० ॥

अत्रान्तरे विजृम्भमाणं यामिककलकलमशृणवम्। श्रुत्वा च कथंचिल्ल-ब्धावकाशः स्वामिकार्यगौरवादागतोऽस्मि ।

पाण्डुः—(आकाशे लक्ष्यं बध्वा सोपहासम्) रे रे मन्त्रिहतक, अस्मज्जयार्थं सहजवैरिणं रसं साधयितुं किल तव प्रयत्नः । तर्हि पश्य—

साधितोऽपि स किं कुर्याद्रसः पथ्यक्रमं विना ।
जिह्वाचापलमुद्भाव्य स एव ध्वंसयिष्यते ॥ ३१ ॥

अत्रान्तर इति । यामिककलकलं-यामिकानां-यामिन्यां पर्यायतः प्रतिप्रहरं नगररक्षामाचरताम्, कलकलं-कोलाहलशब्दम्। प्रतिपन्थिचाराविष्टं नगरमिति प्रतिश्रुत्य प्रहररक्षकैर्विहितं संक्षोभसहितसंरावमिति यावत्। कथंचिदिति-सुबहुभी राजपुरुषैर्यामिकैरपरैश्च नगरमार्गाणां सर्वत्र संकुलीभूतत्वात् तेषां मध्यात् कस्य-चिद्दैदेशिकस्य मादृशस्य विनिर्गमनं दुश्शकमभूदिति भावः ।

आकाश इति । आकाशे लक्ष्यं बध्वा-तिर्यगन्तरिक्षे दृष्टिं साकूतं प्रसार्येत्यर्थः । केनचित् सह संलपन्निव स्वयमेवाकाशबद्धदृष्टिर्यदभिभाषणं तदाकाश-भाषितमिति नाटकेषु व्यवह्रियते । "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम्" इति तल्लक्षणम् । अस्मज्ज-यार्थं-यक्ष्मपक्षीयाणां सर्वेषां रोगसमूहानां विजयार्थम् । सहजवैरिणं रसं-सर्वेषा-मपि व्याधीनां प्रकृत्यैव प्रत्यर्थिभूतं पारदम्। तथा राजनिघण्टुः—"पारदः सकलरोगनाशनः षड्रसो निखिलयोगवाहकः । पञ्चभूतमय एष कीर्तितो देह-लोहपरसिद्धिदायकः" इति । अथ विज्ञानशर्मणा विनिर्मितस्य स्वेषां विनाश-हेतोरुपायस्यापि विघातहेतुकं स्वालोचितमुपायान्तरं विनिर्दिश्य स्ववैरिणं पाण्डु-स्तर्जयति **तर्हि पश्येत्यादिना** ।

साधितोऽपीति । स रसः-पारदः । साधितोऽपि-परमेश्वरप्रसादाधिग-मादिद्वारा देहसिद्धिकरत्वेन सम्पादितसंस्कारोऽपीत्यर्थः। पथ्यक्रमं-औषधगुणाभि-

USĀNIRUDDHAM

A PRAKRIT POEM IN FOUR CANTOS

BY

RĀMA PĀNIVĀDA

EDITED BY

PAṆḌIT S. SUBRAHMANYA SASTRI

AND

DR. C. KUNHAN RAJA

THE ADYAR LIBRARY

1941

FOREWORD

THE Usāṇiruddham is a small poem written in Prakrit language by Rāmapāṇivāda, a poet of Malabar. Pāṇivāda means one who beats (on the drum) with his hands. When the Cākyārs enact Sanskrit dramas in Malabar temples, members of the Nambiyār caste beat on the drum. Rāma belonged to that caste and as such he was intimately connected with the institution of staging Sanskrit dramas in temples, and consequently he had opportunities of being familiar with Prakrit. He was, besides, a good scholar of Prakrit as well as of Sanskrit. He has also written Sanskrit poems.

It is supposed that he lived about two hundreds years ago. There is much controversy about his identity and his relation with other well-known names of Malabar. All that can be said with certainty is that he is comparatively a recent author. His teacher is one Nārāyaṇa Bhaṭṭa. But that gives no clue to his identity or age. There have been Nārāyaṇas and Nārāyaṇas in Malabar.

Rāma Pāṇivāda has written another short Prakrit poem called the Kaṃsavaho, which has already been published by Prof. Upadhye of Bombay. He has written a commentary on the Prākṛtaprakāśa of Vararuci and we have undertaken the publication of that work also from the Adyar Library. Sufficient manuscript-copies of that work are available.

The text of the Prākṛtaprakāśa as current in South Indian Manuscripts shows considerable variations from the text as is now available in print. Thus this commentary will be of great interest to students of Prakrit. In this commentary he also quotes from well-known Prakrit works like Setubandha and Hāla's Gāthāsaptaśatī. Here also variations are noticed from the printed texts.

The Prakrit as found in the Kaṃsavaho (already published) and in the Usāṇiruddham (now being published),

coming from the pen of an eminent scholar of Prakrit grammar, has its own importance for the study of the language and its grammar through its various stages of evolution. It is mainly on this account that the Adyar Library has taken up the publication of the poem.

During the last thirty years the Bhāsa problem has become very prominent in the region of Oriental Researches. It has been argued that in the dramas now available in print as the works of Bhāsa there are evidences of the presence of Prakrit at a stage anterior to the date of Kālidāsa and as such this is taken as a very weighty evidence for the genuineness of these dramas as the works of Bhāsa. Did such pre-Kālidāsa Prakritisms disappear completely by the time of Kālidāsa or are they preserved in certain corners of India where Prakrit has been never a living language but has been current only as a literary language just like Sanskrit? Do the so-called pre-Kālidāsa Prakritisms serve as safe foundation for the edifice of the Bhāsa Theory?

It is hoped that editions of Prakrit poems of a comparatively recent period and of works dealing with Prakrit grammar written by persons who were scholars in Prakrit Language and Literature just as in Sanskrit, will throw some light on some of the problems. Prakrit cannot be arranged in an evolutionary series on a chronological basis and may have to be arranged on a geographical basis also.

Although the work appears under the joint editorship of Paṇḍit S. Subrahmanya Sastri and myself, the major part of the work (and the more important portion too) is contributed by Paṇḍit Subrahmanya Sastri. Mr. K. Madhava Krishna Sarma, M. O. L., a former student of mine and Mr. Ramachandra Sarma both members of the Adyar Library Staff have been assisting the editors in preparing the work for the press and are also associated with us in the course of the publication of the work.

Adyar Library
15th March 1941

C. KUNHAN RAJA

उसाणिरुद्धं

पढमो सग्गो

सिरि-गण-वइणो णमो

श्रीगणपतये नमः

॥ अ-विग्घं होदु ॥

॥ अविघ्नं भवतु ॥

भद्दस्स वो भत्ति-उणळ्ळिआणं भवेज्ज णिच्चं भअवं गणेसो ।
दाणेण जो पीणइ माणसाइं वणीवआणं व महु-व्वआणं ॥

भद्राय वो भक्तिगुणाश्रितानां भवेन्नित्यं भगवान्गणेशः ।
दानेन यः प्रीणयति मानसानि वनीपकानामिव मधुव्रतानाम् ॥ १ ॥

अ-बोह-णिद्दा-विहळो वि लोओ जिस्से पसाए सइ संपबुद्धो ।
सच्छन्ददो बज्झइ कव्व-गुम्भं चित्तम्मि णो भासउ भारई सा ॥

अबोधनिद्राविह्वलोऽपि लोको यस्याः प्रसादे सति संप्रबुद्धः ।
स्वच्छन्दतो बध्नाति काव्यगुम्भं चित्ते नो भासतां भारती सा ॥ २ ॥

संभोअ-सिङ्गार-रस-प्पडिट्ठं सअं व संभाविअ दंसअन्तं ।
एक्कम्मि गत्ते ठिअमेक्क-भावं जं किं पि दिव्वं मिहुणं णमामि ॥

संभोगश्रृङ्गाररसप्रतिष्ठां स्वयमिव संभाव्य दर्शयत् ।
एकस्मिन्गात्रे स्थितमेकभावं यत्किमपि दिव्यं मिथुनं नमामि ॥ ३ ॥

भिज्जन्त-देच्चिन्द-भुअन्तराणं स-ळोहिआ जस्स णहाणँ सोहा ।
संझाणुळिद्धं परिहोइ जोण्हं स णो मणो वच्चउ मच्च-सिङ्घो ॥

भिद्यमानदैत्येन्द्रभुजान्तराणां सलोहिता यस्य नखानां शोभा ।
संध्यानुस्पृष्टां परिभवति ज्योत्स्नां स नो मनो व्रजतु मर्त्यसिंहः ॥ ४ ॥

साहिच्च-संताण-ळअङ्कुराणं बीआइँ कारुण्ण-जळुक्खिवआइं ।
गुरूणँ पाअम्बुअ-चुम्बिआइं रआइँ सीसेण समुप्फुसामि ॥

साहित्यसंतानलताङ्कुराणां बीजानि कारुण्यजलोक्षितानि ।
गुरूणां पादाम्बुजचुम्बितानि रजांसि शीर्षेण संस्पृशामि ॥ ५ ॥

अत्थावबोहम्मि पहाण-भूदे गोणत्तणेणोवअरन्ति सद्दा ।
ते सक्कआ वा उण पाअडा वा बुहाणँ को तत्थ विसेस-सङ्गो ॥

अर्थावबोधे प्रधानभूते गौणत्वेनोपचरन्ति शब्दाः ।
ते संस्कृता वा पुनः प्राकृता वा बुधानां कस्तत्र विशेषसङ्गः ॥ ६ ॥

ण मच्छरो होस्सइ मारिसेसुं महा-मईणं मउवञ्जएसुं ।
णद्दन्तएसुं णवरं घणेसुं णद्दन्ति सिङ्घा ण उ दद्दुरेसुं ॥

न मत्सरो भविष्यति माद्दशेषु महामतीनां मृदुप्रज्ञेषु ।
नर्दत्सु केवलं घनेषु नर्दन्ति सिंहा न तु दर्दुरेषु ॥ ७ ॥

उसाणिरुद्धं त्ति मए णिबद्धं जं किं पि कव्वं जदु-णाह-देव्वं ।
सुदं सुणन्ताणँ वि जं ण तप्पी जहिं खु वण्णिज्जइ वासु-देवो ॥

उषानिरुद्धमिति मया निबद्धं यत्किमपि काव्यं यदुनाथदैवम् ।
श्रुतं शृण्वतामपि यन्न तृप्तिर्यस्मिन्खलु वर्ण्यते वासुदेवः ॥ ८ ॥

जदुस्स वंसे जळहि-प्पहूदे जअण्णिवासो जणिऊण देवो ।
जसोहिँ जोण्हा-धवळेहिँ लोए जणेइ चन्दो व्व मह-प्पआसे ॥

यदोर्वंशे जलधिप्रभूते जगन्निवासो जनित्वा देवः ।
यशोभिर्ज्योत्स्नाधवलैर्लोकानजनयच्चन्द्र इव महाप्रकाशान् ॥ ९ ॥

पळम्ब-केसि-प्पमुहा जहिन्तो ळहन्ति देच्चिन्द-भडा विणासं ।
दुव्वार-तेओ-भर-दूसहादो महन्धआरा विअ भक्करादो ॥

प्रलम्बकेशिप्रमुखा यस्मादलभन्त दैत्येन्द्रभटा विनाशम् ।
दुर्वारतेजोभरदुःसहान्महान्धकारा इव भास्करात् ॥ १० ॥

सळ्ळं समुक्खाणिअ मेइणीए कंसाभिहं किंचण साणुबन्धं ।
रम्मेण धम्मोसहि-ळेवणेणं करेइ तिस्से वण-रोवणं जो ॥

शल्यं समुत्खाय मेदिन्याः कंसाभिधं किंचन सानुबन्धम् ।
रम्येण धर्मौषधिलेपनेनाकरोत्तस्या व्रणरोपणं यः ॥ ११ ॥

जेण व्व वेउण्ठ-विओअ-दुक्खं विणोदअन्तेण व भूरि-सोक्खं ।
संपाइआणन्त-सुवण्ण-सोहं णिम्माविअं धाम समुद्द-मज्झे ॥

येनैव वैकुण्ठवियोगदुःखं विनोदयतेव भूरिसौख्यम् ।
संपादितानन्तसुवर्णसौधं निर्मितं धाम समुद्रमध्ये ॥ १२ ॥

अ-मन्द-सुन्देर-गुणाहिरामा कूअण्ड-ळट्ठी व मणो-भवस्स ।
विअब्भ-राअस्स सुआ मिअच्छी हत्थे कआ जेण अ रुप्पिणी सा

अमन्दसौन्दर्यगुणाभिरामा कोदण्डयष्टिरिव मनोभवस्य ।
विदर्भराजस्य सुता मृगाक्षी हस्ते कृता येन च रुक्मिणी सा ॥ १३ ॥

ताअं च माआ-मणुओ तणूअं पज्जुण्ण-सण्णं जणएइ सोअं ।
समत्थ-संतोस-अरो वसन्तो चूद-प्पवाळं व वण-त्थळीअं ॥

तस्यां च मायामनुजस्तनूजं प्रद्युम्नसंज्ञमजनयत्सोऽयम् ।
समस्तसंतोषकरो वसन्तश्चूतप्रवालमिव वनस्थल्याम् ॥ १४ ॥

पिणाइणा ळोअण-वीइ-होत्ते हुअस्स पुव्वं कुसुमाउहस्स ।
विओ भवो सो रमणो रईए तआ णिरुद्धं तणअं ळहेइ ॥

पिनाकिना लोचनवीतिहोत्रे हुतस्य पूर्वं कुसुमायुधस्य ।
द्वितीयो भवः स रमणो रतेस्तदाऽनिरुद्धं तनयमलभत ॥ १५ ॥

विसट्ट-कन्दोट्ठ-विसाळ-णेत्तो स तुङ्ग-चङ्गो घण-सामळङ्गो ।
उस त्ति बाणस्स कुमारिआए कआ वि दिट्ठो सिविणे णिसाअं ॥

विकसितेन्दीवरविशालनेत्रः स तुङ्गसौन्दर्यो घनश्यामलाङ्गः ।
उषेति बाणस्य कुमारिकया कदाऽपि दृष्टः स्वप्ने निशायाम् ॥ १६ ॥

बाहाहिँ साहाहिँ व घोप्पमाणा थणेहिँ गुच्छेहिँ व पीडअन्ती ।
ळअ व्व सा बाळ-रसाळ-रुक्खं सिग्घं तमाळिङ्गइ साणुराअं ॥

बाहाभ्यां शाखाभ्यामिव गृह्णती स्तनाभ्यां गुच्छाभ्यामिव पीडयन्ती ।
लतेव सा बालरसालवृक्षं शीघ्रं तमालिङ्गत्सानुरागम् ॥ १७ ॥

तदो पबुद्धा सहस व्व मुद्धा मणो-पिअं बालम-विक्खमाणा ।
चिरं परुण्णा सअणे लुढन्ती भिसं विसण्णा विळवेइ कण्णा ॥

ततः प्रबुद्धा सहसैव मुग्धा मनःप्रियं बालमवीक्षमाणा ।
चिरं प्ररुदिता शयने लुठन्ती भृशं विषण्णा व्यलपत्कन्या ॥ १८ ॥

कहिं सि हा सुन्दर मन्द-भग्गं परिच्चअन्तो पणआउळं मं ।
मुहम्बुअं तुज्झ मए खणद्धं दिट्ठं हरिच्चन्द-उरं व णट्ठम् ॥

क्वासि हा सुन्दर मन्दभाग्यां परित्यजन्प्रणयाकुलां माम् ।
मुखाम्बुजं तव मया क्षणार्धं दृष्टं हरिश्चन्द्रपुरमिव नष्टम् ॥ १९ ॥

बिम्बाहरासाअ-सुहं कहं वि ळद्धं मए दे खणमूसुआए ।
देव्वेण सज्जो हिडिअं च तं हा मरन्द-पाणं व महु-व्वईए ॥

बिम्बाधरास्वादसुखं कथमपि लब्धं मया ते क्षणमुत्सुकया ।
दैवेन सद्यो भ्रंशितं च तद्धा मरन्दपानमिव मधुव्रत्या ॥ २० ॥

मा ळज्ज मुद्धं मुह-चन्द-बिम्बं सुहं पळोएमि सु-ळोअणे दे ।
इत्थं पिअं भासिअ वञ्चअन्तो कहं तुवं णिग्घिण णिग्गदो सि ॥

मा लज्जस्व मुग्धं मुखचन्द्रबिम्बं सुखं प्रलोकयामि सुलोचने ते ।
इत्थं प्रियं भाषित्वा वञ्चयन्कथं त्वं निर्घृण निर्गतो ऽसि ॥ २१ ॥

एव्वं भणन्तिं बहुसो रुअन्तिं घेत्तूण बाणस्स सुअं करेहिं ।
तिस्से सही रोअण-काळणं सा कुम्भण्ड-आ पुच्छइ चित्त-ळेहा ॥

एवं भणन्तीं बहुशो रुदतीं गृहीत्वा बाणस्य सुतां कराभ्याम् ।
तस्याः सखी रोदनकारणं सा कुम्भाण्डजा ऽपृच्छच्चित्रलेखा ॥ २२ ॥

अहो अ-संबद्ध-पळाव-सीळे कण्णा सि को संपइ वळ्ळहो दे ।
उसे किमुम्माअ-वसं गआ सि मा चावळं जप्प ळहेहि धेरं ॥

अहो असंबद्धप्रलापशीले कन्याऽसि कः संप्रति वल्लभस्ते ।
उषे किमुन्मादवशं गताऽसि मा चापलं जल्प लभस्व धैर्यम् ॥ २३ ॥

किं दाणिँ संदाव-अरं जुवाणं सद्दावअन्ती रुइअं करेसि ।
आअक्ख णं मे सिविणो किमेसो पच्छादणं मा कुण मज्झ बाळे ॥

किमिदानीं संतापकरं युवानं शब्दापयन्ती रुदितं करोषि ।
आचक्ष्व ननु मे स्वप्नः किमेष प्रच्छादनं मा कुरु मम बाले ॥ २४ ॥

इदं तदो जप्पइ बाण-पुत्ती सच्चं भणिस्सं तुह चित्त-ळेहे ।
सिळाहणिज्जो सिविणे कुमाळो दिट्ठो मए को वि तमाळ-णीळो ॥

इदं ततो ऽजल्पद्बाणपुत्त्री सत्यं भणिष्यामि ते चित्रलेखे ।
श्लाघनीयः स्वप्ने कुमारो दृष्टो मया कोऽपि तमालनीलः ॥ २५ ॥

केऊर-हारङ्गद-कुण्डळेहिं विभूसिओ पीद-दुऊळ-वासो ।
सु-ळोअणो सुन्दर-मन्द-हासो णिरिक्खदो सो णिरुपाहि-रम्मो ॥

केयूरहाराङ्गदकुण्डलैर्विभूषितः पीतदुकूलवासाः ।
सुलोचनः सुन्दरमन्दहासो निरीक्षितः स निरुपाधिरम्यः ॥ २६ ॥

पञ्चेसुणा वञ्चिअ-चित्त-धेरं सेरं समालिङ्गिअ मं वराइं ।
अ-दंसणं झत्ति गदो कढोरो ढज्जामि तो से विरहग्गिणा हं ॥

पञ्चेषुणा वञ्चितचित्तधैर्यां स्वैरं समालिङ्ग्य मां वराकीम् ।
अदर्शनं झटिति गतः कठोरो दह्ये ततो ऽस्य विरहाग्निना ऽहम् ॥ २७ ॥

अहो उसाए वअणं सुणन्ती भणादि कुम्भण्ड-सुआ विअड्ढा ।
अळं विसाएण विसाळ-णेत्ते मणो-रहो होहिइ दे सु-सिद्धो ॥

अथो उषाया वचनं शृण्वत्यभणत्कुम्भाण्डसुता विदग्धा ।
अलं विषादेन विशालनेत्रे मनोरथो भविष्यति ते सुसिद्धः ॥ २८ ॥

जे सन्ति ळोअ-त्तिदए जुवाणो णीसेस-सोहग्ग-गुणोववण्णा ।
सव्वे वि दे चित्त-पडे ळिहिस्सं दक्खेज्ज जेणं तुह चित्त-चोरो ॥

ये सन्ति लोकत्रितये युवानो निःशेषसौभाग्यगुणोपपन्नाः ।
सर्वानपि तांश्चित्रपटे लिखिष्यामि दृश्येत येन तव चित्तचोरः ॥ २९ ॥

तदो अ सा चित्त-पडे विसाळे मणस्सिळादीहिँ सिळाहणिज्जे ।
णहो-अरे दाणव-माणवे अ ळिहेइ सव्वे पवणासणे अ ॥

ततश्च सा चित्रपटे विशाले मनःशिलादिभिः श्लाघनीयान् ।
नभश्चरान्दानवमानवांश्चालिखत्सर्वान्पवनाशनांश्च ॥ ३० ॥

The Adyar Library Series—No. 26

SĀMAVEDASAṂHITĀ

SĀMAVEDASAMHITĀ

EDITED BY

PROF. C. KUNHAN RAJA, M.A., D.PHIL. (OXON.)

THE ADYAR LIBRARY

1941

DEDICATED

TO

THEM

WHO GAVE US THE MUSIC OF THE SAMANS

PREFATORY NOTE

IT is with great pleasure that I introduce to the world the second contribution of Dr. C. Kunhan Raja to the Adyar Library Publications through the Bulletin of the Library. The first was the *Ṛgveda* with the commentary of Mādhava. Here there are two commentaries on the *Sāmaveda*, one by Mādhava son of Nārāyaṇa who belongs to about 600 A.D. and the other by Bharatasvāmin, son of Nārāyaṇa, who belongs to the early fourteenth century. Both are very early authors and as such the commentaries have a special interest.

This is the first time that these commentaries have been made available in print. In this volume, only the text and the two commentaries are published. Dr. Raja has utilised a large number of manuscripts in bringing out the edition. He has been working at it for some years, attending to it day after day with commendable regularity and punctuality. Now the text portion is finished and in the second part the variant readings found in the different manuscripts, some indices and appendices, and some notes will appear. These supplementary materials will be issued through the Bulletin and made available in due course.

The commentary of Mādhava is available only for the Pūrvārcika portion of the Sāmaveda and there is no evidence of his having written a commentary for the Uttarārcika portion. A small part of the commentary by Bharatasvāmin for the Uttarārcika portion is available in some of the

manuscripts. Since Mādhava does not comment on this portion and since Bharatsvāmin's commentary is available only for a small part in the beginning, it is not proposed to include this part in the edition.

By an oversight the last four verses were omitted in the fifth Daśatī of the third Prapāṭhaka. They are given at the end of the edition.

It is the division into Prapāṭhakas and Daśatīs that is adopted in this edition. This is the division found in the commentary of Mādhava. Bharatsvāmin follows a different division. And in the *Vedic Concordance* of Bloomfield, the verses are numbered serially from one to the end. For easy reference a comparative table for these different divisions and numberings is added at the end.

Most of the verses comprising the *Sāmaveda* are found in the *Ṛgveda* also. But there are variations in the text as it appears in the *Ṛgveda* and in the *Sāmaveda*. The text as accepted by the two commentators is not uniform. The Ṛṣis mentioned by the two commentators as the authors of the verses are not also identical. All such points will be noted in the supplementary portion.

It is my pleasant duty to thank Dr. C. Kunhan Raja for his valuable contribution to the Adyar Library Series. I take this opportunity to thank the University of Madras for the permission given to Dr. C. Kunhan Raja to have the work published in this Series.

Adyar Library
5th May, 1941

G. Srinivasa Murti,
Director

TABULAR STATEMENT OF THE ISSUES OF THE BULLETIN IN WHICH THE SĀMAVEDA HAS APPEARED

Vol.	No.	Pages	Prapāṭhaka, Das'atī and Verse
II	1	1—24	I-i-1 to I-iii-3
	2	25—64	I-iii-3 to I-vii-10
	4	65—88	I-vii-10 to II-i-2
III	3	89—128	II-i-3 to II-vii-7
	4	129—192	II-vii-8 to III-vii-10
IV	1	193—240	III-viii-1 to IV-iii-10
	2	241—280	IV-iii-10 to IV-viii-10
	3	281—320	IV-ix-1 to V-iii-9
	4	321—360	V-iii-9 to VI-i-10
V	1	361—384	VI-i-10 to VI-v-8
	2	385—410	VI-v-8 to VI-9-8

Note:

1. In the first three Prapāṭhakas and at the end of the fourth Prapāṭhaka mistakes like सम्म्या दशत्या, which crept in through some oversight, may be corrected.

2. On pages 319 and 320, the figure on the top may be corrected from 5-9-2 into 5-3-9 and on page 334, the figure on the top may be corrected from 5-5-6 into 5-6-6.

3. In III. v. (P. 177—Vol. III. Pt. 4) The last four verses were omitted by an oversight and they are given on Pp. 415 and 416 (in the BulletinVol. V. Pt. ii) at the end of the edition.

बलम्। इन्वन् प्रेरयन्। मदाय तस्य। हन्ति रक्षः। परिबाधते च अरातिं शत्रुम्। वरिवः धनं कृण्वन् परिचारकाय। वृजनस्य बलस्य यज्ञस्य वा। राजा ईश्वरः ॥ (८)

अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व।
ब्रध्नश्चित्तस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥

विनियोगोऽस्य षष्ठेऽहनि। अया पवा अनेन पवनेन पवस्व। एना वसूनि धनानि। मांश्चत्वे अश्वे आरूढः। हे इन्दो सरसि उदके। प्रधन्व प्रगच्छसि। मांश्चत्वे वा सरसि। प्रधन्वः धारणशीलः। बध्नः ब्रह्मा सविता वा महान् वा। चित् अन्तः। यस्य वातो न वातस्येव चित्स्वभावस्य इव। जूतिं गतिम्। पुरुमेधाः बहुप्रज्ञः चित्। तकवे। तकुः स्तोता। तस्मै कवये। नरं अपत्यम्। धात् स्थापयति। अथवा अया पवा अनेन मार्गेण। पवस्व वसूनि धनानि। मांश्चत्वे हे इन्दो सरसि उदके गमनसंयुक्ते। प्रधन्व पवस्व। ब्रध्नश्चित्। ब्रध्नः सविता। चिदिति पदपूरणः। यस्य वातः न जूतिं वातस्येव जूतिः वेगः। पुरुमेधा ऋषिः। चिदिति पदपूरणः। तकवे। यो नरं यजमानमवति रक्षति। नरं धात् ॥

कुत्सः। अया अनया। पवा पवमानया धारया। पवस्व क्षर। एना एनानि वसूनि। मांश्चत्वे अभिमन्यमानान्। शत्रून् चातयति नाशयति इति मांश्चत्वम्। तस्मिन्। सरसि कलशे। प्रधन्व प्रगच्छ हे इन्दो। ब्रध्नश्चित् आदित्यश्च। वातो न वात इव। जूतिं जूतं वेगितम्। पुरुमेधाश्चित् बहुयज्ञश्च इन्द्रः अत्र अस्मिन् यज्ञे। तकवे। तकेर्गतिकर्मणः तकुः। उपगन्त्रे मह्यम्। नरं नेतारं पुत्रम्। धात् दधातु धारयतु हे सोम त्वया समर्पितौ सन्तौ ॥ (९)

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥

महत् महदेवैतत् आश्चर्यमेतत् कर्म । सोमस्य महिषः महनीयस्य । चकार कृतवान् । . . . . . ओजः बलम् । जनयन् जनितवान् सूर्ये । ज्योतिः प्रकाशम् । इन्दुः सोमः । अधिदेवपक्षे महत् सोमः आदित्यः । महिषः पूजनीयः महत्त्वात् । महत् कर्म चकार । अपां यद्गर्भो देवानामाधिपत्यम् । अवृणीत । आच्छादयत् देवान् तेजसा । किंच अदधादिन्द्रे पवमानः सोमात्मना । ओजः बलं पीतः सन् । अजनयत् सूर्ये सरणमण्डले । ज्योतिरिन्दुरादित्यः । अध्यात्मम् । सोमः अहो महदसम्भाव्यं तत्कर्म । महिषः पूजनीयः । अपां यत् गर्भः दर्शनमात्रम् । पञ्चानां भूतानां गर्भः अधिष्ठानं भूत्वा । अवृणीत अधिष्ठितवान् । देवानिन्द्रियाणि अवृणीत शरीरमध्ये तिष्ठतीति कृत्वा । अदधादिन्द्रे आत्मनीश्वरे पवमानः पूयमानः विषयप्रमाणेन । ओजः बलमणिमादि । अजनयच्च सूर्ये ज्योतिः । तथा-चोक्तम्—येन सूर्यस्तपति तेज इन्द्रः ॥

पराशरः । महत् तत् महान्ति तानि कर्माणि । सोमः महिषः महान चकार । कानि तानि । यत् यम् । अपां गर्भः रसभूतः । अवृणीत देवान् असुरपरित्यागेन । अदधाच्च यत् इन्द्रे ओजः बलं पवमानः । यच्च अजनयत् सूर्ये ज्योतिः इन्दुः दीप्तः ॥ (१०)

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
दश स्वसारो अधि सानौ अव्ये मृजन्ति वह्निं सदनेष्वच्छ ॥

असर्जि सृष्टवान् । वक्वा वक्ता । अश्वो न रथ्यः रथे हितः । वाजी वेगवान् । धिया प्रज्ञया कर्मणा वा । मनोता । ओतानि मनांसि देवानां यस्मिन् सोमे सः मनोता । प्रथमा मनीषा मनसः एषणः । दश

स्वसारो भगिन्यः । अधि उपरि । सानौ समुच्छ्रते । अव्ये अविमये । मृजन्ति शोधयन्ति अङ्गुलयः । वह्निं वोढारम् । सदनेषु अच्छ आप्तुम् ॥

काश्यपः । असर्जि सृज्यते प्रेर्यते । रथ्ये रथयोग्ये । आजौ यथा रथः सृज्यते । वक्वा स्तोत्रा । वचेर्वकुः । धिया । विदधाति इति धीः । तया कर्त्र्या । मनोता यस्यां देवानां मनांसि ओतानि सा मनोता । प्रथमा श्रेष्ठा । मनीषा स्तुतिः । किंच दश स्वसारः अङ्गुलयः । अव्ये अविमये । सानौ स्थाने पवित्रे । अधि उपरि । मृजन्ति क्षिपन्ति सोमम् । वह्निं वोढारं यज्ञस्य । सदनेषु कलशेषु । अच्छ अभि ॥ (११)

अपामीवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं च वि च शन्त्युशतीरुशन्तम् ॥

अपां इव इत् ऊर्मयः सङ्घाताः । तर्तुराणाः तरमाणाः । प्र मनीषा ईरते । कम् । सोमम् । . . . . . कामयमानम् ॥

प्रस्कण्वः । अपामूर्मय इव तर्तुराणाः मनीषाः स्तुतयः । प्र ईरते प्र गच्छन्ति । सोमं अच्छ अभि । नमस्यन्तीः परिचरन्त्यः । उपयन्ति समीपे गच्छन्ति च । संयन्ति सह गच्छन्ति च सर्वाः । आविशन्ति च सोमम् । उशन्तं कामयमानम् । उशतीः उशन्त्यः मनीषाः ॥ (१२)

इति षष्ठे पञ्चमी दशती ।

इत उत्तरमनुष्टुभः ॥

पुरो जिती वो अन्धसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्वयम् ॥

विनियोगोऽस्य ज्योतिष्टोमे । पुरः अग्रतः । जिती जित्यै । अन्धसः अन्नस्य सोमलक्षणस्य । सुताय सोमाय । मादयित्वने मदनशीलाय । अपश्रथिष्टन श्वानं अपघ्नत हे सखायः । किंविशिष्टम् । दीर्घजिह्वयम् । अथवा श्रथिष्टन शिथिलीकरोतु इन्द्रम् । हे सखायः ऋत्विजः । अथवा शिथिलीकरोतु सोमम् । श्वानं कञ्चिदुपद्रवकर्तारमपघ्नत ॥

पुरोजिती नवर्चोऽत्र बृहत्या हर्यताय या ।
अष्टावनुष्टुभः शिष्टा वक्ष्यन्ते ऋषयः पृथक् ॥

अनानतः पारुच्छेपिः । पुरः स्थितस्य जनस्य अन्धसः अन्नभूतस्य । चतुर्थ्यर्थे षष्ठी । सुताय अभिषुताय । मादयित्नवे मदनशीलाय सोमाय । तदर्थम् । श्वानं उपघातकम् । दीर्घजिह्वयं दीर्घजिह्वम् । अथवा दीर्घजिह्वीयं चासुरीम् । अपश्नथिष्टन अपबाधध्वम् । अनुपघाताय हे सखायः वः यूयम् । श्रूयते हि शाव्या-यनकं च । दीर्घजिह्वी ह वा आसुर्यः । स सहाह स्म सोमं लेढि इत्यादिना ॥ (१)

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥

विनियोगोऽस्य द्वितीयेऽहनि । पूषा पुष्णातेः सोमः । रयिः धनं भगः । स एव सोमः शोभनः । अथवा पूषा आदित्यः । पुनानः पूयमानः । अथवा पुनानः रश्मिभिः । अर्षति क्षरति आदित्यात्मना गच्छति । पतिः स्वामी विश्वस्य । पूषा च विश्वस्य सर्वस्य भूमनः बहुत्वस्य । व्यख्यत् प्रकाशयति । रोदसी द्यावापृथिव्यौ । उभे उभौ सोमापूषणौ ॥

नहुषो मानवः । अयं सोमः पूषा पोषकरः । रयिः धनवत् प्रियः । भगः भजनीयः । पुनानः पूयमानः पवित्रे । अर्षति गच्छति द्रोणकलशम् । पतिः

विश्वस्य भूमनः भूतजातस्य । व्यख्यत् विचष्टे विजानाति विख्यापयति प्रकाशयति इति वा । रोदसी उभे ॥ (२)

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥

विनियोगोऽस्य तृतीयेऽहनि । सुतासः अभिषुताः । मधुमत्तमाः अतिशयेन रसवत्तमाः सोमाः । इन्द्राय मन्दिनः मदनवन्तः स्तुत्या च तद्वन्तः । पवित्रवन्तः दशापवित्रपूताः । देवान् वस्वादीन् । गच्छन्तु वः युष्माकं मदाः ॥

ययातिः नाहुषः । सुतासः अभिषुताः । मधुमत्तमाः मधुरतमाः सोमाः । इन्द्रस्य मन्दिनः स्वभूताः । पवित्रवन्तः दशापवित्रेण संसृष्टाः अक्षरन् । ते मदाः मदकराः सोमाः देवान् गच्छन्तु । वः युष्मदीयाः हे यजमानाः ॥ (३)

सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥

* मनुः सांवरणः । सोमाः पवन्ते इन्दवः दीप्ताः अस्मभ्यम् । गातुवित्तमाः अतिशयेन मार्गलम्भनाः । मित्राः मित्रभूताः । स्वानाः सुताः । अरेपसः अपापाः । स्वाध्यः शोभनाध्यानाः । स्वर्विदः सर्वज्ञाः सर्वकामलम्भना वा ॥ (४)

अभी नो वाजसातमं रयिमर्ष शतस्पृहम् ।
इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥

* Mādhava's Commentary is missing for verses 4 and 5 and for part of the sixth verse.

ऋजिश्वाम्बरीषश्च । अभ्यर्ष अभिक्षर । नः अस्मभ्यम् । वाजसातमं अतिशयेन बलप्रदं रयिम् । शतस्पृहं बहुभिः स्पृहणीयम् । हे इन्दो सहस्रभर्णसं बहूनां पोषकं । तुविद्युम्नं बह्वन्नम् । विभासहं विदीप्तानां शत्रूणां अभिभवितारम् ॥ (९)

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥

. . . . . .

प्रियमिन्द्रस्य पेयतम इन्द्रस्य । काम्यं इन्द्रोऽपि कामयते । वत्सं न वत्समिव । पूर्वे आयुनि आयुषि । जातं रिहन्ति लेलिहन्ति आस्वादयन्ति । मातरः रश्मयः उदकानि वा ॥

रेफश्च सूनुश्च काश्यपः द्वयोः सहैव । अभी नवन्ते अभिष्टुवन्ति स्तोतारः । अद्रुहः मित्रभूताः परस्परम् । प्रियं इन्द्रस्य काम्यं कमनीयं सोमम् । जातं सुतं एनं मातरः गावः । रिहन्ति पयोरूपेण । वत्सं न वत्समिव । पूर्वे प्रथमे । आयुनि वयसि तिष्ठन्तं गावः ॥ (६)

आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम् ।
शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ॥

हर्यताय । हर्यतिः प्रेप्साकर्मा । प्रेप्सितव्याय । धृष्णवे धर्षणशीलाय । आ धनुष्टन्वन्ति विस्तारयन्ति किञ्चिच्छब्दं कुर्वन्ति वा । पौंस्यं सामर्थ्ययुक्तम् । शुक्राः शुचिष्मन्तः । वियन्ति असुराय सुखाय असुदानवते । निर्णिजे निर्णेजनार्थम् । विपां प्रज्ञानाम् । अग्रे प्रथमम् । महीयुवः महत् सोमं मिश्रयन्ति रश्मयः उदकानि वा ॥

आतन्वन्ति आरोपितज्यं कुर्वन्ति । धनुः पवित्रम् । धनुः दशाज्या रूप्यते । पौंस्यं वीर्यम् । हर्यताय कमनीयाय । धृष्णवे धर्षकाय शत्रूणाम् । सोमाः शुक्राः शुक्लवर्णाः शाटीः । वियन्ति वयन्तीत्यर्थः । शुक्रां वयन्तीति बह्वृचाः । असुराय । असु बलम् । तद्वते । निर्णिजे । निर्णिजमिति रूपनाम । रूपार्थं शोभायै । गोपयः शाटीत्वेन रूप्यते ।

आत्मा पितुस्तनूर्वासः (ऋ. वे. ८. ३. २४)

इति हि निगमः ।

वसानो गा अपो हरिः (९. ४२. १)

इति च भवति । विपां विप्राणां स्तोतॄणां अग्रे । महीयुवः पूजाकामाः अध्वर्यवः ॥ (७)

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान् विश्वाँ इत् परि मदेन सह गच्छति ॥

विनियोगोऽस्य नवमेऽहनि । परि समन्तात् । त्यं तम् । हर्यतं हरिं हरितवर्णम् । बभ्रुं च सुवर्णम् । पुनन्ति पावयन्ति वारेण बालेन । किंविशिष्टेन । अविमयेन । देवान् विश्वान् सर्वान् इत् । परि सर्वतः । मदेन सह गच्छति । परि देवं लक्षयित्वा ॥

ऋजिश्वाम्बरीषौ । परिपुनन्ति परिशोधयन्ति । त्यं तम् । हर्यतं कमनीयम् । हरिं सोमम् । बभ्रुं पोषकम् । वारेण अव्येण दशापवित्रेण । यः देवान् विश्वान् इत् एव । विश्वानेव सह युगपत् । परिगच्छति मदेन रसेन तं पुनन्ति ॥ (८)

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥

विनियोगोऽस्य प्रथमेऽहनि । सुन्वानाय अभिषूयमानाय । अन्धसः सोमस्य । मर्तः मनुष्यः न । वष्ट कामयते तद्वचः । मर्त्यमिव स्तुति-संयुक्तम् । अप श्वानं श्वानमिवाराधसम् । अपहत अपघ्नत । अधनं धनरहितम् । अमखं यज्ञबहिष्कृतम् । भृगवः भर्जनशीलाः रश्मय इव अपघ्नते ऋत्विजो वा ॥

प्रजापतिः । न प्रवष्ट न कामयते । वशेः कान्तिकर्मणो रूपं वष्टेति । सुन्वानायेति षष्ठ्यर्थे चतुर्थी । सूयमानस्य । अन्धसः सोमस्य । तत् वचः शब्दम् । मर्तः मारणीयः । कोऽसौ । . . . श्वानमपहत अपबाधध्वम् । अराधसं असमृद्धिहेतुककर्माणम् । अमघमिव यथा अमघमदातारं यज्ञे न प्रवेशयन्ति तद्वत् । भृगवः दीप्ताः यूयं हे मदीया जनाः ॥ (९)

इति षष्ठे षष्ठी दशती ।

इत उत्तरं जगत्यः ।

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्द्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥

विनियोगोऽस्य ज्योतिष्टोमे । अभि प्रियाणि इष्टानि । पवते यजमानाय । चनोहितः अन्ननिहितः । नामानि सोमादीनि । यह्वः महान् । अधि येषु वर्धते । आ सूर्यस्य बृहतः महतः । बृहन् सोमः । अधि उपरि आदित्यमण्डलात् चतुर्थं मण्डलम् । रथं विष्वञ्चं नानावर्णम् । अरुहत् आरुहत् । छन्दसि व्यवहिताश्च । विचक्षणः विविधं प्रकाशयितेत्यर्थः ॥

जगत्यो द्वादशाभीति तिस्र आद्याश्च पञ्चमी ।
कविर्ददर्श तुर्यी च षष्ठीं चर्षिगणो ऽब्रवीत् ॥
निवावरी ताः सिकतास्त्रिरस्मै रेणुरैक्षत ।
वेनो भार्गव इन्द्राय सोमेत्यृचमृषिस्त्रितः ॥
असावि सोम इत्येतां भारद्वाजोऽब्रवीद्वसुः ।
प्र देवमिति वत्सप्रीरञ्जते व्यञ्जते ऋचम् ॥
ऋषिराङ्गिरसोऽपश्यत् पवित्रो द्वादशीमृचम् ॥

अभि उद्दिश्य प्रियाणि सर्वप्राणिनाम । नामानि उदकानि पवते सोमः । चनोहितः । चनोऽन्नम् । तस्मै हितः । यह्वः महान् । येषु नामसु अधिवर्धते वसतीवर्येकधानाभिर्हि वर्धते । ताभिः वृद्धः तदर्थं च पवते । अध्यारुहत् सूर्यस्य बृहतः रथम् । विष्वञ्चं सर्वतो गन्तारम् । बृहन् महान् । विचक्षणः विद्रष्टा ॥ (१)

अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।
वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥

अचोदसः अचोदयितारः । धन्वन्तु इन्दवः सोमाः । नः अस्मान् प्रति । स्वानासः सुताः । बृहत देवेषु हरयः हरणशीलाः । वि चित् अश्नानाः विनाशयन्तः । ये अरातयः शत्रवः तान् विनाशयन्तः । अर्यः स्वामिनः । नः अस्माकं सन्तु । सनिषन्तु सम्भजन्तु । नः धियः प्रज्ञाः कर्माणि वा ॥

अचोदसः अप्रेरकाः अबाधकाः सन्तः । नः अस्मदर्थम् । प्रधन्वन्तु प्रगच्छन्तु इन्दवः । स्वानासः सुताः । बृहद्देवेषु बृहत्स्तोत्रेषु अस्मासु । हरयः हरितवर्णाः । वि विशेषेण । भृशमित्यर्थः । अश्नानाः भक्षमाणाः सन्तु । इषयः इषमन्नं कामयमानाः । अरातयः अदातारः । नः अस्माकम् । अर्यः अरयः शत्रवः । चिदिति चेत्यर्थः । अस्माकं अरय एवं भवन्तु चेति । किंच सनिषन्तु संभजन्तु । नः अस्मान् । धियः कर्माणि यज्ञादीनि ॥ (२)

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
अभ्यृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥

एष प्र कोशे द्रोणकलशे । मधुमान् रसवान् । अचिक्रदत् शब्दं कृतवान् । इन्द्रस्य वज्रः सोमः । अनेन पीतेन वज्रं क्षेत्पुं समर्थः । वपुषः वपुष्टमः दीप्तेः दीप्तितमः । अभि ऋतस्य यज्ञस्य । सुदुघाः सुदोहनीः । घृतश्चुतः क्षीरं उदकं वा च्यावयन्त्यः । वाश्राः कामयमानाः । क्षरन्ति पयसा च धेनवः । धेट् पाने । पिबन्त्य उदकं आदित्यरश्मयः कामयमानाः । क्षरन्ति पयः धेनवः आदित्यरश्मयश्च ॥

एष सोमः । मधुमान् रसवान् । कोशे कलशे । प्राचिक्रदत् प्रकर्षेण शब्दायते । इन्द्रस्य वज्रः वज्रवद्वीर्यकरः । वपुषः वपुष्मतः दीप्तिमतः । वपुष्टमः दीप्तिमत्तमः । अभ्यर्षति अभिगच्छति । ईं एनं सोमम् । ऋतस्य यज्ञस्य । यज्ञार्थमित्यर्थः । सुदुघाः सुखेन दोग्धव्याः । घृतश्चुतः । घृतं क्षीरं क्षरन्तीति घृतश्चुतः । क्षीरं क्षरन्त्यः । वाश्राः शब्दायमानाः । धेनवः आशीर्दुहः । पयसा अभ्यर्षन्ति च ॥ (३)

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥

विनियोगोऽस्य सप्तमेऽहनि । प्रो अयासीत् इन्दुः सोमः । इन्द्रस्य निष्कृतं समवायं वा । सखा सख्युर्न प्रमिनाति विनाशयति । सङ्गिरं स्तुतिम् । मर्यः मनुष्य इव युवतिभिः सम्बन्धे । अर्षति क्षरति । एवं सोमः कलशे शतयामना शतच्छिद्रेण । पथा पवित्रेण । क्षरति कलशं प्रति ॥

प्र अयासीत् याति इन्दुः । इन्द्रस्य निष्कृतं संस्कृतं स्थानं कलशम् । सखा इन्द्रस्य सख्युः आत्मनः इन्द्रस्य । न प्रमिनाति न प्रहिन्वन्ति । संगिरं

स्तोतारम्। सम्यक् गृणातीति संगिरः। मर्य इव युवतिभिः यथा मनुष्यः कश्चित् युवतिभिः सह गच्छति तद्वत्। सोमः कलशे सहाद्भिः अर्षति गच्छति। शतयामना बहुपत्येन। पथा मार्गेण अन्तरिक्षेण। बहुधारो ऽभिपवते ॥ (४)

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥

विनियोगोऽस्याष्टमेऽहनि। धर्ता धारयिता दिवः। पवते कृत्व्ये कर्तव्ये रसः। दक्षः शीघ्रः। देवानां अनुमाद्यः अनुमदनीयः। नृभिर्मनुष्यैः।

. . . . . .

वृथा पाजांसि कृणुषे अन्नानि करोषि। नदीषु रश्मिषु उदकेषु वा अधि ॥

धर्ता धारकः। दिवो लोकस्य।

दिवो धर्तासि शुक्रः पीयूषः (ऋ. वे. ९. १०९. ६)

इति हि भवति। सोमस्य रसः पवते क्षरति। कृत्व्यः संस्कृतः। दक्षः समर्थः। देवानां अनुमाद्यः स्तुत्यः। नृभिः ऋत्विग्भिः। हरिः हरितवर्णः। सृजानः सृज्यमानः प्रेक्षमाणः। अत्यो न अश्व इव। सत्वभिः सादिभिः। वृथा अनायासेन। पाजांसि गमनानि। कृणुषे कृणोषि हे सोम। नदीषु अप्सु। आ आविष्टः ॥ (९)

वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः।
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥

विनियोगोऽस्य तृतीयेऽहनि। वृषा सेक्ता। मतीनां व्रतानाम्। विचक्षणः विविधं प्रकाशयिता। सोमः अह्नां प्रतरीता प्रकर्षेण तारयिता। उषसां दिवः रश्मीनां द्युलोकस्य च। प्राणा प्राणादयः। तेषां कर्ता।

सिन्धूनामपां कलशादीनि पात्राणि । अचिक्रदत् शब्दं करोति । इन्द्रस्य हार्दि हार्दनः । आविशत् मनीषिभिः मनसः एषणशीलैः पालनैः ॥

वृषा वर्षकः कामानाम् । मतीनां स्तोत्राणाम् । सोमः पवते विचक्षणः विद्रष्टा । अह्नां रात्रीणां प्रतरीता । अहश्शब्दो रात्रावपि वर्तते—

अहश्च कृष्णमहरर्जुनं च (ऋ. वे. ६. ९. १)

इत्यादिषु । उषसां प्रतरीता । दिवो दिवसस्य प्रतरीता । प्राणा । प्रा पूरणे इत्यस्माद्धातोः पॄ पालनपूरणयोः इत्यस्माद्वा लिटः कानच् । अभ्यासाभावः छान्दसः । सोराकारादेशे रूपं प्राणेति । पूर्णः । सिन्धूनां नदीनां पूर्ण इत्यर्थः । कलशान् द्रोणकलशानभि । अचिक्रदत् क्रन्दते । इन्द्रस्य हार्दि हृदयम् । आविशत् आवेक्ष्यन् मनीषिभिः सोमः ॥ (६)

त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यद्दतैरवर्द्धत ॥

विनियोगोऽस्याभिप्लवे । अस्मै सोमाय । सप्त धेनवः सप्त छन्दांसि । त्रिः प्रातःसवनमाध्यन्दिनसवनतृतीयसवनेषु दुदुह्रिरे । अथवा त्रिस्त्रिभिः सवनैः । सप्त धेनवः सप्त होत्राः वषट्कारिणः—होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाक आग्नीध्रः—एतेषां वाचः दुह्यन्ते । अथवा धेनवो दुह्यन्ते । सत्यामाशिरं आश्रयणीयं मिश्रणं वा । परमे प्रकृष्टे । व्योमनि व्याप्तिस्थाने यज्ञे वा । चत्वारि अग्निष्टोम उक्थ्यः षोडशी अतिरात्रश्चतुर्थः । अथवा पृथिवी अन्तरिक्षं द्यौर्दिश इति । अथवा चत्वारो वेदाः । अथवा चत्वारो महर्त्विजः । अथवा चत्वारः समुद्राः । अन्या भुवनानि निर्णिजे चतुर्दशभुवनानि । सप्त भूरादयो लोकाः सप्त पातालानि । तान्यपि । चारूणि चक्रे कृतवान् । केन प्रकारेण । यद्दतैः

अन्नैः यज्ञैः सत्यैर्वा । अवर्धत । अथवा त्रिः अस्मै सप्त धेनवः सप्तरश्मयः दुदुह्रिरे । अथवा सप्ताश्वाः । अथवा सप्तपावकजिह्वाः सप्त मातरो वा सप्त भूरादयो लोकाः सप्त पातालानि सप्त सोमसंस्थाः सप्त समुद्राः सप्त द्वीपानि सप्त स्वराः—एता दुदुह्रिरे । सत्यामाशिरमुदकं परमे व्योमनि । चत्वारि अन्याः भुवनानि पृथिव्यादीनि । चारूणि चक्रे । यद्दतैः यज्ञैः । अवर्धत इति । अथवा त्रिः अस्मै सप्त धेनवः सप्त प्राणाः शीर्षण्याः ईरिताः उत्पत्तिस्थितिप्रलयेषु । सत्यां अवितथाम् । आशिरं ज्ञानम् । चत्वारि अन्यानि भुवनानि जाग्रत्स्वप्नसुषुप्तितुरीयासु अद्वैतावस्थेति । यद्दतैर्जनैः । अवर्धत विज्ञानाय ॥

त्रिः सप्त एकविंशतिः । धेनवः छन्दांसि माध्यमिकवाग्रूपेणावतिष्ठते इत्येतत्—

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥
(ऋ. वे. १. १६४. २९)

इत्यस्यामृचि ज्ञायते । वाचः छन्दांस्यभिव्यक्तिस्थानानीति वाचः छन्दोवृष्टिः । क्रियते अस्मै सोमाय । दुदुह्रिरे दुहते । सत्यां कारणभूतां आशिरम् । परमे श्रेष्ठे यज्ञाख्ये । व्योम्नि स्थाने स्थिताय । चत्वारि अन्या अन्यानि । भुवनानि उदकानि । अस्य निर्णिजे रूपाय भवन्ति । एकं वासतीवरं त्रीणि ऐकधनानीति भुवनचतुष्टयम् । अयं च सोमः चारूणि भद्राणि । चक्रे करोति यजमानानाम् । यत् यदा । ऋतैः उदकैः । अवर्धत वर्धते । तदा चारूणि चक्रे ॥ (७)

इन्द्राय सोम सुषुतः परिस्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥

इन्द्राय सोम सुषुतः अभिषुतः परिस्रव । अप अमीवा व्याधयः । रक्षसा सह अपनुद्यताम् । मा ते तव रसस्य । किंविशिष्टस्य । मत्सतः ।

द्वयाविनः रक्षांसि शत्रवः । द्रविणस्वन्तः धनवन्तः । इह सन्तु इन्दवः । सोमाः रसवन्तो भवन्तु देवानां न तु शत्रुराक्षसादीनाम् ॥

इन्द्राय परिस्रव हे सोम । सुषुतः सुष्ठु अभिषुतः त्वम् । अप अपभवतु नश्यतु । अमीवा रोगः रक्षसा सह । मा मत्सत मा माद्यत न माद्यन्तु । ते त्वदीयस्य । रसस्य रसेन इत्यर्थः । द्वयाविनो द्वयवन्तः वञ्चकाः । येषां वाच्येकं कर्मणि अन्यत् ते द्वयाविनः । द्रविणस्वन्तः धनवन्तः इन्दवः । इह अस्मासु सन्तु वयं तान् परिचराम ॥ (८)

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥

विनियोगोऽस्य नवमेऽहनि । असावि सुतः सोमः । अरुषः अहिंसितः । वृषा सेक्ता । हरिः हरणशीलः । . . . . . वारं वालम् । अत्येषि अत्येति । व्यत्ययेन मध्यमपुरुषः । अव्यमविमयम् । श्येनो न श्येन इव । योनिं स्थानम् । घृतवन्तमुदकवन्तम् । आसदत् स्थितवान् ॥

असावि सुत आसीत् सोमः । अरुषः आरोचमानः । वृषा हरिः राजेव दस्मो दर्शनीयः । दंसु दर्शने । गाः आशीर्दुहः । अभ्यचिक्रदत् शब्दायते । पुनानः पूयमानः । वारं अव्यं अविमयं पवित्रम् । अति अतिक्रम्य । एषीति पुरुषव्यत्ययः । गच्छति । श्येनो न श्येन इव । योनिं स्थानं नीडम् । घृतवन्तं दीप्तिमन्तम् । योनिं कलशम् । आसदत् आसीदतु इति वा आसीदत इति वा आसीद इत्येव वा ॥ (९)

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यन्दन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥

प्र देवं अच्छ मधुमन्तः रसवन्तः । व्यासुवन्ति इन्दवः सोमाः । असिष्यन्दन्त गाव इव स्यन्दन्तो धेनवः । बर्हिषदः बर्हिषि सीदन्तः । वचनावन्तः स्तुतिमन्तः । ऊधभिः परिस्रुतं सर्वतः स्रुतम् । उस्रिया गावः रश्मयो वा । निर्णिजं धिरे दधिरे सोमस्य ॥

प्रासिष्यन्दन्त प्रस्यन्दते । देवं इन्द्रम् । अच्छ अभि । मधुमन्तं रसवन्तं इन्दवः । गावो न गाव इव । धेनवः पयस्विन्यः । आ अभीत्यर्थः । बर्हिषदः बर्हिषि सीदन्तः । वचनवन्तः शब्दवन्तः । तेषु सोमेषु । ऊधभिरिति पञ्चम्यर्थे चतुर्थी । ऊधोभ्यः । परिस्रुतं क्षरितम् । निर्णिजं रूपं रूपकरं पयः आशी-रूपेण परिणतम् । धिरे दधिरे । उस्रिया गावः ॥ (१०)

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥

विनियोगोऽस्य उपप्लवे प्रवर्ग्ये च । अञ्जते व्यञ्जते विविधं अञ्जते । समञ्जते सम्यक् अञ्जते । क्रतुं कर्माणि । . . . . . मध्वा मधुना अभ्यञ्जते । सिन्धोः समुद्रस्य । उच्छ्वासे बडबामुखस्य अग्नेः । पतयन्तं वर्धयन्तं समुद्रम् । उक्षणं महान्तं सेक्तारम् । हिरण्यपावाः हिरण्यस्य पाता रक्षिता । पशुं सोमं अप्सु अन्नभूते गृह्णाति ॥

अञ्जते सिञ्चन्ति । व्यञ्जते मध्वा मधुना आशिरा पृथगञ्जते । गृहेषु स्थितं श्रितदध्यादिभिः सं सह चाञ्जते । पूतप्रभृति क्रतुं कर्म कर्तारं वा । रिहन्ति आस्वादयन्ति देवाः । अभ्यञ्जते अभिमुखं अञ्जते । सिन्धोः नद्याः । उच्छ्वासे उच्छ्वासवत् बहिर्भूते मन्त्रेण परिगृहीते वसतीवर्येकधानाख्ये उदके । पतयन्तं उक्षणं सेक्तारं पशुम् । पश्यतीति पशुः । प्राज्ञं सोमम् । हिरण्यपावाः हिरण्येन पावनाः ऋत्विजः । हिरण्यपाणयो ह्यभिषुण्वन्ति । अप्सु गृभ्णते गृह्णन्ति नियच्छन्ति ॥ (११)

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तः सं तदाशत ॥

विनियोगोऽस्य तृतीयेऽहनि । पवित्रं पुनातेः । यज्ञे विततं विस्तीर्णम् । ब्रह्मणस्पते अन्नस्य ऋग्यजुःसामलक्षणस्य पातः । प्रभुः ईश्वरः । गात्राणि स्वकीयानि । परि समन्तात् एषि । विश्वतः सर्वतः यज्ञम् । अतप्ततनूः अतप्तशरीरः सूक्ष्मैरपि छिद्रैर्दशापवित्रस्य गच्छन् । न तत् आमः रोगः । अश्नुते व्याप्नोति । श्रृतासः निष्पन्नाः सोमाः । वहन्तः बहवः प्रापयन्तः सन्तः । आशत । अशू व्याप्तौ । व्याप्नुवन्ति द्रोणकलशम् ॥

सूक्तस्य (ऋ. वे. ९. ८३) आद्या इयमृक् । सूक्तमुक्तमुद्दिश्य शौनकेनोक्तम्—

आध्यात्मिकं पवित्रं ते सूक्तं जत्वाप्लुतः शुचिः ।
गतिमिष्टामवाप्नोति वृद्धीश्चापीह विन्दते ॥

इति । दशापवित्रास्तरणे चेयं प्रयुज्यते । आध्यात्मिकत्वेन तावद्योज्यते । पवित्रं सर्वपावनम् । ते तव आत्मभूतं तेजः परमात्माख्यम् । विततं विस्तृतं सर्वत्र । हे ब्रह्मणस्पते ब्राह्मणानां स्वामिन् । एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानां राजा (तै. ब्रा. १. ७. ४. २) तस्मात्सोमराजानो ब्राह्मणाः (श. ब्रा. २. ५. ४. ४) इत्यादयो हि निगमा दृश्यन्ते । प्रभुः त्वं गात्राणि अङ्गानि पातॄणाम् । पर्येषि परिगच्छसि विश्वतः । त्वया व्याप्तेन अतप्ततनूः अशोधित-शरीरः । अत एव आमः न तत् विततं पवित्रं अश्नुते । असोमपस्य सत्त्वशुद्ध्य-भावात् ज्ञानद्वारा परमात्मप्राप्तिः न सिद्ध्यति इति । श्रृतास इत् पक्वा एव त्वया वहन्तः यज्ञं जनाः । समाशत समश्नुते । तत् पवित्रमिति शब्दसामान्यमात्रेण पवित्रास्तरणे विनियोगः । यथा दधिक्राव्णो अकारिषम् (ऋ. वे. ४. ३९. ६) इत्यस्या दधिद्रप्सप्रकाशने तद्वत् ॥ (१२)

इति षष्ठे सप्तमी जगती

जगत्य उक्ताः । उष्णिह उच्यन्ते ।

इन्द्रमन्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टे जातास इन्दवः स्वर्विदः ॥

विनियोगोऽस्य ज्योतिष्टोमे । सुता इमे सोमाः । इन्द्रं वृषणं सेक्तारं अभियन्तु । हरयः हरितवर्णाः । श्रुष्टे जातासः श्रुष्टे जाताः । इन्दवः स्वर्विदः ये स्वर्गं लोकं विन्दन्ति ॥

इन्द्रमच्छ पवस्वेति खण्डौ द्वौ द्वादशाष्टकौ ।
औष्णिहः प्रथमः खण्डो द्वितीयः काकुभोऽत्र तु ॥
स सुन्व इति गायत्री यवमध्येति केचन ।
अक्षरव्यूहनादेषा ककुबेवेति केचन ॥
एष स्य धारयेत्येष प्रगाथः काकुभोऽन्तिमः ।
आद्यामेकादशीमग्निश्चाक्षुषः सप्तमीमपि ॥
द्वितीयां मानवश्चक्षुः परे पर्वतनारदौ ।
नवमीं दशमीं चापि चतस्रस्तावदैक्षताम् ॥
पञ्चमीं तु त्रितः षष्ठीं मनुराप्सव ऐक्षत ।
अष्टमीं द्वादशीं चापि द्वित इत्यार्षमुष्णिहाम् ॥
गौरिवितिरूर्ध्वसद्मऋजिश्वा तुर्वशः क्रमात् ।
ऋणञ्चयस्तु पञ्चम्याः षष्ठ्याः शक्तिरुरुर्द्वयोः ॥

अभियन्तु वृषणं वर्षितारम् । सुता इमे हरयः सोमाः । श्रुष्टीति क्षिप्रनाम । श्रुष्टि यन्विति वा श्रुष्टि जातास इति वा सम्बन्धः । जातासः प्रादुर्भूताः । इन्दवः सोमाः । स्वर्विदः सर्वकामलम्भनाः सर्वज्ञा वा ॥ (१)

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।
द्युमन्तं शुष्ममा भर स्वर्विदम् ॥

प्रधन्व प्रगच्छ सोम । जागृविः जागरणशीलः । इन्द्राय इन्दो परिस्रव सर्वतः स्रव । द्युमन्तं द्युतिमन्तम् । शुष्मं आभर आहर स्वर्विदम् ॥

प्रधन्व प्रगच्छ सोम । जागृविः प्रबुद्धः त्वम् । इन्द्राय परिस्रव परिक्षर हे इन्दो । प्रधन्व इत्युक्तस्यैव पुनर्वचनं परिस्रव इति शब्दान्तरेण इन्द्राय इति वक्तुम् । अथवा प्रधन्व पवित्रम् । ततः परिस्रव इति । द्युमन्तं दीप्तिमन्तम् । शुष्मं बलम् । आभर आहर । स्वर्विदं सर्वकामलम्भनम् ॥ (२)

सखाय आ निषीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परिभूषत श्रिये ॥

विनियोगोऽस्य सप्तमेऽहनि । हे सखायः आनिषीदत । पुनानाय सोमाय । प्रगायत स्तोत्राणि । शिशुं न । यथा मातरः शिशुमलङ्कारैर्भूषयन्ति एवम् । सोमं यज्ञैः परिभूषत श्रिये श्रयर्थम ॥

सखायः आगच्छत इति शेषः । आ आगत्य निषीदत उपविशत स्तोतुम् । निषद्य च पुनानाय पूयमानाय सोमाय तदर्थं प्रगायत च । शिशुं न शिशुमिव भूषणैः । यज्ञैः हविर्भिः सवनीयपुरोडाशादिभिः । परिभूषत अलंकुरुत । तैः सहितो हि सोमः शोभते । श्रिये पुष्ट्यर्थं युष्माकम् ॥ (३)

तं वः सखायो मदाय पुनानमभि गायत ।
शिशुं न हव्यैः स्वदयन्त गूर्त्तिभिः ॥

विनियोगोऽस्य षष्ठेऽहनि । तं सोमम् । वः मदाय मदनार्थम् । पुनानं अभिगायत हे सखायः । शिशुं न शिशुमिव । हव्यैः हवनीयैः । स्वदयन्तः आस्वादयन्तः । गूर्तिभिः उद्यमनैः । हव्यैः रत्नैर्दानैर्वा ॥

तं पुनानं अभिगायत हे सखायः । वः यूयं मदाय देवानाम् । स्तुतो हि सोमो मदकरो भवति ।

न सोम इन्द्रमसुतो ममाद
नाब्रह्माणो मघवानं सुतासः (ऋ. वे. ७. २६. १) ॥

इति हि भवति । शिशुं न शिशुमिव हव्यैः हवनैः स्तोत्रैः । स्वदयन्तः गूर्तिभिः स्तुतिभिः । गृणातेः गूर्त्तिः ॥ (४)

प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् ।
विश्वा परि प्रिया भुवदध द्विता ॥

विनियोगोऽस्य पञ्चमेऽहनि । प्राणा प्राणभूतः । शिशुः शंसनीयः । महीनां गोनाम् । हिन्वन् आप्नुवन् । ऋतस्य यज्ञस्य । दीधितिम् । अन्यत्राङ्गुलयः । इह तु दीप्तिं प्रीणनं वा । विश्वा सर्वाणि । प्रिया प्रियाणि । परिभुवत् सर्वत्रानुभवन्ति । अध द्विता द्वैतं पर्णः सोमदेवता च ॥

प्राणा पूर्णः । शिशुः वत्सः । महीनां महतीनां अपाम् । हिन्वन् प्रेरयन् प्रवर्तयन् । ऋतस्य यज्ञस्य । दीधितिं विधातारं यजमानम् । विश्वा विश्वानि । प्रिया प्रियाणि देवानाम् । धामानि पात्राणि । परिभुवत् परिगृह्णाति । द्विता द्विधा स्थितः पृथिव्यां लतारूपेण दिवि चन्द्रमारूपेण च स्थितः ॥ (५)

पवस्व देववीतय इन्दो धाराभिरोजसा ।
आ कलशं मधुमांत्सोम नः सदः ॥

विनियोगोऽस्य नवमेऽहनि । पवस्व देववीतये देवपानाय । इन्दो धाराभिः ओजसा बलेन । आ कलशं मधुमान् सोम नः सदः आसदः ॥

पवस्व देववीतये देवानां अशनाय यज्ञाय हे इन्दो । धाराभिः ओजसा बलेन । आसदः आसीद । कलशम् । नः अस्मदीयम् । मधुमांस्त्वं हे सोम ॥ (६)

सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥

विनियोगोऽस्य चतुर्थेऽहनि । सोमः पुनानः ऊर्मिणा रसेन । अव्यं वारं विधावति । अग्रे वाचः स्तुतीनां पूर्वः । पवमानः कनिक्रदत् शब्दं कृतवान् ॥

पुनानः पूयमानः सोमः । ऊर्मिणा धारया । अव्यं अविसम्बन्धिनम् । वारं पवित्रम् । विधावति विसृज्य गच्छति । पवमानः अग्रे पुरः । वाचः स्तुतेः स्वविषयायाः । कनिक्रदत् ब्रुवत् स्वयमेव ॥ (७)

प्र पुनानाय वेधसे सोमाय वच उच्यते ।
भृतिं न भरा मतिभिर्जुजोषते ॥

प्र पुनानाय वेधसे मेधाविने सोमाय । वचः स्तुतिसंयुक्तं उच्यते । भृतिं न भृतिमिव । भर वेतनम् । मतिभिः प्रज्ञाभिः । जुजोषते सोमपानाय ।

प्रोच्यते प्रोच्यताम् त्वया । वचः स्तोत्रं हे स्तोतः । पुनानाय वेधसे विधात्रे सोमाय । भृतिं न भृतिमिव भृत्याय । भर प्रापय स्तोत्रम् । मतिभिः स्तुतिभिः । जुजोषते प्रीयमाणाय ॥ (८)

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
शुचिं च वर्णमधि गोषु धारय ॥

गोमम् धनवन्। नः अस्मभ्यम्। इन्दो अश्ववत् अश्वैः संयुक्तं सुतः। सुदक्षः धनिव। दक्षतिः दानकर्मा। धन्वतिः गतिकर्मा। शुचिं विशुद्धं वर्णमधि गोषु धारय ॥

गोमत् अश्ववदिति क्रियाविशेषणे। गोयुक्तं अश्वयुक्तं च। नः अस्मदर्थम्। हे इन्दो सुदक्ष सुबल। सुतः त्वं धनिव धन्व पवस्व। गोष्वधि गव्यायां गिरि। शुचिं च वर्णं त्वत्संपर्कजं धारय ॥ (९)

अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत।
गोभिष्टे वर्णमभि वासयामसि ॥

अस्मभ्यं त्वा त्वाम्। वसुविदं वसुनः वेत्तारम्। अभ्यनूषत वाणीः वाक् स्तुतिसंयुक्ता। गोभिः गव्यैः पयआदिभिः। वर्णं रूपम्। अभिवासयामसि आभिमुख्येन आछादयामः ॥

अस्मभ्यं अस्मदर्थम्। वाणीः स्तुतयः स्तोतारो वा। वसुविदं धनलम्भनं त्वाम्। अभ्यनूषत अभिष्टुवन्ति। गोभिः आशिरा ते त्वदीयम्। वर्णं अभिवासयामसि अभिवासयामः ॥ (१०)

पवते हर्यतो हरिरति ह्वरांसि रंह्या।
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥

विनियोगोऽस्य प्रथमेऽहनि। पवते पाव्यते। पूयतेः प्रेप्साकर्मणः। हर्यतः हरिभिर्गन्ता। हरिः हरणशीलः। अति ह्वरांसि। अविमयानि बालानि। रंहि आ वेगेन। अभ्यर्ष आभिमुख्येन क्षर। स्तोतृभ्यः ऋत्विग्यजमानेभ्यः। वीरवद्यशः पुत्रपौत्रसंयुक्तं यशः अन्नं धनं वा ॥

पवते हर्यतः कमनीयः । हरिः सोमः । अति अतिक्रामन् । ह्वरांसि हिंसकानि रक्षःप्रभृतीनि रंह्या । अथ प्रत्यक्षस्तुतिः । अभ्यर्ष अभिक्षारय स्तोतृभ्यः । वीरवत् पुत्रसहितं यशः ॥ (११)

परि कोशं मधुश्चुतं सोमः पुनानो अर्षति ।
अभि वाणीर्ऋषीणां सप्तानूषत ॥

परि सर्वतः । कोशं मधुश्चुतं द्रोणकलशम् । सोमः पुनानः अर्षति क्षरति । अभि वाणीः ऋग्यजुःसामलक्षणाः । ऋषीणां स्तोतॄणाम् । सप्त अनूषत सप्तछन्दांसि सप्त होत्रा वा । अनूषत स्तुतिमकुर्वत ॥

परि अभीत्यर्थः । अर्षति गच्छति । कोशं कलशम् । मधुश्चुतं रसक्षरणम् । पुनानः सोमः । कलशप्रवेशे च सोमस्य रसातिशयो भवति इति मधुश्चुदित्युच्यते कलशः । अभ्यनूषत अभिष्टुवन्ति । ऋषीणां सप्त वाणीः वाण्यः सप्त छन्दांसि ॥ (१२)

इति षष्ठे अष्टमी दशती ।

ककुभः ।

पवस्व मधुमत्तम इन्द्राय सोम ऋतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥

विनियोगोऽस्य ज्योतिष्टोमे । पवस्व मधुमत्तमः रसवत्तमः अतिशयेन मधुमान् । इन्द्राय इन्द्रार्थम् । सोम ऋतुवित्तमः अतिशयेन कर्मवित् । मदः मदनीयः । महि महान् । द्युक्षतमः द्यवि क्षयति दिवा क्षरति वा । मदः ॥

पवस्व इन्द्राय मधुमत्तमः मधुरतमः त्वं हे सोम । क्रतुवित्तमः अतिशयेन प्रज्ञालम्भनः । मदः मदकरः । महि महान् । द्युक्षतमः दीप्ततमः । मदः मदनीयः स्तुत्यः ॥ (१)

अभि द्युम्नं बृहद्यश इषस्पते दीदिहि देव देवयुम् ।
वि कोशं मध्यमं युव ॥

विनियोगोऽस्य पञ्चमेऽहनि । अभि द्युम्नं यशः अन्नं वा । बृहद्यशः इषस्पते अन्नानां पते । दीदिहि देव देवयुं देवान् कामयते । वि कोशं मध्यमं मध्यमे सवने । सुव मिश्रय ॥

अभि दीदिहि प्रयच्छ । ददातेः दीदिहि इति रूपम् । द्युम्नं द्योतमानम् । बृहत यशः अन्नम् । इषस्पते अन्नस्य पते । देव दानादिगुणक । देवयुं इति विभक्तिव्यत्ययः । देवयुः देवकामः त्वम् । वियुव विश्लथय वर्षणार्थम् । कोशं मेघम् । मध्यमं मध्यमस्थानम् ॥ (२)

आ सोता परिषिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम् ।
वनप्रक्षमुदप्रुतम् ॥

विनियोगोऽस्य तृतीयेऽहनि । आ सोता आसुनुत । परि सर्वतः सिञ्चत । अश्वं न अश्वमिव । स्तोमं सोमलक्षणम् । अप्तुरं य अपः तरति तम् । रजस्तुरं लोकेषु तरति गच्छति वा । वनप्रक्षं वने क्षयति । सोमम् । उदकप्लुतम् ॥

आसोता अभिषुणुत सोमम् । तप्तनप् (पा. ७. १. ४९) इत्यादिना तस्य तबादेशः । बहुळं छन्दसि (पा. २. ४. ७३) इति शपो लुक् । परिषिञ्चत पवित्रे । अश्वं न अश्वमिव वेगवन्तम् । स्तोमं स्तोतव्यम् । अप्तुरं

अपां प्रेरकम्। रजस्तुरं रजसः तेजसः प्रेरकम्। वनप्रक्षं वनानां ओषधि-वनस्पतीनां प्रक्षम्। पृच्छतेः पूजाकर्मणो रूपं प्रक्षं पूज्यम्। पतिमित्यर्थः। स्वधितिर्वनानाम् (ऋ. वे. ९. ९६. ६) इति हि भवति। अथवा वनं उदकम्। पृचेः संपर्कार्थात् प्रक्षम्। वसतीवरीभिः संपृक्तमिति। उदप्रुतं उदकस्य रसस्य प्रुतं क्षरणं सौमम्॥ (३)

एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहम्।
विश्वा वसूनि बिभ्रतम्॥

एतमु त्यं मदच्युतं सहस्रधारं बहुधारम्। वृषभं वर्षितारम्। दिवो दुहं दिवः आहृत्य इमं लोकमुदकेन पूरयति। विश्वा सर्वाणि। वसूनि धनानि। बिभ्रतं धारयन्तम्॥

एतं त्यं तम्। मदच्युतं रसस्य च्यावकम्। उ इति पूरणः। सहस्रधारं बहुधारम्। वृषभं वर्षितारम्। दिवः। दीव्यतेः स्तुतिकर्मणो दिवः स्तोता अहम्। दुहं अदुहम्। दुहं इति असृग्रं इतिवन्नकारस्य मकारः। दुहन्ति स्म ऋत्विजः। दिवो देवाः स्तोतारः। विश्वा विश्वानि वसूनि। बिभ्रतं धारयन्तं सोमम्॥ (४)

स सुन्वे यो वसूनां यो रायामानेता य इळानाम्।
सोमो यः सुक्षितीनाम्॥

विनियोगोऽस्य षष्ठेऽहनि। स सुन्वे यः वसूनां धनानां आनेता। यो रायां धनानाम्। य इडानां अन्नानाम्। सोमः सुक्षितीनां मनुष्याणां आनेता यः। स सुन्वे तं स्तुमः॥

सोमः स सुन्वे असावि। यः वसूनां रत्नानामानेता। यो रायां धनानां आनेता। य इडानां अन्नानामानेता। यश्च सुक्षितीनां शोभनानां निवासानां आनेता भवति स सुन्वे॥ (५)

त्वं ह्यङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयत् ॥

विनियोगोऽस्य चतुर्थेऽहनि । त्वं अङ्ग शीघ्रम् । आमन्त्रितं वा । दैव्य देवानां हित । पवमान जनिमानि जन्मानि द्युमत्तमः । अमृतत्वाय घोषयत् । संस्तूयसे इत्यध्याहारः ॥

अङ्ग क्षिप्रम् । दैव्या देवसम्बन्धीनि । जनिमानि जनान् गणान् । अभि घोषयत् इति पुरुषव्यत्ययः । अभिघोषयसि शब्दायसे हे पवमान । द्युमत्तमः दीप्तिमत्तमः त्वम् । अमृतत्वाय तेषाम् ॥ (६)

एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः ।
क्रीळन्नूर्मिरपामिव ॥

विनियोगोऽस्य सप्तमेऽहनि । एष स्य सः । धारया सुतः अभिषुतः । अव्या अविमयेन । वारेभिः पवते पूयते । मदिन्तमः अतिशयेन मादयितः । ऊर्मिः सङ्घातः । क्रीडन् रमन् । अपामिव यः ॥

स्यः सः । एष सुतः । अव्या वारेभिः पवित्रेण इत्यर्थः । धारया पवते । क्रीडन् अनायासेन । मदिन्तमः मादयितृतमः । अपां ऊर्मिः संघातः इव ॥ (७)

य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्म्मीव धृष्णवा रुज ।
ओं वर्मीव धृष्णवारुज ॥

य उस्रिया आदित्यरश्मयः अनड्वाहो वा । अन्तरश्मनि अश्मनोऽप्यन्तः । निर्गाः अकृन्तत् नितरां गावः अकृन्तत् अकर्तयत् । अश्मानं

भिन्दय भिन्धि वा । ओजसा स्वेन बलेन । अभि व्रजं गोष्ठम् । तन्निषे वितनुते विस्तारयति । गव्यं गवां भवम् । अश्व्यं अश्वानां भवम् । वर्मि इव । वर्म सन्नहनम् । तद्यस्यास्ति स वर्मी कवची । तस्य सम्बोधनम् । हे धृष्णो धारयितः । आरुज । रुज भङ्गे । भङ्क्त । धनं गव्यं अश्व्यं च मम प्रयच्छेत्यर्थः ॥

इति छान्दसिकाविवरणं माधवाचार्यकृतं परिसमाप्तम्

य उस्रियाः उत्सरणशीलाः । अपि याः अप्सु अन्तरिक्षे भवाः । या आपः अश्मनि मेघे । अन्तः मध्ये स्थिताः । निरकृन्तत् निश्चकर्ष । ओजसा बलेन । समानेनाख्यानात् अत्र प्रथमपुरुषः । लोकेऽपि तथा दृश्यते—यः एवं अकार्षीत् स त्वमिति । गव्यं गोसम्बधि । अश्व्यं च व्रजं समूहम् । अभि उद्दिश्य । तन्निषे शब्दायसे । तन्यतुः इति हि शब्दनाम । वर्मीव वर्म कवचम् । कवचीव योद्धा । आरुज भञ्जय रक्षःप्रभृतीन् । हे धृष्णो धर्षणशील ॥ (८)

एकोनविंशतितमाः पवमान इतीरिताः ।
शतानि पञ्चाशीतिश्च पञ्च चाप्यखिला ऋचः ॥
इत्थं श्रीभरतस्वामी काश्यपो यज्ञदासुतः ।
नारायणार्यतनयो व्याख्यत्सामान्यमृचोऽखिलाः ॥

इति षष्ठे नवमी दशती

षष्ठः प्रपाठकः

इति श्रीभरतस्वामिनः कृतौ सामवेदसंहिताभाष्ये ऋचां विवरणम् ॥

[*At the end of the fifth Das'atī in the third Prapāṭhaka (p. 177), the last four verses were omitted by an oversight and they are given below.*]

प्रपाठकः ३—दशती ५

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधेऽस्माँ अवन्तु ते धियः ॥

मेधातिथेरार्षम् । पिब हे इन्द्र । सुतस्य अभिषुतस्य सोमस्य । षष्ठीनिर्देशादेकदेशमिति वाक्यशेषः । कीदृशस्य सोमस्य एकदेशं पिबामि । उच्यते । रसिनः । रसो ऽस्यास्तीति रसी । तस्य रसिनः रसवतः । पुष्टस्येत्यर्थः । पीत्वा च मत्स्व तृप्यस्वेत्यर्थः । कस्य पुनः स्वभूतस्य सोमस्य एकदेशं पिबामि । उच्यते । नः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । मम मेधातिथेः स्वभूतस्येत्यर्थः । कीदृशस्य सोमस्य । उच्यते । गोमतः । गोशब्देनात्र वसतीवरीलक्षणान्युदकान्युच्यन्ते । तैस्तद्वतः । तैर्मिश्रितस्येत्यर्थः । कस्मात् पुनः पिबामि । उच्यते । यस्मादापिः ज्ञातिः त्वम् । नः अस्माकम् । तस्मात् पिबेत्यर्थः । किंच बोधि बुध्यस्व । यद्यदहं ब्रवीमि तत् सर्वं शृण्वित्यर्थः । क्व पुनः शृणोमि । उच्यते । सधमाद्ये । सह माद्यन्ते यत्र देवताः स सधमाद्यः यज्ञः । तस्मिन् । तस्मिन्नवस्थित इत्यर्थः । किंच वृधे वर्धनाय । पुत्रपशुग्रामादिभिः अस्मान् अवन्तु रक्षन्तु । ते तव स्वभूताः । धियः प्रज्ञाः ॥

मेधातिथिः । पिबा सुतस्य रसिनः सुतं सोमं रसवन्तम् । मत्स्व माद्यस्व च । नः अस्मदीयस्य च । गोमतः गव्येनाशिरा युक्तस्य सोमस्येत्यर्थः । हे इन्द्र आपिः आप्तो बन्धुः । स त्वं नः अस्माकम् । वृधे वृध्यै । बोधि भव । भवतेर्लोटि रूपमिदम् । हेर्धिः । भकारस्य बकारः । शपो लुक् । गुणश्छान्दसः । सधमाद्ये यज्ञे । सह माद्यन्ति अस्मिन् देवा इति सधमाद्यः । अस्मांश्च अवन्तु रक्षन्तु । ते धियः कर्माणि त्वत्परिचरणादीनि ॥ (७)

त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥

भर्गस्यार्षम् । त्वं हे इन्द्र । हि इति पदपूरणः । आ इहि आभिमुख्येन गच्छ । आगच्छेत्यर्थः । चेरवे । चेरुः चेतयिता । तस्मादियं तादर्थ्ये चतुर्थी । चेरवे ज्ञातुर्मम भर्गस्यार्थायेत्यर्थः । विदा जानीहि । भगं धनम् । किमर्थं पुनर्जानामि । उच्यते । वसुत्तये । धनदानं वसुत्तिः । तस्यै वसुत्तये धनदानार्थम् । एददुक्तं भवति । एत्य आत्मीयं धनं जानीहि धनमस्माकं देयमिति । ज्ञात्वा च उद्वावृषस्व । वृषु तृषु मृषु सेचने इत्यस्येदं रूपम् । सेचनं च क्षरणम् । क्षर । देहि इत्यर्थः । हे मघवन् । मघं धनम् । तद्यस्यास्ति स मघवान् इन्द्रः । तस्य संबोधनं हे मघवन् । धनवन्नित्यर्थः । कीदृशाय पुनर्मे भर्गाय ददामि । उच्यते । गविष्टये । इषु इच्छायां इत्यस्येदं रूपम् । गोकामाय इत्यर्थः । उत् । उपसर्गाभ्यासात् वावृषस्वेति क्रियापदाभ्यासः । क्षर देहि इत्यर्थः ॥

भर्गः । त्वं हि त्वं खलु । एहि आगच्छ । चेरवे । चेरुश्चरतेः । आचरते कर्मणि । वसुत्तये । वसूनि हविर्लक्षणानि ददाति इति वसुत्तिः हव्यदातिर्यजमानः । तस्मै । विदा लम्भय । भगं धनम् । उद्वावृषस्व उद्युक्तो भव हे मघवन् ।

गविष्टये गवामन्वेषणाय । उत् उद्वावृषसस्व हे इन्द्र । अश्वमिष्टये अश्वान्वेषणाय च ॥ (८)

न हि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥

. . . . . परिमंसते इति च प्रथमपुरुषैकवचनं उत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । वसिष्ठो नाम ऋषिः । न हि परिमंसते न सर्वतो जानामि इत्यर्थः । किं पुनर्न परिजानामि । उच्यते । वः चरमम् । युष्माकं मध्ये एकमपि चरमं पश्चात् कृतं जघन्यं न जानामि । सर्वे यूयं समानकालाः समानवयस्काः । महान्त इत्यर्थः । यत एवमतो ब्रवीमि । अस्माकं स्वभूतं अद्य अस्मिन्नेवाहनि इत्यर्थः । हे मरुतः सुते । सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । सुतमभिषुतं सोमम् । सचा सह । विश्वे सर्वे पिबन्तु यूयम् । कीदृशाश्च पिबन्तु । उच्यते । कामिनः कामवन्तः । श्रद्धावन्तो भूत्वा पिबन्तु इत्यर्थः ॥

वसिष्ठः । अस्याः पूर्वार्धेनर्चौ मरुतां प्रत्यक्षस्तुतिः । परेण परोक्षस्तुतिः । न हि वो युष्माकं मध्ये । चरमं अवरजम् । चन अपि च । वसिष्ठ ऋषिः परिमंसते वर्जयित्वा स्तौति । परिः वर्जने । मतिः स्तुतिकर्मा । सर्वानेव युष्मान् स्तौति । अस्माकं मरुतो देवाः । अद्य अस्मिन् अहनि । सुते अभिषुते सति । सचा सह । विश्वे पिबन्तु सोमम् । कामिनः कामयमानाः ॥ (९)

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥

प्रगाथ आत्मीयानृत्विज आह। अन्यत् देवतान्तरम्। मा विशंसत इन्द्रादन्यत् देवतान्तरं मा सुवध्वम्। मा स्तुतेत्यर्थः। तच्च अस्तुवानाः हे सखायः ऋत्विजः। परस्परमात्मानं मा रिषण्यत मा हिंसिष्टेत्यर्थः। इन्द्रमित्। इच्छब्द एवकारस्यार्थे। इन्द्रमेव स्तोत स्तुतेत्यर्थः। कीदृशमिन्द्रं स्तुमः। उच्यते। वृषणं वर्षितारम्। कथं स्तुमः। उच्यते। सचा सहभूताः। कदा स्तुमः। उच्यते। सुते अभिषुते सोमे। किं सकृदेव स्तुमः। नेत्युच्यते। मुहुः पुनः पुनरित्यर्थः। केन पुनः स्तुमः। उच्यते। उक्था। द्वितीयाबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम्। उक्थैः स्तोत्रैः इत्यर्थः। शंसत सुष्ठु स्तुतेत्यर्थः॥

प्रगाथः काण्वः। मा चित् मैव। अन्यत् इन्द्रस्तोत्रात्। विशंसत विविधं ब्रूत हे सखायः। मा रिषण्यथ क्षीणा मा भवत वृथाशब्दोच्चारणेन। इन्द्रमित् इन्द्रमेव। स्तोत स्तुत। तप्तनप्तनथनाश्च (पा. ७. १. ४५) इति तस्य तबादेशः। वृषणं वर्षितारम्। सचा सहायाः स्तुत सर्वे। सुते सोमे सति। मुहुः उक्था शस्त्राणि च शंसत इन्द्राय॥ (१०)

TABULAR STATEMENT OF THE DIVISIONS OF THE SĀMAVEDA

Das'atī	Verses	Serial Number
	PRAPĀṬHAKA I	
1	1—10	1—10
2	1—10	11—20
3	1—14	21—34
4	1—10	35—44
5	1—10	45—54
6	1—8	55—62
7	1—10	63—72
8	1—8	73—80
9	1—10	81—90
10	1—6	91—96
	PRAPĀṬHAKA II	
1	1—10	97—106
2	1—8	107—114 [1]
3	1—10	115—124
4	1—10	125—134
5	1—10	135—144
6	1—10	145—154
7	1—10	155—164
8	1—10	165—174 [2]
9	1—10	175—184
10	1—9	185—193
	PRAPĀṬHAKA III	
1	1—10	194—203
2	1—10	204—213
3	1—9	214—222
4	1—10	223—232 [3]
5	1—10	233—242
6	1—10	243—252
7	1—10	253—262
8	1—10	263—272
9	1—10	273—282
10	1—10	283—292
	PRAPĀṬHAKA IV	
1	1—10	293—302
2	1—10	303—312
3	1—10	313—322
4	1—9	323—331
5	1—10	332—341
6	1—10	342—351 [4]
7	1—8	352—359
8	1—10	360—369
9	1—11	370—380

[1] Prathamādhyāya and Āgneya Parvan end here according to Bharatasvāmin and Sāyaṇa.

[2] Bahusāmi ends here according to Bharatasvāmin.

[3] Dvitīyādhyāya ends according to Sāyaṇa and Ekasāmi and Aindra Gāyatra end according to Bharatasvāmin.

[4] Tṛtīyādhyāya ends according to Sāyaṇa and Bṛhatī ends according to Bharatasvāmin.

Das'atī	Verses	Serial Number	Das'atī	Verses	Serial Number
10	1—10	381—390 [1]	10	1—10	477—486
	PRAPĀṬHAKA V			PRAPĀṬHAKA VI	
1	1—8	391—398	1	1—10	487—496
2	1—10	399—408	2	1—14	497—510
3	1—10	409—418	3	1—12	511—522
4	1—8	419—426 [2]	4	1—10	523—532
5	1—10	427—436	5	1—12	533—544
6	1—10	437—446	6	1—9	545—553
7	1—10	447—456	7	1—12	554—565
8	1—10	457—466 [3]	8	1—12	566—577
9	1—10	467—476	9	1—8	578—585 [4]

[1] Triṣṭup ends according to Bharatasvāmin.
[2] Anuṣṭup ends according to Bharatasvāmin.
[3] Caturthādhyāya and Aindra Parva end according to Sāyaṇa. Aindra ends according to Bharatasvāmin also.
[4] Pavamānaparvan ends according to Sāyaṇa.

In the text-editions by Wilson and Benfey and in the Ajmer series the division into 6 Prapāṭhakas and each Prapāṭhaka into Das'ātīs has been accepted.

Sāyaṇa adopts the division into 5 Adhyāyas, the first 4 with 12 Khaṇḍas (each Das'atī being called a Khaṇḍa) and the last with 11 Khaṇḍas. The first Adhyāya is Āgneya Parvan, the next 3 Adhyāyas form Aindra Parvan and the last Adhyāya is Pāvamāna Parvan. These three Parvans are accepted by Bharatasvāmin too.

Bharatasvāmin adopts another division also. Bahusāmī ends with II. 6, Ekasāmin and Aindra Gāyatra with III. 4, Bṛhatī with IV. 6, Triṣṭup with IV. 10, and Anuṣṭup with V. 4.

साधारणे त्रिश्रुतिः स्यादन्तरत्वे चतुःश्रुतिः ।
गांधार इति तद्भेदौ द्वौ निःशङ्केन कीर्तितौ ॥ ४२ ॥
मध्यमः षड्जवद् द्वेधा ऽन्तरसाधारणाश्रयात् ।
पञ्चमो मध्यमग्रामे त्रिश्रुतिः कैशिके पुनः ॥ ४३ ॥
मध्यमस्य श्रुतिं प्राप्य चतुःश्रुतिरिति द्विधा ।
धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः ॥ ४४ ॥
कैशिके काकलीत्वे च निषादस्त्रिचतुःश्रुतिः ।
प्राप्नोति विकृतौ भेदौ द्वाविति द्वादश स्मृताः ॥ ४५ ॥
ते शुद्धैः सप्तभिः सार्धं भवन्त्येकोनविंशतिः ।

चाच्युत इति दृश्यते ॥ साधारणे त्रिश्रुतिः स्यादित्यत्र मध्यमसाधारण इत्यर्थः । अन्तरत्वे चतुःश्रुतिरित्यत्र स्वस्यान्तरत्व इति विशेषणीयम् ॥ **मध्यमः षड्जवदिति** । अत्र षड्जवदिति षड्जो यथा द्विश्रुतिर्विकृतश्चयुतत्वाच्युतत्वभेदभिन्नस्तथा मध्यमो ऽपीति वतेरर्थः ॥ कैशिके काकलीत्वे चेत्यत्र कैशिके षड्जसाधारणे त्रिश्रुतिः, स्वस्य काकलीत्वे चतुःश्रुतिरिति ॥ ३९—४५- ॥

(सु०) एवं श्रुतीः श्रुतिजातीः [1]श्रुतिजातिभ्यः स्वरोत्पत्तिं च कथयित्वा स्वरभेदान्निरूपयति—त इति । ते षड्जादयः स्वरास्त्रिधा त्रिप्रकाराः । कुतस्त्रिप्रकारत्वम् ? अत आह—मन्द्रमध्यतारास्थानभेदात् । ततश्च तात्त्विको भेदो नास्ति, किं तु स्थानकल्पितो भेदः । यथैक एव देवदत्तस्त्रिभूमिके प्रासादे प्रथमभूमिकायां द्वितीयभूमिकायां तृतीयभूमिकायां च तिष्ठन्नन्य इव [2]भासते तथा स्वरा अपि स्थानविशेषेणेत्यर्थः । ननु यथा षड्जादीनां सप्तानां स्वराणां स्थान-

[1] श्रुतिभ्यः.
[2] प्रतिभाति.

विशेषेणैव भेदस्तात्त्विकः प्रतीयते तथा मन्द्रमध्यतारस्थानस्थितानां षड्जादीनामपीति कथमत्रैव काल्पनिकत्वमङ्गीक्रियते ? ब्रूमः ; प्रत्यभिज्ञानात्स्थानत्रये ऽपि त एव स्वरा इति प्रतीयते । य एव मन्द्रस्थः षड्जः स एवायं मध्यस्थाने तारस्थाने च प्रतीयत इति सकललोकसाक्षिका प्रत्यभिज्ञा नावज्ञातुं शक्यते । नैवं षड्जर्षभादिषु सप्तसु प्रत्यभिज्ञालेशो ऽप्यस्तीति महान्विशेषः । एवं शुद्धान्सप्त स्वरान्निरूप्य द्वादश विकृतान्स्वरान्विभज्य निरूपयति—त एवेति । ते शुद्धाः सप्त स्वरा एव विकृतावस्था विकारं प्राप्ता द्वादशसंख्याका भवन्ति ॥ ३९ ॥ तमेव विकारं दर्शयति—च्युत इति । द्विश्रुतिः षड्जो द्विधा विकृतो भवतीति च्युतश्चाच्युतश्चेत्युच्यते । तत्र च्युतो यस्यां चतुर्थ्यां श्रुतौ स्थापितस्तस्याः सकाशात्प्रच्युतः, अच्युतस्तु तस्यामेव श्रुतावावस्थितः पूर्वश्रुतिहीनतया विकृतो भवति । कदा तस्यैवंविधं विकृतत्वम् ? तदाह—साधारण इति । साधारणे स्वसाधारणे निषादस्य च काकलीत्व उभयविधं विकृतत्वम् ।

'निषादो यदि षड्जस्य श्रुतिमाद्यां समाश्रयेत् ।
ऋषभस्त्वन्तिमां प्रोक्तं षड्जसाधारणं तदा ॥'

इति वक्ष्यमाणे षड्जसाधारणे षड्जः स्वस्थानाच्चतुर्थश्रुतेः प्रच्युतस्तृतीयश्रुतावावस्थितो विकृतो भवति ।

'श्रुतिद्वयं चेत्षड्जस्य निषादः संश्रयेत्तदा ।
स काकली मध्यमस्य गांधारस्त्वन्तरः स्वरः ॥'

इति वक्ष्यमाणे निषादस्य काकलीत्वे पूर्वश्रुतिद्वयहीनत्वादच्युतः स्वस्थाने चतुर्थश्रुतौ स्थित एव विकृतो भवति । ननु स्वस्थानस्थितस्य पूर्वश्रुतिद्वयहीनत्वे ऽपि ध्वनिविकाराभावात्कथं विकृतत्वम् ? उच्यते—यद्यपि पूर्वश्रुतिविहीनत्वे तत्स्थानस्थितत्वाद् ध्वनिविकारो नास्ति, तथा ऽपि निषादस्य स्वस्थानस्थितत्वे चतुःश्रुतित्वात्षड्जस्यायतत्वं भवति । यदा काकलीत्वे निषादः षड्जस्य द्वितीयश्रुतौ तिष्ठति, तदा द्विश्रुतित्वादनायतः प्रतीयते । तस्माद्भवत्येव विकृतः ॥ ४० ॥ ऋषभस्य विकृतत्वं कथयति—साधारण इति । साधारणे षड्जसाधारणे षड्जस्यान्तिमां श्रुतिमृषभो गृह्णाति, तदा चतुःश्रुतिः सन्विकृतो भवति ॥ ४१ ॥ गांधारस्य द्वौ भेदौ विकृतौ कथयति—साधारण इति । साधारणे मध्यमसाधारणे

मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ॥ ४६ ॥
गजश्च सप्त षड्जादीन्क्रमादुच्चारयन्त्यमी ।

मध्यमस्य प्रथमां श्रुतिं गांधारो गृह्णाति । तदा त्रिश्रुतिर्विकृतो भवति । [1]अन्तरस्तु गांधारो मध्यमस्याद्यं श्रुतिद्वयं गृह्णाति । तदा चतुःश्रुतिः सन्विकृतो भवति ॥४२॥ मध्यमस्य द्वौ विकृतौ भेदौ कथयति—मध्यम इति । षड्जो यथा च्युतत्वेनाच्युतत्वेन च द्वेधा विकृतः कथितः स्वसाधारणे निषादस्य च काकलीत्वे, तद्वन्मध्यमसाधारणे गांधारस्यान्तरत्वे च मध्यमो ऽपि द्वेधा विकृतो भवति ।

'मध्यमस्यापि गपयोरेवं साधारणं मतम् ।' इति,
'. . . . मध्यमस्य गांधारस्त्वन्तरः स्वरः ।'

इति च मध्यमसाधारणं गांधारस्यान्तरत्वं च वक्ष्यते ॥ ४२- ॥ पञ्चमस्य द्वेधा विकृतत्वं कथयति—**पञ्चम** इति । पञ्चमे तृतीयश्रुतिसंस्थिते सति मध्यमग्राम इति वक्ष्यते । तस्मिन्मध्यमग्रामे त्रिश्रुतिः पञ्चमो विकृतो भवति । पुनश्च कैशिके मध्यमसाधारणे मध्यमस्यान्तिमां श्रुतिं प्राप्य चतुःश्रुतिः सन्विकृतो भवति ॥-४३, ४३- ॥ धैवतस्यैकधा विकृतत्वं कथयति—**धैवत** इति । मध्यमग्रामे पञ्चमस्य तृतीयश्रुताववस्थितत्वादन्तिमा पञ्चमस्य श्रुतिर्धैवतं प्रविशति । स तदा चतुःश्रुतिर्विकृतो भवति ॥-४४ ॥ निषादस्य द्विधा विकृतत्वं कथयति—**कैशिक** इति । कैशिके षड्जसाधारणे निषादः षड्जस्य प्रथमश्रुतौ यदा तिष्ठति, तदा त्रिश्रुतिः सन्विकृतः; यदा तु काकली भवन्षड्जस्य श्रुतिद्वयं गृहीत्वा चतुःश्रुतिर्भवति तदा ऽपि विकृतः । एवं द्वादश विकृतभेदाः । विकृतानां शुद्धानामप्येकोनविंशतिर्भेदा भवन्तीत्याह—**तैरिति** ॥ ४५, ४५- ॥

(क०) लोकतो ऽपि षड्जादिस्वरूपपरिज्ञानाय मयूरादिप्राणिविशेषध्वनिं निदर्शनाभिप्रायेणाह—**मयूरेति** । स्वराणामन्योऽन्यं स्वरूपकृतं भेदमुक्त्वा प्रसङ्गात्प्रयोगार्थं प्रकारभेदेन तेषां चातुर्विध्यं दर्शयति—

[1] अन्तरस्वरस्तु.

चतुर्विधाः स्वरा वादी संवादी च विवाद्यपि ॥ ४७ ॥
अनुवादी च वादी तु प्रयोगे बहुलः स्वरः ।
श्रुतयो द्वादशाष्टौ वा ययोरन्तरगोचराः ॥ ४८ ॥
मिथः संवादिनौ तौ स्तो निगावन्यविवादिनौ ।
रिधयोरेव वा स्यातां तौ तयोर्वा रिधावपि ॥ ४९ ॥

चतुर्विधा इति । वदनाद्वादी । ननु वदनादिकं प्राणिधर्मः कथमचेतनानां स्वराणां संभवति ? सत्यम् ; वदनं हि नाम रागप्रतिपादकत्वं विवक्षितम्, न वचनमित्यदोषः । संवदनात्संवादी । संवदनं नाम यद्वादिना स्वरेण रागस्य रागत्वं जनितं तन्निर्वाहकत्वम् । विवदनाद्विवादी । विवदनं नाम वाद्यादिभिः स्वरैरुत्पाद्यमानाया रक्तेर्विनाशकत्वम् । अनुवदनादनुवादी । अनुवदनं नाम वादिसंवादिसंपादितरक्त्यनुकूलत्वम् । क्रमेण तान्लक्षयति—**वादी त्वित्यादिना** । प्रयोगे जात्यादौ बहुलो ग्रहत्वन्यासत्वादिभेदेन पुनः पुनरावृत्तः । संवादिलक्षणपरिज्ञानार्थमादौ मण्डलप्रस्तारं वीणाप्रस्तारं वा लिखेत् । तत्र मण्डलप्रस्तारो यथा—षड्ऊर्ध्वरेखा लिखित्वा तदूर्ध्वाधः किंचिदग्राण्यवशेष्य मध्ये पञ्च तिर्यग्रेखाः किंचिदग्रावशेषं लिखेत् । तदा परितो रेखाऽग्राणि द्वाविंशतिर्भवन्ति । वीणाप्रस्तारस्तु—तिर्यग्रेखा एव द्वाविंशतिं लिखेत् । तत्र वामतो दक्षिणतो वा रेखाऽग्राणि द्वाविंशतिर्भवन्ति । तत्रैकस्मिञ्श्रुतिमण्डले शुद्धान्विकृतान्वा षड्जादीन्स्वस्वश्रुतिसंख्यया विलिखेत् । तेषु ययोः स्वरयोरन्तरगोचराः स्वाधारश्रुती विहाय मध्यवर्तिन्यः श्रुतयो द्वादशाष्टौ वा दृश्यन्ते तौ मिथः संवादिनौ भवत इति ज्ञातव्यम् । **निगावन्यविवादिनाविति** । अन्येषां पञ्चानां विवादिनौ विरोधिनौ । ननु निगयोरितरान्पञ्चापि स्वरान्प्रति विवादित्वमुक्तम् ; तदनुपपन्नम्, शुद्धयोर्मध्यमनिषादयोः परस्परं संवादित्वदर्शनादित्यपरितोषेण

शेषाणामनुवादित्वं वादी राजा ऽत्र गीयते ।
संवादी त्वनुसारित्वादस्यामात्यो ऽभिधीयते ॥ ५० ॥
विवादी विपरीतत्वाद्धीरैरुक्तो रिपूपमः ।

पक्षान्तरमाह—**रिधयोरेव** वेति । प्रथममन्यविवादिनावित्यविशेण कथनं तु समश्रुतिकयोरेव संवाद इति मतानुसारेण । अतो द्वादशाष्टश्रुत्यन्तरितत्वमात्रमेव संवादिलक्षणमिति सिद्धं भवति । **तौ तयोर्वेति** । तौ रिधौ तयोर्निगयोर्विवादिनौ स्तः । एतेनैकश्रुत्यन्तरितौ परस्परं विवादिनाविति लक्षणं सूचितं भवति । 'द्व्यन्तरत्वाद्विवादित्वमुक्तम्' इति मतङ्गोक्तस्यापि द्वयोरेकस्वराधारश्रुत्या सह द्व्यन्तरत्वस्य विवक्षितत्वादेकश्रुत्यन्तरितत्वमेवार्थः । एवम् 'त्रयोदशनवान्तरम्' इति मतङ्गोक्तस्य संवादिलक्षणस्यापि द्वादशाष्टान्तरत्वमेवार्थः । अतः शुद्धावस्थायां रिगयोर्धन्योश्च यथा परस्परं विवादः, तथा विकृतावस्थायां गमयोर्निसयोश्च विवादो द्रष्टव्यः । अयमभिप्रायः—वादिसंवाद्यनुवादिनां परस्परं स्थानव्यत्ययेन प्रयोगे ऽपि जातिरागहानिर्न भवति; विवादिनस्तु प्रयोगे जातिरागहानिर्भवेदिति । शेषाणां वाद्यादिलक्षणरहितानाम् । अथ प्रयोगे वाद्यादीनां प्रधानोपसर्जनभावेन तारतम्यं सदृष्टान्तं दर्शयति—वादी राजेत्यादिना ॥ -४६—५१ ॥

(सु०) एतेषां स्वराणां स्वरूपज्ञानार्थमसाधारणानुच्चारयितॄन्कथयति—मयूरेति । मयूरः षड्जमुच्चारयति, चातक ऋषभम्, छागो गांधारम्, क्रौञ्चो मध्यमम्, कोकिलः पञ्चमम्, दर्दुरो धैवतम्, गजो निषादमिति ॥ -४६, ४६- ॥ स्वराणां चातुर्विध्यं कथयति—**चतुर्विधा** इति । वादिनो लक्षणं कथयति—**वादी** त्विति । प्रयोगे जातिरागादौ बहुलो बाहुल्येन य उच्चार्यते सो ऽंशस्वरापरपर्यायो वादी । ननु वदतीति वादी; वदनं च प्राणिधर्मः कथमचेतनानां स्वराणां संभवति? सत्यम्; वदनं हि नामात्र रागप्रतिपादकत्वं विवक्षितम्; ततश्च रागाणां रागत्वं वदन्ति प्रतिपादयन्तीति वादिनः ॥ -४७, ४७- ॥ संवादि-

लक्षणं कथयति—श्रुतय इति। द्वादशाष्टौ वा श्रुतयो ययोरन्तरे वर्तन्ते तौ मिथः परस्परं संवादिनौ भवतः। ननु मतङ्गेन त्रयोदशनवश्रुत्यन्तरत्वेन संवादित्वमुक्तम्; यदाह—'संवादिनस्तु पुनः समश्रुतिकत्वे सति त्रयोदशनवान्तरत्वे वा ऽन्योऽन्यं बोद्धव्याः' इति। दत्तिलेनाप्युक्तम्—

'मिथः संवादिनौ ज्ञेयौ त्रयोदशनवान्तरौ।'

इति; तत्कथमुच्यते 'श्रुतयो द्वादशाष्टौ वा ययोरन्तरगोचराः' इति? उच्यते—ययोः श्रुत्योः स्वरावस्थितौ ते श्रुती विहाय मध्यस्थाः श्रुतयो द्वादशाष्टौ वा यदि भवन्ति तदा तयोः संवादित्वमित्यनेनाभिप्रायेणैवमुक्तम्। मतङ्गादिभिस्तु यो यस्य संवादी तस्यावस्थानश्रुतिमपि मध्ये गणयित्वा त्रयोदशनवान्तरत्वमुक्तमिति न कश्चिद्विसंवादः। ततः षड्जस्य मध्यमपञ्चमौ संवादिनौ, ऋषभस्य धैवतः, गांधारस्य निषादः, मध्यमस्य षड्जः, पञ्चमस्य षड्जः, धैवतस्यर्षभः, निषादस्य गांधार इति। ननु संवादित्वेन क उपयोगः? ब्रूमः—यस्मिन्गीते यो ऽंशत्वेन परिकल्पितः षड्जस्तस्य स्थाने मध्यमः क्रियमाणो जातिरागनाशको न भवति; यस्मिन्वा ऽंशत्वेन मूर्च्छनावशान्मध्यमः प्रयुक्तस्तस्य स्थाने षड्जः प्रयुज्यमानो जातिरागनाशको न भवति; षड्जपञ्चमयोः स्थाने पञ्चमषड्जौ प्रयुज्यमानौ जातिरागहानिकरौ न भवतः; एवमृषभधैवतयोः स्थाने धैवतर्षभौ प्रयुज्यमानौ जातिरागविनाशकरौ न भवतः; गांधारनिषादयोः स्थाने निषादगांधारौ प्रयुज्यमानौ जातिरागहानिं न कुरुत इति। विवादिलक्षणमाह—**निगाविति**। निषादगांधारावन्येषां सर्वेषां स्वराणां विवादिनौ। पक्षान्तरमाह—**रिधयोरिति**। तौ निषादगांधारावृषभधैवतयोरेव विवादिनाविति। तृतीयं पक्षमाह—**तयोरिति**। तयोर्निषादगांधारयोर्ऋषभधैवतौ विवादिनाविति। मतङ्गेन तु द्विश्रुत्यन्तरितत्वेन विवादित्वमुक्तम्; यदाह 'द्व्यन्तरौ तु स्वरौ विवादिनौ' इति। ननु किमिदं विवादित्वम्? ब्रूमः—वाद्यादिभिः स्वरैर्यद्रागस्य वादित्वं संवादित्वमनुवादित्वं वा प्राप्तं तद्विनाशकत्वं नाम विवादित्वम्। ततश्चर्षभस्थाने यदा गांधारः प्रयुज्यते गांधारस्थाने वर्षभस्तदा जातिरागहानिर्भवति। अनुवादिलक्षणं कथयति—**शेषाणामिति**। येषां परस्परं संवादित्वं विवादित्वं वा नास्ति तेषामनुवादित्वम्। मतङ्गेन त्वेकश्रुत्यन्तरहीनत्वेनानु-

नृपामात्यानुसारित्वादनुवादी तु भृत्यवत् ॥ ५१ ॥
गीर्वाणकुलसंभूताः षड्जगांधारमध्यमाः ।

वादित्वमुक्तम् । नन्वनुवादी स्वरः किमनुवदति ? यद्वादिना रागस्य रागत्वं संपादितं तत्प्रतिपादकत्वं नामानुवादित्वम् । ततश्च षड्जस्थान ऋषभः प्रयुज्यमान ऋषभस्थाने च षड्जः प्रयुज्यमानो जातिरागविनाशकरो न भवति ; पञ्चमस्थाने धैवतः प्रयुज्यमानो धैवतस्थाने च पञ्चमः प्रयुज्यमानो जातिरागविनाशकरो न भवति ; षड्जस्थाने धैवतः प्रयुज्यमानो धैवतस्थाने च षड्जः प्रयुज्यमानो जातिरागविनाशकरो न भवति ; तथा पञ्चमस्थान ऋषभः प्रयुज्यमान ऋषभस्थाने च पञ्चमः प्रयुज्यमानो जातिरागविनाशकरो न भवति ; मध्यमस्थान ऋषभ ऋषभस्थाने च मध्यमस्तथा धैवतस्थाने मध्यमो मध्यमस्थाने च धैवतः प्रयुज्यमानो जातिरागनाशको न भवतीति । ऋषभगांधारयोश्चैकश्रुत्यन्तरहीनत्वेनानुवादित्वे प्राप्ते द्वयन्तरत्वाद्विवादित्वम् । एवं षड्जग्रामे वादिसंवादिविवाद्यनुवादिविचारः । एवमेव मध्यमग्रामे ऽपि पञ्चमस्य तृतीयश्रुत्यवस्थितत्वात्क्वचिद्विकृतो ऽयमेव विचारो बोद्धव्यः । तत्र षड्जस्य संवादी मध्यमः ; ऋषभस्य धैवतपञ्चमौ ; गांधारस्य निषादः ; मध्यमस्य षड्जनिषादौ ; पञ्चमस्यर्षभः ; धैवतस्यर्षभः ; निषादस्य गांधारमध्यमाविति । विवादित्वं ग्रामद्वये ऽपि समानमेव । षड्जस्य पञ्चमधैवतर्षभा अनुवादिनः ; ऋषभस्य षड्जमध्यमौ ; गांधारनिषादयोः सर्वविवादित्वादनुवादित्वं नास्ति ; मध्यमस्यर्षभधैवतौ ; पञ्चमस्य मध्यमधैवतौ ; धैवतस्य मध्यमपञ्चमाविति ज्ञातव्यम् । एतेषां वाद्यादीनां प्रधानगुणभावमाह—**वादी राजेति** । यथा राजा मुख्यस्तथा वादी, अन्येषां तदनुसारित्वात् । संवादी त्वस्य वादिनः प्रधानपुरुषतुल्यः ; कुतः ? अनुसारित्वात्सहवृत्तेः, अत एवामा सह वसतीत्यमात्य इत्यमात्यशब्देनाभिधीयते । विवादी तु रिपुतुल्यो विपरीतत्वात् ; अननुसारित्वादित्यर्थः । अनुवादी सेवकवत् ; नृपो वादी, अमात्यः संवादी, तदनुसारित्वात् । भृत्यो ऽप्युभयानुसारी भवति ॥ -४६—५१ ॥

(क०) ज्ञात्वा प्रयोगे ऽदृष्टातिशयो ऽप्यस्तीति स्वराणां कुलादीन्युद्देशक्रमेणाह—**गीर्वाणकुलेत्यादिना** ॥ ५२— ५९- ॥

पञ्चमः पितृवंशोत्थो रिधावृषिकुलोद्भवौ ॥ ५२ ॥
निषादो ऽसुरवंशोत्थो ब्राह्मणाः समपञ्चमाः ।
रिधौ तु क्षत्त्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ ॥ ५३ ॥
शूद्रावन्तरकाकल्यौ स्वरौ वर्णास्त्विमे क्रमात् ।
पद्माभः पिञ्जरः स्वर्णवर्णः कुन्दप्रभो ऽसितः ॥ ५४ ॥
पीतः कर्बुर इत्येषां जन्मभूमीरथ ब्रुवे ।
जम्बूशाककुशक्रौञ्चशाल्मलीश्वेतनामसु ॥ ५५ ॥
द्वीपेषु पुष्करे चैते जाताः षड्जादयः क्रमात् ।
वह्निर्वेधाः शशाङ्कश्च लक्ष्मीकान्तश्च नारदः ॥ ५६ ॥
ऋषयो ददृशुः पञ्च षड्जादींस्तुम्बुरुर्धनी ।
वह्निब्रह्मसरस्वत्यः शर्वश्रीशगणेश्वराः ॥ ५७ ॥
सहस्रांशुरिति प्रोक्ताः क्रमात्षड्जादिदेवताः ।
क्रमादनुष्टुब्गायत्री त्रिष्टुप्च बृहती ततः ॥ ५८ ॥
पङ्क्तिरुष्णिक्च जगतीत्याहुश्छन्दांसि सादिषु ।
सरी वीरे ऽद्भुते रौद्रे धो बीभत्से भयानके ॥ ५९ ॥
कायौं गनी तु करुणे हास्यशृङ्गारयोर्मपौ ।

(सु०) इदानीं षड्जादीनां स्वराणां कुलानि कथयति—**गीर्वाणेति** । षड्जगांधारमध्यमास्त्रयः सुरवंशसमुत्पन्नाः; पञ्चमः पितृवंशोद्भवः; ऋषभधैवतावृषिवंशोद्भवौ; निषादो ऽसुरवंश्यः । इदानीं ब्राह्मणत्वादिवर्णविशेषं कथयति—**ब्राह्मणा इति** । षड्जमध्यमपञ्चमा ब्राह्मणाः; ऋषभधैवतौ क्षत्त्रियौ; निषादगांधारौ वैश्यौ; अन्तरकाकल्यौ शूद्रौ । तयोस्तु लक्षणं मूर्च्छनाप्रकरणे वक्ष्यति ॥ ९१–९३- ॥ अधुना तु सितादिवर्णविशेषं कथयति—**पद्माभ** इति । पद्माभो रक्तवर्णः षड्जः; ऋषभस्तु पिञ्जर ईषत्पीतवर्णः; गांधारः स्वर्णवर्णो ऽतिपीतवर्णः; मध्यमः कुन्दवर्णः शुभ्रः; पञ्चमो ऽसितः कृष्णवर्णः;

धैवतः पीतवर्णः; निषादः कर्बुरो विचित्रवर्णः ॥ -९४ ॥ अधुना ऽमूनां स्वराणां जन्मभूमीः प्रतिज्ञाय कथयति—एषां जन्मभूमीरिति। जम्बूद्वीपे षड्ज-स्योत्पत्तिः; शाकद्वीप ऋषभस्य; कुशद्वीपे गांधारस्य; क्रौञ्चद्वीपे मध्यमस्य; शाल्मलीद्वीपे पञ्चमस्य; श्वेतद्वीपे धैवतस्य; पुष्करद्वीपे निषादस्य। नन्विदं द्वीपोत्पत्तिकथनं कुत्रोपयुज्यते? स्वराणां सप्तत्वनिश्चय इति ब्रूमः। तथा चोक्तं मतङ्गेन—'ननु कथं सप्त स्वरा इति नियमः? उच्यते—यथा सप्तधात्वाश्रि-तत्वेन सप्तैव धातवो रसादयो ज्ञेयाः; तथा चाह सुश्रुतः—

'त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्लानि धातवः।'

इति; तथा सप्तचक्राश्रितत्वेन सप्तद्वीपाश्रितत्वेन वा सप्तैव स्वरा इति। ननु काकल्यन्तरयोरपि स्वरान्तरयोः सद्भावात्कथं सप्तैव स्वरा इति नियमः सिध्यति? नव स्वरा इति हि वक्तव्यम्; मैवम्, अनंशत्वादनयोः स्वरान्तरत्वं नास्ति; विकृतनिषादस्यैव काकलीत्वं विकृतगांधारस्यैवान्तरत्वम्। तथा चोक्तं दत्तिलेन—

'निषादः काकलीसंज्ञो द्विश्रुत्युत्कर्षणाद्भवेत्।
गांधारस्तद्वदेव स्यादन्तरस्वरसंज्ञितः ॥
अनंशत्वात्तु भेदेन स्वरत्वं नोच्यते तयोः।
अतो निषादगांधारावेतावाद्यैरुदाहृतौ ॥'

इति ॥ ९५, ९५- ॥ अथ स्वराणां द्रष्टॄनृषीन्कथयति—**वह्निरिति**। षड्जस्य-र्षिर्वह्निः; ऋषभस्य ब्रह्मा; गांधारस्य चन्द्रः; मध्यमस्य विष्णुः; पञ्चमस्य नारदः; धैवतनिषादयोस्तुम्बुरुः ॥ -९६, ९६- ॥ देवताः कथयति—**वह्नीति** ॥ -९७, ९७- ॥ छन्दांसि कथयति—**क्रमादनुष्टुबिति**। ननु स्वराणाम् 'पद्माभः-' इत्यादि वर्णनिरूपणमृषिदैवतच्छन्दोनिरूपणं च कुत्रोपयुज्यते? स्वरोपासना-यामित्यवेहि। यदा स्वराणां बीजैः षड्जादयः स्वरा उपास्यन्ते तदा तेषामृषि-देवताच्छन्दांसि स्मर्तव्यानि, वर्णाश्च ध्येयाः। अत एव स्वराणां बीजान्युक्तानि मतङ्गेन। यथा—

'वर्गाष्टकं तु संप्राप्य अकारादि यशान्तकम्।
वर्णमात्रासमायुक्तमुद्धरेत्स्वरसप्तकम् ॥

अष्टमस्य तृतीयं तु हरिबीजसमन्वितम् ।
आद्यं स्वरं स्वरज्ञस्तु उद्धरेत्स प्रयत्नतः ॥
सप्तमस्य द्वितीयं तु कामबीजसमन्वितम् ।
उद्धरेत्तु स्वरं नित्यं सौरभेयं[1] मनोहरम् ॥
द्वितीयस्य तृतीयं तु हरिबीजसमन्वितम् ।
समुद्धरेत्तृतीयं तं सरसं स्वरमुत्तमम् ॥
षष्ठस्यापि हि वर्गस्य अन्तिमं चादिसंयुतम् ।
अविनष्टं विजानीयान्मध्यमस्वरमुत्तमम् ॥
तदादि प्रथमोपेतं स्वरं संविद्धि शोभनम् ।
व्योमसंख्यासमायुक्तमोष्ठस्थानसमुद्भवम् ॥
पञ्चमस्यापि वर्गस्य चतुर्थं चादिभूषितम् ।
कोदण्डद्वयसंभूतमुद्धरेत्स्वरमुत्तमम् ॥
अकारान्तान्तसंभिन्नं पञ्चमान्तं समुद्धरेत् ।
ब्रह्मस्थानसमुद्भूतं सुतारध्वनिसंयुतम् ॥
आगमस्थः स्वरोद्धार एवं तावत्प्रदर्शितः ।'

इति ॥ -९८, ९८- ॥ अथ स्वराणां रसव्यञ्जकनियममाह—सरी इति । षड्जर्षभौ वीराद्भुतरौद्रेषु; धैवतो बीभत्सभयानकयोः; गांधारनिषादौ करुणे; मध्यम-पञ्चमौ हास्यशृङ्गारयोरिति ॥ -९९, ९९- ॥

इति प्रथमे स्वरगताध्याये नादस्थानश्रुतिस्वरजातिकुलदैवत-र्षिच्छन्दोरसप्रकरणम् ॥ ३ ॥

---

[1] 'सौरभेयवृषभम्' इति सुधाटिप्पणी.

अथ चतुर्थं ग्राममूर्च्छनाक्रमतानप्रकरणम्

ग्रामः स्वरसमूहः स्यान्मूर्च्छनाऽऽदेः समाश्रयः[1] ।
तौ द्वौ धरातले तत्र स्यात्षड्जग्राम आदिमः ॥ १ ॥
द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ।
षड्जग्रामः पञ्चमे स्वचतुर्थश्रुतिसंस्थिते ॥ २ ॥

(क०) एवं स्वरान्निरूप्य व्यस्तानां तेषां दृष्टादृष्टफलोपयोगित्वं नास्तीति तत्सिद्धये नियतसमस्तस्वरसंनिवेशरूपान्मूर्च्छनाऽऽदीन्निरूपयिष्यंस्तदाश्रयत्वाद्व्यवस्थापकत्वाच्च ग्रामयोः प्रसक्तयोस्तत्सामान्यलक्षणं तावदाह—**ग्राम** इति । ग्रामवद् ग्रामः । यथा लोके जनसमूहो ग्राम इत्युच्यते, एवमत्र स्वरसमूहो ग्राम इति विवक्षितः । स्वरसमूहो ग्राम इत्येतावत्युच्यमाने लौकिकवैदिकवाक्येष्वपि स्वरसमूहत्वसंभवात्तत्रातिव्याप्तिः स्याल्लक्षणस्य । तद्व्यावृत्त्यर्थं मूर्च्छनाऽऽदेः समाश्रय इति विशेषणम् । अत्रादिशब्देन क्रमतानवर्णालंकारजात्यादयो गृह्यन्ते । सामान्यलक्षणे ग्राम इति जातावेकत्वनिर्देशादविशेषेण सप्तानामपि स्वराणां ग्रामविशेषणत्वे प्राप्ते, त्रयाणामेव तद्विशेषणत्वमवगमयन्ग्रामविशेषलक्षणानि लोकव्यवस्थापूर्वकमाह—**तौ द्वावित्यादिना** । ननु समूहित्वाविशेषेण सप्तानामपि ग्रामव्यपदेशकत्वसंभवे कथं धरातले द्वावित्यवधारणमिति चेत्तत्रोच्यते—शुद्धविकृतरूपेण द्विविधस्वरप्रयोगवशात्,

'द्वौ ग्रामौ विश्रुतौ लोके षड्जमध्यमसंज्ञकौ'

इति मुनिवचनाच्च शुद्धाश्रयत्वात्षड्जग्राम आदिमो विकृताश्रयत्वाद्द्वितीयो मध्यमग्राम इत्युपपद्यत इति । **स्वचतुर्थश्रुतिसंस्थित** इति । स्वकीय-

[1] •मूर्च्छनादिसमाश्रयः

स्वोपान्त्यश्रुतिसंस्थे ऽस्मिन्मध्यमग्राम इष्यते ।
यद्वा धस्त्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ॥ ३ ॥
रिषयोः श्रुतिमेकैकां गांधारश्चेत्समाश्रितः ।
पञ्चुतिं धो निषादस्तु धश्रुतिं सश्रुतिं श्रितः ॥ ४ ॥
गांधारग्राममाचष्ट तदा तं नारदो मुनिः ।
प्रवर्तते स्वर्गलोके ग्रामो ऽसौ न महीतले ॥ ५ ॥

चतुर्थश्रुतौ करुणाजातिभेद आलापिन्यामादितः सप्तदश्यां स्थिते सति षड्जग्रामः । **स्वोपान्त्यश्रुतिसंस्थ** इति । स्वोपान्त्यश्रुतावायतामेदे संदीपन्यां षोडश्यां संतिष्ठत इति संस्थः, तस्मिन् । अत्र चतुर्थश्रुतिसंस्थित इत्युपान्त्यश्रुतिसंस्थ इति चैतावत्युक्ते, मध्यमग्रामे मध्यमसाधारणे पञ्चमस्य चतुःश्रुतिकत्वेन स्वतृतीयश्रुतिसंस्थस्यापि मध्यमान्तिमश्रुतिसाहित्येन चतुर्थश्रुतिसंस्थत्वम्, तस्यामवस्थायां स्वद्वितीयश्रुतेरुपान्त्यत्वेनोपान्त्यश्रुतिसंस्थत्वं च संभवतीति तन्निवृत्त्यर्थमुभयत्र स्वशब्दोपादानं कृतम्, तयोस्तृतीयद्वितीययोः श्रुत्योः स्वकीयत्वेन रूपेण चतुर्थत्वोपान्त्यत्वाभावात् । यद्वेत्यभ्युच्चयपक्षः । कुतः? पञ्चमभेदायत्तत्वेन ग्रामभेदे सिद्धे ग्रामभेदाश्रयणेन धैवतभेदकथनात्, धैवतस्य पञ्चमसंनिधानं विना स्वगतभेदाप्रतीतेः स्वतो ग्रामभेदकत्वाभावाच्च । भेदकत्वकथनं तु धैवतः पञ्चमान्त्यश्रुतिलाभाच्चतुःश्रुतिर्विकृतः संस्तदलाभे शुद्धश्च सन्साक्षाल्लक्षणस्य पञ्चमस्य क्रमात्त्रिश्रुतित्वं चतुःश्रुतित्वं चावगमयन्ग्रामयोरुपलक्षणं भवतीति ॥ १—५ ॥

(सु०) ग्रामनिरूपणार्थमाह—**ग्रामः स्वरसमूह** इति । स्वराणां समूहो ग्रामशब्देनोच्यते । ननु कथं स्वरसमूहस्य ग्रामशब्दवाच्यत्वम्? उच्यते—यतो मूर्च्छनाऽऽदेः समाश्रयभूतः, अतः स्वरसमूहो ग्रामः । लोकाश्रयभूतो हि ग्राम इत्युच्यते । तदुक्तं मतङ्गेन—

'यथा कुटुम्बिनः सर्व एकीभूता वसन्ति हि ।
[1]सर्वलोकस्य स ग्रामो यत्र नित्यं व्यवस्थितिः ॥'

इति । अथ वा स्वरसमूहस्य ग्रामत्वे ऽव्यवस्थयोच्चारितस्यापि स्वरसमूहस्य ग्रामत्वं स्यात्, तन्निवृत्त्यर्थमुक्तं मूर्च्छनाऽऽदिसमाश्रय इति । यस्तु मूर्च्छनाऽऽदीनामाश्रयः स्वरसमूहः स एव ग्रामशब्देनोच्यते, नाव्यवस्थयोच्चारितः स्वरसमूह इत्यर्थः । तथा चोक्तं संगीतसमयसारकारेण—

'स्वराणां मूर्च्छनातानजातिजात्यंशकात्मनाम् ।
व्यवस्थितश्रुतीनां हि समूहो ग्राम इष्यते ॥'

इति । तस्य भेदावाह—**तौ द्वाविति** । ननु त्रयो ग्रामा इति प्रसिद्धिः; कथं द्वावित्युच्यते? अत आह—**धरातल** इति । तत्र तयोर्मध्ये षड्जग्राम आदिमो मुख्यः । द्वितीयो मध्यमग्रामः । अत एव मतङ्गेनोक्तम्—

'उभयोर्ग्रामयोर्मध्ये मुख्यत्वं कस्य गण्यते ।
षड्जस्यैव हि मुख्यत्वं [2]गम्यते वचनान्मुनेः ॥'

इति । तयोर्लक्षणं प्रतिज्ञाय कथयति—**तयोरिति** । पञ्चमे स्वरे स्वकीया या चतुर्थी श्रुतिर्यस्यामसौ स्थापितस्तत्स्थे ऽविकृते षड्जग्रामः । यद्यपि षड्जग्रामे ऽन्येषामपि षड्जादीनां स्वराणामविकृतत्वं तथा ऽपि पञ्चमस्यैवाविकृतत्वकथनं मध्यमग्रामे पञ्चमस्य विकृतत्वात्तद्वैलक्षण्यप्रतिपादनार्थम् । मध्यमग्रामलक्षणं कथयति—**स्वोपान्त्येति** । स्वस्योपान्त्या ऽन्त्यायाः श्रुतेः समीपे वर्तमाना या तृतीया श्रुतिस्तत्र संस्थिते ऽस्मिन्पञ्चमे मध्यमग्रामो भवति । यद्यपि धैवतस्य प्रथमा श्रुतिः पञ्चमस्यान्त्यश्रुतेः समीपवर्तिनी भवति, तथा ऽपि सा स्वकीया न भवतीति तन्निवृत्त्यर्थं स्वेत्युक्तम् । इदमेव लक्षणं प्रकारान्तरेण कथयति—यद्वेति । धो धैवतः षड्जग्रामे त्रिश्रुतिः, मध्यमग्रामे तु पञ्चमस्यान्तिमां श्रुतिं लब्ध्वा चतुःश्रुतिः । अर्थस्तु स एव । किं तु पूर्वं पञ्चमस्वरप्राधान्येनोभयोर्लक्षण-

[1] सर्वलोकेषु.
[2] गण्यते.

षड्जः प्रधानमाद्यत्वादमात्याधिक्यतस्तथा ।
ग्रामे स्यादविलोपित्वान्मध्यमस्तु पुरःसरः ॥ ६ ॥
एतत्कुलप्रसूतत्वाद्गांधारो ऽप्यग्रणीर्दिवि ।
क्रमाद् ग्रामत्रये देवा ब्रह्मविष्णुमहेश्वराः ॥ ७ ॥
हेमन्तग्रीष्मवर्षासु गातव्यास्ते यथाक्रमम् ।
पूर्वाह्णकाले मध्याह्ने ऽपराह्णे ऽभ्युदयार्थिभिः ॥ ८ ॥

मुक्तम, इदं तु धैवतप्राधान्येन । [1] धैवतप्रधान्यनिरूपणाद्यत्पूर्वोक्तं लक्षणमसंमतमिव भाति तत्परमते, न तु स्वमते । अत एव पञ्चमरहितानां कूटतानानां भेदकपञ्चमाभावादेव पौनरुक्त्यं वक्ष्यति, न धैवताभावेन पौनरुक्त्यमिति । गांधारग्रामस्य क्षितितले ऽनुपयोगे ऽपि शास्त्रस्य सर्वविषयत्वात्तल्लक्षणं कथयति—**रिमयोरिति** । गांधार ऋषभस्यान्तिमां श्रुतिं मध्यमस्य चादिमां श्रुतिमाश्रितः संश्चतुःश्रुतिर्भवति । धैवतस्तु पञ्चमस्यान्तिमां श्रुतिमाश्रयति । निषादश्च धैवतस्यान्तिमां श्रुतिं गृहीत्वा षड्जस्य चादिमां श्रुतिं समाश्रितः संश्चतुःश्रुतिर्भवति । तदा तं गांधारग्रामं नारदो मुनिराचष्ट । नारदकथनं प्राशस्त्यार्थं न तु स्वमते ऽन्यथात्वप्रकटनार्थम् ॥ १—९ ॥

(क०) ननु स्वरप्रयोगवशादिह द्वावेव ग्रामौ स्याताम्; स्वरान्तरेषु सत्सु किं तयोः षड्जमध्यमविशेषणेनेत्याशङ्क्य तत्रोपपत्तिमाह— षड्जः प्रधानमिति । अमात्याधिक्यतः, संवादिस्वरबाहुल्यादित्यर्थः । ग्रामे प्रधानं स्यादित्यन्वयः । **अविलोपित्वादिति** । मध्यमस्याविलोपित्वं चाधस्तनानां सरिगाणामुपरितनानां पधनीनां च यथासंख्यं द्वयोर्द्वयोरेकत्र तन्त्र्यां संवदनं संवाद इति मतानुसारेणैकाकिनो मध्यमस्यान्येन संवादाभावात्परिशेषाद-वधिभूतस्य तस्य लोपो नेष्यत इति केषांचिन्मतम् । अन्येषां तु शुद्धतान-

[1] धैवतप्राधान्यनिरूपणं च संमतं परमतत्वेन, न तु स्वमतत्वेन ।

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।

लक्षणावसरे षड्जर्षभनिषादपञ्चमहीनाश्चत्वारस्ताना इत्यादिना भरतादिभिर्मध्यमव्यतिरिक्तानामेव षाडवौडुवकारित्वेन लोपविधानान्मध्यमस्याविनाशित्वमिति ॥ ६—८ ॥

(सु०) ननु कथं षड्जमध्यमगांधाराणामेव ग्रामत्वव्यपदेशो नान्येषां स्वराणामत आह—**षड्ज** इति । षड्जः सर्वेषां स्वराणामाद्यः, तस्मात्प्रधानं मुख्यः । अन्यदपि प्राधान्ये कारणमाह—**अमात्याधिक्यत** इति । अमात्याः संवादिनः, तेषामाधिक्यमन्यस्वरापेक्षया । अन्येषां स्वराणामेकैक एव स्वरः संवादी ; षड्जस्य तु मध्यमपञ्चमौ द्वौ संवादिनौ । मध्यमो ऽपि ग्रामे पुरःसर आद्यः ; ग्रामव्यपदेशभाग्भवतीति यावत् । कारणमाह—**अविलोपित्वादिति** । षाडवितत्व औडुवितत्वे च मध्यमस्य लोपो नास्ति । तस्मात्सो ऽपि प्रधानम् । एतयोः षड्जमध्यमयोः कुले देवकुल उत्पन्नत्वाद्गांधारो ऽपि स्वर्गलोके स्वराणामग्रणीराद्यो ग्रामव्यपदेशभाक् । अत एवोक्तं मतङ्गेन—'ननु कथं षड्जमध्यमस्वराभ्यां ग्रामव्यपदेशः? उच्यते—असाधारणत्वेन ताभ्यां ग्रामव्यपदेशः । असाधारणत्वं च देवकुलोत्पन्नत्वेन।' इति। मध्यमस्याविलोपित्वमुक्तं दत्तिलेन—

'पञ्चमं मध्यमग्रामे षड्जग्रामे तु धैवतम् ।
अलोपिनं विजानीयात्सर्वत्रैव तु मध्यमम् ॥'

इति । ग्रामत्रये ऽप्यधिष्ठातॄन्देवान्कथयति—**क्रमादिति** । गान ऋतुनियमं कथयति—**हेमन्तेति** । ऋतुविशेषेष्वपि पूर्वाह्णादिकालविशेषं गाने नियमयति—**पूर्वाह्णेति** । ऋतुविशेषेष्वप्यभ्युदयार्थिभिरिति फलस्य कथितत्वान्नियमे फलमनियमे न दोषः । ग्रामनिरूपणप्रयोजनमुक्तं मतङ्गेन—'स्वरश्रुतिमूर्च्छनातानजातिरागाणां व्यवस्थापकत्वं नाम प्रयोजनम्' इति ॥ ६—८ ॥ इति ग्रामप्रकरणम् ॥

(क०) ग्रामलक्षणे तदाधेयत्वेन प्रथमोपात्तानां मूर्च्छनानां सामान्यलक्षणमाह—**क्रमात्स्वराणामिति** । क्रमादिति कूटतानव्यावृत्त्यर्थम् । सप्तानां

मूर्च्छनेत्युच्यते ग्रामद्वये ताः सप्त सप्त च ॥ ९ ॥
षड्जे तूत्तरमन्द्रा ऽऽदौ रजनी चोत्तरायता ।
शुद्धषड्जा [1]मत्सरीकृदश्वक्रान्ता ऽभिरुद्धता ॥ १० ॥
मध्यमे स्यात्तु सौवीरी हारिणाश्वा ततः परम् ।
स्यात्कलोपनता शुद्धमध्या मार्गी च पौरवी ॥ ११ ॥
हृष्यकेत्यथ तासां तु लक्षणं प्रतिपाद्यते ।

स्वराणामिति शुद्धतानव्यावृत्त्यर्थम् । आरोहश्चावरोहणमित्यारोह्यवरोहिद्वि-विधवर्णालंकारनिवृत्त्यर्थम् । **मूर्च्छने**ति । यया करणभूतया रागो मूर्च्छ्यते व्याप्यत इति, श्रोता मूर्च्छ्यते मोह्यत इति वा 'मुर्छा मोहसमुच्छ्राययोः' इति धातोर्ण्यन्ताद्युचि प्रत्यये मूर्च्छनेति रूपम् । यदि पुनर्मतङ्गनन्दिकेश्वरादिभिः प्रयोगे स्थानत्रयव्याप्तिसिद्ध्यर्थं लक्ष्यानुरोधेन द्वादशस्वरमूर्च्छना अप्युक्ताः, एवमपि लक्ष्ये प्रायेण ग्रामद्वयसंसृष्टप्रयोगदर्शनात्तेनैव स्थानत्रयव्याप्तिः सेत्स्यतीत्यभिप्रायेण न पृथगुक्ताः । तद्विशेषान्ग्रामद्वये ऽपि व्यवहारार्थं नामतो रूपतश्च संख्यापूर्वकं दर्शयति—**ग्रामद्वय** इत्यादिना । मूर्च्छनेति जातिविवक्षयैकत्वे प्रकृते ऽपि ता इति बहुवचनेन परामर्शो वक्ष्यमाणतद्विशेषापेक्षयेत्युपपद्यते । मध्यस्थानस्थषड्जेनाग्रिमा मूर्च्छनोत्तरमन्द्रा ऽऽरभ्यते । कुतो ऽयं नियमः? भरतादिनियमितत्वात्तासाम् । यथा ऽऽह भरतः 'मध्यमस्वरेण वैणवेन मूर्च्छनानिर्देशः' इति ; मतङ्गो ऽपि 'मध्यसप्तकेन मूर्च्छनानिर्देशः कार्यो मन्द्रतारसिद्ध्यर्थम्' इति ॥ ९—११ ॥

(सु०) मूर्च्छनां निरूपयति—**क्रमादिति** । सप्तानां स्वराणामारोहश्चावरोहणं च मूर्च्छनेत्युच्यते । आरोहावरोहणशब्देन तद्युक्ताः स्वरा उच्यन्ते ।

[1] मत्सरीकृता ऽश्वक्रान्ता.

मध्यस्थानस्थषड्जेन मूर्च्छना ऽऽरभ्यते ऽग्रिमा ॥ १२ ॥
अधस्तनैर्निषादाद्यैः षडन्या मूर्च्छनाः क्रमात् ।
मध्यमध्यममारभ्य सौवीरी मूर्च्छना भवेत् ॥ १३ ॥
षडन्यास्तदधोऽधःस्थस्वरानारभ्य तु क्रमात् ।
षड्जस्थानस्थितैर्न्यायै रजन्याद्याः परे विदुः ॥ १४ ॥
हारिणाश्वादिका गाद्यैर्मध्यमस्थानसंस्थितैः ।

ततश्चारूढा अवरूढाश्च क्रमतः सप्त स्वरा मूर्च्छनाशब्दवाच्याः । मूर्च्छनाशब्द-व्युत्पत्तिः कथिता मतङ्गेन—

'मूर्च्छनाशब्दनिष्पत्तिर्मुर्छा मोहे समुच्छ्राये ।
मूर्च्छ्यते येन रागो हि मूर्च्छनेत्यभिसंज्ञिता ॥'

इति । स्वराणामेव मूर्च्छनात्वं न त्वारोहणावरोहणरूपायाः क्रियाया इत्य-प्युक्तं तेनैव—

'आरोहणावरोहणक्रमेण स्वरसप्तकम् ।
मूर्च्छनाशब्दवाच्यं हि विज्ञेयं तद्विचक्षणैः ॥'

इति । सप्तानां स्वराणामित्युपलक्षणम्, द्वादशस्वराणामपि मूर्च्छनानां मतङ्गेन प्रतिपादितत्वात् । तासां भेदान्कथयति—**ग्रामद्वय** इति । षड्जग्रामे सप्त मूर्च्छनाः, मध्यमग्रामे च सप्त भवन्ति । तासां नामानि कथयति—**षड्ज** इति । षड्जग्रामे प्रथमा मूर्च्छनोत्तरमन्द्रा, द्वितीया रजनी, तृतीयोत्तरायता, चतुर्थी शुद्धषड्जा, पञ्चमी मत्सरीकृता, षष्ठ्यश्वक्रान्ता, सप्तम्यभिरुद्गता । मध्यमग्रामे प्रथमा सौवीरी, द्वितीया हारिणाश्वा, तृतीया कलोपनता, चतुर्थी शुद्धमध्या, पञ्चमी मार्गी, षष्ठी पौरवी, सप्तमी हृष्यकेति ॥ ९—११- ॥

(क०) अधस्तनैर्मन्द्रस्थानभवैः । तदधोऽधःस्थस्वरान्, तस्य मध्य-स्थानस्थितमध्यमस्याधोऽधःस्था गांधारर्षभाद्यः स्वराः, तान् । क्रमादव-रोहक्रमेण । लक्ष्यानुरोधेन पक्षान्तरमाह—**षड्जस्थानस्थितैरिति**। मध्य-

स्थानस्थितषड्जस्थानगतैरिति प्रकरणादवगन्तव्यम् । सरिगमपधनीत्युत्तर-मन्द्रास्वरस्थानेष्वेव निसरिगमपधेति रजनीस्वरानुच्चारयेदित्यर्थः ॥ **हारिणाश्वादिका** इति । अत्रापि मध्यस्थानस्थितमध्यममारभ्य मपधनिसरिगेति सौवीरीस्वरस्थानेष्वेव गमपधनिसरीति हारिणाश्वास्वरानुच्चारयेदित्यर्थः । उभयत्राप्यादिशब्देन षड्जमध्यमस्थानयोरेव तत्तन्मूर्च्छनाऽऽदिमस्वरारम्भो द्रष्टव्यः ॥ -१२—१४- ॥

(सु०) श्रोत्रवधानार्थं वैषम्यद्योतनाय चैतासां लक्षणं प्रतिज्ञाय कथयति—**अथ तासामिति** । मध्यस्थानस्थितेन षड्जेनाग्रिमा षड्जग्रामे प्रथमा मूर्च्छनोत्तर-मन्द्रा ऽऽरभ्यते । षड्जमारभ्य सप्तमस्वरपर्यन्तमारोहो निषादमारभ्य षड्ज-पर्यन्तं चावरोहः कार्यः । अन्यास्तु षड्जन्यादयो मूर्च्छनास्तस्मान्मध्यस्थान-स्थितात्षड्जादधो ऽपकृष्टस्थाने स्थिता ये मन्द्रनिषादधैवतादयो मन्द्रर्षभपर्यन्ताः षट्, तानारभ्य कर्तव्याः । मध्यमग्राममूर्च्छना लक्षयति—**मध्यमध्यममिति** । मध्यस्थानस्थितं मध्यममारभ्य सौवीरी मध्यमग्रामे प्रथमा मूर्च्छना भवेत् । अन्यास्तु षड् हारिणाश्वादयस्तस्य मध्यस्थानस्थमध्यमस्याधो ऽधो ऽपकृष्टे स्थाने स्थिताः स्वरा ये गांधारर्षभादयो मन्द्रपञ्चमपर्यन्ताः, तानारभ्य कर्तव्याः । ततश्चैवं मूर्च्छनास्वरूपं भवति—लिपौ बिन्दुशिरा मन्द्रो ज्ञातव्यः, ऊर्ध्वरेखा-शिरास्तु तारः, 'मन्द्रो बिन्दुशिरा भवेत् । ऊर्ध्वरेखास्तारो लिपौ' इति वक्ष्यमाणत्वात् । तत्र त्वारोहक्रम एव लिख्यते । अवरोहक्रमस्त्वन्तिमस्वराज्ज्ञा-तव्यः । सरिगमपधनि—उत्तरमन्द्रा ॥ १ ॥ निसरिगमपध—रजनी ॥ २ ॥ धंनिसरिगमप—उत्तरायता ॥ ३ ॥ पंधंनिसरिगम—शुद्धषड्जा ॥ ४ ॥ मंपं-धंनिसरिग—मत्सरीकृता ॥ ५ ॥ गंमंपंधंनिसरि—अश्वक्रान्ता ॥ ६ ॥ रिंगंमंपं-धंनिस—अभिरुद्गता ॥ ७ ॥ मपधनिसरिंगं—सौवीरी ॥ १ ॥ गमपधनिसरिं—हारिणाश्वा ॥ २ ॥ रिगमपधनिसं—कलोपनता ॥ ३ ॥ सरिगमपधनि—शुद्धमध्या ॥ ४ ॥ उत्तरमन्द्रायां तु पञ्चमश्चतुःश्रुतिः, अस्यां तु त्रिश्रुतिरित्यन-योर्भेदः । निसरिगमपध—मार्गी ॥ ५ ॥ अस्या रजन्याश्च पूर्ववत्पञ्चमेन भेदः । धंनिसरिगमप—पौरवी ॥ ६ ॥ अस्या उत्तरायतायाश्च पूर्ववत्पञ्चमेन भेदः ।

षड्जादीन्मध्यमादींश्च तदूर्ध्वं सारयेत्क्रमात् ॥ १५ ॥
चतुर्था ताः पृथक्शुद्धाः [1]काकलीकलितास्तथा ।
सान्तरास्तद्द्वयोपेताः षट्पञ्चाशदितीरिताः ॥ १६ ॥

पंधंनिंसरिगम—हृष्यका ॥ ७ ॥ अस्याः शुद्धषड्जायाश्चापि पूर्ववत्पञ्चमेन भेदः । मतान्तरेणान्यथैतासां लक्षणमाह—**षड्जस्थानेति** । निषादाद्यैः स्वरैः षड्ज-स्थानस्थितै रजन्याद्या भवन्ति । षड्जस्य स्थाने निषादे स्थाप्यमाने रजनी ॥२॥ धैवते स्थाप्यमान उत्तरायता ॥ ३ ॥ पञ्चमे स्थाप्यमाने शुद्धषड्जा ॥ ४ ॥ मध्यमे मत्सरीकृता ॥ ५ ॥ गांधारे ऽश्वक्रान्ता ॥ ६ ॥ ऋषभे ऽभिरुद्गता ॥ ७ ॥ एवं मध्यमस्य स्थाने स्थाप्यमानैर्गांधाराद्यैर्हारिणाश्वाऽऽदयो भवन्ति । मध्यमस्य स्थाने गांधारे स्थाप्यमाने हारिणाश्वा ॥ २ ॥ ऋषभे स्थाप्यमाने कलोपनता ॥३॥ षड्जे स्थाप्यमाने शुद्धमध्या ॥ ४ ॥ निषादे मार्गी ॥ ५ ॥ धैवते पौरवी ॥ ६ ॥ पञ्चमे हृष्यका ॥ ७ ॥ इति ॥ -१२—१४- ॥

(क०) ननु षड्जमध्यमस्थानयोरेव निषादगांधारादिप्रयोगे सति षड्जग्राम उत्तरमन्द्रारजन्यादीनां कथं परस्परं भेदो मध्यमग्रामे च सौवीरी-हारिणाश्वाऽऽदिकानां च कथमन्योऽन्यं भेद इत्याशङ्क्य परिहरिष्यन्नाह—**षड्जादीन्मध्यमादींश्चेति** । **तदूर्ध्वमिति** । रजन्यादिकायां षड्जस्थान-स्थापितनिषादादेर्हारिणाश्वाऽऽदिकायां मध्यमस्थानस्थापितगांधारादेश्च परं षड्जादीन्मध्यमादींश्च स्वरान्सारयेत् ; स्वस्वश्रुतिसंख्यापर्यालोचनया श्रुत्य-न्तराणि प्रापयेदित्यर्थः । **क्रमादिति** । उत्तरायतायां षड्जस्थाने धैवते स्थापिते तदूर्ध्वं निषादं कलोपनतायां मध्यमस्थान ऋषभे स्थापिते तदूर्ध्वं गांधारं चेत्यादिः क्रमः । तस्मान्मूर्च्छनानां शुद्धादिभेदेन प्रत्येकं चातुर्विध्यं दर्शयति—**चतुर्धेति** । ग्रामयोरुक्ताश्चतुर्दश मूर्च्छनास्ता इति परामृश्यन्ते ।

[1] काकलीसहिता०.

शुद्धाः षड्जग्रामे सर्वस्वरविकाररहिताः; मध्यमग्रामे तु ग्रामस्वरूपभेद-निर्वर्तकं पञ्चमं तदुपलक्षकं धैवतं च विहायेतरस्वरविकाररहिताः। तत्र पञ्चमधैवतयोस्तादवस्थ्यमेव शुद्धत्वं विवक्षितमिति मन्तव्यम्। ननु विकृत-स्वरेषु यद्यपि पञ्चमस्य ग्रामभेदकत्वेनैव चरितार्थत्वे ऽपि, ऋषभधैवतयोश्च षड्जपञ्चमविकारायत्तविकारयोः स्वतो भेदकत्वाभावे ऽपि, षड्जमध्यमसा-धारणद्वयाश्रयणेनापि प्रकारान्तरेषु संभवत्सु केवलं काकल्यन्तराश्रयणेनैव चतुर्धेति निश्चयः कथमिति चेत्। सत्यम्; षड्जमध्यमयोः साधारणी-कृतयोः स्वरूपेण भेदकत्वे संभवत्यपि काकल्यन्तरयोः साधारणयोरन्तर्भूतत्वेन तयोः पृथग्भेदकत्वम्। तथा चाह मतङ्गः—'साधारणस्वरौ निषादगांधार-वन्तौ तदादिविकृतास्तत्रैवान्तर्भूताः' इति। किं च ग्रामद्वये मूर्च्छनासाधा-रणप्रकारभेदनिरूपणावसरे प्रतिनियतग्रामवर्तिनोः षड्जमध्यमसाधारणयोरनु-पयोगाच्च। यथोक्तं भरतेन—'षड्जग्रामे षड्जसाधारणं मध्यमग्रामे मध्यमसाधारणम्' इति। अतश्चतुर्धेत्युपपद्यत इत्याचार्यरहस्यमसंप्रदाय-विदुषां दुर्ग्रहम्।

श्रुतिस्वरप्रमाणज्ञः कल्लिनाथः कलानिधिः।
चातुर्विध्यं मूर्च्छनानामत्रैवं निरदीधरत्॥ -१५, १६॥

(सु०) ननु षड्जस्थाने मध्यमस्थाने च यदि निषादादयो गांधारा-दयश्च स्थापितास्तदा षड्जमध्यमयोः कुत्रावस्थानमत आह—**षड्जादीनिति**। षड्जर्षभगांधारादीन्मध्यमपञ्चमधैवतादींश्चोर्ध्वं सारयेदुत्कृष्टेषु स्वरेषु स्थापयेत्। यदा निषादः षड्जस्थाने स्थापितस्तदा षड्ज ऋषभस्थान ऋषभो गांधारस्थान इत्यादि। यदा धैवतः षड्जस्थाने तदा निषाद ऋषभस्थाने षड्जो गांधारस्थान इत्यादि स्वयमूह्यम्। ननु कथमन्यस्य स्वरस्यान्यस्वरस्थाने ऽवस्थानम्? ब्रूमः; नायं मुख्यो व्यवहारः, किं त्वौपचारिको ऽयं व्यवहारः। अथ वा, दत्तिलादि-भिरङ्गीकृतत्वादेवमुच्यते। दत्तिलो हि स्वेच्छया यस्यां कस्यामपि श्रुतौ

षड्जं स्थापयेत्तदपेक्षया च श्रुतिनियमेनान्यान्स्वरान्स्थापयेदित्युक्तवान् । यदाह—

'षड्जत्वेन गृहीतो यः षड्जग्रामे ध्वनिर्भवेत् ।
तत ऊर्ध्वं तृतीयः स्यादृषभो नात्र संशयः ॥
ततो द्वितीयो गांधारश्चतुर्थो मध्यमस्ततः ।
मध्यमात्पञ्चमस्तद्वत्तृतीयो धैवतस्ततः ॥
निषादो ऽतो द्वितीयः स्यात्ततः षड्जश्चतुर्थकः ।'

इति । विवृतं चैतत्प्रयोगस्तबकाख्यायां दत्तिलटीकायाम्—'षड्जत्वेन षड्ज-स्वरभावेन गृहीतः परिकल्पितो बुद्धया व्यवस्थापितो यः कश्चिद् ध्वनिविशेषः षड्जाख्ये ग्रामे भवेत्तस्माद् ध्वनिविशेषादूर्ध्वं तृतीयः स्यादृषभः' इति । अनेनैवाभिप्रायेण दत्तिलः षड्जग्राममूर्च्छनानां मध्यमग्राममूर्च्छनानां च किंचिद्वि-कारेणैक्यमुक्तवान् । यदाह—

'गांधारं धैवतीकुर्याद् द्विश्रुत्युत्कर्षणाद्यदि ।
तद्वशान्मध्यमादींश्च निषादादीन्यथा स्थितान् ॥
ततो ऽभूद्यावतिथ्येषा षड्जग्रामस्य मूर्च्छना ।
जायते तावतिथ्येव मध्यमग्राममूर्च्छना ॥
श्रुतिद्वयापकर्षेण गांधारीकृत्य धैवतम् ।
पूर्ववन्मध्यमाद्यांश्च भावयेत्षड्जमूर्च्छनाः ॥'

इति । स्वेच्छया षड्जावस्थापनमङ्गीकृत्यैव दत्तिलदक्षप्रजापत्यादयो ऽवधानं गांधर्वाङ्गत्वेनाङ्गयकार्षुः । यदाह दत्तिलः—

'पदस्थः स्वरसंघातस्तालेन सुमितस्तथा ।
प्रयुक्तश्चावधानेन गांधर्वमभिधीयते ॥'

इति । दक्षप्रजापतिरपि—

'अवधानानि गांधर्वे पश्चात्स्वरपदादयः ।
अवधानातिरेकेण त्रिविधं नोपपद्यते ॥

इत्याह । अवधानं नाम मनोबुद्धिस्मृतीन्द्रियाणामैकाग्र्यम् । षड्जो यत्र स्थापित-स्तदपेक्षयैवान्येषां स्वराणामुच्चारणमिति यावत् । यदि स्वराः स्वेच्छया नावस्थाप्यन्ते तदा ऽवधानं नोपयुज्येत । शार्ङ्गदेवेनापि चलवीणायां सारणानिरूपणेनायं पक्षः किंचित्स्वीकृत एव, 'स्वोपान्त्यतन्त्रीमानेया-स्तस्यां सप्त स्वरा बुधैः' इत्युक्तत्वात् । लोके च वैणिकाः स्वेच्छया स्वरानवस्थापयन्तो दृश्यन्त इत्यास्तां विस्तरः । मतङ्गेन तु द्वादशस्वरमूर्च्छना उक्ताः—

'इदानीं संप्रवक्ष्यामि द्वादशस्वरमूर्च्छनाः'

इति । अत्र मूर्च्छनानिर्देशः स्थानत्रितयप्राप्त्यर्थमिति वचनाद् द्वादशस्वरसंपन्ना मूर्च्छना द्रष्टव्याः । नन्दिकेश्वरेणाप्युक्तम्—

'द्वादशस्वरसंपन्ना ज्ञातव्या मूर्च्छना बुधैः ।
[1]जातिभाषाऽऽदिसिद्ध्यर्थं तारमन्द्रादिसिद्धये ॥'

इति । ताश्चैवम्—धनिसरिगमपधनिसरिग—उत्तरमन्द्रा ॥ १ ॥ निसरिगमपध-निसरिगम—रजनी ॥ २ ॥ सरिगमपधनिसरिगमप—उत्तरायता ॥ ३ ॥ रिग-मपधनिसरिगमपध—शुद्धषड्जा ॥ ४ ॥ गमपधनिसरिगमपधनि—मत्सरीकृता ॥ ५ ॥ मपधनिसरिगमपधनिस—अश्वक्रान्ता ॥ ६ ॥ पधनिसरिगमपधनिसरि—अभिरुद्गता ॥ ७ ॥ इति षड्जग्रामे ॥ मध्यमग्रामे ऽप्येवमेव । [2]सरिगमपध-निसरिगमप—सौवीरी ॥ १ ॥ रिगमपधनिसरिगमपध—हारिणाश्वा ॥ २ ॥ ग-मपधनिसरिगमपधनि—कलोपनता ॥ ३ ॥ मपधनिसरिगमपधनिस—शुद्धमध्या ॥ ४ ॥ पधनिसरिगमपधनिसरि—मार्गी ॥ ५ ॥ धनिसरिगमपधनिसरिग—पौरवी ॥ ६ ॥ निसरिगमपधनिसरिगम—हृष्यका ॥ ७ ॥ इति । चतुर्दशाना-मपि मूर्च्छनानां चातुर्विध्यं प्रतिपादयति—**चतुर्धेति** । ताश्चतुर्दश मूर्च्छनाः पृथक्प्रत्येकं चतुर्विधाः शुद्धाः काकलीसहिताः सान्तराः काकल्यन्तरोपेताश्चे-त्येवं षट्पञ्चाशद्भवन्ति ॥ -१५, १६ ॥

[1] परिभाषाऽऽदि०.

[2] निसरिगमपधनिसरिगम—सौवीरी• इत्यादिः कोशान्तरपाठः

श्रुतिद्वयं चेत्षड्जस्य निषादः संश्रयेत्तदा ।
स काकली मध्यमस्य गांधारस्त्वन्तरः स्वरः ॥ १७ ॥

(क०) मूर्च्छनाभेदकत्वेन प्रसक्तयोः काकल्यन्तरयोः स्वरूपमाह— **श्रुतिद्वयं चेदिति । मध्यमस्येति** । अत्रापि श्रुतिद्वयं चेदित्याद्यनुषञ्जनीयम् । मूर्च्छनाभेदोपयोगिकाकल्यन्तरप्रसङ्गान्मतङ्गप्रोक्तौ स्वराणां प्रवेशनिग्रहावुच्येते । तद्यथा—द्विविधस्तानप्रयोगः प्रवेशेन निग्रहेण च । प्रवेशो द्विविधः पूर्वस्वरविप्रकर्षेणोत्तरस्वरमार्दवेन च । तत्रर्षभापेक्षया षड्जस्याधरीभूतस्य लोपनीयस्यापि विप्रकर्षः पीडनम् ; ऋषभापादनमिति यावत् । तस्यैव षड्जस्य निषादापेक्षयोत्तरीभूतस्य मार्दवं शिथिलीकरणम् ; निषादापादनमिति यावत् । निग्रहस्तूत्तरस्वरस्य परित्यागः ; असंस्पर्श इति यावत् । तथा चाह भरतः—

'द्विधा तानक्रिया तन्त्र्यां प्रवेशान्निग्रहात्तथा ।

इति । तत्र प्रवेशो नामाधरस्वरविप्रकर्षादुत्तरस्वरमार्दवाद्वा । निग्रहश्चासंस्पर्शः' इति । दत्तिलेनाप्युक्तम्—

'तानक्रिया द्विधा तन्त्र्यां प्रवेशान्निग्रहात्तथा ।
प्रवेशो ध्वनिसादृश्यमसंस्पर्शस्तु निग्रहः ॥'

इति ॥ १७ ॥

(सु०) काकलीसहिताः सान्तरा इत्युक्तम् ; तत्र को ऽयं काकल्यन्तरो वेत्यपेक्षायामाह—**श्रुतिद्वयमिति** । निषादः षड्जस्य श्रुतिद्वयं संश्रयेच्चेत्, षड्जस्य द्वितीयश्रुतौ तिष्ठंश्चतुःश्रुतिर्भवति यदि, तदा काकलीत्युच्यते । गांधारश्च मध्यमस्य श्रुतिद्वयं गृह्णंश्चतुःश्रुतिः सन्नन्तर इत्युच्यते । निषादगांधारावेव काकल्यन्तरस्वरौ, न तयोः स्वरान्तरत्वमित्युक्तं प्राक् ॥ १७ ॥

यस्यां यावतिथौ षड्जमध्यमौ ग्रामयोः क्रमात् ।
मूर्च्छना तावतिथ्येव सा निःशङ्केन कीर्तिता ॥ १८ ॥
प्रथमादिस्वरारम्भादेकैका सप्तधा भवेत् ।
तासूच्चार्यान्त्यस्वरांस्तान्पूर्वानुच्चारयेत्क्रमात् ॥ १९ ॥
ते क्रमास्तेषु संख्या स्याद् द्वानवत्या शतत्रयम् ।
यक्षरक्षोनारदाब्जभवनागाश्विपाशिनः ॥ २० ॥
षड्जग्रामे मूर्च्छनानामेताः स्युर्देवताः क्रमात् ।
ब्रह्मेन्द्रवायुगन्धर्वसिद्धद्रुहिणभानवः ॥ २१ ॥
स्युरिमा मध्यमग्राममूर्च्छनादेवताः क्रमात् ।
तासामन्यानि नामानि नारदो मुनिरब्रवीत् ॥ २२ ॥
मूर्च्छनोत्तरवर्णा ऽऽद्या षड्जग्रामे ऽभिरुद्गता ।
अश्वक्रान्ता च सौवीरी हृष्यका चोत्तरायता ॥ २३ ॥
रजनीति समाख्याता ऋषीणां सप्त मूर्च्छनाः ।
आप्यायनी विश्वकृता चन्द्रा हेमा कपर्दिनी ॥ २४ ॥
मैत्री चान्द्रमसी पित्र्या मध्यमे मूर्च्छना इमाः ।
नन्दा विशाला सुमुखी चित्रा चित्रवती सुखा ॥ २५ ॥
आलापा चेति गांधारग्रामे स्युः सप्त मूर्च्छनाः ।
ताश्च स्वर्गे प्रयोक्तव्या विशेषात्तेन नोदिताः ॥ २६ ॥

(क०) मूर्च्छनासु प्रथमादिसंख्यापरिज्ञानोपायमाह—**यस्यामिति** । **यावतिथाविति**। यावच्छब्दात्पूरणे ऽर्थे डटि 'वतोरिथुक्' इति वत्वन्तस्येथुगागमे कृते यावतिथ इति रूपम् । ग्रामयोर्यस्यां मूर्च्छनायां षड्जमध्यमौ यावतिथौ सा मूर्च्छना तावतिथी । अत्र 'टिड्ढाणञ्—' इत्यादिना

ङीप् ॥ अथ मूर्च्छनाप्रसङ्गेन केवलारोहवत्तया तदेकदेशरूपान्क्रमान्प्रस्तारे कूटतानोपयोगार्थं प्रतिमूर्च्छनमियत्तया ऽवधार्य लक्षयति—प्रथमादीत्यादिना । प्रथमादिस्वरारम्भात्, यस्यां मूर्च्छनायां य: प्रथम: स्वर: स आदिर्येषां त इतरे षट् स्वरा:, तद्गुणसंविज्ञानात्प्रथमश्चेति प्रथमादय: सप्त स्वरा:, तेषामारम्भ: क्रमादादिमत्वेनोच्चारणम्, तस्मात् । एकैकेति । शुद्धादिभेदेनोक्तासु षट्पञ्चाशन्मूर्च्छनासु प्रत्येकमित्यर्थ: । तास्वन्त्यस्वरान्क्रमादुच्चार्य पूर्वान्स्वरान्क्रमादुच्चारयेदिति क्रमादित्यस्यावृत्त्या ऽन्वय: कर्तव्य: । पूर्वानारब्धस्वरादधस्तनान् । इह सप्तस्वरात्मकेषु क्रमेषु पूर्वानुच्चारयेदिति लक्षणांश: प्रतिमूर्च्छनं प्रथमक्रमेष्वसंभाव्यो ऽपि द्वितीयादिक्रमेषु संभवत्स्वरविषयो द्रष्टव्य: । तद्यथा—उत्तरमन्द्रायां सरिगमपधनीति प्रथम: क्रम: । निसरिगमपधेति द्वितीय: । धनिसरिगमपेति तृतीय: । पधनिसरिगमेति चतुर्थ: । मपधनिसरिगेति पञ्चम: । गमपधनिसरीति षष्ठ: । रिगमपधनिसेति सप्तम: । एवं क्रमेणोच्चारितत्वादेतेषां क्रमसंज्ञा ॥ यक्षरक्ष इत्यादि: स्पष्टार्थ: ॥ १८-२६ ॥

(सु०) मूर्च्छनासंख्यापरिज्ञानार्थं सुगममुपायमाह—यस्यामिति । उभयोर्ग्रामयोर्मध्ये षड्जमध्यमौ स्वरौ यावतिथौ यावत्संख्यापूरणौ, तावतिथी तावत्संख्यापूरणी मूर्च्छना नि:शङ्केन नि:शङ्क इति बिरुदविराजितेन शार्ङ्गदेवेन कथिता । षड्जग्राममूर्च्छनासु यदि षड्ज: प्रथमस्तर्हि प्रथमा मूर्च्छना, यदि षड्जो द्वितीयस्तर्हि द्वितीया, यदि तृतीयस्तृतीया, यदि चतुर्थश्चतुर्थी, यदि पञ्चम: पञ्चमी, यदि षष्ठ: षष्ठी, यदि सप्तम: सप्तमीति । एवं मध्यमग्राममूर्च्छनासु यदि मध्यम: प्रथमस्तर्हि प्रथमा मूर्च्छना, यदि द्वितीयो द्वितीया, यदि तृतीयस्तृतीयेत्यादि ॥ १८ ॥ षट्पञ्चाशत्संख्यानां मूर्च्छनानां प्रत्येकं सप्तविधत्वं दर्शयति—प्रथमादीति । एकैका मूर्च्छना सप्तधा भवति, प्रथमद्वितीयतृतीयतुरीयपञ्चमषष्ठसप्तमस्वरारम्भात् । ननु द्वितीयादिस्वरारम्भे कथं सप्तस्वरत्वम्? अत आह—तास्विति । तासु मूर्च्छनास्वन्त्यस्वरपर्यन्तमुच्चार्य पूर्वान्स्वरानु-

च्चारयेत् । ननु तर्हि क्रमादारोहावरोहाभावान्मूर्च्छनात्वं व्याहन्येत ; अत आह—क्रमादिति । यद्यप्यारोहावरोहयोः क्रमो नास्ति, तथा ऽपि स्वरक्रमस्य सद्भावान्मूर्च्छनात्वम् ॥ १९ ॥ ते मूर्च्छनाभेदाः क्रमशब्देनोच्यन्ते । तेषां संख्या द्वानवत्या ऽधिकं शतत्रयं ज्ञातव्यम् । मतङ्गदत्तिलौ तु मूर्च्छनानामन्यथा चातुर्विध्यमवादिष्टाम् । यदाह मतङ्गः—'तत्र सप्तस्वरा मूर्च्छना चतुर्विधा पूर्णा षाडवौडुविता साधारणी चेति । तत्र सप्तभिः स्वरैर्या गीयते सा पूर्णा । षड्भिः स्वरैर्या गीयते सा षाडवा । पञ्चभिः स्वरैर्या गीयते सौडुविता । काकल्यन्तरैः स्वरैर्या गीयते सा साधारणी ।' इति । दत्तिलो ऽप्याह—

'स्वरौ यावतिथौ स्यातां ग्रामयोः षड्जमध्यमौ ।
मूर्च्छना तावतिथ्येव तद्ग्रामद्वितये तथा ॥
सर्वास्ताः पञ्चषट्पूर्णसाधारणकृताः स्मृताः ।'

इति । मूर्च्छनानां षाडवत्वं वक्ष्यमाणषाडवतानप्रकारेणोक्तम् । ओडुवत्वं वक्ष्यमाणौडुवतानप्रकारेणोक्तम् । ताभ्यां षाडवौडुवत्वम् । मूर्च्छनातानयोश्च भेदः प्रतिपादितो मतङ्गेन । यदाह—'ननु मूर्च्छनातानयोः को भेदः ? उच्यते । मूर्च्छनातानयोर्नार्थान्तरत्वमिति विशाखिलः । एतन्न संगतम्, संग्रहश्लोके मूर्च्छनातानयोर्भेदस्य प्रतिपादितत्वात् । ननु कथं मूर्च्छनातानयोर्भेदः ? ब्रूमः—आरोहावरोहक्रमयुक्तः स्वरसमुदायो मूर्च्छनेत्युच्यते ; तानस्त्वारोहणक्रमेण भवतीति भेदः' इति ॥ १९- ॥ मूर्च्छनानां देवताः कथयति—यक्षेति । यक्षाः, रक्षांसि, नारदः, अब्जभवो ब्रह्मा, नागाः सर्पाः, अश्विनौ दस्रौ, पाशी वरुणः ॥ -२०, २०- ॥ मध्यमग्राममूर्च्छनानां देवताः कथयति—ब्रह्मेति । देवताकथनं तु तया तया मूर्च्छनया गीतया सा सा देवता प्रीयत इत्येतमर्थं ज्ञापयितुम् । नारदमतेन मूर्च्छनानामन्यथा नामानि कथयति—तासामिति । ऋषीणां समाख्याता इति । ऋषिभिः समाख्याता इत्यर्थः । नारदमतेन गांधार-ग्राममूर्च्छनानामानि कथयति—नन्देति । ननु गांधारग्राममूर्च्छनानां लक्षणं किमिति नोक्तम् ? अत आह—ताश्चेति । विशेषयति व्यावर्तयति सजातीय-विजातीयेभ्य इति विशेषो लक्षणम् । ल्यब्लोपे पञ्चमी । लक्षणं कृत्वा नोक्ता इत्यर्थः ॥ -२१—२६ ॥

ताना: स्युर्मूर्च्छना: शुद्धा: षाडवौडुवितीकृता: ।
षड्जगा: सप्त हीनाश्चेत्क्रमात्सरिपसप्तमै: ॥ २७ ॥
तदा ऽष्टाविंशतिस्ताना मध्यमे सरिगोज्झिता: ।
सप्त क्रमाद्यदा ताना: स्युस्तदा त्वेकविंशति: ॥ २८ ॥
एते चैकोनपञ्चाशदुभये षाडवा मता: ।
सपाभ्यां द्विश्रुतिभ्यां च रिपाभ्यां सप्त वर्जिता: ॥ २९ ॥
षड्जग्रामे पृथक्ताना एकविंशतिरौडुवा: ।
रिधाभ्यां द्विश्रुतिभ्यां च मध्यमग्रामगास्तु ते ॥ ३० ॥
हीनाश्चतुर्दशैव स्यु: पञ्चत्रिंशत्तु ते युता: ।
सर्वे चतुरशीति: स्युर्मिलिता: षाडवौडुवा: ॥ ३१ ॥

(क०) प्रसङ्गात्क्रमानुक्त्वा मूर्च्छनैकदेशरूपत्वेन मूर्च्छनाऽनन्तर-मुद्दिष्टान्शुद्धतानाल्लक्षयति—**ताना: स्युरिति** । तन्यते विस्तार्यत इति तनोतेर्धातो: 'अकर्तरिं च—' इत्यादिना सूत्रेण कर्मणि घञि तान इति रूपं दायो लाभ इतिवत् । शुद्धा मूर्च्छना: षाडवौडुवितीकृता: सत्य: शुद्धास्ताना: स्युरिति शुद्धपदस्योभयत्र संबन्ध: । यदि तानपदेनैव संबन्धस्तदा मूर्च्छना इत्यविशेषेण प्रकृतत्वात्षट्पञ्चाशन्मूर्च्छनानामपि प्रसक्तौ तासां च प्रत्येकं वक्ष्यमाणप्रकारेण षाडवौडुवितत्वयो: कृतयोस्तदुत्थतान-संख्यायां षट्त्रिंशदुत्तरशतत्रयमितायां सत्याम् 'ताना श्चतुरशीति: स्यु:' इति भरतवचनविरोध: स्यात् । किं चोत्तरवाक्ययो: 'षड्जगा: सप्त' 'मध्यमे सप्त' इति च संख्योपादानमनुपपन्नं स्यात् । अत: शुद्धा मूर्च्छना इत्यन्वय: कर्तव्य: । अथ यदि मूर्च्छनापदेनैव संबन्ध: क्रियेत तदा कूट-तानानामपि लक्ष्यत्वं प्रतीयेत, तानपदस्याविशेषेणोपादानात् । तन्मा भूदित्यु-

भयत्रान्वयः कर्तव्यः । इह मूर्च्छनानां शुद्धत्वं नाम काकल्यन्तररहितत्वम् ; तानानां तु शुद्धत्वं काकल्यन्तररहितत्वं व्युत्क्रमेणोच्चारितस्वररहितत्वं चावगन्तव्यम् । षाडवौडुवितीकृता इति । सप्तसु नियतैकस्वरलोपात्षाडवाः । सप्तसु नियतस्वरद्वयलोपादौडुविताः । पूर्वमषाडवाः षाडवाः संपन्नाः षाडवीकृताः, पूर्वमनौडुविता औडुविताः संपन्ना औडुवितीकृताः । षाडवीकृताश्चौडुवितीकृताश्चेति समासः । षाडवौडुवितीकृता इत्यनेनैकस्य द्वयोर्वा स्वरयोरविशेषेण लोपे प्राप्ते, भरतादिमतानुसारेण लोपं निगमयति—**षड्जगा** इत्यादिना । ननु शुद्धतानेषु केषुचिद्भेदकपञ्चमलोपाद् ग्रामविवेकः कथमिति चेत् ; उच्यते—ग्रामविशेषमधिकृत्यैव तत्तत्स्वरविहीनतानाभिधानात्क्वचिद्भेदकपञ्चमाभावे ऽपि तानविशेषस्यैव ग्रामभेदकत्वमिति ॥ २७—३१ ॥

(सु०) तानान्निरूपयति—**तानाः स्युरिति** । शुद्धा मूर्च्छनास्तानाः स्युः । किंविधा मूर्च्छनाः ? विवक्षितैकस्वरापकर्षेण विवक्षितस्वरद्वयापकर्षेण च षट्स्वराः पञ्चस्वराश्चेति कृताः । तमेव विवक्षितं स्वरापकर्षं कथयति—**षड्जगा** इति । षड्जग्रामस्था मूर्च्छना यदा षड्जेन हीनाः क्रियन्ते तदा सप्त ताना भवन्ति । यदर्षभेण हीनास्तदा सप्त । यदा पञ्चमेन हीनास्तदा सप्त । यदा सप्तमेन निषादेन हीनास्तदा सप्त । एवं षड्जग्रामे षाडवा अष्टाविंशतिस्ताना भवन्ति । मध्यमग्रामे सप्त मूर्च्छना यदा षड्जोज्झिता भवन्ति तदा सप्त तानाः । यदर्षभोज्झितास्तदा सप्त । यदा गांधारोज्झितास्तदा सप्त । एवं मध्यमग्राम एकविंशतिः षाडवास्ताना भवन्ति । ग्रामद्वये मिलिताः षाडवास्ताना एकोनपञ्चाशत् ॥ २७—२८ ॥ औडुवांस्तानान्निरूपयति—**सपाभ्यामिति** । षड्जग्राममूर्च्छनाः सपाभ्यां षड्जपञ्चमाभ्यां वर्जिता यदा भवन्ति तदा सप्तौडुवास्तानाः । यदा द्विश्रुतिभ्यां गांधारनिषादाभ्यां वर्जितास्तदा सप्त । यदा रिपाभ्यामृषभपञ्चमाभ्यां हीनास्तदा सप्त । एवं षड्जग्राम एकविंशतिस्ताना औडुवाः । मध्यमग्रामे यदा सप्त मूर्च्छना रिधाभ्यामृषभधैवताभ्यां हीना भवन्ति तदा सप्त ताना औडुवाः । यदा द्विश्रुतिभ्यां गांधारनिषादाभ्यां हीनास्तदा सप्त । एवं मध्यमग्राम

असंपूर्णाश्च संपूर्णा व्युत्क्रमोच्चारितस्वराः ।
मूर्च्छनाः कूटतानाः स्युस्तत्संख्यामभिदध्महे ॥ ३२ ॥
पूर्णाः पञ्च सहस्राणि चत्वारिंशद्युतानि तु ।
एकैकस्यां मूर्च्छनायां कूटतानाः सह क्रमैः ॥ ३३ ॥

औडुवास्तानाश्चतुर्दश । ग्रामद्वये मिलिता औडुवाः पञ्चत्रिंशत् । सर्वे ऽपि षाड-वौडुवाश्चतुरशीतिः । तानानां प्रयोगस्तु द्विधा कथितो मतङ्गेन । यदाह—कथमेषां तानानां प्रयोगः कार्य इति चेत्, उच्यते । द्विविधस्तानप्रयोगः प्रवेशेन निग्रहेण च । प्रवेशो ह्यृषभापेक्षया षड्जस्याधरीभूतस्य लोपनीयस्य विप्रकर्षः पीडनम्, ऋषभापादनमिति यावत् । इति विप्रकर्षेण प्रवेशः । मार्दवेनायं यथा —तस्यैव षड्जस्य निषादापेक्षयोत्तरीभूतस्य मार्दवं शिथिलीकरणम्, निषादा-पादनमिति यावत् । इति द्विविधः प्रवेशः । निग्रहस्तूत्तरस्वरपरित्यागो ऽसंस्पर्शः । प्रयोगस्तु यथा—सासागरिपापामारी । तथा चाह भरतः—'द्विधा तानक्रिया तन्त्र्यां प्रवेशो निग्रहश्च । अत्र प्रवेशो नामाधरस्वरप्रकर्षणादुत्तरस्वरमार्दवाच्च । निग्रहश्चासंस्पर्शः' इति । दत्तिलो ऽप्याह—

'द्विधा तानक्रिया तन्त्र्यां प्रवेशान्निग्रहात्तथा ।
प्रवेशो ध्वनिसादृश्यमसंस्पर्शस्तु निग्रहः ॥'

इति । ननु प्रथमायां सप्तम्यां च मूर्च्छनायां षड्जे लुप्ते रिगमपधनीत्येकमेव रूपं भवतीति तत्र को विशेषः ? सत्यं भेदो नास्ति, परं तु मन्द्रतारकृतो भेदो विद्यत एव । ननु मूर्च्छनास्तावज्जातिरागभाषाऽऽदिषूपयोगिन्य इति युक्तं तासां कथनम्; तानास्तु कुत्रोपयुज्यन्ते ? उच्यते । द्वयोर्ग्रामयोर्जातिरागान्यत्वप्रति-पादनार्थं प्रयोगस्तानानामित्युक्तं मतङ्गेन ॥ २९—३१ ॥

(क०) क्रमप्राप्तान्कूटतानाँल्लक्षयति—**असंपूर्णाश्चेति** । मूर्च्छनाश्च-तुर्विधा अपि मूर्च्छनाः संपूर्णा असंपूर्णाश्च व्युत्क्रमेणोच्चारितस्वराश्चेत्कूट-तानाः स्युरित्यन्वयः । संपूर्णाः सप्तस्वरयुक्ताः, असंपूर्णा एकैकान्त्यान्त्य-स्वरत्यागे सति षटस्वराद्येकस्वरान्ताः, चकारो विकल्पार्थः । व्युत्क्रमोच्चा-

षट्पञ्चाशन्मूर्च्छनास्थाः पूर्णाः कूटास्तु योजिताः ।
लक्षद्वयं सहस्राणि द्व्यशीतिर्द्वे शते तथा ॥ ३४ ॥
चत्वारिंशच्च संख्याता अथापूर्णान्प्रचक्ष्महे ।
एकैकान्त्यान्त्यविरहाद्भेदाः षट् षट्स्वरादयः ॥ ३५ ॥
एकस्वरो ऽत्र निर्भेदो ऽप्युक्तो नष्टादिसिद्धये ।
क्रमा अकूटतानत्वे ऽप्युक्तास्तेषूपयोगिनः ॥ ३६ ॥

रितस्वरा इत्यत्र स्वराणामानुपूर्व्या ऽऽरोह एव क्रमः । तेष्वेकादिस्वरव्यत्यासो व्युत्क्रमः । अवरोहे सत्यामपि विपरीतानुपूर्व्यां क्रमत्वाभावेन कूटतानत्वमेव । कूटत्वं नाम व्युत्क्रमोच्चारितस्वरत्वम् ॥ अथ षट्पञ्चाशति मूर्च्छनास्वेकैकस्याः संपूर्णादिसप्तभेदेषु प्रतिभेदं वक्ष्यमाणप्रस्तारवशादियत्तया कूटतानसंख्यां दर्शयितुं प्रतिज्ञापूर्वकमाह— **पूर्णाः पञ्च सहस्राणीत्यादिना** ॥ **एकैकान्त्यान्त्यविरहादिति** । एकैकस्यां मूर्च्छनायामन्त्यान्त्यविरहादन्त्यान्त्यस्वरपरित्यागात् । अन्त्यान्त्येति वीप्सयोत्तरमन्द्रायां संपूर्णक्रमे ऽन्त्यो निषादः, तस्य परित्यागात्षट्स्वरः क्रमो भवति । तस्मिन्क्रमे ऽन्त्यो धैवतः, तत्परित्यागात्पञ्चस्वरः क्रमो भवति । एवमसंपूर्णाः षड् भेदा द्रष्टव्याः । तद्यथा सरिगमपधेति षट्स्वरो भेदः ; सरिगमपेति पञ्चस्वरः ; सरिगमेति चतुःस्वरः ; सरिगेति त्रिस्वरः ; सरीति द्विस्वरः ; सेत्येकस्वरः । एवमन्यास्वपि मूर्च्छनासु प्रत्येकं षड् भेदा द्रष्टव्याः । निर्भेदः प्रस्तारा-भावादवान्तरभेदरहितः । **नष्टादिसिद्धय** इति । आदिशब्देनोद्दिष्टस्य संख्यायाश्च ग्रहणम् ; तेषु 'मौलैकाङ्कसमन्वितैः' इत्येकस्वरतानस्योपयोगात्तत्सिद्धिरिति, तस्यै । **तेषूपयोगिन** इति । तेषु कूटतानेषु मूलकारणत्वेनोपयोगिनो यतो ऽत उक्ताः । व्युत्क्रमस्य क्रमापेक्षित्वादिति भावः ॥ ३२–३६ ॥

(सु०) कूटतानान्कथयति—असंपूर्णा इति । या मूर्च्छना असंपूर्णा याश्च संपूर्णास्तास्ता एव व्युत्क्रमेणोच्चारितस्वराः सत्यः कूटताना भवन्ति । प्रतिमूर्च्छनं पूर्णकूटतानसंख्यां प्रतिज्ञाय कथयति—तत्संख्यामिति ॥ ३२ ॥ एकैकस्यां मूर्च्छनायां पूर्णाः कूटतानाश्चत्वारिंशदुत्तराणि पञ्च सहस्राणि (५०४०) भवन्ति । ननु मतङ्गेन त्रयस्त्रिंशदधिकानि पञ्च सहस्राणि (५०३३) प्रतिमूर्च्छनं कूटतानसंख्योक्ता; यदाह—"कूटतानानां सहस्राणि पञ्च त्रयस्त्रिंशदधिकानि निष्पद्यन्ते; दत्तिलेनाप्युक्तम्—

'पूर्णाः पञ्च सहस्राणि त्रयस्त्रिंशच्च संख्यया ।
कथयन्ति प्रतिग्राममुपायो गणने ऽधुना ॥'

इति" इति । तन्निरासार्थमाह—सह क्रमैरिति । प्रतिमूर्च्छनं प्रस्तारे क्रियमाणे सप्त क्रमाः संजायन्ते; तैः सह चत्वारिंशदुत्तराणि पञ्च सहस्राणि भवन्तीति तात्पर्यम् । दत्तिलादिभिस्तु क्रमान्विहाय कूटतानसंख्यैव निर्दिष्टेत्यविरोधः ॥३३॥ प्रतिमूर्च्छनं कूटतानसंख्यामुक्त्वा सर्वासां मूर्च्छनानां कूटतानसंख्यां कथयति—षट्पञ्चाशदिति । चत्वारिंशदधिकानि पञ्च सहस्राणि षट्पञ्चाशता गुणनीयानि । एतावता लक्षद्वयं द्व्यशीतिः सहस्राणि शतद्वयं चत्वारिंशदधिकमितीयं संख्या (२८२२४०) निष्पद्यते । अपूर्णान्कूटतानान्प्रतिज्ञाय कथयति—अथापूर्णानिति । क्रमाणां कूटतानानां च षट्स्वरादयः षड् भेदा भवन्ति । कथं भवन्तीत्यपेक्षायामाह—एकैकान्त्यान्त्यविरहादिति । पूर्णा या मूर्च्छना ग्रामद्वये तासामेकैकान्त्यस्वरापकर्षेण; अन्त्यैकस्वरापकर्षेण षट्स्वरा भेदा भवन्ति, अन्त्यस्वरद्वयापकर्षेण पञ्चस्वराः, अन्त्यस्वरत्रयविरहेण चतुःस्वराः, अन्त्यस्वरचतुष्टयहान्या त्रिस्वराः, अन्त्यस्वरपञ्चकहान्या द्विस्वराः, अन्त्यस्वरषट्कहानेनैकस्वरा इति ॥३४, ३५॥ नन्वेकस्वराणां प्रस्ताराभावाद्भेदा न सन्ति; ते किमर्थमत्रोच्यन्ते? अत आह—एकस्वर इति । एकस्वरभेदा नष्टोद्दिष्टसिद्धय उक्ताः । एकस्वरपरित्यागेन द्विस्वरादीनामपि निवेशने खण्डमेरौ नष्टोद्दिष्टपरिज्ञानस्याशक्यत्वादेकस्वरा अप्युक्ता इत्यर्थः । ननु तर्हि क्रमाः कूटतानत्वाभावात्किमर्थमत्रोच्यन्ते? अत आह—क्रमा इति । क्रमा यद्यपि कूटताना न भवन्ति, तथा ऽपि 'क्रमं न्यस्य स्वरः स्थाप्यः' इति वक्ष्यमाणे प्रस्तारे ते कूटतानेषूपयोगिनो भवन्ति, क्रमैर्विना कूटतानानामशक्यज्ञानत्वात् ॥ ३२–३६ ॥

स्युः षाडवानां विंशत्या सह सप्त शतानि तु ।
औडुवानां तु विंशत्या सहितं शतमिष्यते ॥ ३७ ॥
चतुःस्वराणां [1]कूटानां चतुर्विंशतिरीरिताः ।
त्रिस्वराः षड् द्विस्वरौ द्वावेकस्त्वेकस्वरो मतः ॥ ३८ ॥
आर्चिको गाथिकश्चाथ सामिको ऽथ स्वरान्तरः ।
एकस्वरादितानानां चतुर्णामभिधा इमाः ॥ ३९ ॥
[2]उक्ताः शुद्धादिभेदेन निगयुक्ताश्चतुर्विधाः ।
तयोरेकैकहीनास्तु द्वेधा मूलक्रमा मताः ॥ ४० ॥

(क०) **स्युः षाडवानामिति** । अत्र षाडवत्वं षट्स्वरवत्त्वमात्रेण विवक्षितम्, न तु प्रयोगापादनसमर्थषट्स्वरवत्त्वम् । औडुवानामित्यत्राप्येवमेव द्रष्टव्यम् ॥ **आर्चिक** इति । यज्ञप्रयोगेष्वृचामेकस्वराश्रयत्वात्, तत्संबन्धादार्चिकः । तथा गाथासंबन्धाद्गाथिको द्विस्वरः । सामसंबन्धात्त्रिस्वरस्तानः सामिकः । साम्नां तु त्रिस्वरत्वं सप्तस्वरवत्त्वे ऽपि मन्द्रादिस्थानत्रयविवक्षया । चतुःस्वरतानस्यैकस्वरादिसप्तविधतानमध्यवर्तित्वात्स्वरान्तर इति संज्ञा ॥ **उक्ताः शुद्धादिभेदेने**ति । अत्रादिशब्देन सकाकलिसान्तरतद्द्वयोपेता गृह्यन्ते ॥ ३७–४० ॥

(सु०) षाडवानां कूटतानानां क्रमैः सह संख्यामाह—स्युः षाडवानामिति । षाडवस्य क्रमस्य प्रस्तारे क्रियमाणे विंशत्युत्तराणि सप्त शतानि (७२०) भेदाः संजायन्ते । औडुवानां प्रस्तारे प्रतिमूर्च्छनं विंशत्युत्तरशतम् (१२०) भेदा भवन्ति । चतुःस्वराणां प्रस्तारे चतुर्विंशतिर्भेदा भवन्ति । त्रिस्वराणां प्रस्तारे

[1] तानानां.
[2] उक्तशुद्धादिभेदेन.

इदं च विष्ण्वाराधनं भगवच्छास्त्रेषु तैस्तैर्व्यापकमन्त्रप्रभृतिभिस्तत्तदधिकारानुरूपं प्रपञ्च्यते । अधिकृतशास्त्रप्रतिपादितस्य पूर्णोपदिष्टस्यैव मुख्यत्वं होतृशाखोक्तहौत्रपरिग्रहन्यायेन सिद्धम् । एतेन "अलाभे वेदमन्त्राणां पञ्चरात्रोदितेन वा" इति [1]स्मृतिरपि प्रणवाष्टाक्षर-द्वादशाक्षरादिमन्त्राणामाथर्वणरहस्याम्नायाद्यधीततया वेदमन्त्रशब्देन संग्रहात् पञ्चरात्रोदितेन वा इत्ययमंशस्तान्त्रिकसंज्ञितप्रत्यक्षेतरश्रुतिमूलमन्त्रान्तरविषयतया योज्यः[2] ।

पाञ्चरात्रोक्तं समाराधनमेव सर्वेषां मुख्यम् ।

नित्यं चैतद्वैश्वदेवादिवद्भगवत्समाराधनम् । 'नित्यमाराधयेद्धरिम्' इति वचनवात् ।

भगवत्समाराधनस्य नित्यत्वम् ।

"शौनकोऽहं प्रवक्ष्यामि नित्यं विष्ण्वर्चनं परम् ।
प्रवः पान्तमन्धसोऽधियेत्यर्धर्चविधानतः[3] ॥"

इति सूत्रान्तरानुसारात् ।

"स्नात्वा नित्यं शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।
देवताभ्यर्चतं चैव समिदाधानमेव च ॥"

इति सामान्यतो मनूक्तेश्च । उक्तं चानुशासनिके श्रीपुण्डरीक-नारद-संवादे—

"ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
केशवाराधनं हित्वा नैव याति परां गतिम् ॥" इति ।

[1] स्मृतिरपि इत्येव सर्वत्र पाठः.

[2] योज्या—ख, ग.

[3] धीत्यृचोऽर्धस्य—घ, ङ, ज ; चोर्धर्च—ख, ग ; धि इत्यर्धर्च—क, झ.

एवं योगयाज्ञवल्क्यादिष्वपि[1]—

"विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः ।
तस्मात् पूज्यतमं नान्यमहं मन्ये जनार्दनात् ॥"

इत्यादिकमुच्यते । एवंविधदेवतार्चनाकरणे च प्रत्यवायं स एवाह—

"यो मोहादथवालस्यादकृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकान् सूकरेष्वपि जायते" ॥ इति ।

भगवदर्चावताररहितगृहस्य[2] पुरुषस्याभोज्यान्नत्वमप्यन्यत्रोच्यते—

"केशवार्चा गृहे यस्य न तिष्ठति महीपते ।
तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत्" ॥ इति ।

अनन्तरं च पञ्चमहायज्ञपूर्वकं प्राणाग्निहोत्रं प्रपञ्चयन्नेवमाह[3]—

"स्वाहाप्रणवसंयुक्तं प्राणायान्नाहुतिं ततः ।
अपानाय ततो हुत्वा व्यानाय तदनन्तरम् ॥
उदानाय ततः कुर्यात् समानायेति पञ्चमम् ।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः ॥
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम् ।
ध्यात्वा तु मनसा देवमात्मानं वै प्रजापतिम्" ॥ इति ।

अत्रापि देव-प्रजापतिशब्दौ पूर्वोक्तनयेन विष्णुपरौ मन्तव्यौ[4] । "हृदि

[1] योगयाज्ञवल्क्येनापि—क, ख, ग.
[2] अर्चारहितगृहस्थस्य—घ.
[3] एवाह—क, ख, ग, च, ज, झ.
[4] मन्तव्यौ—क, ख, ग, झ पुस्तकेषु नास्ति ।

ध्यायन् हरिं तस्मै निवेद्यान्नं समाहितः" । इत्यादिभगवद्यामुनेयोपात्तकर्मकाण्डस्थप्राणाग्निहोत्रविषयव्यासवचनानुसाराच्च, अस्मिन्नपि[1] व्यासवचने देवध्यानं तदेव हृदयस्थहरिध्यानमिति गम्यते । ईदृशं च भोजनमेवानुयागसमाख्ययान्यत्र व्यपदिश्यते ।

अथान्यदपि[2] भोजने अपेक्षितं सर्वमुपदिश्य,

व्यासस्मृतौ स्वाध्यायसंवादनम् ।

"भुक्त्वैवं सुखमास्थाय तदन्नं परिणामयेत् ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" ॥

इति चतुर्थकालसाध्यं स्वाध्यायमाह । एवमन्येऽपि स्मरन्ति—"भुक्त्वोपस्थाय चादित्यं पुराणानि सदा पठेत्" इत्यादि । अत्र परिपूर्णज्ञानस्योपबृंहणनिरपेक्षस्याधिकारिविशेषस्य द्विषडष्टषडक्षरद्वयादिजप एव स्वाध्याय इति तत्र तत्र तद्विधिः । अत एव रहस्याम्नाये वेदान्तरनिषेधेन द्विषट्कमात्रस्वाध्यायविधानं निर्व्यूढम् ।

यत्पुनरनन्तरं पञ्चमकालं[3]कृत्यमुक्तम् "ततः सन्ध्यामुपासीत"

व्यासस्मृतौ योगोऽपि आक्षेपलभ्यः ।

इत्युपक्रम्य,

"हुत्वाग्निं विधिवन्मन्त्रैर्भुक्त्वा चान्नमभीष्टकम् ।
सभृत्यबान्धवजनः स्वपेच्छुष्कपदो निशि" ॥

[1] अस्मिन्नेव—क, ख, ग, ङ.
[2] अथ—क, ख, ङ पुस्तकेषु नास्ति ।
[3] पञ्चकाल—ख, घ.

इत्यादि । अत्र रात्रिभोजनवचनेन तदनन्तरं योगोऽपि दिवाभोजनानन्तरोक्तः स्वयमेवागच्छतीति तदनुक्तिः । तथा हि, पूर्वं दिवाभोजनानन्तरमेवमाह—

"हुतानुमन्त्रणं कुर्याच्छ्रद्धायामिति मन्त्रतः ।
तथाक्षरेण स्वात्मानं योजयेद्ब्रह्मणीति हि ॥
सर्वेषामेव योगानामात्मयोगः परः स्मृतः ।
योऽनेन[1] विधिना कुर्यात् स याति पदमक्षयम्" ॥ इति ।

एवं च निगमयामास—

"इत्येतदखिलेनोक्तमहन्यहनि यन्मया ।
ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥
नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः ।
स याति नरकान् घोरान् काकयोनौ च जायते ॥
नान्यो विमुक्तये पन्था मुक्त्वाश्रमविधिं सुखम् ।
तस्मात् कर्माणि कुर्वीत तुष्टये परमेष्ठिनः" ॥ इति ।

अत्र परमेष्ठी सर्वकर्मसमाराध्यो विष्णुरेव । विष्णोरेव सर्वकर्मसमाराध्यत्वम्,

"भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्" ।
"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" ।
"यज्ञैस्त्वमिज्यसे नित्यं सर्वभूतमयाच्युत" ।
"हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्" ।

[1] योगेन—क, ख, च, छ, झ.

इत्यादिषु प्रसिद्धम्। अयं चात्र परमेष्ठी विहितकर्मतोष्यत्वेनोच्यते। परमे पदे तिष्ठतीति परमेष्ठी। स च तमसः परस्तात्, 'तद्विष्णोः परमं पदं' इत्युक्ते शुद्धसत्त्वमये वैकुण्ठ[1]संज्ञके लोके वर्तमानः पुरुषोत्तम एव। एवं वैयासे धर्मशास्त्रे भगवतः पञ्चसु कालेषु भजनं भगवन्नित्यकर्मानुप्रवेशेनैव विहितमिति न कस्यचित् तत्परित्याग उपपद्यते।

यत्तु दक्षेणोक्तं कालाष्टकविभागेन दिनकृत्यं तदपि प्रकृतानुगुणमेव।

दक्षोक्तकालाष्टक-विभागोऽपि पाञ्च-कालिककर्मानुगुणः।

तथा हि—

"प्रातरुत्थाय कर्तव्यं यद्द्विजेन दिने दिने।
तत् सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम्॥
उदयास्तमयं यावन्न विप्रः क्षणिको भवेत्।
नित्यनैमित्तिकैर्युक्तैः काम्यैश्चान्यैरगर्हितैः॥
स्वकं कर्म परित्यज्य यदन्यत् कुरुते द्विजः।
अज्ञानादथवा लोभात्त्यागेन पतितो भवेत्"॥ इति।

नित्य-नैमित्तिककर्मणां तदुपकारिकाम्यकर्मणां च यथाकालमनुष्ठानमविच्छेदेन कर्तव्यमिति प्रतिपाद्य,

"दिवसस्याद्यभागेन कृत्यं तस्योपदिश्यते।
द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा॥
षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक्।
भागेष्वेतेषु यत् कृत्यं तत् प्रवक्ष्याम्यशेषतः"॥

इति कालाष्टकविभागेन कृत्यविभागं सामान्यतः प्रस्तुत्य,

[1] वैकुण्ठादि—घ, ङ, ज.

दक्षस्मृतौ प्रथमद्वि-
तीय कालकर्तव्यस्या-
भिगमनेऽन्तर्भावः ।

"उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम्" ।

इत्यादिना,

"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत्" ॥

इत्यन्तेन स्नानाचमन-सन्ध्यावन्दनादीनि यथावत् प्रतिपाद्य,

"सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते ।
स्वयं होमे फलं यत्तु न तदन्येन जायते ॥
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एतैरेव हुतं यत्तु तद्धुतं स्वयमेव हि" ॥

इति प्राभातिकं होमं चोक्त्वानन्तरमाह—

"देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणः[1] ।
देवकार्यस्य सर्वस्य पूर्वाह्णस्तु विशिष्यते ॥
देवकार्याणि पूर्वाह्णे मनुष्याणां तु मध्यमे ।
पितृणामपराह्णे तु कार्याण्येतानि यत्नतः" ॥ इति ।

अत्र प्रातर्होमानन्तरं देवकार्यविधानात् तत्कालचोदितं भगवदभि-गमनमपि सामान्यत उपदिष्टं भवति । यत्त्वनन्तरमुक्तम्—

[1] वीक्षणम्—छ, ज.

"द्वितीये तु तथा भागे वेदाभ्यासो विधीयते ।
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥" इति
तदप्यनुगुणम् । उक्तानि हि जयाख्यसंहितायां जप-ध्यानार्चन-स्तोत्राणि
प्रथमप्रहरपर्यन्तेऽभिगमने ।

उपादानं चानन्तरमेवाह—

दत्तोक्ततृतीयकाल-कृत्यस्य उपादाने-ऽन्तर्भावः ।

"समित्पुष्पकुशादीनां स कालः समुदाहृतः ।
तृतीये तु तथा भागे पोष्यवर्गार्थसाधनम् ॥" इति ।

इदं चोक्तं जयाख्यसंहितायाम् "ततः पुष्पफलादीनाम्" इत्यादिना ।
अत्र पोष्यवर्गार्थसाधनमित्येतत् प्रागुक्तन्यायेन भगवत्प्रीणनतयैवेति ग्राह्यम् ।
आह चात्र प्रातःस्नानं[1] प्रक्रम्य पूर्वमेव सर्वेषु कर्मसु भगवदनुसन्धानम्—

"ध्यायेन्नारायणं[2] देवं स्नानादिषु च कर्मसु ।
ब्रह्मलोकमवाप्नोति न चेहा जायते पुनः ॥" इति[3] ।

असूत्रयच्च भगवान् शौनकः—"हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेषु च ।"
इति । अत्र कर्मशब्देनानवच्छेदात् दृष्टादृष्टसर्वकर्मसंग्रहः । अन्यदेवत्य[4]-

[1] स्नानादि—क, ख, ग; स्नानादीन्—च, झ.
[2] ध्यायन्—क, ख, ग, च, झ.
[3] इति च—घ.
[4] अन्यदैवत्य—च.

कर्मण्यपि तदन्तरात्मभूतो हरिरनुसन्धेय इत्येवकाराभिप्रायः । नित्यमित्यनेन काम्यत्व-नैमित्तिकत्वशङ्काव्युदासः । स्वतः प्राप्तं कर्मकाले स्मरणं चकारेण संगृह्यते । एवं शास्त्रीयेषु सर्वेषु[1] कर्मसु भगवदनुसन्धानं नित्यमिति सिद्धम् । एतदेव रागप्राप्तेष्ववर्जनीयमिति जयाख्यसंहितायां नियमेषु पठ्यते—

"शयनासनयानादावासक्तश्चापि[2] भोजने ।
हृद्धृतं न त्यजेद्ध्यानमानन्दफलदं हि यत्" ॥ इति ।

सर्वसंग्रहेण तूच्यते—

"आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा" ॥ इति ।

एतच्च नित्यत्वात् स्वरूपानुरूपानन्दफलत्वेन स्वयं प्रयोजनत्वाच्च स्वतन्त्र-प्रपत्तिशास्त्रार्थनिष्ठैरपि[3] दुस्त्यजम् । उक्तं चैवं स्वयंप्रयोजनत्वं नारायणमुनिभिः—

"वृत्तिः स्वामिनि दासस्य स्वरूपानुगुणा शुभा ।
भक्तिश्रद्धासमायुक्ता तत्समाराधनं विदुः ॥
किं किं न साध्यं भगवदाराधनपरैर्नरैः ।
वैष्णवानां विशेषेण स्वयमेतत्प्रयोजनम्" ॥ इति ।

भगवदनुसन्धानविच्छेदोऽपि हि पुरुषार्थहानित्वेन स्मर्यते—

"यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ।
सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया" ॥ इति ।

[1] सर्वेषु—क, ख, ग, ङ पुस्तकेषु नास्ति.
[2] असक्तश्चापि—घ, छ, ज.
[3] शास्त्रनिष्ठैरपि—क, ख, ग, च, ज, ङ.

पुरुषार्थहानिः, काम-क्रोधाद्यरीणामवकाशः, अनात्मादिष्वात्मबुद्धिहेतुः, अस्वाभाविकसुख-दुःखकारणं चेत्यर्थः ।

"एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते ।
दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम्" ॥ इति

खिन्नवृत्तीनामन्यपराणामपि—

"व्याप्तेनापि मनसा विष्णुः सेव्योऽन्तरान्तरा ।
मेधिबद्धो भ्राम्यमाणो घासग्रासं करोति गौः" ॥

इत्यादिभिर्यथावसरं क्षुच्छान्तिकरकर्मसमाधिना तावन्मात्रप्रयोजनत्वेन भगवत्सेवनं स्मर्यते । तदिह सिद्धोपायस्य उपायं साधयतश्च भगवत्कैङ्कर्यं अरोगस्य आरोग्यार्थिनश्च क्षीरास्वादवत् स्वयंप्रयोजनमेव ।

दत्तोक्तचतुर्थ-पञ्चम-कालकृत्यस्य इज्यायामन्तर्भावः ।

यत्तु—"चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत्" इत्यादिना स्नानभेदानप्युपदिश्य,

"पञ्चमे तु तथा भागे संविभागो यथार्हतः ।
पितृदेवमनुष्याणां कीटानां चोपदिश्यते" ॥

इत्यादिना—

"संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ।
भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत्" ॥

इत्यन्तेन संग्रहेण देवतार्चन[1]-भोजनपर्यन्तमुक्तम् । तत्रापि अवान्तरपर्वभेदेन द्विधा विभक्तोऽयं काल एव 'इज्याकालः' इत्येकीकृत्य निर्दिश्यत इति न विरोधः । अत्र देवसंविभागशब्दनिर्दिष्टमर्थमुत्तरत्र देवतार्चनशब्देन विशेषयामास—'सन्ध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम्' इति । एवम् 'इतिहासपुराणाभ्यां षष्ठं सप्तममभ्यसेत्' इत्युक्तं कालद्वयं स्वाध्यायकाल इत्येकीकृतम् । अत्र मात्रया [2]कालवैषम्यं मतभेदादुपपद्यते । 'अष्टमे लोकयात्रां तु बहिः-सन्ध्यां ततः पुनः' इत्युक्तलोकयात्राकालविभागस्तु लोकपराङ्मुखे भगवदेकान्तिनि नातीवापेक्षित इति तदनुक्तिः । यथोक्तं पूर्वश्रवे[3]—

दत्तोक्तषष्ठ-सप्तम-कालकृत्यस्य स्वाध्याये ऽन्तर्भावः । अष्टम-कालोक्तलोकयात्रा तु न परमैकान्तिनाम् ।

"गुरोर्गुरौ सन्निहिते वृत्तिः कार्या यथा गुरौ ।
विद्यागुरुष्वनन्येष्वप्यन्या[4] वृत्तिः स्वयोनिषु" ॥ इति

उक्तं ज ब्रह्मविद्भिः—

"अद्यप्रभृति हे लोका यूयं यूयं वयं वयम् ।
अर्थकामपरा यूयं नारायणपरा वयम् ॥
नास्ति संगतिरस्माकं युष्माकं च परस्परम् ।
वयं तु किङ्करा विष्णोर्यूयमिन्द्रियकिङ्कराः" ॥ इति ।

'अहेरिव गणाद्भीतः' इत्यादिषु च भिन्नशीलगुणपरिहार उपदिश्यते । संन्यासप्रकरणे 'समानशीलैः सहवासो न दोषाय' इति कपिलानुशिष्टस्य

[1] देवार्चनादिकं—घ, ङ, छ, ज.
[2] कालत्रयवैषम्यं—क, ख, ग, च.
[3] पूर्व (ग्रन्थे) श्रवे—च.
[4] विद्यागुरुषु चान्येषु—क, ख, ग.

कैमुत्येन गृहस्थादिष्वपि मोक्षार्थिषु तुल्यप्रसरत्वात् । आमनन्ति च बह्वृचाः—'नेदंविदनिदंविदा समुद्दिशेन्न सह भुञ्जीत न सधर्मादिः[1] स्यात्' इति । तस्येदमुपबृंहणम्—

"आविद्यः[2] प्राकृतः प्रोक्तो वैद्यो वैष्णव उच्यते ।
आविद्येन[3] न केनापि वैद्यः किंचित् समाचरेत् ॥" इति ।
"अहन्यहनि धर्मस्य योनिः साधुसमागमः ।
मोहजालस्य हेतुर्हि[4] धूर्तैरेव समागमः ॥" इति ।

तथा—

"मनीषिणो हि ये केचिद्यतयो मोक्षकाङ्क्षिणः ।
तेषां वै छिन्नतृष्णानां योगक्षेमवहो हरिः" ॥
"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्" ॥
"शरीरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् ।
ददाति ध्यायिनां नित्यमपवर्गप्रदो हरिः" ॥
"वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः ।
न शौरिचिन्ताविमुखजनसंवासवैशसम्" ॥

[5]इत्यादिभिर्ब्रह्मविदां लोकनैरपेक्ष्यं सिद्धम् । अत एव हि लौकिकेश्वराभिगमनमप्यापद्विषयमिति पूर्वमेवोक्तम् ।

[1] सधर्मा—क, ख, ग, च, झ.
[2] अवैद्यः—क, च.
[3] अवैद्येन—क, च.
[4] योनिर्हि—घ, ङ, छ, ज.
[5] इत्यादिभिश्च—घ, ङ.

यत्तु पश्चादुक्तम्—

"प्रदोषपश्चिमौ यामौ वेदाभ्यासेन यापयेत् ।
यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते" ॥ इति ।

दत्तस्मृतौ वेदाभ्यासस्य योगेनाविरोधः ।

अत्र योगासमर्थस्य तच्छेषभूतः स्वाध्यायः, समर्थस्य तु योग एवेति न समानकालतदुभयविधायकशास्त्रद्वयविरोधः । विस्तरेण चाह योगमन्त्रे दक्षः । तत्र चैष सारः प्रोक्तः—

"सर्वोपाधिविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत् ।
एतद्ध्यानं च योगश्च शेषोऽन्यो ग्रन्थविस्तरः" ॥ इति ।

याज्ञवल्क्यश्च—'वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं ब्रह्मणि न्यसेत्' । इति । वृत्तिहीनं बाह्यवृत्तिरहितमित्यर्थः । अतः स्वाध्याय-योगयोरेकैकस्मिन् प्रदोषादिकाले तदंशभेदेन क्रमात् प्रयोगेऽपि[1] न विरोधः । 'यत्रैकाग्रता तत्राविशेषात्' इति शारीरकसमर्थितप्रकारेण एकाग्रतानुगुणकालान्तरेऽपि स्वगुणभूतस्वाध्यायादिनिरोधेनापि योगोऽनुष्ठातुं युक्तः । याम-यामार्धविभागे स्वाध्यायदिषु नातिदूरपूर्वापरन्यूनाधिकनाडिकाविभागादयस्तु मतभेदतया निर्वाह्या इति । एवं स्मृत्यन्तराण्यपि संवादनीयानि[2] ।

पञ्चकालधर्मावश्यकतानिगमनम् ।

अतः पञ्चसु कालेषु तैस्तैः कर्मभिर्भगवत्सेवनस्य नित्यत्वेन विधानात्, व्यास-दक्षाद्युक्तमर्यादया भगवदाज्ञानुपालनेऽपि नीरन्ध्रभगवदुपासनसिद्धेः अधिकृतशास्त्रोक्त-

[1] प्रयोगभेदेऽपि—क, ख, ग, ज्ञ.
[2] संपादनीयानि—क, ख, ग, च, ज्ञ.

प्रशस्ततमपूर्णशास्त्रार्थपरिग्रहौचित्यस्य प्रागेव दर्शितत्वात्, [1]भाष्यकार-तदन्तेवासिप्रभृतिभिश्च प्रपत्त्येकनिष्ठैस्तदनुसारेण भगवद्भजनस्योक्तत्वात् तद्योग्यैश्चाद्ययावत्तदनुष्ठानस्य यथाशक्ति परिग्रहात्, अनिपुणपरि-त्यागस्यानादरणीयत्वात्[2] "यच्छीलः स्वामी तच्छीला प्रकृतिः" इति न्यायेन

"नाहङ्कारान्न संरम्भान्नामर्षान्नार्थकारणात् ।
न [3]हेतुवादाल्लोभाद्वा धर्मं [4]जह्यां कथंचन" ॥

इति वदता भगवता वसुदेवनन्दनेन स्वामिना तद्दासैः समशीलैर्भवि-तव्यत्वात्, स्वामिसंप्रीणनस्वरूपानुरूपवृत्तेश्च सर्वाभिमतत्वात्, तत्प्रीणनस्य च नित्यानां मुक्तानामिव च मुमुक्षुभिः प्रत्यक्षेणावगन्तुमशक्यत्वात्, 'श्रुतिः स्मृतिर्ममैवाज्ञा' इति तदुक्त्यनुसारेण शास्त्रादेव तत्प्रीणननिश्चयात्, 'येनास्य पितरो याताः,' 'पञ्चरात्रोदितान् वापि ये स्ववंश्यैरनु-ष्ठिताः' इत्यादिप्रतिपादितप्रकारेण तत्तत्संहितामेदभिदुरेषु परमात्मसंप्रीणन-प्रस्थानभेदेषु कांचिन्मर्यादामवलम्ब्य स्वतन्त्रप्रपत्तिनिष्ठैरपि स्वाधिकारोप-देशाद्यनुरूपम्

"कुसीदमेके विहरन्ति सर्वे
य[5] आशीर्वदन्तो ददत्यत्र किंचित् ।
पर्यन्तलोकास्त्विह ते भवन्ति
अनाशिषस्तु विजयायानन्ताय" ॥

[1] भाष्यकारान्तेवासि—क, ख, ग, च, झ.
[2] अनिपुणपरित्यागस्यानादरणीयत्वात्—क, ख, ग, झ पुस्तकेषु न दृश्यते ।
[3] भेदवादात्—क, ख, ग, झ.
[4] जह्यात्—क, ख, च, छ, झ.
[5] यच्छब्दः च कोशे नास्ति.

"यस्य सर्वे समारम्भा अनाशीर्बन्धनास्त्विह ।
त्यागे यस्य हुतं सर्वं स त्यागी स च पण्डितः" ॥

"अथ भो[1] भगवन्तं याचेत, न भो इत्याह आश्रयितव्यो भगवान् भवति न त्वेव याच्यः" इति रहस्याम्नायादिचोदित-प्रकारेण प्रयोजनान्तरप्रार्थनारहितैः स्वयंप्रयोजनत्वात् पञ्चस्वपि कालेष्व-विच्छेदेन भगवत्सम्प्रीणनरूपशास्त्रीयकैङ्कर्यव्यापारेण यावन्न्यासविद्याख्य-यागावभृथं आगामिनिश्रेयसकालनिर्विशेषमवन्ध्यकालो यापनीय इति सिद्धम् ॥

अयमत्र सारः—

पाञ्चकालिकधर्मानु-ष्ठानप्रयोजनम् ।

माङ्गल्यसूत्रवस्त्रादीन् संरक्षति यथा वधूः ।
तथा प्रपन्नः शास्त्रीयपतिकैङ्कर्यपद्धतिम् ॥
यद्वन्मङ्गलसूत्रादेस्त्यागे संरक्षणेऽपि वा ।
रक्षेन्निरोधाद्भोगाद्वा[2] पतिस्तद्वदिहापि नः ॥ इति ।

कालं सर्वमिहाभ्युपेत्य भगवत्कैङ्कर्यमादेशिकं
तत्पर्वक्रमपञ्चके किमु वयं मान्ये विमन्येमहि ।
त्यक्त्वा विंशतिपञ्चकं शतमिव प्राप्तुं मुधा मुह्यता-
मस्माकं सदसद्विवेकिषु मतं हासास्पदं मा स्म भूत् ॥

[1] अयि भो—क, च, झ.
[2] निरोधैर्भोगैर्वा—क, ख; निरुन्ध्याद्भोगैर्वा—च.

अनुपुरमनुरुन्धन्नान्तरध्वान्तराशिं[1]
न च पुरत उदेता नास्तमेता च पश्चात् ।
स्वविषयनिजधर्मान् शुद्धसत्त्वान् स सत्त्वान्[2]
अवतु भवतुषारादक्षरव्योमसूर्यः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु श्रीपाञ्चरात्ररक्षायां

नित्यानुष्ठानस्थापनाख्यः

द्वितीयोऽधिकारः ।

കേരള സാഹിത്യ അക്കാദമി

[1] अनुपुरमिति श्लोक एषः—क, ख, ग, च, झ पुस्तकेषु कालं सर्वमिति श्लोकस्य पूर्वं दृश्यते.

[2] सतत्त्वान्—छ.

॥ श्रीः ॥

नित्यव्याख्यानाख्यः

तृतीयोऽधिकारः ।

[1]अथोपक्रम्यते नित्यकर्तव्यक्रमसंक्रमः[2] ।
नाथयामुनपूर्णादिसम्प्रदायसरित्पथे ॥

सर्वकर्मसाधारणानि
अङ्गानि ।

अत्र यदुक्तं भगवद्यामुनाचार्यैः श्रीमद्गीतार्थसंग्रहे—

"ज्ञानी तु परमैकान्ती परायत्तात्मजीवनः ।
तत्संश्लेषवियोगैकसुखदुःखस्तदेकधीः ॥
भगवद्ध्यानयोगोक्तिवन्दनस्तुतिकीर्तनैः ।
लब्धात्मा तद्धृतप्राणमनोबुद्धीन्द्रियक्रियः ॥
निजकर्मादिभक्त्यन्तं कुर्यात् प्रीत्यैव कारितः ।
उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः ॥" इति ।

स पञ्चपरतत्त्वज्ञः पञ्चकालपरायणः ।
जितपञ्चेन्द्रियक्लेशः पञ्चभ्यो नागमद्भयम् ॥

इत्ययं श्लोकः तृतीयाधिकारस्यादौ ङ, छ कोशयोः दृश्यते.

[2] संचयः—क, ख, झ ; सं (क्रमः) चथः—च.

इदं तावत् आप्रबोधात्[1] आनिशान्तमनुष्ठीयमानेषु कर्मसु[2] न विस्मर्तव्यम्। समयाचारनियमाध्यायश्रीवैष्णवधर्मशास्त्रादिकथितं परमैकान्तिनां विशेषकर्तव्यं च सर्वं यथावदधिगन्तव्यम्। सर्वेषु च कर्मारम्भेषु भगवच्छास्त्राद्युक्तत-त्तन्मन्त्रः, 'भगवानेव' इत्यादिकं भाष्यकारनित्योक्तं च वाक्यं पठितव्यम्। अन्ते च सर्वं स्वनियाम्येत्यादिक्रमेण समन्त्रकं भगवति समर्पणीयम्। [3]न चैतदखिलमपि उपासनोपायाधिकार्यन्तरमात्रविषयमिति भ्रमितव्यम्[4]। तथा सति तत्सहपठितगुरुभजन-निर्माल्यभक्षणनिषेधादेरपि तावन्मात्रविषय-कत्वप्रसङ्गेनालेपकवादावतारप्रसङ्गात्। प्रपञ्चितं चैतत् पूर्वस्मिन्नधिकारे, निक्षेपरक्षादिषु च।

बाह्यमुहूर्तकर्तव्यानां उपक्रमः।

तत्र भाष्यकारोक्तनित्यानुष्ठाननिष्ठस्य ब्राह्ममुहूर्तादिप्राप्तौ यत्कर्तव्यं तत्तावत् तच्छिष्यप्रशिष्यग्रन्थ-तन्मूलभूतसंहिताद्यनुसारेण संगृह्यते। पूर्वमेव यथाकालं विश्रान्त्यै निद्रां निर्विश्य प्राप्ते यामिन्याः पश्चिमे यामे सावधानेन निद्रा परित्याज्या। 'याम-द्वयं शयानस्तु', 'युक्तस्वप्नावबोधस्य' इत्यादिषु स्मरणात्। येषु च[5] योगग्रन्थेषु कृत्स्नायां रात्रौ निश्छिद्रयोगार्थं स्वप्न-समयसंभावितेन्द्रियक्षोभादिपरिहाराय च जागरः प्रतिपाद्यते, ते[6] विश्रम-निरपेक्षयोगदशापन्नपूर्णारोग्यपुरुषविशेषविषयाः[7]। तत्तत्पुरुषशक्त्यनुसारेणैव हि नित्य-नैमित्तिक-काम्यविषयाणां सर्वेषां शास्त्राणां प्रवृत्तिः। अत एव हि

[1] आप्रभातात्—क.
[2] सर्वेषु कर्मसु—च.
[3] न चैतदखिलमुपासनाधिकार्यन्तर—क, ख, ग, च, झ.
[4] मन्तव्यम—ख, ग.
[5] केषुचित्—ग.
[6] स तु—क, ख, ग, झ.
[7] विषयः—क. ख, ग, झ.

धर्मसाधनेषु प्रधानतमं शरीरं रक्षितुं प्रवृत्ते 'ब्रह्मा स्मृत्वायुषो वेदमुपवेदमथर्वणाम्' इत्यथर्वणवेदोपवेदभूतायुर्वेदे "ब्राह्मे मुहूर्त उत्तिष्ठेज्जीर्णाजीर्णे निरूपयन्" इत्यभिधाय, अजीर्णे पुनरासन्ध्यागमनात् स्वापो विधीयते। ईदृशसर्वपुरुष[1]क्रोडीकारेण हि 'युक्तस्वप्नावबोधस्य' इति गीतम्। तस्मात् सर्वेषु मानवेषु प्रायिकतयौत्सर्गिकौ निद्राप्रबोधकालौ 'यामद्वयं शयानः' इत्यादिभिरुपदिश्यत [2]इति विषयव्यवस्था।

ब्राह्ममुहूर्तप्रबोधः तत्फलं च।

एवं प्राप्तकालमपनीतनिद्रातमस्कत्वेन सत्त्वस्थः प्रसन्नधीश्च भवति। तेन पूर्वयामानुसंहितमन्तःकरणचित्रभित्तिगतं विचित्रशुभाश्रयविशिष्टं ध्येयं निद्रातमोऽन्तरितमपि तत्कालसमुन्मुषितसत्त्वसन्धुक्षितसात्त्विकज्ञानरूपप्रदीपप्रकाशेन सम्यगवलोक्येत[3]। तत [4]एव चापररात्रयोगो निष्पद्यते। य एष सात्त्वतादिषु ब्राह्ममुहूर्तात् पूर्वमेव कर्तव्यत्वेन प्रपञ्च्यते——

"समुत्थायार्धरात्रेऽथ जितनिद्रो जितश्रमः।
कमण्डलुस्थितेनैव समाचम्य तु वारिणा।
गुरून् देवान् नमस्कृत्य ह्युपविश्याजिनासने" ॥

इत्यादिना एतत्संहितानिष्ठानामेष योगकालनियमः[5]। निःशब्दे सर्वसुषुप्तिकाले च ऐकाग्र्यातिशयसंभावनया च तद्विधिः। तत्तत्पुरुषशक्त्याद्यनुसाराच्च तत्तत्कालविधेरविरोध इत्युक्तम्।

[1] पुँरुषशब्दः घ पुस्तक एव दृश्यते.
[2] उच्यत इति—घ.
[3] अवलोक्यते—घ.
[4] स एव—छ.
[5] एष कालनियमः—क, ख, ग, ङ.

निद्रान्ताचमनादिकम् ।

अत्र—

"वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ।
यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले" ॥

इत्यादिभिर्मन्त्राद्युपदिष्टसोदककमण्डलुधारणादिकं भगवद्योगिनोऽप्यनपोदितमिति ज्ञापनाय 'कमण्डलुस्थितेनैव' इत्युक्तम् । निद्रान्तनिमित्ततया,[1] उत्तरकर्माङ्गतया चात्र तन्त्रेणाचमनम्, तुशब्देन स्वशास्त्रोक्तविशेषः तोयाभाव[2]लाभदशायां दक्षिणश्रवणस्पर्शश्च व्यज्यते । स्मरन्ति हि—

"सम्यगाचमनाशक्तावलाभे[3] सलिलस्य च ।
पूर्वोक्तेषु निमित्तेषु दक्षिणं श्रवणं स्पृशेत्" ॥ इति ।

अत्र मन्त्रचतुष्कादिव्यतिरिक्तं सर्वं संहितान्तरनिष्ठानामपि साधारणम् । अजिनासन इति "चेलाजिनकुशोत्तरम्" इति गीते प्रधानांशग्रहणम् । "ततस्त्वभिमतेनैव[4] त्वास्ते पद्मासनादिना" इति जितासनगतत्वं विधीगते ।

अपररात्रयोगः ।

यच्च "समं कायशिरोग्रीवं धारयन् अचलं स्थिरम्" इत्यादिना योगदशापेक्षितं गीतं तदपि सर्वमिह सविशेषमुपदिश्यते[5] ।

[1] निद्रानिमित्ततया—क, च, झ.
[2] तोयाभाव—क, ख, ग, च, झ.
[3] शक्तावभावे—क, ख, ग, च, झ.
[4] अभिमतेनैव तिष्ठेत्—क, ख, ग, च, झ.
[5] समं कायेत्यारभ्य उपदिश्यते इति यावत् घ कोशादन्यत्र विमुक्तम् ।

"समं कायशिरोग्रीवं सन्धाय सह वक्षसा ।
दृङ्नासाग्रगता कार्या विनिमीलितलक्षणा ॥
जिह्वातालुतलस्था च सान्तरे दशनावली ।
ईषदोष्ठपुटौ लग्नौ धार्यौ द्वौ बाहुकूर्परौ ॥
ऊरुमध्यप्रदेशे तु हस्तौ नाभेरधो[1] न्यसेत् ।
अधरोत्तरयोगेन वामदक्षिणतः क्रमात् ॥
अचलं योगपट्टेन त्वेवं सन्धार्य विग्रहम् ।
संकोच्यापानदेशात्तु ह्युपरिष्टात्तमेव हि ॥
विकास्य वर्णहीनेन[2] हार्देनालक्ष्यमूर्तिना ।
विषयान्तर्निविष्टं तु क्रमाच्चित्तं समाहरेत् ॥
कुर्याद्वै बुद्धिलीनं तु तां च कुर्यात् स्वगोचरे ।
समाधायात्मनात्मानं सह मन्त्रैस्ततः[3] क्रमात् ॥" इति ।

योगे तादात्म्यभावनस्य उपपत्तिः ।

यत्पुनरिह योगदशायां तादात्म्यभावनमुपदिश्यते—

"ततो जाग्रत्पदस्थं चाप्यनिरुद्धं च मन्त्रपम् ।
परावर्त्य शतं बुद्ध्या तदभिन्नेन चेतसा ॥
तन्मन्त्रजपसामर्थ्यात्तादात्म्यस्थितिबन्धनात् ।
महिमा तु सविज्ञानस्तदीयस्तस्य जायते ॥
अभ्यासाद्वत्सरान्ते तु तदद्वैतसमन्वितः ।
अथ प्रद्युम्नमन्त्रं तु परावर्त्य शतद्वयम् ॥

[1] नाभावधः—घ, ङ, छ.
[2] विकास्यावर्णहार्णेन—घ, ङ, छ.
[3] मन्त्रैः स्वतः—क, ञ.

योऽहं सोऽहमनेनैवाप्यद्वैतेन सदैव हि ।
एवमेव समभ्यासान्मतिमांश्छिन्नसंशयः ॥
तत्प्रभावाच्च तेनैव तथा कालेन जायते ।
अनेन क्रमयोगेन जपध्यानान्वितेन तु ॥
निखिलं चाप्यधीकुर्यान्मन्त्रबृन्दं[1] पुरोदितम् ।
यावदाभाति भगवान् स्थाने पूर्वोक्तलक्षणे ॥
प्रलीनमूर्तिरमलोऽप्यनन्तस्तेजसां निधिः ।
चिदानन्दघनः शान्तोऽप्यनौपम्यो ह्यनाकुलः ॥
समाधायात्मनात्मानं तत्र त्यक्त्वा जपक्रियाम् ।
ध्यातृध्येयाविभागेन यावत्तन्मयतां व्रजेत् ॥
यदा संवेद्यनिर्मुक्ते समाधौ लभते स्थितिम् ।
अभ्यासाद्भगवद्योगी ब्रह्म सम्पद्यते तदा ॥" इति

अत्र न स्वरूपैक्यादिकं विवक्षितम् । शरीर-शरीरिणोर्जीवात्म-परमात्मनोः शारीरकसमर्थितप्रकारेणाविरुद्धस्य, अस्पृष्टलक्षणादोषस्य, अशेषशास्त्रानुगुणस्य, अनुकूलतर्कशालिनः, 'तत्स्थत्वादनुपश्यन्ति ह्येक एवेति साधवः'[2]' इत्युपबृंहणं[3]शतसुस्थितस्य 'अवस्थितेरिति काशकृत्स्नः' इति सूत्रितस्य, पूर्वापरग्रन्थसंहितान्तरानुगुणस्य विशिष्टाद्वैतस्य विवक्षितत्वात् । 'ध्यातृध्येयाविभागेन' इत्यादिना च निर्विकल्पकसमाध्यवस्थोच्यते । 'ब्रह्म सम्पद्यते तदा' इति च परमसाम्यरूपफलप्रतिपादनम् । उक्तं च ब्रह्मैव भवतीत्यादिवाक्यान्यधिकृत्य भाष्यकारैः—"प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव, यथा सेयं गौरिति" इति । अन्यथा "निरञ्जनः परमं साम्यमुपैति"

[1] निखिलं वापि—क, ख, ङ.
[2] (तन्मयत्वेन साधवः)—च.
[3] इत्याद्युपबृंहण—घ.

"मम साधर्म्यमागताः" इति श्रुति-स्मृतिभ्यां विरोधः। तथा च श्रुत्यन्तरम्—"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम" इति। साम्ये च स एवेति व्यपदेशः श्रुतावेव दृश्यते—"वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वा इमान् लोकानभिजयति" इति। एवं च सति[1] 'महिमा तु सविज्ञानस्तदीयस्तस्य जायते' इत्यादिप्राकरणिकग्रन्थसामञ्जस्यं भवति। शारीरके च फलपादे मुक्तस्याविर्भूतस्वरूपस्य गुणाष्टकविशिष्टस्य जगद्व्यापारव्यतिरिक्तं भोगमात्रसाम्यं च सूत्रितम्—'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च', 'भोगमात्रसाम्यलिङ्गाच्च' इति। अत उपायदशायां फलदशायां च विशिष्टैक्यानुसन्धानमेवात्र विवक्षितम्।

एतेन लाञ्छनन्यासाद्यनन्तरं 'मुद्रां बध्वा [2]स्मरेद्देवं देवोऽहमिति भावयेत्' इति समाराधनारम्भग्रन्थोऽपि[3] निर्व्यूढः। 'बध्वा मूलादिकां मुद्रां देवोऽहमिति भावयेत्[4]' इत्यादिसंहितान्तरग्रन्थाश्चात्र तुल्यन्यायाः। अत्र च 'मनो ब्रह्मेत्युपासीत' इत्यादिष्विवेतिकरणादिवशात् दृष्टिविधित्वं सुस्पष्टम्। अत एव हि तथाविधभावनयाप्यनन्तरं योग्यतापादनमात्रमुक्तम्—

"न्यासेन देवमन्त्राणां देवतादात्म्यभावनात्।
अप्राकृताङ्गकरणात् पूजामर्हति साधकः" ॥ इति।

अन्यथा—

"देवतारूपमात्मानमर्चयेदर्घ्यधूपकैः।
धूपावसानिकैर्भोगैर्ध्यात्वा नारायणं हृदि"।

[1] एवं सति—ध.
[2] स्मरेद्ध्यानं—क, ख, ग, घ, ङ.
[3] समाराधनग्रन्थोऽपि—ङ, छ.
[4] इति समाराधन इत्यारभ्य भावयेत् इत्यन्तं—क, ख, ग, च, ञ कोशेषु विमुक्तम्.

ति समनन्तरकर्तव्यं कथं संगच्छते। न हि स्वरूपैक्यभावनायां हृदि पुनर्नारा-
णध्यानमिति किंचित् सात्। न च शेषवृत्तौ प्रवर्तमानस्य स्वरूपैक्यभावनं
ाघटीति। अतो दृष्टिविधिपक्षोऽत्र स्वीकार्यः। यद्वा गत्यन्तरे संभवति दृष्टि-
वेधिविवक्षा च न युक्ता। अतस्तच्छरीरतया तादधीन्यादिभिः सर्वानु-
त्तस्तद्व्यपदेशः। तदभिप्रायेण च स्वनियाम्येत्यादिकं वक्ष्यति भाष्यकारः।

योगे च[1] भिन्नलक्षणयोः परमात्म-प्रत्यगात्मनोः संबन्धानुसन्धान-
मेवेति शाण्डिल्यस्मृतिवाक्येन स्थापितं पूर्वाधिकारे।

योगस्वरूपे शाण्डिल्यस्मृतिः श्रीकृष्णमुनिश्च।

उक्तं च विप्रकीर्णे सात्त्वते नित्यं संगृह्यान्ते श्रीकृष्ण-
मुनिभिः स्वरूपैक्यादिबुद्धेरवैदिकत्वम्—

"चेतनस्त्वेक एवेति मतिर्या केवला क्रिया।
फलतीति मतिस्ते द्वे वेदाप्रामाण्यबुद्धिजे।
स एनं प्रीतः प्रीणाति ब्राह्मणस्यानुगे न ते" ॥ इति।

एवं यथावदनुष्ठितयोगस्य श्रान्तिसंभावनायां ब्राह्ममुहूर्तात् पुनर्वि-
श्रमोऽनुज्ञाप्यते—

योगमध्ये श्रान्तौ विश्रमाभ्यनुज्ञा।

"ततः श्रमजयं कुर्यात्त्यक्त्वा ध्यानासने क्रमात्।
समासीत शयानश्च[2] कालं रात्रिक्षयावधि" ॥ इति।

ाह्ममुहूर्ते विशेष-कर्तव्यानि, हरि-कीर्तनं च।

तत्र[3] ब्राह्ममुहूर्तप्रभृतिविशेषकर्तव्ये[4] दिङ्मात्रं दर्शितम्—

[1] योगे च इत्येव सर्वत्र पाठः। योगश्च इति चेत् साधीयान्। दृश्यतां च शाण्डिल्य-
स्मृतेरुपात्तं 'तत्संबन्धानुसन्धानमिति योगः प्रकीर्तितः' इति वचनं पूर्वाधिकारे (५९-पुटे).
[2] समास्ते शयनस्थश्च—घ; समाप्ते शयतस्थश्च ङ. च, छ.
[3] अत्र—क, ख, ग, च, झ. [4] कर्तव्यं—क, झ.

"ब्राह्मे मुहूर्ते संप्राप्त उत्थाय शयनात्ततः ।
स्नात्वाभ्यर्च्य जगन्नाथं समिदाधानमाचरेत्" ॥

इत्यादिना । तदिदं संहितान्तरेषु विस्तृतम् । अत्र हरिर्हरिर्हरिरिति मुहुः संकीर्तयन् हरिमेव चिन्तयन्नुत्तिष्ठेत् । अत्र हरिशब्दसंकीर्तनं सप्तकृत्व इति श्रीमद्बुध्नसरोमुनिभिर्नित्यक्रमसंग्रहे[1] निबद्धम् । उत्तिष्ठतश्च हरिशब्दपूर्वक-भगवदनुस्मरणं श्रीविष्णुधर्मे भगवता शौनकेनोक्तम्—

"उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवम् ।
भुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम्" ॥ इति ।

सर्वकर्मारम्भावसानेषु च हरिसंस्मरणं तेनैव स्वकीयसूत्रेऽप्युक्तम्—'हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेषु च' इति । स च निद्रानन्तरमनुस्मर्तव्यो हरिः, 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च' इति धर्मदेवतात्मजत्वेन[2] स्मर्य-माणेषु भगवदवतारेषु तृतीय इति सम्प्रदायः ; गजेन्द्रमोक्षकश्चैव ।

"ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन् माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः" ॥

स खलु तमोमयग्राहग्रस्तस्वाश्रितगजेन्द्रमोचकः सुषुप्तिरूपस्वेतरदुर्निवार-तमोग्राहग्रस्तजन्तुजालमोचकत्वेनानुसन्धीयते । तमधिकृत्यैव पौराणिकोप-जप्यं 'प्रातः स्मरामि' इत्यादिश्लोकत्रयं प्रभाते सर्वैः पठ्यते । तत्फल-श्रुतौ च हरिरित्येव भगवान्निर्दिष्टः—

[1] नित्यकर्मसंग्रहे—क, ख, ग, च, झ.
[2] धर्मदेवतात्मकत्वेन—क, झ.

"श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः" ॥ इति ।

[1]पाप-तद्विपाकरूपं सर्वमनिष्टं हरतीति[2] हरिशब्दः ।

"ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च ।
प्रसह्य हरते यस्मात् तस्माद्धरिरितीर्यते" ॥

इत्यादिभिस्तस्यैव निखिलजगदुदय-विभव-लयलीलस्य निरङ्कुशस्वातन्त्र्यं चानुसन्धेयम् ।

एवमुत्थाय निद्रान्ताचमनं मुख्यं दक्षिणश्रवणस्पर्शरूपं वा तदानीं शक्यं विधाय तस्मिन्नेव शयने समासीनः प्रतिसंहितयोगो योगशास्त्रोक्ते यत-

निर्वेदानुसन्धानम् ।

मानव्यतिरेकैकेन्द्रियवशीकाराख्ये क्रमभाविनि संज्ञा-चतुष्टये द्वितीयावस्थारूपव्यतिरेकसंज्ञान्यायेन भूत-भाविदशाविशेषपरामर्शाय कृताकृतप्रत्यवेक्षणाय च नियतेन्द्रियः समाहितो-ऽतिक्रान्तमनन्तं कालं निरर्थकमवलोक्य निर्वेदं परं गच्छेत् । निर्वेद-प्रकाराश्च विविधास्तत्तत्संहिताविशेषेष्वनुसन्धेयाः । तदिदं संगृहीतं नारायण-मुनिभिः—

"ब्राह्मे मुहूर्ते सत्त्वस्थो हरिर्हरिरिति ब्रुवन् ।
उत्थाय शयने तत्र समासीनः समाहितः ।
व्यर्थं वीक्ष्य गतं कालं निर्विद्याहमितः परम्" ॥ इति ।

विस्तरेणोद्धृतं चैतद्बङ्गिवंशेश्वरैः—

"ब्राह्मे मुहूर्ते संप्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः ।
हरिर्हरिर्हरिरिति व्याहरेद्वैष्णवः पुमान् ॥

[1] पापं तद्विकाररूपं—क ; पापं तद्विपाकरूपं—ङ, च, झ.
[2] हरतीत्यत्र—क, ख, ग, घ, च, झ.

उत्थाय शयने तस्मिन्नासीनो नियतेन्द्रियः ।
त्रस्तनिर्विण्णहृदयो व्यर्थं वीक्ष्य गतं वयः" ॥

इत्यादिभिः, "दुस्तरां दुर्दशामेतां कथयिष्यामि कस्य वा" इत्यन्तैरधिकविंशैः श्लोकैः । यद्यपि मुमुक्षोः 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति प्राथमिकगुरूपसत्तिकालात् पूर्वमेव तृणीकृतहिरण्यगर्भादिभोगः परिपूर्णो निर्वेदः संवृत्तः, तथापि विषमविपाकविशेषगुणत्रयाश्रयभूतप्रकृतिसंबद्धतया सम्भावितविषयसंगादिदोषपरिहाराय तथाविध एव निर्वेदोऽनुवर्तनीयः । अगीयत चास्य नित्यानुवर्तनीयत्वममानित्वादिगुणगणमध्ये—"जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्" इति । अतः सिद्धोपायस्यापि पराङ्कुश-परकालादीनामिव भगवदनुभवविच्छेदकतया हेयतमरजस्तमोमयनिद्रादिप्रतिकूलवर्गप्रवाहानुवृत्तिदर्शनेन संसारवैराग्योपचयार्थम् अहरहस्तदुचितावसरेषु निर्वेदः कर्तव्य एव ।

एवं सति विवेकविमोकादिसप्तकान्यतमभूतानवसादविरुद्धावसादवशादुत्तरकैङ्कर्यप्रवृत्तेरनिष्पत्तिः स्यादिति तत्परिहारायानन्तरमुच्यते—

सात्त्विकधृत्यवलम्बनम् ।

"इति निर्विद्य तदनु धृतिमालम्ब्य सात्त्विकीम् ।
विधूय चेमं निर्वेदं सर्वकार्यावसादकम्" ॥

इत्यादिना गतजलसेतुबन्धनाभिलाषतुल्यानुतापप्रशमनपूर्वकं सात्त्विकधृत्यवलम्बनात्मकागामिकालशक्यकैङ्कर्यनिश्चयः । सात्त्विकधृतिस्वरूपं चैवं[1] भगवता गीतम्—

[1] चेदं—क, ख, ग, ङ, च, छ, झ.

"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी" ॥ इति ।

सात्त्विकधृतिप्रकारः ।

स च निश्चयप्रकार एवं तत्कालोचितकर्तव्यविभागेन संगृहीतः—

"इत ऊर्ध्वमहं तावद्यावज्जीवं श्रियः श्रियः ।
पदयोरर्चनं कर्तुं यतमानः समाहितः ॥
अभिगच्छन् हरिं प्रातः पश्चाद्द्रव्वाणि चार्जयन् ।
अर्चयंश्च ततो देवं ततो मन्त्रान् जपन्नपि ॥
ध्यायन्नपि परं देवं कालेष्वूक्तेषु पञ्चसु ।
वर्तमानः सदा चैवं पाञ्चकालिकवर्त्मना ॥
स्वार्जितैर्गन्धपुष्पाद्यैः शुभैः शक्त्यनुरूपतः ।
आराधयन् हरिं भक्त्या गमयिष्यामि वासरान्" ॥ इति ।

अत्र 'इत ऊर्ध्वम्' 'यावज्जीवम्' 'सदा' इत्यादयः शब्दाः कैङ्कर्य-प्रारम्भदिवसे तावत् स्वरसवाहिनः । उत्तरोत्तरदिवसेष्वपि निरुपाधिक-कैङ्कर्योपचयसिद्ध्यर्थं निर्वेदविषयतयानुवर्तमानानां भगवदासक्तिविरोधिना-मान्तराणाम्, अष्टादशचण्डाल-षड्वृषलादिशब्दव्यपदेश्यानां दोषविशेषाणां निःशेषनिवृत्तिलक्षणवैशिष्ट्यलाभार्थं प्राज्ञप्रज्ञापहारकप्रबलतर[1]विषयेन्द्रियादि-मूलसंभावितपाक्षिक[2]कैङ्कर्यविच्छेदपरिहारार्थं चेदंप्रथमं प्रवर्तमानेनैवं[3] मनो-रथानुवर्तनं कार्यमेव । अत एव नारायणमुनिभिरपि—

[1] प्रबलतर—क, ख, ग, च, झ कोशेषु नास्ति.
[2] मूलभूतपाक्षिक—घ, ङ, छ.
[3] इदंप्रथमप्रवर्तनेनैवं—क, ख, ग, च, झ ; इदंप्रथमं प्रवर्तमानेनैव तथैव—घ.

"भगवच्चरणाम्भोजपरिचर्याविधिक्रमम् ।
एकान्तिभिरनुष्ठेयं नित्यं समभिदध्महे" ॥

इति नित्यकर्तव्यं प्रक्रम्य उक्तम्—

"व्यर्थं वीक्ष्य गतं कालं निर्विद्याहमितः परम् ।
आराधयेयं ध्यायेयं भजेयं पुरुषोत्तमम् ॥
कीर्तयेयं नमस्येयं चिन्तयेयमनारतम् ।
व्रजेयं शरणं चेति निश्चित्य मनसा स्वयम् ॥" इति ।

अत्र[1] 'गमयिष्यामि वासरान्' इत्यनेन प्रकृतस्य परमैकान्तिनः प्रकारान्तरेण कालयापनमशक्यमिति अच्छिद्रकैङ्कर्यस्य स्वयम्प्रयोजनत्वं व्यज्यते । तदेव हि कण्ठोक्तं नारायण-मुनिभिः—

पाञ्चकालिकधर्माणां स्वयंप्रयोजनत्वम् ।

"किं किं न साध्यं भगवदाराधनपरैर्नरैः ।
वैष्णवानां विशेषेण स्वयमेतत् प्रयोजनम्" ॥ इति ।

यदत्र धर्मार्थचिन्तनं तदुपायभूतकायक्लेशचिन्तनं च स्मर्यते, तत्र कैङ्कर्यरूपो धर्मः; तच्छेषभूतोऽर्थः[2]; तयोर्गुरुलघूपायविवेकार्थं कायक्लेश-चिन्तनम् । तत्र "न पूर्वाह्ण-मध्यन्दिनापराह्णानफलान् कुर्यात् यथाशक्ति धर्मार्थकामेभ्यः, तेषु च धर्मोत्तरः स्यात्" इत्यादिभिर्गौतमाद्युक्त-[3]कामौपायिकप्रवृत्त्यंशोऽपि 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ' इत्युक्तसत्सन्तानोत्पादनादिमात्रार्थशास्त्रीयकामविषयतया गृहस्थस्य कैङ्कर्यपक्षे निक्षिप्यते ।

[1] तत्र—क, च, ज्ञ.
[2] कैङ्कर्यरूपधर्मशेषभूतः—घ, ङ, छ.
[3] कामोपाधिक—क, ख, ग, ज्ञ.

तदयं[1]मपवर्गाङ्कुरभूतस्वयंप्रयोजनस्वामिकैङ्कर्यमहानन्दलाभः 'विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यते' इति कथं भविष्यतीति भयात् अनन्तरं प्रतिबन्धकनिवृत्तिः प्रार्थ्यते[2]—

निर्विघ्नकैङ्कर्यसिद्धिप्रार्थनम्।

"एतत्क्रियाविरोधीनि प्राचीनान्यशुभानि मे ।
कर्माण्यनन्तान्यच्छेद्यान्यनादीन्यशुचीन्यपि ॥
स्वयैव कृपया देवो विनाश्यास्मन्मनोरथान् ।
पूरयत्विति संप्रार्थ्य मन्त्रमेतमुदीरयेत् ॥" इति ।

स च प्रार्थनामन्त्रः 'त्वय्याराधनकामोऽयम्' इत्यादिको यथान्यायं देशिकसकाशादधीत्यान्वहं प्रयोक्तव्यः। एवमेव हि सर्वेषां मन्त्राणां समाधिः। विपर्यये हि नैष्फल्यं दृष्टादृष्टप्रत्यवायश्च तेषु तेषु शास्त्रेषु पठ्यते—

"यदृच्छया श्रुतो मन्त्रश्छन्नेनाथ छलेन वा ।
पत्रेक्षितो वा व्यर्थः स्यात् प्रत्युतानर्थदो भवेत् ॥" इति ।

निर्विघ्नकैङ्कर्यसिद्धये गुरुपरम्पराप्रपत्तिपूर्वकहरिध्यानम्।

अस्यैव श्लोकस्यान्यत्र 'तं जपेद्यद्यनर्थकृत्' इति चतुर्थपादस्य पाठः।

एवंविधनिर्विघ्नकैङ्कर्यसिद्धिरपि,

"सङ्कल्पादेव भगवांस्तत्त्वतो भावितात्मनाम् ।
वृत्तान्तमखिलं कालं सेचयत्यमृतेन तु ॥"

[1] यदयं—क, ख, ग, ङ.
[2] कथ्यते—क, ख, ग, ङ.

इति श्रीसात्त्वतादिकथितप्रकारेण भगवत्प्रसादादेव भविष्यतीति तत्सिद्ध्यर्थमपि प्रथमं हरेरेव ध्यानमुच्यते—"इति संप्रार्थ्य तत्सिद्धयै संस्मरेत् प्रथमं हरिम्" इत्यादिना ।

अत्र गुरुपरम्पराप्रपत्तिपूर्वकमिदं ध्यानं विवक्षितम् । "गुरून् प्रपद्य प्रथमं तदुरूंश्च ततो हरिम्" इति तस्मिन्नवसरे नित्यान्तरोक्तेः । उक्तं च श्रीसात्त्वते अपररात्रयोगारम्भे—"गुरून् देवं नमस्कृत्य ह्युपविश्याजिनासने" इत्यादि । सर्वत्र शास्त्रीयकर्मारम्भे भगवत्पर्यन्तगुरुपङ्क्तिप्रपदनं निश्रेयसाय भवति । उक्तं च रहस्याम्नायब्राह्मणे—'स चाचार्यवंशो ज्ञेयो भवति । आचार्याणामसावसावित्याभगवत्तः' इति । देव-गुरुभक्तिरेव सर्वतत्त्वप्रकाशकारणमिति कठवल्ल्यां श्रूयते—"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति । [1]'स्मर्यते चापस्तम्बादिभिः—'देवमिवाचार्यमुपासीत' इत्यादि ।

एवं मनोरथसिध्यै गुरूपसत्तिपूर्वकं भगवन्तं प्रपद्य भगवच्छास्त्रतदुपबृंहणनित्यगद्यस्तोत्रादिषु विप्रकीर्णोक्तध्यानं यथावगमं समाहृत्यानुतिष्ठेत् । गुणोपसंहारपादोक्तन्यायेन ध्येयरूपादिषु साधारणमसाधारणं च सर्वं तत्तत्संहितादिविशेषानुसारेणावगन्तव्यम् ।

योगान्तर्गतं ध्यानम् ।

एवं परिपूर्णं भगवन्तमनुसन्धाय ततो वासुदेवादिव्यूहनामचतुष्टयम्, केशवादिव्यूहान्तरनामानि, मत्स्यादिदशावतारनामानि, अन्यान्यप्यधिगतानि पृथग्भूतानि स्तोत्रनिबद्धानि देव्यादिनामानि च प्रहर्षजनकेनोच्चैःशब्देन संकीर्तयेत् । तत्काल-

सप्रणवं व्यूहादिनामसंकीर्तनम् ।

[1] उक्तं च—क, ख, ग, च, ज्ञ.

चोदितं समुचितं भगवन्मन्त्रं जपेत्। वेदाभ्यासं च[1] यथाबलमाचरेत्। तत्र वासुदेवादिकल्किपर्यन्तसंकीर्तनं प्रणवपूर्वकमन्त्रात्मकं पारमेश्वरे प्रोक्तम्—

"संप्रबुद्धः प्रभाते तु उत्थाय शयने स्थितः।
नाम्नां संकीर्तनं कुर्यात् षोडशानां प्रयत्नतः॥
ओं नमो वासुदेवाय नमः सङ्कर्षणाय ते।
प्रद्युम्नाय नमस्तेऽस्तु अनिरुद्धाय ते नमः॥
क्रमशः केशवादीनां यावद्दामोदरं द्विज[2]।
नमो नमः केशवाय नमो नारायणाय च॥
माधवाय नमश्चैव गोविन्दाय नमस्ततः।
विष्णवेऽथ नमस्कुर्यां नमस्ते मधुसूदन॥
नमस्त्रिविक्रमायाथ वामनाय नमस्ततः।
श्रीधराय नमश्चाथ हृषीकेशाय ते नमः॥
नमस्ते पद्मनाभाय नमो दामोदराय च।
दिव्यानामवताराणां दशानामथ कीर्तनम्॥
एकशृङ्गादिकानां तु विहितं क्रमशः प्रभो।
नमस्ते मीनरूपाय कमठाय नमस्ततः॥
नमोऽस्त्वादिवराहाय नारसिंहाय ते नमः।
नमो वामनरूपाय नमो रामत्रयाय च॥
कुठारज्याहलास्त्राय नमः कृष्णाय वेधसे।
कल्किन् विष्णो नमस्तेऽस्तु सर्वं सप्रणवं द्विज॥

[1] तत्कालचोदितं भगवन्मन्त्रं वेदाभ्यासं च—क;
कालोचितं समुदितं भगवन्मन्त्रजपवेदाभ्यासं च—ख, ग;
तत्कालचोदितं समुचितभगवन्मत्रजपं वेदाभ्यासं च—घ, च, झ.
तत्काले चोदितं—ङ, छ.

[2] द्विजः—क, ख, ग, च, झ.

यथास्थितक्रमेणैव भेदांस्त्वेतान्[1] हरेर्विभोः ।
नमस्कुर्यात् प्रभाते तु योगान्ते तु दिनक्षये ॥
शब्देनोच्चतरेणैव संहृष्टिजनकेन तु ।
स्तोत्राणि चाथ मन्त्राणि[2] उदीर्यान्यानि वै ततः" ॥ इति ।

एवं च संगृहीतं वङ्गिवंशेश्वरैः—

" चिकीर्षन्नीप्सितं कर्म तन्नामान्यनुकीर्तयेत् ।
चतुर्भिर्वासुदेवाद्यैर्नामभिः सह संयतः ॥
जपेत् द्वादशनामानि केशवादीनि चादरात् ।
दशावतारनामानि मत्स्यकूर्मादिकान्यपि ।
जपन्नुत्थाय शयनादर्चयिष्यन् सदा हरिम्" ॥ इति ।

एवमुच्चैस्तरेण[3] शृण्वतामपि सकलदुरितहारिणा[4] हरिसंकीर्तनेन संहृष्टमानसः सन्ध्यायामासन्नायाम्, सन्धातृत्वेन सर्वेषां सन्ध्येति परिकीर्तितं भगवन्तमुपासितुं जिगमिषुः,

सन्ध्यापूर्वकाल-कर्तव्यक्रमः ।

" हरिं हरिं ब्रुवंस्तल्पादुत्थाय भुवि विन्यसेत्[5] ।
नमः क्षितिधरायोक्त्वा वामं पादं महामते" ॥

इति पारमेश्वरादिपठितेन नमःपूर्वेण क्षितिधरलिङ्गेन मन्त्रेण महावराहं

[1] भेदास्त्वेते—ङ, छ.
[2] मन्त्राणि इति नपुंसकान्तत्वेनैव सर्वेषु कोशेषु दृश्यते.
[3] उच्चैस्स्वरेण—च.
[4] दुष्कृतहारिणा—घ.
[5] हरिं हरिं इति पूर्वार्धस्थाने 'हरिं ब्रुवंस्तल्पादुत्थाय' इति क, च, ञ, कोशेषु दृश्यते.

क्षितिधरमनुध्यायन्, वामपादं भूमौ विन्यस्येत्। 'ततो भूधरमन्त्रेण वामपादं भुवि' इत्यपि स एव मन्त्र उच्यते। तत्र क्षितिधारणसाम्यात् कूर्मादिरूपान्तरशङ्काव्युदासाय 'श्रीमद्वराहमन्त्रेण न्यस्येद्वामपदं भुवि' इति विशेषशब्देन व्याचख्युः। महावराहमहिष्या भुवः प्रपदनं चात्र महाभारतादिषु समन्त्रकमुपदिश्यते—'नमोऽस्तु प्रियदत्तायै तुभ्यं देवि वसुन्धरे।' इति। पृथिव्याः प्रियदत्तेति कीर्तनं च, विष्णोः ब्रह्मण्यदेवेति कीर्तनवत् अनवसादहेतुत्वेन स्मर्यते।

"पृथिवीं प्रियदत्तेति गायन् सर्वंसहेति वै।
विष्णुं ब्रह्मण्यदेवेति[1] कीर्तयन्नावसीदति॥" इति।

ततः पदक्रमान् कुर्वन् विष्णुक्रमणमन्त्रेण पादेन्द्रियाधिदैवतं त्रिविक्रमं विष्णुं ध्यायेत्। 'क्रान्ते विष्णुं बले हरिम्' इति पदविक्षेपे विष्णोरनुध्येयतोक्तेः तदनुसन्धानस्य च तत्तदुचितशास्त्रीयप्रकाशकसापेक्षत्वात्। इति सन्ध्यापूर्वकालकर्तव्यक्रमः॥

ततः स्नानीयदर्भतिलवस्त्रादिकं दृष्टादृष्टार्थं स्नानोपकरणं सर्वं समाहृत्य तमस्तिरोहितदुष्टजन्तुपलायनार्थं निर्गममार्गं संचालयेत्। यथोक्तं पारमेश्वरे—'बहिर्निर्गममार्गं तु संचाल्य' इत्यादि।

स्नानाय निर्गमनं केशवध्यानं च।

ततो गृहान्निर्गच्छन् केशवमनुध्यायेत्। 'व्रजंश्चिन्तय केशवम्' इति स्मरणात्। केशवशब्देन 'अंशवो ये प्रकाशन्ते', 'यदादित्यगतं तेजः' इत्याद्युक्तांशव उच्यन्ते; तद्वत्त्वात् केशवः। गच्छतो मार्गादिप्रकाशनार्थं दिङ्मोहाद्यान्तरतमोनिरासार्थम्,

"क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्।
आवां तवाङ्गे संभूतौ तस्मात् केशवनामवान्"॥

[1] कीर्तनवत् इत्यारभ्य ब्रह्मण्यदेवेति इति यावत् क, ख, ग, ङ्ग कोशेषु विमुक्तम्।

इति ब्रह्म-रुद्रोपलक्षितविश्वसृष्टिरक्षाहेतुत्वात्, केशिवधोपलक्षितसर्वदुष्टदमन-स्वभावत्वाच्च असहायदशासाहाय्यार्थं[1] तदा तच्चिन्तनम् ।

ततः स्वाश्रमादिभ्यो बहिः नैर्ऋत्यां दिशि द्वित्रेषुपातप्रमितां भुवमतिक्रम्य, शुद्धदेशे निक्षिप्तस्नानोपकरणो यथोक्तनियमैर्विण्मूत्रविसर्जनं कृत्वा, स्ववर्णाश्रमावस्थाद्यनुगुणादृष्टार्थमृत्संख्यावर्ण-परिमाणादिनियमवद्गन्धलेपक्षयकरम् अर्शःपीडादिरहितं शौचं कुर्यात् । अत्र मूत्र-पुरीषयोरेकस्य प्रवृत्तौ तस्यैव शुद्धिः । क्रमेणोभयप्रवृत्तौ यथाक्रमम् । युगपत्प्रवृत्तौ पुरीषशुद्धिः प्रथममिति निष्कर्षः[2] ।

विण्मूत्रविसर्जनं शौचविधिश्च ।

तत्र पाद्मे[3]—'उपवीतं कर्णदेशे निधाय च तृणादिना' इत्यादिना विण्मूत्रविसर्जनप्रकारमुक्त्वा [4]'अनन्तरमेवं शौचविधिरुक्तः ।

" दक्षिणेतरहस्तेन गृहीत्वा मेहनं ततः ।
दक्षिणे मृत्तिकां हस्ते समुत्थाय जलाशयम् ॥
प्रागुदीच्यामुदीच्यां वा गत्वा शौचं समाचरेत् ।
मृत्तिकाभिर्द्वादशभिर्गुदं षड्भिश्च मेहनम् ॥
अन्तरा चान्तरा वामं करं प्रक्षाल्य वारिभिः ।
तन्मात्राभिस्तदन्ते द्वौ करौ द्वादशसंख्यया ॥
संशोध्य च करौ जंघे कटिं चोरू च वारिभिः ।
प्रत्येकं मृत्तिकामात्राचतुष्केण विशोधयेत् " ॥ इति ।

[1] साहाय्यार्थं च इति चेत् सम्यक्.
[2] निष्कर्षकाः—घ, ङ, छ.
[3] तत्रैव पाद्मे—क, ख, ग, च, झ.
[4] अनन्तरमेव—क, च, झ.

पितामहस्तु सनत्कुमाराय एवमाह—

"ततः पूर्वं समुत्थाय प्राचीमेवोपनिष्क्रमेत् ।
उदीचीं प्रागुदीचीं वा शौचाचारक्षमां दिशम् ॥
यत्रोदकं प्रभूतं तु तद्गत्वा शौचमाचरेत्" ॥ इति ।

स्मरन्ति च देशादिभिन्नं शौचम्—

"देशं कालं तथा ज्ञानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत्" ॥ इति ।

दिवसादिभेदेनापि शौचतारतम्यं स्मर्यते—

"अह्नि यच्छौचमुद्दिष्टं निश्यर्धं तु ततो भवेत् ।
पथि पादस्ततः प्रोक्तो यथाशक्त्यातुरस्य तु ॥" इति ।

पारमेश्वरे तु प्रावृडादिकालभेदेनापि मृत्संख्याभेदादिकमुक्तम् ।

"अस्पृष्टतीर्थः शौचार्थमृद्भिरभ्युद्धृतैर्जलैः ।
गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥
तिस्रो लिङ्गे मृदो देया एकैकान्तरमृत्तिकाः ।
पञ्च वामकरे देयास्तिस्रः पाण्योर्विशुद्धये ॥
मूत्रोत्सर्गे शुद्धिरेषा पुरीषस्याप्यनन्तरम् ।
अर्धप्रसृतिमात्रं तु प्रथमा मृत्तिका स्मृता ॥
द्वितीया च तृतीया च तदर्ध[2] परिकीर्तिता ।
बिडालपदमात्रं तु तदूर्ध्वं परिकीर्तिता ॥

[1] शौचार्धं—घ, ङ, छ ; शौचार्थं—क, ख, ग, झ.
[2] तदर्धा—ख, ग, घ, ङ, छ.

पञ्चापाने मृत्तिकाः स्युस्तथैवान्तरमृत्तिकाः ।
दश वामकरे देयाः सप्त तूभयहस्तयोः ॥
पादाभ्यां तिसृभिः शुद्धिर्जघाशुद्धिश्च पञ्चभिः ।
नियोजयेत्ततो विप्रः[1] कट्यां वै सप्त मृत्तिकाः ॥
स्वदेहस्वेददोषघ्ना बाह्यकर्दमशान्तये ।
भक्तानां श्रोत्रियाणां च वर्षास्वेवं निरूपितम् ॥
प्रावृड्युक्तात्तु वै तस्मादेकमृद्द्व्यपनोदनम् ।
शरद्ग्रीष्मवसन्तेषु नित्यं कार्यं क्रियापरैः ॥
[2]एतस्मादपि चैकैका परिलुप्या[3] तु मृत्तिका ।
हेमन्तशिशिरे विप्रैः[4] श्रोत्रियैः संयमस्थितैः ॥
पथि शौचं प्रकर्तव्यं देशकालानुरूपतः ।
गन्धलेपमपास्यैवं[5] मनःशुध्या विशुध्यति ॥
विहिताः पादशौचे तु बिडालपदसंमिताः ।
मृदश्चतुर्द्विजेन्द्राणां त्रिर्द्विरेका क्रमात्ततः ॥
वर्णानां शूद्रनिष्ठानां कटिशौचे तथैव हि ।
सप्त सप्त उभाभ्यां तु कराभ्यां त्रितयं पुनः ॥
सर्वेषामेव सामान्यं पाणिशौचमुदाहृतम् ।
अन्तर्जानुगतं कृत्वा भुजयुग्मं द्विजोत्तमः ॥
चतुर्धा मणिबन्धस्थं तोयं कृत्वा सुनिर्मलम् ।

[1] विप्र—घ, ङ, छ.
[2] एकस्मात्—क, ख, ग, च, झ.
[3] परिपाल्या—घ कोशादन्यत्र.
[4] विप्र—घ, ङ, छ.
[5] अपास्यैव—क, ख, ग, च, झ.

बुद्बुदाद्यैर्विनिर्मुक्तं पिबेद्विप्रो हृदा ततः ॥
एकैकां ह्रासयेन्मात्रां वर्णत्रयमनुक्रमात् ।
पाणिना क्षालितेनैव पुनराचामयेद्बुधः ॥ " इति ।

आचमनं दन्तधावनं च ।

आचमनप्रकाराश्च बहुधा धर्मशास्त्रेषु भगवच्छास्त्रेषु च प्रतिपादिताः । तत्र स्वसूत्रोक्तमन्यद्वा यथाशक्त्यधिगम[1]माचमनं कुर्यात् । आचमनोक्त्यनन्तरं च पारमेश्वरे दन्तधावन-मुखशोधनप्रकार उक्तः—

" एवं प्रक्षाल्य विधिवदाचम्य प्रयतः शुचिः ।
प्राङ्मुखोदङ्मुखो वापि उपविश्यासने ततः ॥
अर्कादिभिरपामार्गैः कारयेद्दन्तधावनम् ।
प्रातर्हत्वा च मृद्वग्रं कषायकटुतिक्तकम् ॥
भक्षयेद्दन्तकाष्ठं च दन्तमांसान्यबाधयन् ।
द्वादशाङ्गुलमात्रं तु वक्रग्रन्थिविवर्जितम् ॥
पयोभिः सह तर्जन्या ब्रह्मन् द्वादशसंख्यया ।
काष्ठालाभे तु रोगे वा कर्तव्यं दन्तधावनम् ॥
षोडशाङ्गुलदीर्घैस्तु वक्रग्रन्थिविवर्जितैः ।
हेमादिनिर्मितैर्वापि कुशदर्भादिभिस्तथा ॥
जिह्वानिर्लेखनं चैव गण्डूषमुखधावनम् ।
कुर्यादाचमनं विप्रः[2] शुचिना[3] सलिलेन च " ॥ इति ।

[1] यथाधिगमं—क, ख, ग, च, ञ.
[2] विप्र—घ.
[3] शुद्धेन—घ, ङ, छ.

अत्र अर्कादिभिरित्युक्तं तत्रैव विवृतम्—

" अर्कन्यग्रोधखदिरकरञ्जककुभादिकम् ।
शरजोदुम्बराश्वत्थप्लक्षदर्भांश्च वैणवान् ॥
आम्राङ्कुरमपामार्गमर्जुनं धातकी शमी[1] ।
अन्यानि च पवित्राणि तेषु सम्पन्नमाहरेत् " ॥ इति ।

अत्राभक्षणीयस्यापि काष्ठस्य भक्षणोक्तिः भक्षणवदाद्यन्ताचमनादिप्राप्त्यर्था ।

पाद्मेऽप्येवं दन्तधावनमुक्तम्—

" आचम्य प्राङ्मुखो भूत्वा दन्तधावनमाचरेत् ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षाम्रार्जुनधातकी ॥
पलाशवेणुखदिरशमीदारूणि धावने ।
दन्तानामुदितान्येकादश चाम्भोरुहासन ॥
दन्तधावनकाष्ठं च द्वादशाङ्गुलमायतम् ।
दशाङ्गुलं तथा मानमष्टाङ्गुलमथायतम् ।
ब्राह्मणक्षत्रियविशां क्रमेणैतदुदाहृतम् " ॥ इति ।

अत्र सर्वत्र प्रतिषिद्धानां[2] वर्जनं सर्वत्र विहितानाँमुपादानं च ; क्वचिद्विहितानां क्वचिच्च प्रतिषिद्धानां गत्यभावे ग्रहणमिति निष्कर्षः । एवं सर्वत्र भाव्यम् ।

यथोक्तलक्षणं च दन्तकाष्ठं समन्त्रकं गृहीत्वा 'आयुर्बलम्' इत्यादिस्मार्तमन्त्रपूर्वकं प्रादक्षिण्येन प्रथममधरतो दन्तधावनं कुर्यात् । काष्ठाला-

[1] धातकी शमी इति पदद्वयमपि प्रथमान्तत्वेनैव सर्वेषु कोशेषु दृश्यते.
[2] सर्वप्रतिषिद्धानां—घ. ङ, छ.
[3] सर्वविहितानां—घ, ङ, छ.

भादिदशासु तत्तत्तरुपर्णैस्तृणैर्वा तेषामप्यभावे द्वाद्वशगण्डूषैर्मुखशुद्धिः । उक्तं चैवं नारायणमुनिभिः—

"तीर्थं संशोध्य संक्षाल्य पादावाचम्य वाग्यतः ।
तृणैर्वा शास्त्रसंसिद्धैर्वटार्कखदिरादिभिः ।
दन्तान् संशोध्य निर्लिख्य जिह्वां गण्डूषयेन्मुहुः" ॥ इति ।

स्मरन्ति च—

"अलाभे दन्तकाष्ठानां प्रतिषिद्धदिनेष्वपि ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्भविष्यति" ॥ इति ।

अत्र—

"प्रतिपत्पर्वषष्ठीषु चतुर्दश्यष्टमीषु च ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥
अष्टम्यां च चतुर्दश्यां पञ्चदश्यां त्रिजन्मसु ।
तैलं मांसं व्यवायं च दन्तकाष्ठं च वर्जयेत्" ॥

इत्यादिभिः प्रतिषिद्धदिनानि ग्राह्याणि । दन्तशुद्ध्यनन्तरं दन्तकाष्ठं क्षालयित्वा भङ्क्त्वा शुद्धस्थले प्रक्षिपेत् ।

स्नानार्हतीर्थम् ।

तत्र यच्छुद्धेः पूर्वं जलाशयगमनमुक्तं तत्र भागवतं भागवताश्रितं च तीर्थं विवक्षितम् । यथाहुः—"तीर्थं भागवतं शुद्धमुपगच्छेन्मनोहरम्" इति । "ततस्तीर्थं समाश्रित्य शुद्धं भागवताश्रितम्" इति च । स्मरन्ति च—

"जलं शुद्धमशुद्धं वा विष्णुवास्तुसमीपतः ।
विष्णुगङ्गासमं तीर्थं महापातकनाशनम् ॥

भवद्विधा भागवतास्तीर्थभूताः स्वयं प्रभो[1] ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ॥
ये भजन्ति जगद्योनिं वासुदेवमनीश्वरम् ।
न तेभ्यो विद्यते तीर्थमधिकं राजसत्तम ॥
यत्र भागवताः स्नानं कुर्वन्ति विमलाशयाः ।
तत्तीर्थमधिकं विद्धि सर्वपापप्रणाशनम्" ॥ इति ।

स्नानविधिः ।

एवं गृहीतस्नानोपकरणस्तीर्थमासाद्य मुखशोधनपर्यन्तं कृत्वा वक्ष्यमाणक्रमेण तीर्थावगाहनादिपूर्वकं सर्वक्रियामूलभूतं स्नानमाचरेत् । प्रातःस्नानस्य नित्यत्वं प्रभावश्च तत्र तत्र द्रष्टव्यः । तत्र[2] वर्णभेदेन स्माननियमं स्मरन्ति पितामहादयः—

"अपोऽवगाहनं स्नानं विहितं सार्ववर्णिकम् ।
मन्त्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते" ॥ इति ।

तत्र शक्तस्य वारुणमेव स्नानम् । तदशक्तस्य तु—

गौणस्नानानि ।

"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।
न चान्यवस्त्रमाच्छाद्य नाविज्ञाते जलाशये" ॥

इत्यादिभिस्तत्प्रतिषेधात् स्नानान्तराणि भवन्ति । तेषु च वारुणानन्तरमाकण्ठस्नानम् । 'अशक्तावशिरस्कं वा' इति स्मरणात् । तत्राप्यशक्तस्य[3] कापिलम् । तस्मिन्नप्यशक्तस्य तत्तच्छास्त्रोदितेषु पार्थिवाग्नेय-वायव्य-दिव्य-

[1] विभो—घ.
[2] अत्र—घ ; तत्र तत्र—क, ख, ग, च, झ.
[3] असमर्थस्य—घ.

न्त्र-मानसात्मध्यान-पञ्चाङ्ग-पुरुषान्तरकृतस्पर्शपूर्वकावगाहनरूपेषु स्नानान्त-
ु तत्कालसंभावितम् । तत्रापि स्वशक्यं कुर्यात् । आह चैवं
तुः—

" प्राक्छौचं स्नानमादेयं ब्राह्मं वा स्नानमिष्यते ।
वृद्धातुराणामुष्णाद्भिर्योगाङ्गैर्वा यमादिभिः " ॥ इति ।

त्र यथाधिकारमिति विवक्षा । एवं चोक्तं पारमेश्वरे—

" विना विविधसम्पर्कैः पञ्चाङ्गं स्नानमाचरेत् ।
मुखं करद्वयोपेतं पादौ कटितटावधि ।
स्त्रीसंगाद्युपघातेषु स्नानं कुर्याद्यथाविधि " ॥ इति ।

तोदकस्नानासमर्थस्य उष्णोदकस्नानम् । तच्चानुपहतस्याप्रतिषिद्धेषु दिव-
्वेव । एवं शक्त्याद्यनुगुणं स्नानं कुर्यात् । बलानुरूपं च स्नानं प्रत्येकं
ुदितं वा संजगृहुः—

" दिव्याप्यमान्त्रवायव्यभौमतैजसमानसैः ।
एतैः समस्तैर्व्यस्तैर्वा कृतशुद्धिर्यथाबलम् ॥ " इति ।

्यथा त्वकर्मण्यो भवति । ' स्नानमूलाः क्रियाः सर्वाः ' इति विधानात् ।
त्रिश्च स्नान-जप-होम-दानानां नित्यत्वमाह—

" अस्नाताशी मलं भुङ्क्ते अजपः पूयशोणितम् ।
अहुताग्निः कृमिं भुङ्क्ते अदाता कीटमश्नुते " इति ।

[1] पार्थिववायव्यमान्त्र—क, झ.
[2] स्पृष्टिपूर्वक—घ, ङ, छ.

एवं स्नातः कृतोर्ध्वपुण्ड्रः स्नानांङ्गं भगवदात्मकदेवर्षिपितृतर्पणं कृत्वा,

सन्ध्योपासनम् अर्घ्यदानं च ।

आचम्य, मन्त्रप्रोक्षण-मन्त्राचमन-पुनःप्रोक्षण-स्वात्म-परिषेचनानि स्वसूत्रसंहितोक्तप्रकारेण कृत्वा,[1] गाय-त्र्याभिमन्त्रितजलमादित्यान्तःस्थिताय परमात्मनेऽर्घ्यरूपं दद्यात् । अत्र जलाञ्जलिप्रक्षेपस्त्रिरिति सनत्कुमाराय पितामहः प्राह—

"उभाभ्यां तोयमादाय हस्ताभ्यां सुसमाहितः ।
गायत्र्या चाभिमन्त्र्यापस्तारव्याहृतिपूर्वया ।
रवेरभिमुखस्तिष्ठन्नूर्ध्वं त्रिःसन्ध्ययोः क्षिपेत्" ॥ इति ।

ततो वज्रीभूततज्जलनिहतमन्देहाख्यरक्षोनिरसनपाप्मावधूननार्थं प्रदक्षिणं प्रक्रम्य,[2] मार्गशीर्षादिमासेशान् केशवादीन्[3] तत्तन्मन्त्रेण तर्पयित्वा,

प्राणायाम-गायत्री-जपौ ।

"सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते" ॥

इत्युक्तप्रकारेण प्राणायामत्रयं कृत्वा,[4] गायत्रीमावाह्य, अष्टोत्तरसहस्रमष्टोत्तर-शतं यथाशक्ति दशवारां वा[5] गायत्रीं जपेत् ।

[1] कृत्वा—इति पदं घ कोशादन्यत्र विमुक्तम् .
[2] परिक्रम्य—क, च, झ.
[3] केशवादीन् इति पदं घ कोश एव विद्यते.
[4] इत्युक्तप्रकारेण दशवारं प्राणायामत्रयं वा कृत्वा—च, झ.
[5] अष्टोत्तरसहस्रमष्टोत्तरशतं यथाशक्ति दशवारां गायत्रीं—क, ङ, च, छ, झ ; अष्टोत्तरसहस्रमष्टोत्तरशतं यथाशक्ति गायत्रीं—ख ; अष्टोत्तरसहस्रमष्टोत्तरशतं वा गायत्रीं—ग ; अष्टोत्तरसहस्रमष्टोत्तरशतं यथाशक्ति दशावरं वा गायत्रीं—घ ; अष्टोत्तरसहस्रमष्टोत्तरशतं वा यथाशक्ति गायत्रीं—इति निक्षेपचिन्तामणौ.

"न च क्रमन्न च हसन्न पार्श्वमवलोकयन् ।
न पदा पादमाक्रम्य न चैव हि तथा करौ" ॥

इत्यादयश्च जपकालनियमाः ।

अष्टाक्षरजपः ।

"मद्भक्ता ये नरश्रेष्ठ मद्गता मत्परायणाः ।
मद्याजिनो मन्नियमास्तान् प्रयत्नेन पूजयेत् ॥
तेषां तु पावनायाहं नित्यमेव युधिष्ठिर ।
उभे सन्ध्येऽधितिष्ठामि ह्यस्कन्नं तद्व्रतं मम ॥
तस्मादष्टाक्षरं मन्त्रं[1] मद्भक्तैर्वीतकल्मषैः ।
सन्ध्याकालेषु जप्तव्यं सततं चात्मशुद्धये" ॥

इति श्रीवैष्णवधर्मशास्त्रोक्तश्रीमदष्टाक्षरजपोऽपि यथाशक्ति सन्ध्यायामवसरे कार्यः[2] । प्राणायामेन शतकृत्वः प्रणव-व्याहृतिसंभेदविशेषेण दशकृत्वो गायत्रीजपं सहस्रतुल्यं बोधायनादयः स्मरन्ति । एवमेकपादस्थित्यासनविशेष-स्वगृह-तटाकाश्वत्थमूल-देवायतनादिस्थानभेदेषु च फलतारतम्यं स्मर्यते । तत्रैषा काष्ठा—'अनन्तं विष्णुसन्निधौ' इति । गणनायां च कराक्षसूत्रयोर्यथाशक्ति विकल्पतः करणत्वम् । उक्तं च जयाख्यसंहितायाम् 'जपं तु द्विविधं कुर्यादक्षसूत्रकरार्पितम्' इति । अक्षसूत्रार्पितं करार्पितं वेत्यर्थः । तदेव विशेषितं श्रीसात्त्वते—'स्फाटिकेनाक्षसूत्रेण स्वकैर्वा करपर्वभिः' इति । अत्र स्फाटिकेनेत्यक्षमालावर्गोदाहरणम् । शास्त्रान्तरेषु पद्माक्षमालादीनामाधिक्यस्मरणात् । फलविशेषार्थं तु मणिमुक्तामयाद्यक्षमालाभेदाः ।

[1] अत्र च मन्त्रशब्दः सर्वेषु कोशेषु च नपुंसकान्तत्वेन दृश्यते.
[2] सन्ध्यायामेव कार्यः इति च-कोशे पाठान्तरतया निर्दिष्टम्.

प्रतिष्ठाविशेषादिनियमाश्च तत्र तत्र प्रपंच्यन्ते । करेऽपि शङ्ख-पद्ममुद्रादि-भेदाश्च[1] । तत्रैष सारः—

"कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
अनामिकान्तं देवेश[2] जपेत् कोटिसहस्रकम्" ॥ इति ।

बोधायनीये तु श्रीमदष्टाक्षरविधावेवमुक्तम्—

"क्रियायागाद्दशगुणो जपयज्ञः प्रकीर्तितः ।
उच्चाच्छतगुणो ज्ञेय उपांशुश्चेत् स्मृतस्तदा ।
उपांशोर्मानसः प्रोक्तः सहस्रगुणतोऽधिकः" ॥ इति ।

अन्यदपि तत्रोक्तम्—

"जपमध्ये गुरुर्वापि वैष्णवो यः समागतः ।
संभाषणादिपूजां तु तस्य कृत्वानुमान्य च ।
अनुश्राव्य ततः कृत्वा जपशेषं समाहितः ॥
सर्वस्य प्रभवो यस्माद्विष्णुपादश्रया नराः ।
तन्मूलतः क्रियाः सर्वाः सफलास्तु भवन्ति हि" ॥ इति ।

नारदीये श्रीमदष्टाक्षरब्रह्मविद्यायाम्—

"सर्वः सप्रणवो जप्यो जपादप्रणवादपि ।
सहस्र इति विज्ञेयः प्रणवो ह्यक्षरं परम् ॥
असंख्याताच्च संख्यातः सहस्रगुण उच्यते ।
संख्यातादपि साहस्रः सोर्ध्वपुण्ड्रतनोर्जपः" ॥

इत्युक्तम् ।

[1] शङ्खपद्ममुद्राश्च—ङ, छ.
[2] देवेशि—घ, ङ, छ.

एवम्—

" विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ।
उच्चैर्जपादुपांशुः स्याद्विशिष्टो दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः " ॥

इत्यादिकमपि द्रष्टव्यम् ।

सूर्योपस्थानम् ।

एवमासूर्योदयात् 'पूर्वोत्तराशाभिमुखस्त्वपरोत्तरदिङ्मुखः' इत्यादिस्मृत्यनुसारेण प्राङ्मुखः प्रागुदङ्मुखो वा तिष्ठन्, गायत्रीमावर्त्य, पूर्ववत् कृतप्राणायामत्रयः, सन्ध्योपस्थानसङ्कल्पपूर्वकम् 'उत्तमे शिखरे' इति मन्त्रेण गायत्रीमनुज्ञाप्य, स्वसूत्रोक्तैर्मन्त्रैरादित्यमण्डलान्तस्थितं भगवन्तमुपस्थाय, सप्रदक्षिणं भगवदात्मकसन्ध्यादिपञ्चकनमस्कारं कृत्वा, 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इत्यधीतं हृदयान्तस्थितं परमात्मानमभिवाद्य प्रणम्य, दिगादि[1]नमस्काराणामपि स्वपूर्वपूर्वोपदेशानुष्ठानपारम्पर्यमस्ति चेत्तत्रापि भगवदात्मकध्यानपूर्वकं प्रणमेत् । एवं तु उपस्थानप्रकारं पितामहः सनत्कुमारायाह—

" एताभिः प्राञ्जलिर्नित्यं विस्पष्टोदितमण्डलम् ।
सहस्ररश्मिं भगवन्तं[2]मुपतिष्ठेद्दिवाकरम् ॥
ततस्तस्मै नमस्कृत्वा सन्ध्याद्याः पञ्च देवताः ।
प्रदक्षिणनमस्कारैर्दिशश्चैवोपतिष्ठते ।
परमात्मानमात्मानं भावयित्वा द्विजोत्तमः[3] " ॥ इति ।

[1] नमस्कारमपि पूर्वपूर्वोपदेश—क, ख, ग, च, ङ.
[2] भर्गं तं—च.
[3] द्विजोत्तम—ख, ग, घ.

तत आधारशक्त्यादिपारिषदान्तान् देवर्षिपितॄंश्च भगवदात्मकान् ध्यात्वा, प्रणवपूर्वकैस्तत्तन्नामभिः सन्तर्प्य, शुचौ [1]देशे स्नानवस्त्रं निष्पीड्य, आचम्य, आवाहिततीर्थ मन्त्रांश्च [2]स्वात्मनि समाहरेत् ।

आधारशक्त्यादि-तर्पणम् ।

तत्र यद्यप्यार्षी वैष्णवी प्राजापत्येति त्रिविधाः सन्ध्योपास्तिभेदा[3]-स्तत्तत्संहितासूच्यन्ते, तथापि तासां संहितानां लुप्त-प्रायत्वेन तत्तत्प्रकाराणां दुर्ज्ञानत्वात् पारमेश्वरपरम-संहितादिषु परिपूर्णदृश्यमान[4]सन्ध्योपासनप्रकारभेदाना-मपि यथावदुपदेशानुष्ठानपारम्पर्यासिद्धेः, भगवच्छास्त्रसंहितास्वेव स्वसूत्रोक्त-संस्कारा[5]चाराभ्यनुज्ञानात् प्रथमपरिगृहीतपरित्यागे निर्बन्धाभावात् यथा-सूत्रमनुष्ठानेऽपि भगवत्समाराधनरूपत्वसिद्धेः स्वसूत्रविहितमेव सन्ध्यो-पास्त्यादिकं[6] कर्तुमुचितम् । उक्तं हि नारदीये—'स्वसूत्रविहितान् वापि निषेकादीन् समाचरेत्' इत्यादि । पाद्मे च शौचाचमन-दन्तधावन-स्नानानि यथाक्रमं विधायानन्तरमेवं सन्ध्योपासनमुक्तम्—

स्वसूत्ररीत्यैव सन्ध्या अनुष्ठेया ।

"आचम्य प्रोक्षयेद्दर्भवारिभिर्मन्त्रवत्तनुम् ।
ओंपूर्वया च गायत्र्या वारिभिश्चाभिमन्त्रितैः ॥
आत्मानं परिषिच्योर्ध्वमुत्क्षिपेत् सलिलाञ्जलिम् ।
योद्धुकामानि रक्षांसि सन्ध्ययोरुभयोरपि ॥

[1] स्थले—घ कोशादन्यत्र.
[2] आत्मनि—क, च, झ.
[3] त्रिधा सन्ध्योपास्तिविशेषाः—घ.
[4] परिदृश्यमान—क, ख, ग, च, झ.
[5] स्वसूत्रसंहिताचार—क, ख, ग, च, झ.
[6] सन्ध्योपासनादिकं—क, झ; सन्ध्योपस्थानादिकं—ख, ग, च.

शाम्यन्ति तैर्वज्रभूतैर्हतानि प्रेरितैर्जलैः ।
प्रायश्चित्तं तु हिंसायाः परिक्रम्य प्रदक्षिणम् ॥
तर्पयेदुपविश्याथ तत्तन्मन्त्रमुदीरयन्[1] ।
देवादीन् सलिले तिष्ठन् सावित्रीं प्राङ्मुखो जपेत् ॥
यावत्सूर्योदयं दृष्ट्वा प्राञ्जलिस्तिमिरापहम् ।
उपस्थाय स्वशाखोक्तैर्मन्त्रैर्ध्येयं हृदि स्थितम् ॥
अभिवाद्य गुरून् वृद्धांस्तथा भागवतान् क्रमात्" । इति ॥

अत एव हि श्रीमद्भट्टारकैरुक्तम्—

"प्रातरुत्थाय संस्मृत्य हरिं तच्चरणोत्थिताम् ।
गङ्गां विभाव्य[2] तीर्थाम्भस्ततस्तदवगाह्य च ॥
श्रुतिस्मृत्युदितं कर्म यावच्छक्ति परात्मनः ।
आराधनत्वेनापाद्य सोर्ध्वपुण्ड्रश्च तर्पयेत्" ॥ इति ।

तद्गुरुभिः श्रीवत्साङ्कमिश्रैरपि वटुकपूर्णाभ्यर्थनया अभिगमनसारमुपदिशद्भिरादावुक्तम्—"प्रातरुत्थाय स्वगुरोश्चरणारविन्दे स्वात्मानं समर्प्य कृतार्थं निर्भरं स्वात्मानमनुसन्धाय, स्नानादिकं स्वकर्म कृत्वा, शुचौ देशे आसीनः" इत्यादि । वङ्गिवंशेश्वरैश्च—

"धृतोर्ध्वपुण्ड्रो देवर्षिपितॄन् सन्तर्प्य मन्त्रतः ।
प्रयतः परया[3] भक्त्या स्वकर्माराध्यमच्युतम् ॥

[1] उदीरयेत्—ख, घ, ङ, छ.
[2] विगाह्य—क, च.
[3] प्रपन्नः परया—क, च, झ ; प्रपत्तिपरया—ख, ग, ङ, छ ; प्रपत्तिफलया—घ ; प्रयतः परया इति वङ्गीशकारिकापाठः.

आदित्यमण्डलान्तस्थं प्रणम्य मनसा स्मरन् ।
सन्धातृत्वेन सर्वेषां सन्ध्येति परिकीर्तितम् ॥
श्रुतिस्मृत्युदितं कर्म[1] स्ववर्णस्वाश्रमोचितम् ।
फलाभिसन्धिरहितं परब्रह्मार्चनात्मकम् ॥
न्यस्य कर्तृत्वभोक्तृत्वे स्वामित्वं च परात्मनि ।
नित्यनैमित्तिकैः काम्यैः कर्मभिश्च समन्वितः ॥
गायत्रीजपपर्यन्तं मन्त्राचमनपूर्वकम् ।
सान्ध्यं कर्माखिलं साधु समाप्य च यथाविधि ॥
ततः स्वकर्मभोक्तारमादित्यान्तरवस्थितम् ।
उपस्थाय स्वकैर्मन्त्रैर्नारायणमतन्द्रितः" ॥

इत्यादि ।

सन्ध्यार्घ्ये भगवद-ध्यत्वभावनम् ।

अत्र गायत्र्यभिमन्त्रितजलाञ्जलिप्रक्षेपे भगवदर्घ्यरूपत्वमपि भावनीयतया संगृहीतं नारायणमुनिभिः—

" आपो हीत्यादिभिर्मन्त्रैर्वाचकैः परमात्मनः ।
संप्रोक्ष्य मन्त्राचमनं मन्त्रैस्तत्प्रतिपादकैः ॥
आदित्यान्तस्थितस्यार्घ्यं वितीर्य परमात्मनः ।
प्रतिपादिकया विष्णोः साविज्या तं जपेद्धरिम् ॥
ध्यायन् जस्वोपतिष्ठेत तमेव पुरुषोत्तमम् ।
नारायणात्मकान् देवानृषीन् सन्तर्पयेत् पितॄन् ॥

[1] श्रुतिस्मृत्युदितं सम्यक्—घ ; श्रुतिस्मृत्युदितं सर्वं इति कारिकापाठः.

तत आधारशक्त्यादीन् सर्वान् पारिषदान्तकान् ।
संपीड्य तीरे तद्वस्त्रं पुनराचम्य वाग्यतः ।
पाषण्डादिभिरालापदर्शनादीनि वर्जयेत्" ॥ इति ।

यथोपदिष्टसन्ध्यानादरे च दोषं स्मरन्ति—

सन्ध्यानादरे दोषः ।

"अनागतां तु ये पूर्वामनतीतां तु पश्चिमाम् ।
सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः ॥
सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते ।
कामं तान् धार्मिको राजा हीनकर्मसु[1] योजयेत्" ॥ इति ।

स एष सन्ध्याक्रमः ।

ब्रह्मयज्ञः ।

अथ ब्रह्मयज्ञं प्रत्यक्षतैत्तिरीयश्रुत्याद्यनुसारेण उदित आदित्ये कुर्यात्; माध्यन्दिनानन्तरं वा भोजनात् पूर्वमेव[2] यत्र क्वचिदवसरे वा ।

तीर्थासन्नभगवदालयप्रणामः ।

तीर्थस्नानसमनन्तरं महाभारतोक्तप्रकारेण तीर्थासन्नविष्ण्वायतनं च नमस्कुर्यात् । भगवन्मन्दिरप्रवेशदशायां कर्तव्यस्य दिङ्मात्रं दर्शितं श्रीसात्त्वते—

"प्रासादं देवदेवीयमाचार्यं पाञ्चरात्रिकम् ।
अश्वत्थं च वटं धेनुं सत्समूहं गुरोर्गृहम् ॥
दूरात् प्रदक्षिणं कुर्यान्निकटात् प्रतिमां विभोः ।
दण्डवत्प्रणिपातैस्तु नमस्कुर्याच्चतुर्दिशम् ॥

[1] शूद्रकर्मसु—घ, ङ, छ.
[2] माध्यन्दिनानन्तरमेव वा भोजनात् पूर्वं वा—क, ख, झ.

न यानपादुकारूढो न सोपानत्कपादभृत् ।
न विक्षिप्तमना भूत्वा संविशेद्भगवद्गृहम् ॥" इति ।

तत्र च प्रदक्षिणानि प्रणामांश्च युग्मान् कुर्यात् । 'एकत्रिपञ्च-सप्तादिगणना विषमं हि यत्' इति विषमप्रतिषेधात् । 'प्रवेशे निर्गमे चैव विष्वक्सेननतिं चरेत्' इति विधानात् विष्वक्सेनं तत्तद्वारपालांश्च प्रणम्यानुज्ञाप्य तत्र तत्र प्रविशेत्[1] ।

"चक्रवद्भ्रामयेन्नाङ्गं पृष्ठभागं न दर्शयेत् ।
पश्चाद्भागेन निर्गच्छेद्देवतासन्निधौ सुधीः ॥" इति ।

प्रविष्टश्चाष्टाङ्गेन तत्तद्देशकालशक्येन मस्तिष्क-सम्पुट-प्रह्वाङ्ग-पञ्चाङ्ग-दण्डाङ्गादिषु अन्यतमेन वा प्रणमेत् । तत्राष्टाङ्ग-प्रणामप्रकारः । प्रणामम्—

"मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम्" ॥

इति सात्त्वतोक्तमुदाहरिष्यति भाष्यकारः । मस्तिष्कादिपञ्चकं तु श्रीवैखानसशास्त्रे पठितम्—

"स मस्तिष्कप्रणामः स्यादञ्जलिं मस्तके न्यसेत् ।
प्रणामः सम्पुटः स स्याद्धृदयेऽञ्जलिमर्पयेत् ॥
प्रह्वाङ्गः सम्पुटं कुर्यात् सा प्रह्वाङ्गनमस्क्रिया ।
पादाङ्गुलिभ्यां जानुभ्यां शिरसा चावनिं स्पृशन् ॥

[1] अनुज्ञाप्य तत्र प्रविशेत्—क, ख, ग, ङ.

बद्धाञ्जलिर्नमस्कुर्यात् स पञ्चाङ्ग उदाहृतः[1] ।
पादौ हस्तौ प्रसार्यैव शेते भूमौ च दण्डवत् ॥
स दण्डाङ्गप्रणामः स्यात् प्रणामानेवमाचरेत्" ॥ इति ।

सङ्कर्षणसंहितायां सुकृतप्रणामप्रकरणे त्वेवं प्रणाम उक्तः—

"ललाटोदरजान्वङ्घ्रियुगाग्रानूर्ध्वगौ करौ ।
भूमौ सन्धाय मनसा वासुदेवमनुस्मरन्" ॥ इति ।

एवं चाष्टाङ्गप्रणामः स्मर्यते—

"उरसा शिरसा वाचा मनसा च कपोलतः ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते" ॥ इति ।

रहस्याम्नायब्राह्मणे च नमस्कारप्रकरणे 'जानुभ्यां पाणिभ्यां शिरसा च नन्तव्यं भवति' इत्यादिना पूर्णनमस्कारस्वरूपादिकमुपदिश्य तत्फलं चोक्तम्—'सर्वैः करणैर्नमन् समग्रो नमति । समग्रो नमन् आप्तकारी भवति । आप्तकारी भगवन्तमाप्नोति' इति । एवं द्वादशाङ्गप्रणामादिकं तत्र तत्र द्रष्टव्यम् । एकहस्तेन नमनं तु श्रीभागवते प्रतिषिद्धम्—

"एकेन पाणिना यस्तु प्रणमेत् पुरुषोत्तमम् ।
न्याय्यस्तस्य करच्छेद इति धर्मविदो विदुः ॥" इति ।

अञ्जलित्वमपि ह्यस्य[2] नास्ति । 'तौ युतावञ्जलिः पुमान्' इति नैघण्टुकपाठात् । चामरग्राहिणीप्रभृतीनां तु व्याप्तान्यहस्ततया एकहस्त-नमनाभ्यनुज्ञा । अतोऽवज्ञादिमूलैककरनमने करच्छेददण्डानुशासनमिति

[1] उदीर्यते—घ, ङ, छ.
[2] अञ्जलित्वमप्यस्य—क, ख, ग, च, झ.

'यथा तथा वापि सकृत् कृतोऽञ्जलिः' इत्यादीनामविरोधः[1] । योग्यतायां सत्यां द्वाभ्यां पाणिभ्यां प्रणमतोऽपि ऊनत्वमामनन्ति—"यदा ह्ययं केवल-पाणिभ्यामेव नमति न जानुभ्यां न शिरसा, एकेन ज्ञानेन नमति स्पर्शविशेषज्ञानेन[2] हीयते । इतराणि ज्ञानानि कर्मणः । एकेन नमन् ऊनो नमति । ऊनो नमन् अनाप्तकारी भवति । अनाप्तकारी न भगवन्तमाप्नोति" इति । आचार्यनामग्रहणे[3] भगवन्नामग्रहणे[4] च अञ्जलिबन्धादिकं तत्र तत्र ग्राह्यम् । दर्शितश्चायमाचारः सम्भवपर्वणि व्यासप्रस्तावे "महर्षेः कीर्तना-त्तस्य भीष्मः प्राञ्जलिरब्रवीत्" इति ।

भगवत्सेवाप्रकारः ।

एवं यथार्हं प्रणम्योत्थितश्च[5] भगवतः पुरस्ताद्दक्षिणतोऽवस्थाय गुरुपरम्परया भगवन्तं शरणमुपगम्य पावन-मनोहरत-द्दर्शनानन्दबृंहितसर्वाङ्गः प्रीतिपरीवाहरूपाणि स्तव्य-स्तवप्रियवशीकरणानि स्तोत्राणि पठेत् । भगवदर्चावतारदर्शनमाहात्म्यं[6] चैवमुक्तं श्रीपौष्करे—

"सन्दर्शनादकस्माच्च पुंसां संमूढचेतसाम् ।
कुवासना कुबुद्धिश्च कुतर्कनिचयश्च यः ।
कुहेतुश्च कुभावश्च नास्तिकत्वं लयं व्रजेत् ॥" इति ।

अन्यत्र तु महतामपि पातकानां प्रायश्चित्ततया विधीयते । "अहरेकं हरेर्बिम्बमापीठादवलोकयेत्" इति ।

[1] इत्यादीनामप्यविरोधः—घ.
[2] स्पर्शविषयविशेष—छ.
[3] आचार्यदर्शने—क, ख, ग, ङ, च, छ, झ.
[4] भगवतो नामग्रहणे—घ.
[5] चकारः क, च, झ कोशेषु नास्ति.
[6] माहात्म्यशब्दो घ कोशादन्यत्र विमुक्तः

"आपीठान्मौलिपर्यन्तं पश्यतः पुरुषोत्तमम् ।
पातकान्याशु नश्यन्ति किं पुनस्तूपपातकम् ॥" इत्यादि च ।

स्तुति-सङ्कीर्तनादेश्च प्रभावः—

"एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥"

"कलौ सङ्कीर्त्य केशवम् ।"

"कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥"

इत्यादिषु ग्राह्यः ।

भगवत्प्रसाद-स्वीकारप्रक्रिया ।

अत्र भगवत्प्रसादलब्धं तुलसी-पादोदकादिकं यत्किञ्चिदपि प्रणिपात-पुरःसरं हर्षोत्फुल्लकपोलः शिरसा सम्भाव्य यथार्ह-मुपयुञ्जीत । अत्र "प्रतापभूपरचितस्तथाचमन-निर्णयः" इत्यादौ शिष्टाः पठन्ति—

"आम्रेक्षुदण्ड[1]ताम्बूलचर्वणे सोमपानके ।
विष्वङ्घ्रितोयपाने च नाद्यन्ताचमनं स्मृतम् ॥" इति ।

तन्मूलभूता चाथर्वणश्रुतिर्नारायणमुनिभिः संगृहीता । "भगवान् पवित्रं वासुदेवः पवित्रं तत्पादौ पवित्रं[2] तत्पादोदकं पवित्रं न तत्पान आचमनम्, यथा हि सोमे" इति । एवं भगवत्सेवयात्मानं कृतार्थं मन्यमानो भगवदनुज्ञया क्वचिन्निभृतमुपविश्य जपादिभिरुपासीत ।

[1] आम्रेक्षुखण्ड—घ, ङ, छ.
[2] तत्पादौ पवित्रं—क, झ कोशयोः नास्ति.

भगवन्मन्दिरे च तत्तच्छास्त्रोदितान् अपचारान् परिहरेत् । एवं तु श्रीवाराहे पुराणे द्वात्रिंशदपचाराः पठिताः—

द्वात्रिंशदपचाराः ।

"श्रीधरण्युवाच—

"देवदेव जगन्नाथ श्रुतं त्वत्तो मयाखिलम् ।
यान् कृत्वा योग्यतां यान्ति तव वेश्मप्रवेशने ॥
तान् ब्रूहि देवदेवेश भक्तवत्सल माधव ।"

श्रीभगवानुवाच—

"अपचारानहं वक्ष्ये तच्छृणुष्व वसुन्धरे ॥
गीतवादित्रनृत्तादिपुण्याख्यानकथाश्च ये ।
लोपयन्त्यथ पारुष्यैर्मम वेश्मसु मानवाः ॥
ते यान्ति वसुधे पापा नरकानेकविंशतिम् ।
ततस्तेऽपि महाभागे गार्दभीं योनिमाश्रिताः ॥
वर्तन्ते तत्र वै देवि सप्त जन्मानि सौकरीम् ।
वस्त्रेणाच्छाद्य देहं तु यो नरः प्रणमेत्तु माम् ॥
श्वित्री च जायते मूर्खस्त्रीणि जन्मानि भामिनि ।
कृष्णकम्बलसंवीतो यो नरः प्रणमेत्तु माम् ॥
चण्डालयोनितां याति जन्मानि नव पञ्च च[1] ।
तैलेनाभ्यक्तसर्वाङ्ग उपानद्गूढपादकः ॥
यो नरः प्रविशेद्गेहं मम भूतधरे शुभे ।
स याति गृहपालानां योनौ[2] जन्मत्रयं शुभे ॥

[1] भुवि पञ्च च—घ.
[2] गृहजालानां योनिं—घ, ङ, छ.

नखरोमाणि यश्चैव केशास्थीनि तथैव च ।
यः क्षिपेन्मम गेहेषु तस्य पापफलं शृणु ॥
माक्षिकीं योनिमाश्रित्य नखरोमचितस्तदा ।
सप्त जन्मानि तत्रैव नरकानेकविंशतिम् ॥
ताम्बूलं चर्वितं यस्तु प्रक्षिपेन्मम मन्दिरे ।
स याति नरकं घोरं यावदाभूतसंप्लवम् ॥
ततो मुक्तो महाभागे शुनकोऽपरजन्मनि ।
संस्थितस्त्रीणि जन्मानि वसत्येव न संशयः ॥
निष्ठीवनकरो यस्तु मन्दिरे मम सुन्दरि ।
कृमिभक्ष्ये पतेद्घोरे नरके पापकृन्नरः ॥
श्लेष्मातकतरुर्भूत्वा जायते जन्मपञ्चकम् ।
श्मशानमध्ये गत्वा तु यो नरो मामथार्चयेत् ॥
सप्तजन्मकृतात् पुण्यात्तत्क्षणान्मुच्यते नरः ।
सार्गाली[1] योनिमाश्रित्य वसेज्जन्मत्रयं शुभे ॥
मूत्रयेन्मन्दिरे यस्तु मम देवि शुभानने ।
स मूत्रगर्तनरके पतत्येव ह्यवाक्छिराः ॥
तस्मान्मुक्तस्तु रक्तादिनिम्बकंद्रुममास्थितः[2] ।
जनिष्यति वरारोहे ह्यष्टजन्मानि सौकरीम् ॥
पुरीषं वा प्रकुर्वीत यो नरो मम मन्दिरे ।
स याति नरकान् घोरान् पर्यायेणैकविंशतिम् ॥
ततो मुक्तो महाभागे विष्ठायां जायते कृमिः ।

[1] मार्जालीं—घ.
[2] बिम्बकद्रुम—ङ, छ.

अनुगम्य यथा प्रेतमिच्छया यस्तु मानवः ॥
आराधितुमथेच्छेन्मां स व्रजत्यधमां गतिम् ।
बलिभुग्योनितां याति जन्मानि भुवि भूधरे ॥
भरणं तु तथा कृत्वा मृतकस्य वसुन्धरे ।
मन्दिरं न प्रवेष्टव्यं प्रविष्टस्य फलं शुणु ॥
चाण्डालीं योनिमाश्रित्य जन्मकृन्नव पञ्च च ।
भविष्यति वरारोहे व्याधः क्रूरोऽथ निष्ठुरः ॥
भुक्त्वा श्राद्धं महाभागे मनुजो मामथार्चयेत् ।
चटकत्वमनुप्राप्य ततो गोधावपुर्गतः ॥
छायामाक्रम्य यो मोहाद्विमानस्य वसुन्धरे ।
प्रदक्षिणमकुर्वंस्तु यस्तिष्ठेन्मतिपूर्वकम् ॥
तिष्ठेत् स कानने शून्ये कण्टकैर्बहुभिर्वृतः ।
फलपुष्पविहीनश्च अरण्ये शून्यवृक्षताम् ॥
समीपे मन्दिरस्यापि शकृन्मूत्रं करोति यः ।
स तिष्ठेद्रौरवे घोरे वर्षाणामयुतं शतम् ॥
ततोऽपि मनुजो मुक्तो ग्रामसूकरजातिताम् ।
ग्रामे जन्मशतं सुभ्रु विष्ठाभुक् सूकरस्तथा ॥
अनिबद्धप्रलापान् ये कुर्वते मम सन्निधौ ।
तेऽपि तित्तिरितां गत्वा जायन्ते जन्मपञ्चकम् ॥
आरोपितं प्रदीपं ये नयन्त्यन्यत्र मन्दिरात् ।
अन्धास्तेऽपि भविष्यन्ति जन्मानि नव पञ्च च ॥
कथायां कथ्यमानायां मन्दिरे मे वरानने ।
अनादृत्य च ये यान्ति तेषां पापफलं शृणु ॥

बधिरास्ते भविष्यन्ति मूका वै जन्मपञ्चकम् ।
पादौ प्रसार्य ये गेहे शेरते मे नराधमाः ॥
लालां विसृज्य चोच्छिष्टां तेषां पापफलं शृणु ।
तोयहीनेऽतिरौद्रे च वने वै शून्यवृक्षताम् ॥
जायन्ते सप्त जन्मानि ततश्चण्डालतां ययुः[1] ।
दरिद्राश्चैव मूर्खाश्च भविष्यन्ति त्रिजन्मकम् ॥
अन्यदेवार्थसन्दिष्टैः पुष्पैर्यो मामथार्चयेत् ।
ममैव तु महागेहे मण्डूकत्वं व्रजन्ति ते ॥
जन्मद्वयं तु वै मूढाः शूद्रतां यान्ति ते नराः ।
अन्यदेवगृहं गत्वा ह्यस्नात्वा यो व्रजेद्गृहम् ॥
ममैव वसुधे तस्य फलं पापस्य मे शृणु ।
गृहाद्गृहमथो गत्वा भिक्षार्थी क्षुधितः स्वयम् ॥
भिक्षामलब्ध्वा तत्रापि दरिद्रो जायते नरः ।
चत्वारि चैव जन्मानि तेषामन्ते च योऽबुधः ॥
चण्डालयोनिमाप्नोति जन्मानि दश पञ्च च ।
अन्यदेवसमं यस्तु मन्यते मां तु सोऽधमः ॥
चण्डालयोनितां याति जन्मानि नव पञ्च च ।
कुसुमानां निवेद्यानां गन्धमाघ्राति यो नरः ॥
स पूतिगन्धसंयुक्तः कुष्ठी चैव धरे शुभे ।
भवति त्रीणि जन्मानि भवत्येव न संशयः ॥
विष्णुस्थानसमीपस्थान् विष्णुसेवार्थमागतान् ।
श्वपचान् पतितान् वापि स्पृष्ट्वा न स्नानमाचरेत् ॥

[1] ययुरित्येव सर्वत्र पाठः.

उत्सवे वासुदेवस्य यः स्नाति स्पर्शशङ्कया ।
स्वर्गस्थाः पितरस्तस्य पतन्ति नरके क्षणात् ॥
पिबेत् पादोदकं विष्णोर्वैष्णवानां विशेषतः ।
तत्र नाचमनं कुर्याद्यथा सोमे द्विजोत्तमः ॥"

"इति श्रीवाराहे पुराणे धरणीप्रश्ने द्वात्रिंशदपचारो नाम पञ्चचत्वारिंशोऽध्यायः ॥" इति ।

अन्यत्र[1] तु द्वात्रिंशदपचाराः प्रकारान्तरेण पठ्यन्ते । तत्र चात्र च उक्तानुक्तसमुच्चयः कार्यः । तत्रेयमेका प्रक्रिया ।

प्रकारान्तरेण द्वात्रिंशदुपचाराः ।

"अपचारास्तथा विष्णोर्द्वात्रिंशत् परिकीर्तिताः ।
यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ॥
देवोत्सवाद्यसेवा चाप्रणामश्च तदग्रतः ।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम् ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम् ।
पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम् ॥
शयनं भोजनं चैव मुधाभाषणमेव[2] च ।
उच्चैर्भाषा वृथाजल्पो रोदनाद्यं च विग्रहः ॥
निग्रहानुग्रहौ चैव स्त्रीषु साकूतभाषणम् ।
अश्लीलकथनं चैवाप्यधोवायुविमोक्षणम् ॥
कम्बलावरणं चैव परनिन्दा परस्तुतिः ।
शक्तौ गौणोपचारश्चाप्यनिवेदितभक्षणम् ॥

[1] अन्ये तु—क, ख, ग, च, झ.
[2] मिथ्याभाषणमेव च—घ, ङ, छ.

तत्तत्कालोद्भवानां च फलादीनामनर्पणम् ।
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिषु ॥
पृष्ठीकृत्यासनं चैव परेषामभिवादनम् ।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा" ॥ इति ।

एवं प्रक्रियान्तराण्यपि तत्र तत्र ग्राह्याणि । तथा—

"प्रमादादपि कीलालं यः स्पृशेद्वैष्णवो नरः ।
उपचारशतेनापि न क्षमामि वसुन्धरे ॥
स्वाधीनशयनं जल्पं स्वाध्यायं च विशेषतः ।
आसनारोहणं चैव न कुर्यात् केशवालये ॥
यो विष्णोः प्रतिमाकारे लोहभावं करोति च ।
यो गुरौ मानुषं भावमुभौ नरकपातिनौ" ॥

इत्याद्युक्तान्यपचारान्तराण्यपि द्रष्टव्यानि । एवं भगवन्मन्दिरे सावधानः परिहृतापचारः पूर्ववत् प्रणम्य विष्वक्सेनादीन् अनुज्ञाप्य निर्गच्छेत् ।

प्रातर्होमाभिगमने ।

ततः स्वदेवाधिष्ठितमाश्रमगृहादिकमागत्य, सुप्रक्षालितपाणिपादः स्वाचान्तः स्वर्ण-रजत-ताम्रादिपात्रैः स्वयं पूर्वाहृतेन मणिकस्थेन वा[1] गृहं संप्रोक्ष्य, स्वसूत्रविधिना स्वाग्निं भगवदात्मकं हुत्वा, देवगृहमागत्य दूरात् प्रणमेत् । अत्र चैवमभिगमनं वङ्गिवंशेश्वरैर्दर्शितम्—

"ततः कुम्भं समादाय शुचिनापूर्य वारिणा ।
हरेराराधनार्थाय मौनी नियतमानसः ॥

[1] जलेन—इति विशेष्यपदम् अपेक्षितं न कस्मिंश्चिदपि कोशे दृश्यते.

पाषण्डावेक्षणादीनि वर्जयन्[1] यन्नतः पथि ।
ध्यायन्नारायणं देवं यागभूमिं समाश्रयेत् ॥
ततः प्रक्षाल्य चरणौ स्वाचान्तः सुसमाहितः ।
ब्रह्मचारी गृहस्थो वा वानप्रस्थो ऽथवा मुनिः ॥
समिदाज्यादिभिर्द्रव्यैर्मन्त्रैरपि यथोदितैः ।
हुत्वाग्नीनग्निहोत्रादावुक्तं कालमपि क्षिपन् ॥
पराराधनरूपेण कृतेनैव स्वकर्मणा ।
कृते निष्कल्मषे शुद्धे स्वस्मिन् मनसि सुस्थिते ॥
लब्धाधिकारो देवस्य ध्यानार्चनजपादिषु ।
विनिष्क्रम्याग्निशालाया गत्वा यागगृहं स्वकम् ॥
अर्चयित्वा परात्मानं देशकालाद्यपेक्षया ।
पत्रैः पुष्पैः फलैर्वापि पूजाकालोक्तवर्त्मना[2] ।
केवलाञ्जलिना वापि विहितेन यथा तथा" ॥ इति ।

अत्र पराराधनरूपेण कर्मणा शुद्धान्तःकरणस्य ध्यानार्चनादिष्वधिकारविधानात् केषांचित् कुदृष्टीनां मतं निरस्तम् । उक्तं च कुदृष्टिमतोपन्यासमध्ये परकालसूरिभिः ।

" स्तुतिजपनिजबिम्बालोकनध्यानसेवा-
स्मृतिकथनसमर्चाकर्मभिः श्रौतदूरैः ।
वृषभशिखरिनाथ त्वामभीप्सन्ति केचि-
च्छ्रुतिपथपरिनिष्ठप्रापणीयांघ्रिपद्मम् " ॥ इति[3] ।

[1] वर्जयेत्—क, ख, ग, च, ञ.
[2] पूर्वकालोक्तवर्त्मना—घ, ङ, छ.
[3] " इति " शब्दः च कोश एव दृश्यते.

एवं च संगृहीतं नारायणमुनिभिः—

"पाषण्डादिभिरालापदर्शनादीनि वर्जयेत् ।
गृहानागत्य संक्षाल्य पादावाचम्य वाग्यतः ॥
द्वारपालाननुज्ञाप्य प्रविश्य सदनं हरेः ।
अभिगम्य च देवेशं निभृतः परया मुदा ॥
मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥
अष्टाङ्गेन प्रणामेन दिव्यशास्त्रोदितेन च ।
प्रणमेत् पुण्डरीकाक्षं भक्तिभारावनामितः ॥
द्वयेन तद्विवरणैः प्रपद्य प्रभुमीश्वरम् ।
निक्षिप्य चिरमात्मानं तत्पादाब्जे कृती भवेत्" ॥ इति ।

इह च—

"ब्राह्मे मुहूर्ते संप्राप्ते उत्थाय शयनात्ततः ।
स्नात्वाभ्यर्च्य जगन्नाथं समाराधनमाचरेत्[1]" ॥

इत्येतावत् सात्त्वतोक्तं सर्वेषां[2] समानम् । शेषं तु तावत्[3] तत्तत्संहितानिष्ठानामेव । एवं संहितान्तरेषु कालान्तरकर्मस्वपि ग्राह्यम् । जयाख्यसंहितायां तु सर्वसंहितोक्ताभिगमनं संग्रहेणोक्तम्—

"ब्राह्मान्मुहूर्तादारभ्य प्रागंशं विप्र वासरे ।
जपध्यानार्चनस्तोत्रैः कर्मवाविचित्तसंयुतैः ।
अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतम् ॥" इति ।

[1] समिद्दानं समाचरेत्—घ.
[2] "सर्वेषां" इति पदं घ, ङ, छ कोशेषु नास्ति.
[3] "तावत्" इति शब्दः घ, ङ, छ कोशेषु नास्ति.

पाद्मे च आद्यन्तकर्मविच्छेदेन दर्शितम्—

"कल्याणाचरणान्तं यत् कर्मजातं चतुर्मुख ।
उत्थानादिक्रमादेतदभियानमुदीरितम् ॥" इति ।

सन्ध्योपासनानन्तरकृत्यं चैवं विवृतम्—

"अभिवाद्य गुरून् वृद्धांस्तथा भागवतान् क्रमात् ।
प्रविश्य स्वाश्रमं देवमभिगम्य यथाविधि ॥
अर्चयेज्जपहोमान्तं दद्याद्ग्रासं गवामपि ।
अञ्जनालेपनैः स्रग्भिर्वासोभिर्भूषणैस्तथा ॥
अलक्तकरसाद्यैश्च ताम्बूलमुखशोधनैः ।
उपेतो मङ्गलैरन्यैर्नयेदभिगमक्रियाम्" ॥ इति ।

एतेन 'देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम्' इति स्मृत्यभिप्रेतमपि विवृतम् । अत्र च 'उपेतो मङ्गलैरन्यैः[1]' इति वचनं तत्तदाश्रमाविरुद्ध-मङ्गलदेवतावल्लभ-गुरुपूजास्तुतिनमस्कारादिकमपि संगृह्णाति । 'ग्रासं गवामपि' इत्येतच्च परगोविषयम् । 'ग्रासमुष्टिं परगवे दद्याच्चैव न लोपयेत्' इति श्रीवैष्णवधर्मशास्त्रोक्तेः । कृष्णकल्पेऽप्युक्तम्—'दद्याद्ग्रासम्' इत्यारभ्य, 'गोषु चैवं प्रसन्नासु गोपालोऽपि प्रसीदति' इति । गवादिषु चान्त-स्थितो भगवान् भाव्य इति जयाख्यसंहितायामुक्तम्—

"सोमसूर्यान्तरस्थं च गवाश्वत्थाग्निमध्यगम् ।
भावयेद्भगवद्विष्णुं गुरुविप्रशरीरगम्" ॥ इति ।

अतस्तत्र तत्र प्रयुक्तेष्वपि कर्मसु न देवतान्तरभजनरूपत्वप्रसङ्गः । एवं व्यासाद्युक्तदेवादिनमस्कारोपहारनिवेदन-पुष्पादिप्रदान-वृद्धाभिवादन-गुरूप-

[1] उपेतो मङ्गलैरन्यैर्नयेदभिगमक्रियाम् इति क, ख, ग, च, झ कोशेषु पूर्णमुपात्तम् .
[2] देवतानमस्कार—क, ख, ग, च, झ ; देवतादिनमस्कार—ङ, छ.

सेवन[1]-तद्धिताचरण-वेदाभ्यास-जपाध्ययन-धारण-तदर्थविचारण-धर्मादिशास्त्र-वैदिकनिगमवेदाङ्गावेक्षणप्रभृतीनि प्रथमकालकर्तव्यानि पूर्वाधिकारविशोधित-प्रक्रियया प्रतिसन्धेयानि । इति व्याख्यातमभिगमनम् ॥

उपादानम् ।

अथोपादानं व्याख्यास्यामः । तच्चैवं संगृहीतं वङ्गिवंशेश्वरैः—

"प्राप्तेऽथाह्नो द्वितीयेंऽशे स्वास्त्रमन्त्रेण धर्मतः ।
आर्जयित्वार्चनाद्रव्यमशेषं च यथोदितम्" ॥ इति ।

उपादानार्हाणि अनर्हाणि च द्रव्याणि ।

तदेतद्व्याख्यातं नारायणमुनिभिः—

"अह्नो द्वितीयभागेन कृष्णाराधनतत्परः ।
द्रव्याण्याराधनार्थानि शास्त्रीयाणि समार्जयेत् ॥
प्रभूतानि विशुद्धानि शुद्धदेशोद्भवानि च ।
अरौद्राण्यनिषिद्धानि संगृहीतानि वैष्णवैः ॥
सुगन्धीनि मनोज्ञानि पुष्पाण्यभिमुखानि च ।
वासांसि धनधान्यानि चन्दनाद्यनुलेपनम्[2] ॥
अन्यानि हविरर्थानि तानि मूलफलानि च ।
संक्षालितानि बहुशो देवभोग्यानि यानि च[3] ॥

[1] गुरूपासन—घ, ङ, छ.

[2] चन्दनान्यनुलेपनम्—ङ, च, छ.

[3] वासांसि इत्यारभ्य, देवभोग्यानि यानि च इति यावत् सार्धश्लोकः क, ख, ग, झ कोशेषु विमुक्तः.

दधिक्षीराज्यमुख्यानि द्रव्याणि च विशेषतः ।
उत्तमानुपदंशांश्च मुद्गमाषादिकान्यपि ॥
ताम्बूलादीनि चान्यानि सर्वाण्यादाय सादरम् ।
यथार्हं तानि संस्कृत्य प्रक्रमेतार्चनं ततः" ॥ इति ।

यत्तूक्तं श्रीसात्त्वते—

"प्रातरुत्थाय चिन्वीयात् स्वारामात् स्वयमेव हि ।
पूजार्थमस्त्रमन्त्रेण पुष्पादीन् यत्नतः सदा ॥
यायादरण्यमथवा निर्बाधं हि तदार्जयेत् ।
अकण्टकद्रुमोत्थाश्च कण्टकद्रुमजा अपि ॥
हृद्याः सुगन्धाः कर्मण्या ग्राह्याः सर्वे सितादयः ।
उग्रगन्धास्त्वकर्मण्यास्त्वप्रसिद्धास्तथैव च ॥
चतुष्पथशिवावासश्मशानावनिमध्यजाः ।
क्षता अशनिपाताद्यैः कृमिकीटसमावृताः ॥
वर्जनीयाः प्रयत्नेन पत्रपुष्पफलादयः ।
अम्बुजानि सुगन्धीनि सितरक्तानि कानिचित् ॥
योक्तव्यानि पवित्राणि नित्यमाराधने तु वै ।
साङ्कुराणि च पत्राणि भूगतान्येवमेव हि ॥
विहितान्यर्चने नित्यं यथर्तुप्रभवानि च ।
न गृहे करवीरोत्थैः कुसुमैरर्चनं हितम् ॥
विशेषतः सकामस्य सिद्धिभूतियुतस्य च ।
अतोऽन्यथा न दोषोऽस्ति दोष उन्मत्तकादिभिः ॥
सद्यो हृतानां विहितं त्वम्लानानां यथाक्रमम्[1] ।

[1] यथाक्रियम्—घ; यथाक्रियः—ङ, छ.

प्रदानमम्बुसिक्तानां तेषां कार्यं न चान्यथा ॥
निर्दोषतां प्रयान्त्याशु मन्त्रिणामवलोकनात् ।
भवन्ति भक्तिपूतानि ह्यन्मन्त्रनिरतात्मनाम् ॥" इति ।

तदिदं नियमपरिच्छेदानुशिष्टत्वाद्विपर्ययानर्हमवधातव्यम् । शक्तमधिकृत्य चात्र स्वारसिकं स्वयंप्रवृत्त्यादिकमुपदिश्यते । पक्षान्तरस्याप्यन्यत्रानुज्ञानात् । अत्र वैशेषिकार्चनादिषु कदाचित् प्रातःशब्दस्य मुख्यार्थता । अन्यथा त्वभिगमनविधिना प्रातःकालोपरोधात् । अन्येषु च सर्वेषु शास्त्रेषु द्वितीयकाल एव द्रव्यार्जनविधानात् । प्रातःशब्देन सन्निकर्षवशात् त्वरातिशयसिद्ध्यर्थं तदुचितकालो लक्ष्यते । "सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्" इतिवत् । अत एवात्रत्यमुत्थानं च न स्वापानन्तरभावि । अपि तु "ततः [1]पुष्पफलादीनामुत्थायार्जनमाचरेत्" इति जयाख्यसंहितोक्तमभिगमनानन्तरं देवसन्निधेरुत्थानम् । इह च श्रीवैष्णवधर्मशास्त्रोक्तपुष्पनियमः पूर्वाधिकारे प्रसङ्गाद्दर्शितः । पाद्मे त्वेवं विचित्रद्रव्योपादानमुक्तम्[2]—

"उपादद्यात्तथा [3]पूजासाधनानि यथातथम् ।
पुष्पाणि फलमूलानि विविधान्योषधीरपि ॥
दध्यादि च हवियोंग्यतण्डुलानि[4] गुडानि च ।
स्नानीयान्यपि वस्त्राणि स्वादूनि सलिलानि च ॥

[1] पुष्पकुशादीनां—घ, ङ, छ.
[2] द्रव्योपार्जनमुक्तम्—क, ख, ग, झ.
[3] उपादद्याद्यथापूर्वं—क, झ ; उपादद्याद्यथापूजा—ख, ग, च.
[4] तण्डुलादि—घ.

दर्भान् पत्राणि[1] समिधो यथाशक्ति यथावसु ।
आहृत्य याच्ञयार्थैर्वा[2] पूजास्थाने निवेशयेत् ।
नीत्वोपादानसमयमित्थं तदनु पूजयेत् ॥" इति ।

अस्यां संहितायां संहितान्तरेषु पुष्पप्रकरण-हविष्पाकप्रकरणादिषु[3] च हेयोपादेयसमस्तद्रव्यविभागो द्रष्टव्यः । अत्र याच्ञयेत्युक्तोऽयंमध[4]माधमपक्षः ।

" स्वप्रयत्नकृतं शस्तं मध्यमं वन्यमुच्यते ।
अधमं तु क्रयक्रीतं याचितं[5] त्वधमाधमम् ॥"

इति पुष्पप्रकरणोक्तस्य सर्वेषु द्रव्येष्वविशेषेण सञ्चरणात् ।

भोजराजस्त्वेवं पुष्पेषु राजस-तामसादिविभागं पुष्पाङ्कुर-पत्र-मूल-धूप-दीप-वस्त्राभरणेषु वर्ज्यावर्ज्यविभागं च[6] संजग्राह—" अथ पुष्पाणि त्रिविधानि—सात्त्विकानि राजसानि तामसानीति । शुक्लानि सात्त्विकानि । रक्तानि राजसानि । कृष्णानि तामसानीति । शुक्लानि द्विविधानि—शुक्लवर्णं वलर्क्ष-मिति । शुक्लं शंख-कुन्देन्द्वादिवर्णम् । वलर्क्षं स्फटिकवर्णादि । रक्तं द्विविधम्—रक्तम् अरुणमिति[7] । रक्तं जपाकुसुमादिवर्णम् । अरुणं किंशुकादिवर्णम् । पीतं द्विविधम्—पीतं हरितमिति । कृष्णं द्विविधम्—

पुष्पेषु वर्ज्यानि अवर्ज्यानि च ।

[1] पर्णानि—घ, ङ, च, छ.
[2] याच्ञयास्तैर्वा—क, झ; याच्ञया तैर्वा—ख, ग; याच्ञयार्थानि (?) (स्तानि) घ.
[3] हविःप्रकरणादिषु—क, ख, ग, च, झ.
[4] अयं इति शब्दः घ, ङ. छ कोशेषु न दृश्यते.
[5] पारक्यं—क, ख, ग, च, झ.
[6] घ कोश एव 'च' कारो दृश्यते.
अरुणं चेति—क, ख, ग, च, झ.

नीलं श्याममिति[1]। नीलं तापिञ्छादि[2]। श्यामं विष्णुक्रान्तादि[3]। फलमेषां भिद्यते—सात्त्विकादर्धफलानि राजसानि, तस्मादर्धफलानि[4] तामसानि इति। एतानि स्वारामोत्पादितानि,[5] आरण्यानि, क्रीतानि, प्रतिग्रहालब्धानि, याचितानि[6] ग्राह्याणि पञ्चविधानि पुष्पाणि। तत्र स्वारामजमुत्तमम्। आरण्यं मध्यमम्। क्रीतमधमम्। [8]याचितमधमाधमम्[9]। प्रतिग्रहपुष्पे दातुरेव फलम्। कर्तुः किञ्चिद्भवेन्नवा। तस्मात् प्रतिग्रहलब्धैः पुष्पैर्नार्चयेत्।

करवीरौ पद्मौ [10]जाति-मल्लिकोत्पलानि तिन्त्रिणी-तगर-चम्पक-श्वेतार्क-कुटज-वकुल-कन्दली-तुलसी-तमाल-वनमाली-मरुवक-शमी-सिन्दुवार-पलाश-सहदेवी-फणिज्जक-पुन्नाग-वंशपुन्नाग-क्षुद्रपुन्नाग-मालती-श्वेतकुमुद-कन्दल-पद्म-महापुष्प-नाग-सदाभद्रा-प्रियङ्गु-बिल्व-वनमल्लिका-लक्ष्म्यगस्त्यद्वयं[14] वैष्णवी कर्णिकार(रो) द्वावशोकौ कुटजस्तथा[15] कारण्ड-नन्द्यावर्तद्वय-

[1] श्यामलं—क, ङ, च.

[2] नीलं तापिञ्छादि—ख, ग, च कोशेषु विमुक्तम्.

[3] कृष्णश्यामं विष्णुक्रान्तादि—च.

[4] राजसादर्धफलानि—क, ख, ग, च, झ.

[5] स्वारामोत्पन्नानि—क, झ; स्वारामोत्पन्नादीनि—च.

[6] अयाचितानि—ख ग, घ, च, छ.

[7] क्रयक्रीतं—घ.

[8] अयाचितं—घ.

[9] याचितमधमाधमम्—क, ख, ग, झ कोशेषु विमुक्तम्.

[10] केतकीजाति—क, ख, ग, च, झ.

[11] त्रीणि—घ.

[12] कदली—क, ख, ग, ङ, च, छ, झ.

[13] वनमाली—घ, ङ, छ.

[14] अतसीद्वयं—छ.

[15] लक्ष्म्यगस्त्यद्वयवैष्णवीकर्णिकाराशोककुटजस्तथा—क, ख, ग, च, झ.

क्षुद्रकेतक्य इत्यादीनि पुष्पाणि । एतानि तिथिभेदेन ग्रहणायन-सङ्क्रान्ति-व्यतीपात-विषुवादिभेदात् सङ्गवादिकालविशेषाच्च समग्रफलानि भवन्ति । तत्र तिथिपुष्पाणि—वैष्णवी-कंदल[1]-पद्म-लक्ष्मी-सिन्दुवार-द्रोण-प्रियङ्गु-मालती-पाटल-केतकी-जातिमल्लिका-महाजाति-पलाशाश्वत्थपत्राणि तिथीनामानुपूर्व्येण पुष्पाणि गृह्णीयात् । नन्द्यावर्तकैः सङ्क्रान्त्यां भगवन्तं पूजयेत् । उपनन्द्यावर्तकैरयने । विषुवे तुलसीभिः । व्यतीपाते फणिज्जकैः । ग्रहणे [2]मरन्दैः(?) पूजयेत् । सङ्गवे [3]तत्तत्तिथिचोदितं पुष्पं गृह्णीयात् । समे पद्मैः, धर्मे कुमुदैः, करवीरैर्विष्णुप्रिये, बिल्वपत्रैर्विरागे भगवन्तं पूजयेत् ।

अत्र सङ्गवादयः काला अहरहः प्रवर्तन्ते । सङ्गवः समो विष्णुप्रियो धर्मो विराग इति पञ्च काला अध्यात्मविद्भिरुपदिष्टाः । उदयात् पञ्चनाडीभ्यः[4] सङ्गव उक्तः । तस्माद्द्विगुणमात्रात्[5] सम उपदिश्यते । तावता विष्णुप्रियः । तावता धर्मः । तावता विराग इति । तत्र पूर्वापरौ भूत्वा[6] नाडीद्वयतः सङ्गवादयो मुहूर्ता उक्ताः । तत्र सङ्गवे वैकुण्ठस्य प्रीतिः, समेऽनिरुद्धस्य, विष्णुप्रिये शिंशुमारस्य, धर्मे बडबामुखाग्नेः, विरागे कपिलस्येत्येवं पञ्चानां पञ्च प्रीतिकालविशेषाः । दिवापुष्पैर्दिवापूजा मुख्या, रात्रिपुष्पैर्निशि ; विहितेष्वपि, छिद्रं मुकुलं जीर्णं पर्युषितं भुक्तशेषं घ्रातं परिम्लानमस्पृश्यस्पृष्टं जन्तुभिर्भक्षितं[7] जन्तुभिरधिष्ठितमशुभदेशे पुष्पितमापद्यपि न गृह्णीयात् ।

[1] वैष्णव्ये, कदली—क, ग, च, झ ; वैष्णव्ये कन्दल—घ, ङ, छ.
[2] मरन्दैः इत्येव बहुषु पाठः ; मकरन्दैः—ङ, छ ; मन्दरकैः मकरन्दैः—घ.
[3] तत्तिथि—ग, घ.
[4] नाड्यः—क, ख, ग, च, झ.
[5] द्विगुणमात्रः—क, च, झ.
[6] भूत्वा इत्येव सर्वत्र पाठः .
[7] जन्तुभिर्भक्षितं—क, ख, ग, घ, झ कोशेषु नास्ति.

पाणी प्रक्षाल्य पात्रे पुष्पाणि गृह्णीयात् । पिधाय स्थापयेदनातपे प्रदेशे[1] यथा न परिम्लायते । केवलपुष्पनिवेदनात् माला वरा । मालायाः स्रग्वरा । एकगुणा माला, बहुगुणा स्रक् । तत्र सूत्रैः पुष्पाणि न ग्रथ्नीयात् निर्माल्यसमानि भवन्तीति । देवोद्दिष्टानां निन्दां न कुर्यात्, प्रशंसामेव सर्वदा कुर्यात् । देवोद्दिष्टं मनुष्यो न गृह्णीयात् देवस्वं भवतीति । यत्किंचित् पीतवर्णं पुष्पं जलजं स्थलजं वा तदापदि संग्राह्यम् । अनुक्तमपि नान्यत्र[2] । तत्रापि वर्जनीयानि विशेषेण वर्जयेत् ।

कारण्डं[3] कृष्णवर्णं कपित्थं गिरिकर्णिकाम्र-विभीतक-शिरीष-मदयन्ति-निर्गुण्डि-सिन्दुवार-किंशुक-शल्मली-जपार्क-कनकोन्मत्त-कारञ्ज-विषपादप-बन्धूक-माधवी-नीपार्जुन-पाटलि-चिञ्चा-कोशातक्यलाबू-शिग्रूः[4] इत्येतानि वृक्षवल्लीषु विशेषेण[5] वर्जयेत् । यव-मुद्ग-प्रियङ्गु-निष्पाव-शण-दूर्वा-भूतृण-माषाणामेवाङ्कुराणि गृह्णीयात् । अन्येषामङ्कुराणि निर्माल्यसमानि भवन्ति इति । अपामार्ग-सदाभद्रा-तुलसी-विल्वाश्वत्थ-पलाश-धातकी-तमाल-गन्धपूर्ण-कृष्णा-ब्राह्मी-शमीवृक्षाणामेव पर्णानि गृह्णीयात् । उत्पलानामेव मुकुलं गृह्णीयात् । पद्मोत्पलादीनां जलजानां दिनद्वयादूर्ध्वं पर्युषितत्वम् । सर्वेषां मूलानामुशीरमूलमेव विशिष्टम् । देवदारुकृतं धूपं चन्दनागरुमिश्रितं विधूमाङ्गार-सम्भवं शस्तम् । सालसर्ज्जरसं कृष्णागरुमिश्रितं[6] प्राण्यङ्गवर्जितमन्यं वा धूपं निवेदयेत् । पात्रे गव्येन सर्पिषा दिव्येन[7] तैलेनापि कृतं सूत्रवर्तियुतं

[1] अप्रतापे प्रदेशे—क, ख, ग, च, झ.

[2] अनुक्तमप्यन्यत्र—क, ख, ग, झ.

[3] कोरण्डं—ग, घ, ङ, छ.

[4] शिग्रुशब्दस्य स्त्रीत्वं चिन्त्यम् ; शिग्रुः इति क, ङ, च कोशेषु पाठः.

[5] विशेषेण इति पदं घ कोश एव दृश्यते.

[6] विधूमाङ्गारेत्यारभ्य कृष्णागरुमिश्रितं इति यावत् ङ. छ कोशयोः न दृश्यते.

[7] दिव्येन इति पदं घ कोशे नास्ति.

मुखानिलदीपितं[1] दीपं भवेत् । दुकूलं क्षौमं नेत्रम्, सूत्रं वा कार्पासिकं सुगन्धधूपितं नवं वस्त्रं भवेत् । हेम-रत्नमयमाभरणं दद्यात् । दोषयुतं भुक्तपूर्वं वा मनुष्यैर्नाभरणं भवेत्" । इति ।

तदेतन्नानासंहितापरामर्शसमुद्धृतं सारम्[2] । अन्यदपि सर्वं तत्तत्संहितासु विस्तरेण द्रष्टव्यम् । श्रीशाण्डिल्यस्मृतौ च काष्ठपर्यन्तवर्ज्यावर्ज्यद्रव्यविभागः कृतः । श्रीविष्णुस्मृत्यादिषु प्राण्यङ्गसुगन्धेषु कस्तूरी-मृगमदयोरङ्गरागतया परिग्रहः । अर्चायां शुक्लाम्बरसमर्पणं पद्म-कह्लारेतररक्तपुष्पवर्जनमित्याद्यपि ग्राह्यम् । योगक्षेमार्थेश्वराभिगमनादिस्वरूपशोधनं च पूर्वाधिकारसिद्धं न विस्मर्तव्यम्[3] ।

एवं द्रव्याण्यार्जयतः प्रतिग्रहनियमश्च तत्र तत्र संक्षिप्तः । यथोक्तं

उपादाने प्रतिग्रहनियमः ।

श्रीशाण्डिल्यस्मृतौ—

"कुलटाषण्डपतितवैरिभ्यः[4] काकिणीमपि ।
उद्यतामपि गृह्णीयान्नापद्यपि कदाचन" ॥ इति[5] ।

उक्तं च श्रीसात्त्वते—

"तस्करात् पतितात् [6]षण्डाद्रुम्भलोभमदान्वितात् ।
मात्रावित्तं न गृह्णीयादभक्तादुपचारतः[7]" ॥ इति ।

[1] मुखानिलदीप्तिदीपितं—क, ख, ग, च, झ ; उखानलदीप्तिदीपितं इति चेत् साधीयान् .

[2] सारशब्दः सर्वेषु कोशेषु नपुंसकान्तत्वेनैव लिखितोऽस्ति.

[3] प्रस्मर्तव्यम्—घ, ङ, छ.

[4] स्वैरिभ्यः—शाण्डिल्यस्मृतिपाठः

[5] इत्यादि—घ.

[6] चण्डात्—सात्त्वतसंहितापाठः

[7] अपचारतः—क, झ.

स्मर्यते च—

"केशवार्चा गृहे यस्य न तिष्ठति महीपते ।
तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत् ॥" इति ।

अत्र[1] पक्वमन्नमपक्वं वा केशवार्चनरूपनित्यधर्मरहिते[2] गृहे न प्रतिग्राह्यम् । उभयत्रान्नशब्दप्रयोगात् । अन्यथा पक्वान्नमिति विशेषेण प्रयोगानुपपत्तेः । प्रतिग्रहगुणदोषविस्तरश्च धर्मशास्त्रेषु पठितव्यः । सर्वेषु चापदनापद्दशाभाविषु प्रतिग्रहेषु यमोपदिष्टं मन्त्रविशेषं भगवान् शौनकः स्मरति—

"दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति ।
प्रतिग्रहीतृभिश्चैव न ते मद्विषयोपगाः ॥" इति ।

तथा बलादिमन्त्रान्तरैरपि तत्तन्निष्ठानां प्रतिग्रहादिः । यद्यप्यस्त्रमन्त्रेण सामान्यतः सर्वपुष्पादिग्रहणमुपदिष्टं तथापि तुलस्या मन्त्रविशेषास्तत्तत्कल्पेषूपदिश्यन्ते, 'तुलस्यमृतजन्मासि' इत्यादयः ।

एवं वृत्त्यर्थतयानुज्ञातैरध्यापन-याजनादिभिरपि यथाशास्त्रं प्रयुक्तैः समुचितानि समाराधनोपकरणानि सम्पादयेत् । पूर्वनिष्पन्नसंपूर्णद्रव्यस्तु न प्रतिग्रहादिषु प्रवर्तेत । "आपत्स्वनन्तरा वृत्तिः" इत्यनुज्ञातेष्वपि 'वृत्तिं प्राप्य विरमेत्' इति स्मरणात् न नित्यं प्रवर्तेत । कृषि-वाणिज्ये च स्वयं कृते कुसीदं चैवमाद्यमपि[3] गत्यन्तरासम्भवे । 'सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः' इत्याद्युक्तनन्दनवनकरणादियतनमपि पुष्प-फलादिपूजोपकरणार्थतया उपादानकोटौ निविशते । अत्र परिव्राजकानां न स्वयं पुष्पापचयादि

प्रतिग्रहोपायनियमाः ।

[1] तत्र—क, ख, ग, च, झ.
[2] नित्यकर्म—क, च, झ.
[3] कुसीदं चेत्येवमाद्यपि—घ.

कर्तव्यम्[1] । यथोक्तं यतिधर्मसमुच्चये—"फलपुष्पोत्पाटने प्रायश्चित्त-विधानादद्धिः कर्तव्यमन्याहृतैर्वा" इति । एषा च वृद्धवसिष्ठस्मृतिस्तत्रोपात्ता—"जले मत्स्यादीनां स्थले पशु-मृग-सरीसृपादीनां सर्वप्राणिनामभयं दत्वा पुष्प-मूल-फलोपादान-छेदन-मधुमांसानृतवचनदानानि वर्जयेत्" इति। इतरेषां तु स्वयं परतो वा अन्यारामादिसंभूतानामदत्तानां ग्रहणे तस्करत्वमपि स्यात् । इति तत्र तत्र द्रष्टव्यम् । स्मर्यते च द्रव्य-गृह-दारादिनियमो मन्वादिभिः—

"यानशय्यासनान्यस्य कूपारामगृहाणि च ।
अदत्तान्युपभुञ्जान एनसः स्यात्तुरीयभाक् ॥
अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥" इत्यादिना ।

तदिह साक्षाद्वा परम्परया वा समाराधनोपकरणभूतशास्त्रीयसमस्तद्रव्योपादानेषु[2] स्वशक्येषु ध्यानादिविरोधिकायक्लेशकरबह्वायासरहितेषु न्यायतः प्रवर्तेत । इत्युपादानसंग्रहः ।

प्रभूतायासवर्जनमपि हि[3] मुमुक्षूणामवश्यम्भावित्वेन परिगणितेष्वष्टसु गुणेषु गौतमः पठति[4]—"दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति; यस्य तु खलु संस्काराणामेकदेशोऽपि

पूर्वसिद्धद्रव्यस्य आन्तरगुणोपादानम् ।

[1] कर्तव्यम्—घ कोशे नास्ति.
[2] द्रव्योपायेषु—क, ख, घ, च.
[3] हि शब्दः ग, च, छ कोशेषु नास्ति.
[4] प्रभूतायासेत्यारभ्य पठति इति पर्यन्तं ख कोशे विसृष्टम्.

THE NYĀYAKUSUMĀÑJALI

OF

UDAYANĀCĀRYA

A presentation of theistic doctrines according to the Nyāya system of philosophy

TRANSLATED INTO ENGLISH

BY

SWAMI RAVI TIRTHA

ADYAR LIBRARY

1941

FOREWORD

THE Nyāyakusumāñjali of Udayanācārya is perhaps the most outstanding work in Indian philosophy, dealing with the problem of God. In his other work called the Ātmatattvaviveka, Udayana establishes that there is a permanent self in man, which endures after the death of the individual, which carries with it the residue of its actions in the past life to a later life and which, after a series of lives, attains to final release in course of time.

In this work, the attack is against the Mīmāṃsakas who hold that there is a settled order of things in this world, which needs no God either for its establishment nor for its maintenance. According to the Mīmāṃsakas there is neither creation nor dissolution of the world. There may be higher beings in the Universe, who when propitiated may help man, may guide man in this life. But they are all subordinate to the Law of the world which is eternal, unmade, unending and unalterable. Thus in their scheme of the Universe and man's life, there is no room for God either as the creator or as the regulator of the world and its moral law.

The work is in five sections called Stabakas or bunches in fitting with the name of the work, which means handful of reasoning-flowers. In the first two sections, Udayana establishes his main thesis, namely

that there is God who has created the world and the moral order in the world and who controls this moral order. In the first section he maintains that there is a regular current of cause and effect in this world and that apart from the visible elements in the causes, there is also an invisible element which settles the nature of the effect. In the second section, he argues that it is only from scripture that we can know the Moral order of the world. God is the author of scripture and is the source of its validity.

In the third section he takes up the problem of why God is not seen, if He exists.

In the fourth section Udayana refutes the Mīmāṃsaka definition of valid knowledge and establishes the validity of scripture as the words of God.

In the fifth and last section, Udayana refers to a large number of phenomena in the Universe which tend to point out towards the existence of God. Causal relation, the first movements in matter, the holding up of the bodies in space and various other factors are brought in, to prove his point.

The text is a very difficult one and translation cannot obviate the difficulties of the original. In translating Sanskrit into English, we are creating a new language and until the words settle down into definite meanings, there will be some obscurity and ambiguity in the language. It is hoped that this translation will introduce students of religion and philosophy to a masterly treatise on the subject in Sanskrit.

TRANSLATOR

THE NYĀYAKUSUMĀÑJALI

OF

UDAYANĀCĀRYA

1. May this handful of reasoning-flowers whose good petals move, whose festivity has been determined by the arousing of good fragrance for the virtuous, which does not fade even when it is crushed and which is the source of honey identical with the flow of the essence of nectar, may this faultless handful of reasoning-flowers placed at the pair of feet of the Lord rejoice my revolving mind which behaves like a bee.

2. Here is being considered that supreme self whose worship the wise regard as the path to heaven and to beatitude.

3. Now, even though this is the position :

Keeping in view some particular goal of man, the Bhava whom the followers of the Upaniṣads worship as eternal, pure, awaken and liberated by nature, the followers of Kapila as the first knower, the followers of Patañjali as the one who is untouched by afflictions, action, their fruits and their residues, who shows the

traditional path and who blesses occupying an artificial body, the followers of Mahāpās'upata as the independent one untainted by even what are opposed to secular and scriptural laws, the S'aivas as S'iva, the Vaiṣṇavas as the Highest Person, the followers of the Purāṇas as the Pitāmaha, the ritualists as the Sacrificial Person, the Digambaras as the unshrouded, the Buddhists as the Omniscient, the Mīmāṃsakas as the one shown as he who is to be worshipped, the Logicians as he who will be established by what is set forth (in this work), the Materialists as the one who is established by worldly experience, why say much, whom even artisans worship as the architect of the Universe, in respect of that Lordly Bhava, whose greatness is famous so long as there is the world, like caste, family, sub-family, Vedic School, race, duty etc., whence can there be a doubt ? What is it that is to be considered ?

Yet,

this investigation of the Lord through reasoning, which assumes the name of ratiocination, is undertaken only as worship, which comes in the wake of hearing.

Indeed, the Lord, who has been heard of many times in scripture, law-texts, ancient lores and epics, is now to be ratiocinated ; because there is the scripture—" he is to be heard of, to be ratiocinated " ; and because there is also the law-text :

One attains to the highest yoga by cultivating his intellect in the three ways, through scripture,

through reasoning and through the enjoyment of repeated contemplation.

4. Here, indeed, the points at issue are briefly as follows : (There is no God), because of the absence of a supernatural means for the world beyond ; because of the possibility of resorting to other means for the world beyond ; because of the presence of means of valid knowledge which make known His non-existence ; because of His not being a source of valid knowledge and because of the non-existence of means of valid knowledge for establishing Him.

5. Of these it cannot be the first point ; because,

on account of dependence, on account of beginninglessness, on account of universal observance and on account of the experience (of the result of action) being confined to the same individual, there is a supernatural means.

Indeed, the world constituted of many kinds of miseries does not deserve to be non-dependent. If that were so, either it can only be or it can only not be ; if cannot sometimes be. If it be said that it is not produced from something, it is not so.

6. **It cannot be a denial of the cause or of production ; nor can it be a postulation of itself or something incomprehensible (as cause). To describe it as nature is not in this way, since there is invariableness of limits.**

7. If it is a denial of the cause, since production does not depend on anything, there will be production

always, as there is no difference. If it is a denial of production there will be no existence later just as (there was no existence) prior, as there is no difference. Since what itself was non-existent prior to its production, is incompetent for its own production, there is unreasonableness for the alternative of (production) from itself. And the relation of cause and effect is the rule of being prior and posterior. And the same cannot be both the prior and the posterior, because being such rests on difference. If the cause is something incomprehensible there is the possibility of existence (of the effect) even prior and there again results eternality.

8. Let it be so. By "not from something", it is not merely a denial of cause, nor a denial of production, nor itself being the cause, nor the cause being something incomprehensible, that is meant to be conveyed, but that something, without being dependent at all, has a definite period (of existence) by nature, just as it has a definite (place in) space by nature.

9. We reply. If there is no limit, or if the limit is not invariable, there is the break-down of its existence only sometimes. Indeed, existence only sometimes is not merely being found at a particular time, but (being so) when it did not exist prior. And if there is a limit, that itself, when prior, is called the cause.

10. If it be said, "Let the prior non-existence itself be the limit", it is not so; because at that time there are others also. For, otherwise, it itself cannot be thought of. And as such it cannot be the sole limit,

since there will be no difference. For, if prior non-existence, without anything to depend on, is the limit, even prior to that limit, there is occasion for the effect to exist.

11. If it be said, "Let there be some sort of limits; but they are not depended upon. This is the meaning of (saying it is by) nature," what is meant by "they are not depended upon"? Is it that they are not invariable? Or is it that, though invariable, they are not contributory? In the first alternative, the smoke can have a donkey as limit as well as fire, since there is nothing to regulate. And in the second alternative, what other contribution is wanted? For dependence means only invariableness; that itself is the nature of cause and such a theory of nature is acceptable.

12. If it be said, "This is like the rule of the nature of eternal things. It is not proper to ask why the being itself of Ether cannot pertain to all, in so far as it is not produced from something," it is not so. For what pertains to all cannot be being itself. Indeed the same thing cannot surely be the nature of more than one, since there is contradiction.

13. Now here too the explanation is the same, in that there is contradiction in what exists always having the nature of what exists only sometimes. It is not the same; because if there is no limit or if the limit is not invariable, there is contradiction to existing only sometimes. And if there is a limit which is invariable, there is the adoption of the doctrine of causation.

14. Let it be so. Let there be a prior limit for the later; a posterior one for the earlier; and both limits for what is in-between. For there can be no denial of what is seen.

15. This has to be admitted by you too. There are not, indeed, both the limits for non-existence as in the case of positive things. It shall be so even for such positive things for which the one or the other limit is not observed.

16. It shall not be so. For there is beginning-lessness.

> This course (of cause and effect) is what has no beginning and is not what is differentiated and (at the same time) having a uniform potentiality. One must put forth effort in respect of the true nature of concomittance and non-concomittance.

17. If it be said, "Indeed prior non-existence has a posterior limit and is without a beginning. Even a positive thing like a jar can be so. This is not unacceptable in respect of such jars and other things for which a prior limit is not observed," it is not so. For if by nature such alone be the limit, then the result would be that just as on that day, even on the prior day, taking that as the limit, its effect can come into existence, since there is nothing else to depend on. Similarly (it can exist) even prior and still prior. In respect of positive things, this itself is eternality.

18. If it be said that its nature is that it is to be produced only on that particular day, it is not so. For

even for that day, there is the occasion, according to the previous argument, for existence prior too. Therefore for that also there can be that as prior; similarly even for what is prior to it. Thus there is eternality, rather; but not that there is the production of something without a prior, there being no production by what has not a prior.

19. If it be said, "even so let there be an invariability in respect of individuals, but not in respect of classes," it is not so. For that will occasion the breakdown of the nature (of a thing being) of a definite class. Indeed, if something, even being produced from a mere anything, can have the nature of belonging to a particular class, anything can belong to all classes or to the same class. Similarly, if it be its nature that being of that particular class, it should be produced from something or other definitely, even then there can be produced from everything things that belong to any class or to the same class.

20. How then is it that fire produced from grass, drill or lens belongs to the same class?

21. If it be said that it is due to (the causes) having the same potentiality, it is not so. If even in things belonging to different classes there can inhere the potentiality for the production of things belonging to the same class, in no place can there be the inference of a particular cause from an effect. Nor can from the non-existence of the cause, be concluded the non-existence of the effect of the same class. For even in its non-existence, there is the possibility of its production

from another having the potentiality (for the production) of a thing of that class.

Saṃnyāsin, Sadāś'iva-brahmaṃ by name, and sat at his feet, imbibing Vedānta along with a host of other disciples bent on a similar mission. Then he settled at Tanjore about the year 1894, having undertaken to teach Vedānta to the late Colonel Smart, R. E., who was then the Executive Engineer of the Vennar Division. Soon after this, he was appointed as the Senior Sanskrit Paṇḍit of the Kalyāṇasundaram High School, Tanjore, which place he continued to hold without break till 1932, when he retired therefrom. He spent all his holidays and spare hours in visiting the Mahārājā S'arabhoji Sarasvatī Mahal Library, attached to the Tanjore Palace, a treasure-mine of rare manuscripts in Sanskrit, Telugu, Tamil and other South Indian languages, copying manuscripts of hitherto unpublished works bearing on the Veda-s, S'āstra-s, Itihāsa-s, Purāṇa-s, Dharma-, Gṛhya- and S'rauta Sūtra-s, Tarka, Vyākaraṇa, Mīmāmsa, Vedānta, Saṅgīta, Nāṭya, Āyur-veda and other gems of Sanskrit Literature, ridding them at the same time of all orthographical, etymological and other errors committed by the ignorant scribe, suggesting suitable words to fill up the lacunae, with the glosses, if any, by celebrated commentators, and getting them published in the Kāvya-mālā, the S'ri Vāṇī-vilāsini and other serial publications. He found time to dive deep into the pigeon-holes of private collections of manuscripts at Tanjore and its near-neighbourhood, rescue rare works from oblivion and prepare fair copies for publication of those works for the delectation of all lovers of Sanskrit. The work of deciphering manuscripts involves a close acquaintance with different styles of hand-writing, prevalent in different times, in different parts of the country and a knowledge of the Grantha, Telugu, Malayālam, Canarese and Devanāgari characters, both print and script. He therefore came to acquire proficiency in this difficult art and soon became a linguist of

fair attainments and wrote a very good hand in the several languages, whose visible symbols he had to deal with as his daily hobby. He picked up a knowledge of Hindi and Mahrāṭhi in course of time, which stood him in good stead, when later in life he translated the *Gītā-rahasya* the *Magnum opus* in Mahrāṭhi of the late Loka-mānya Bāla Gaṅgādhara Tilak and in appreciating the beauties of Hindi songs, and the works of Tulasī-dās, Tukārām and Rāmadās and other gifted saints and men of letters of North and West India. As he was an intimate friend of Palamārneri Svāminatha Aiyar and Tiruvādi Sabhesa Aiyar, two of the direct disciples of the famous Mahā-vaidyanātha S'ivan and had also himself listened to several of the music performances of that eminent South Indian exponent of Carnatic music, he managed to master the intricacies of Carnatic music and garnered for his future use the details of the technique of that art. Further, he could play on the Mṛdaṅgam, the Vīṇā, flute, and even Morsing tolerably well, by dint of sedulously practising on those instruments, all with a view to appreciate better the performances of experts and understand at first hand the difficulty involved in making dumb instruments respond to the deft touches of the artiste. In collaboration with the writer of this memoir and other friends of his, he brought out editions of the Sanskrit Text Books prescribed for the First Examination in Arts and the B.A. Degree Examination of the Madras University for a number of years commencing from the year 1900, with Sanskrit commentary, notes and an English rendering. He took a leading part in the Annual Music Conferences held at Tanjore, at the instance of the late Rao Sahib M. Abraham Paṇḍitar of the Karuṇā-nidhi Medical Hall and the several papers contributed by him on Carnatic Music, as an exponent of the

theory of Twenty-two S'ruti-s attracted the attention of all lovers of South Indian Music.

Ever since the Madras Music Academy came to be started, he had been an active member of the Committee of Experts of that Body, had regularly attended all the Annual Sessions of the Academy, contributed various learned disquisitions on the technique of Carnatic Music, helped in the publication of a number of treatises on Indian Music in Sanskrit, both ancient and modern, in the pages of the *Journal* of the Academy and taken a prominent part in the discussions bearing on the characteristics of the several Rāga-s known to Carnatic Music in olden times and at the present day. A Tamil translation of S'ri Veṅkata-makhin's *Catur-daṇḍi-prakās'ikā*, made by him, saw the light of day only very recently. He has also brought out the *Mela-rāga-mālikā* of Mahā-vaidyanātha S'ivan and the *Saṅgraha-cūdāmaṇī* of Govinda, with a critical Introduction on Carnatic Music, in the Adyar Library Series. He encouraged budding authors of Sanskrit Poems, Dramas and musical compositions with a brotherly affection and solicitude, by retouching and even recasting them in a better setting, with a view to get them published. After his retirement from the Kalyāṇasundaram High School, which also synchronized with that of the writer of this memoir, he prevailed upon the latter to devote all his spare time in collaborating with him in the publication of revised editions of *Yoga-sūtra-s* of Patañjali and other works for the Theosophical Publishing House, Adyar, The *Varivasyā-rahasya*, the *Jīvan-mukti-viveka* and the *Saundarya-laharī* were then taken up and jointly produced by the late Paṇḍit and the writer of this memoir, the former being responsible for the Sanskrit portion and the latter for the English portion of those works, as will be borne out by

their Introductions. The first Book of the *Saṅgīta-ratnākara* which has just been completed by the Adyar Library, has been edited by the Paṇḍit with two rare glosses. The Minor Poems of S'ri Rāmabhadra Dīkṣita of Tiruvisanallur, under the name and style of the *Stava-maṇi-mālā* was edited by him to comply with the dying wish of the late T. S. Kuppusvāmi Sastrial of Tiruvisanallur, who had with great difficulty collected copies of the Manuscripts which had almost been lost to us. He saw through the press almost all the Publications of the S'rī Vāṇī-vilāsa Press brought out at considerable cost by his life-long friend, S'rī T. K. Bālasubrahmaṇya Aiyar of S'rīraṅgam, including the *Edition de Luxe* of the complete works of S'ri S'aṅkara-bhagavat-pādācārya. To give a bare list of Sanskrit works, published on his initiative and edited by him, would indeed occupy several pages. Lastly, though not the least of all, with his wonted kindness he undertook to edit and see through the Press the English Translation of the *Yoga-upaniṣad-s*, the *Sāmānyavedānta-upaniṣad-s* and the *Vaiṣṇavopaniṣad-s* by the writer of this memoir, on the basis of the gloss of S'rī Upaniṣad-brahma-yogin. It is of melancholy interest to the writer of this memoir to note here that the final Proof of the *Dattātreyopaniṣad* bears the last mark of the unremitting care and attention bestowed by the Paṇḍit on even the smallest detail of any work undertaken by him, just before retiring to rest for the night when he was called away from the field of his multifarious activities. A fuller and more useful life than the one lead by him is hard to find anywhere. The Sanskrit world and the world of Carnatic Music are the poorer indeed on account of the demise of this indefatigable and unostentatious worker in their cause. May his soul rest in peace !

A RARE MANUSCRIPT OF THE VEDA-BHĀṢYASĀRA OF BHAṬṬOJI DĪKṢITA

By P. K. Gode, M.A.

In the list of works recorded by Aufrecht in his *Catalogus Catalogorum* under the entry[1] "भट्टोजिदीक्षित" no work of the name "वेदभाष्य" or "वेदभाष्यसार" is recorded. Rao Bahadur W. A. Bambardekar also makes no mention of any such work in his recent work[2] on Bhaṭṭoji while giving a complete list[3] of Bhaṭṭoji's works. In view of these facts and in view also of the absence of reliable data regarding Bhaṭṭoji's life and personality I was interested to know from Paṇḍit

[1] *CC*, I, p. 395.

[2] *Bhaṭṭoji Dīkṣita—Jñātiviveka*, Bombay, 1939.

[3] I note here for ready reference the names of 34 works ascribed to Bhaṭṭoji as given by Rao Bahadur Bambardekar :

अद्वैतकौस्तुभ, आचारप्रदीप, आशौचनिर्णय, आह्निकम्, कारिका, कालनिर्णयसंग्रह, गोत्रप्रवरनिर्णय, चतुर्विंशतिमुनिवरव्याख्या, चन्दनधारणविधि, जातकालङ्कार, तत्वकौस्तुभ, तत्वविवेकदीपनव्याख्या, तन्त्रसिद्धान्तदीपिका, तन्त्राधिकारनिर्णय, तर्कामृतम्, तिथिनिर्णय, तिथिनिर्णयसंक्षेप, तिथिप्रदीप, तीर्थयात्राविधि, त्रिस्थलीसेतुसारसंग्रह, तैत्तिरीयसंध्याभाष्य, दशश्लोकीव्याख्या, दायभाग, धातुपाठनिर्णय, प्रायश्चित्तविनिर्णय, प्रौढमनोरमा, बालमनोरमा, भट्टोजिदीक्षितीय, भट्टोजिभट्टीय, मासनिर्णय, लिङ्गानुशासनसूत्रवृत्ति, शब्दकौस्तुभ, श्राद्धकाण्ड, सिद्धान्तकौमुदी. The authorship of Bhaṭṭoji in the case of many of the above works is well known. It is worth while examining doubtful cases.

Raghunātha Kṛṣṇa Pāṭankar of Rajapur [1] that he has come across a rare MS. of the *Vedabhāṣyasāra* of Bhaṭṭoji. Paṇḍit Pāṭankar was also kind enough to send me a copy of this MS. made by himself together with a description [2] of the original.[3] Realizing the importance of this work for the history of Sanskrit literature in general and for the history of Bhaṭṭoji's works in particular, I take this opportunity of thanking Paṇḍit Pāṭankar for the materials for this paper sent by him and at the same time acquainting all students, of Sanskrit literature with the contents of this work in brief.

The copy of the *Vedabhāṣyasāra* before me consists of 16 foolscap pages (about 29 lines to a page) and begins as follows :

"ॐ

वागीशाद्याः सुमनसः सर्वार्थिनामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
माधवाचार्य[4]रचिताद्वेदभाष्यमहार्णवात् ।
श्रीभट्टोजीदीक्षितेन सार उद्धियतेधुना ॥ २ ॥

[1] In the Ratnagiri District of the Bombay Presidency. Pt. Pāṭankar is associated with the Sanskrit Pathashala at Rajapur. There is a Collection of Sanskrit MSS. at this Pathashala.

[2] The MS. of *Vedabhāṣyasāra* is old and in a decaying condition. It was procured by Pt. Pāṭankar from his guru, the late Bāls'āstri Māiṇkar of Khārepāṭaṇ at some distance from Rajapur. The full name of Bāls'āstri is "Bālakṛṣṇa Lakṣmaṇa Maiṇkar."

[3] The original MS. is now deposited with the Sanskrit Pāthashala, Rajapur.

[4] Paṇḍit Pāṭankar's remarks on this manner of mentioning the author of the *Vedabhāṣyasāra* may be noted here :

"**दीक्षितैः** स्वीयव्याकरणग्रंथे श्री**वेदभाष्यकाराणां** माधवाचार्याणां यत्र स्वमतसमर्थने समुल्लेखः क्रियते तत्र "**वेदभाष्यकाराः**" इति सादरं उच्यते, यत्र तेषां खण्डनं तत्र "**यत्तु माधवेनोक्तं**" इति सामान्यतो ह्येकवचनं विधीयते." If this observation is correct we must regard the great grammarian as a "Singular" controversialist in line with other great Paṇḍits of his age.

एतस्मिन्प्रथमोध्यायः श्रोतव्यः संप्रदायतः ।
व्युत्पन्न त्तावता सर्वं बोद्धुं शक्नोति शुद्धधीः ॥ ३ ॥

अध्ययनविधेरर्थावबोधपर्यंतं व्यापार इति भाट्टादिमते अर्थज्ञानमावश्यकमिति स्पष्टमेव अक्षरग्रह . . . . इति विवरणाचार्यादिमतेपि etc ''

The colophons of the *12 vargas* of the work are as follows :

Page 5—" समाप्तो वर्गः "
,, 6—" द्वितीयो वर्गः "
,, 7—" तृतीयो वर्गः "
,, 8—" चतुर्थो वर्गः "
,, 9—" पंचमो वर्गः "
,, 10—" षष्ठो वर्गः "
,, 11—" सप्तमो वर्गः "
,, 12—" अष्टमो वर्गः "
,, 13—" नवमो वर्गः "
,, 14—" दशमो वर्गः "
,, 15—" एकादशो वर्गः "
,, 16—" इति द्वादशो वर्गः ॥ शिवाय नमः ॥

The evaluation of the present work must be left to the students of Sanskrit grammar as the comments of Bhaṭṭoji set forth herein are preponderantly grammatical. That the present work is Bhaṭṭoji's own production is proved by verse 3 quoted above, which explicitly states that Bhaṭṭoji Dīkṣita has composed this *Sāra* on the basis of the *Vedabhāṣya* of Mādhavācārya. In the history of the commentators of the Veda this work of Bhaṭṭoji though brief may have its own place in view of Bhaṭṭoji's reputation as a grammarian. My interest

in the present work is purely of a historical nature as I have been studying of late the historical background of Bhaṭṭoji and his pupils and have published so far[1] some papers pertaining to this field.

Bhaṭṭoji refers to the following works and authors in his *Vedabhāṣyasāra.*

(1) माधवाचार्य P. 1.
(2) वेदभाष्य (माधवाचार्यरचित), P. 1.
(3) भाट्टादिमते, P. 1.
(4) विवरणाचार्यादिमते, P. 1.
(5) महाभाष्य, P. 1.
(6) स्मर्यते, P. 1.
(7) सूत्रकार, P. 2.
(8) ऋग्विधान, P. 2.
(9) श्रुतेः, P. 2.
(10) प्रातिशाख्यात, P. 3, 7.
(11) तैत्तिरीयाः, P. 3.
(12) हरदत्तः, P. 5.
(13) यास्कः, P. 7. 8.
(14) उत्तररत्ने,[2] P. 14. ("पक्षसी तु स्मृतौ पक्षावित्युत्तररत्ने")

[1] These papers are : (1) *A New Approach to the Date of Bhaṭṭoji Dīkṣita* (*Annals*, Tirupati, S. V. Ori. Institute, Vol. 1, pt. 2, pp. 117-127) and (2) *Varadarāja, a Pupil of Bhaṭṭoji Dīkṣita and His Works—Between A.D. 1600 and 1650* (*Festschrift, Prof. P. V. Kane*, 1941, pp. 188-199). I have projected a paper on Nilakaṇṭhā S'ukla *another pupil of Bhaṭṭoji Dīkṣita* who wrote between 1637 and 1656 A.D.

[2] "उत्तररत्ने" is possibly a mis-reading for "उत्तरतन्त्रे", vide my note on उत्तरतन्त्र (*Annals*, B.O.R. Institute, Vol. XXI, 1940, p. 133 footnote 1). उत्तरतन्त्र is part of a lost work on lexicography. It is

I have recorded above whatever data could be gathered from the copy[1] of the MS. supplied to me by Pandit Raghunātha S'āstrī Patankar and I now leave it to scholars to see if the present MS. is a fragment of a larger work of Bhaṭṭoji of the title *Vedabhāṣyasāra* or is a complete work by itself. It is also necessary to examine other works of Bhaṭṭoji with a view to see if he quotes this *Vedabhāṣyasāra*[2] in any of them.

---

mentioned by Nārāyaṇa Dīkṣita in his Commentary on the *Vāsavadattā*, which I have assigned to the period "*between A.D. 1250 and 1550*". See also Aufrecht *CC*, I, 63. Bhaṭṭoji's reference to उत्तरतन्त्र evidently supports my evidence. उत्तरतन्त्र is not recorded by Prof. Rāmāvatāra S'armā in his list of *Kos'as* (Pages LV-LXII of Intro. to *Kalpadru-Kos'a*, Vol. I, G.O.S. Baroda, 1928). Perhaps someday we may recover this lexicon.

[1] Since this paper was drafted Pt. Pāṭankar has sent me the original MS. of the *Vedabhāṣyasāra*. It consists of 9 folios (Size: $11\frac{1}{2}'' \times 4\frac{3}{4}''$); 14 lines to a page, 55 letters to a line. The MS. is written legibly on country paper. It is quite old and worn out. It appears to be about 250 years old and may belong to the 17th century.

[2] Dr. V. Raghavan of the Madras University of whom I inquired about other MSS. of this work writes on 3-7-1941: "We are not able to find any other MS. of a *Vedabhāṣyasāra* by Bhaṭṭoji Dīkṣita."

इत्थमादिशेदित्याह ।

मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् ॥ १ ॥

एतस्मिन् काले मेखलामाबध्नाति । दण्डं च प्रदाय ब्रह्मचर्यमादिशेत् । कथमादिशति ॥

ततो मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् ॥ (१)

ब्रह्मचार्यस्यपोऽशान कर्म कुरु दिवा मा स्वाप्सीराचार्याधीनो वेदमधीष्वेति ॥ २ ॥

ब्रह्मचार्यसि ब्रह्मचारी त्वमसि । अपोऽशानेति । अतः प्रभृत्याचमनं कुरु । इत्येतदुक्तं[1] भवति । कर्म कुरु यच्छास्त्रविहितम् । दिवा मा स्वाप्सीः । दिवाशयनप्रतिषेधः । आचार्याधीनो भव । वेदमधीष्व । सततं शयनपानभोजनादिषु अध्ययनेषु[2] च नित्यमाचार्याधीनेन भवितव्यमित्येतदुक्तं भवति ॥

इदानीं ब्रह्मचार्यसि । अपोऽशान मूत्रपुरीषादौ शास्त्रविहितमाचमनं कुर्वित्यर्थः । कर्म कुरु यच्छास्त्रविहितं कर्म सन्ध्योपासनादि । दिवा मा स्वाप्सीरिति दिवाशयनप्रतिषेधः । आचार्याधीनो नित्यं भव । वेदमधीष्व वेदाध्ययनं कुरु ॥ (२)

द्वादश वर्षाणि वेदब्रह्मचर्यम् ॥ ३ ॥

[1] A. वित्तं extra before इत्येतदुक्तं.

[2] L. अध्ययनादिषु.

द्वादश वर्षाणि वेदब्रह्मचर्यं[1] वेदस्य ब्रह्मचर्यं भवति[2]। अथ वेद-ग्रहणं किमर्थं क्रियते। कथं वेदव्रतस्यैवायं कालनियमः स्यादिति। तेन महानाम्निकादीनामूर्ध्वं द्वादशेभ्यः प्रयोगः। एवं च कृत्वा उपनयनात् प्रभृति षोडशे वर्षे गोदानं भवति। वेदग्रहणादयमर्थः[3] साध्यते। इतरथा हि वेदग्रहणमेव नाकरिष्यत्। एवमेके। अन्ये जन्मनः प्रभृति षोडशे वर्षे गोदानम्। द्वादशेष्वेव वर्षेष्वन्तर्भूतम्। तन्मध्यपातित्वात् माहानाम्नीनां वा पृथग्भावः। कस्मात्। महानाम्नीनां वेदैकदेशत्वात्। तस्मात् सहैवैतैः[4] कालनियमोऽयम्। यदि वैतानि द्वादशसु[5] गण्यन्ते उत्तरेष्वस्य संख्या न प्राप्नोति। त्रिरात्रं द्वादशरात्रं संवत्सरं वेत्यस्य को दोषः। संवत्सरपक्षे गोदानं प्राप्नोति। एष दोषः उपनयनात् पूर्वमिच्छताम्। तेन नादरणीयोऽयं पक्षः[6]। ननु च वेदग्रहणमपार्थकम्। अन्यार्थं वेदग्रहणम्। एकस्य वेदस्य द्वादशवर्षाणि ब्रह्मचर्यम्। द्वयोश्चतुर्विंशतिः। त्रयाणां षट्त्रिंशतिः। चतुर्णामष्टाचत्वारिंशत्। इत्येवमर्थं साधयितुकामेनाचार्येण वेदग्रहणं कृतम्॥

वेदस्य ब्रह्मचर्यं वेदब्रह्मचर्यं। वेदग्रहणं कथं वेदमात्रस्यायं कालनियमः स्यादिति। मन्त्रब्राह्मणयोर्वेदनामधेयम्। तेन महानाम्न्यादीनां व्रतानामूर्ध्वं द्वादश-वर्षेभ्यस्त्रयः संवत्सराः स्युः। एवं च कृत्वोपनयनप्रभृति षोडशे वर्षे गोदानं सिद्धम्। वेदग्रहणादयमर्थो लब्धः। एवमेके। अन्ये तु जन्मप्रभृति षोडशे वर्षे

[1] A. L. have भवति extra after this word.

[2] A. has वेदस्य extra after this word.

[3] A. L. वेदग्रहणादयः

[4] A. L. सहै वतेर्वातेः

[5] A. दाहः सुकरं for द्वादशसु। L. पनि extra after द्वादशसु, perhaps for परि.

[6] A. L. उपचयात्र प्रतीच्छत्वेनादरणीयं पक्षः

ादानं । महानाम्नयादीनां च व्रतानां द्वादशवर्षेष्वन्तर्भावमिच्छन्ति महानाम्नया-
नामपि वेदैकदेशत्वादिति । पूर्वस्मिन् पक्षे यदा संवत्सरं व्रतचर्या तदा सप्तदशे
ादानं स्यात् । तस्मादयमेव पक्षः श्रेयान् । वेदग्रहणं कथमेकैकस्य वेदस्य
दशवर्षाणि ब्रह्मचर्यं स्यादिति । तेन द्वयोश्चतुर्विंशतिः । त्रयाणां षट्त्रिंशत् ।
तुर्णामष्टाचत्वारिंशत् ॥ (३)

ग्रहणान्तं वा ॥ ४ ॥

ग्रहणान्तं वा ब्रह्मचर्यं भवति प्रागूर्ध्वं च द्वादशेभ्यः । एवं कुर्व-
ाचार्येण त्रिविधं स्नानं दर्शितं भवति—विद्यास्नानं व्रतस्नानं विद्याव्रत-
ानमिति । यो द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अधीतविद्यः स्नानं करोति
सौ विद्याव्रतस्नातकः । यः[1] प्राक् द्वादशवर्षेभ्यः विद्यामधीत्य स्नानं
रोति असौ विद्यास्नातकः । यः पुनर्द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अन-
ातविद्यः स[2] व्रतस्नातकः । स तु कांचिद्विद्यामुत्सृज्य स्नानं करोति ।
ाम्या आरण्या[3] इत्युभयलक्षणा च विद्या भवति । तत्र च महानाम्नीनां[4]
त्यानामध्ययनम् । तस्मात्[5] कारणात्तथैव वक्ष्यामः । यां[6] पुनरारण्यां
वते[7] योऽनधीत्य[8] एतां विद्यां अधीयमानोऽपि बर्ही विद्यां[9] स्नानं[10]

[1] L. यश्च.
[2] L. omits स.
[3] A. L. ग्राम्यारण्यां.
[4] L. महानाम्न्यादीनां.
[5] A. L. कस्मात् .
[6] A. L. ये.
[7] A. L. कुर्वते.
[8] A. L. योऽधीत.
[9] A. L. अनधीयानोऽपि विहाय विद्या.
[10] A. L. omit स्नानं and have यः instead.

करोति सः[1] स्नातको न[2] भवतीति । तस्मात्[3] अवश्यमध्ययनं महानाम्नीनाम् । ग्राम्यां तूत्स्रष्टुं[4] विद्यां शक्यम् ॥

वेदग्रहणान्तं वा ब्रह्मचर्यं भवति प्रागूर्ध्वं वा द्वादशभ्यः । एवं ब्रुवता त्रिविधं स्नानं प्रदर्शितं भवति । विद्यास्नानं व्रतस्नानं विद्याव्रतस्नानमिति । प्राग्द्वादशभ्यो वेदमधीत्य यः स्नाति स विद्यास्नातकः । यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अनधीतवेदः स्नाति स व्रतस्नातकः । यस्तु पुनर्द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अधीतवेदः स्नाति स विद्याव्रतस्नातकः । ननु विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञातस्य वा स्नानमिति वक्ष्यति । अतः कथं व्रतस्नानस्य सम्भवः । उच्यते । विद्यान्ते इति न विद्यासमाप्तौ स्नानं चोद्यते । किं तर्हि ? विद्याया अन्ते न मध्ये । तेन व्रतस्नातकोऽपि मध्यमुत्सृज्य अन्तमारण्यकमधीत्य स्नायात् । रहस्ये चारण्यकं प्राधान्येन स्ननिमित्तं चोद्यते । नेदमनधीयन्तस्नातको भवति इत्यादिना । ततः स्विष्टकृदादि समापयेत् ॥ (४)

सायं प्रातर्भिक्षेत ॥ ५ ॥

सायं च प्रातश्च भिक्षां याचेत । आचार्यार्थमात्मनश्चाशनार्थम् । यदा तत्कारणं नास्ति तदा भिक्षा न गृहीतव्या ॥

अहनि रात्रौ चाचार्यार्थमशनार्थं चान्नं याचेत । तत्र भवत्पूर्वमित्यादि शास्त्रान्तरदृष्टो विधिर्द्रष्टव्यः ॥ (५)

सायं प्रातः समिधमादध्यात् ॥ ६ ॥

[1] A. L. omit सः

[2] A. L. omit न.

[3] A. L. यस्मात् .

[4] A. यामकुच्येति । L. यमनूच्येति.

समिदाधानं च सायं प्रातः च[1] करोति । तत्र समिदाधानधर्मा अग्निपरिसमूहनादारभ्योपस्थानान्ताः उक्ताः । तत्र च दर्शितं[2] यथा समिदाधाने भवन्तीति । इह पुनः सायंप्रातर्ग्रहणं न[3] कर्तव्यम् । कस्मात् । प्रकृतत्वात् । तत्[4] क्रियते पूर्वेण सह असंबन्धार्थम्[5] । संबन्धे सति को दोषः । क्रमनियमः प्राप्नोति । तेन क्रमनियमनिवृत्त्यर्थं पुनः सायंप्रातर्ग्रहणम् ॥

अग्निं परिसमूह्येत्याद्युपस्थानान्ता धर्मा भवन्तीत्युक्तम् । पुनः सायंप्रातर्ग्रहणं पूर्वेणासम्बन्धार्थम् । तेन भैक्षं वा पूर्वं भवति समिदाधानं वेति क्रमानियमः सिद्धः ॥ (६)

अप्रत्याख्यायिनमग्रे भिक्षेत अप्रत्याख्यायिनीं वा ॥ ७ ॥

यो हि न प्रत्याचष्टे ईदृग्लक्षणं प्रथमं भिक्षेत । अप्रत्याख्यानशीलः[6] अप्रत्याख्यायी । तं याचेत् । अग्रे प्रथममित्यर्थः । पश्चादन्यान् । तत्र संशयः । किमेतद्भिक्षान्तरं आहोस्विद्याचनोपाय[7] इति । किंचातः । यदि तावद्याचनोपायः[8] अप्रत्याख्यायिनं[9] याचित्वा पश्चादन्येषां[10] नियमः ।

[1] A. L. omit च.
[2] A. तत्र दावति.
[3] L. omits न.
[4] A. omits तत् .
[5] A. L. संबन्धार्थम्.
[6] A. L. अप्रत्या.
[7] A. L. आहोस्विच्छास्त्रोपाय.
[8] A. L. तावच्छास्त्रोपायः
[9] A. अप्रत्याख्यायिनीं. L. अप्रत्यख्यायिनां.
[10] A. पश्चादनोंम. L. पश्चात् (omit अन्येषां).

तस्मादन्यत्रापि[1] याचते । अप्रत्याख्यायिनीं वा स्त्रियं याचेत । तत्र सायं-प्रातः भिक्षेत । तस्यायं विधिः । नेत्युच्यते । भिक्षान्तरमेव गम्यते ॥

अयं नियमोऽनुप्रवचनीयभैक्षे । कुतः अनुप्रवचनीयं भवान् ददात्विति भैक्षमन्त्रात् ॥ (७)

भवान् भिक्षां ददत्विति अनुप्रवचनीयमिति वा ॥ ८ ॥

भिक्षां भवान् ददातु इत्येवं भिक्षां याचेत । अनुप्रवचनीयोपदेशात् गम्यते अनुप्रवचनीयार्थमिदं भिक्षायाचनमिति । भवत्पूर्वमित्येवम् । इदं तु भिक्षायाचनं सर्वेषां वर्णानां भवत्यविशेषात् । यदा तु स्त्रियं याचेत तदा भिक्षां भवती ददातु इत्यनुप्रवचनीयं वेति ॥

स्त्रीभिक्षा चेदुभयत्र मन्त्रे भवती ददात्विति ब्रूयात् ॥ (८)

तदाचार्याय वेदयीत तिष्ठेदहःशेषम् ॥ ९ ॥

तदनुप्रवचनीयार्थं[2] भिक्षामाहृतां आचार्याय वेदयीत । तद्वेदयित्वा[3] तिष्ठेदहःशेषम् । शिष्टं यदह्नस्तावल्लक्षणं स्थानं चोद्यते । आसनं न भवति ॥

तल्लब्धमाचार्याय निवेद्य तस्मिन्नहनि यावच्छिष्टं तावन्तं कालं तिष्ठेत् । आसनादि न कुर्यात् ॥ (९)

अस्तमिते ब्रह्मौदनमनुप्रवचनीयं श्रपयित्वाचार्याय वेदयीत ॥ १० ॥

[1] A. तस्मादन्यापि.

[2] L. omits तत् in the beginning.

[3] L. omits त् in the beginning.

अस्तमिते ब्रह्मौदनं श्रापयति । ब्रह्मणः ओदनः ब्रह्मौदनः । तं श्रपयति ब्रह्मचारी पाकयज्ञविधानेन । अथवा ब्राह्मणानामर्थायायं[1] ओदनं उच्यते । अनुप्रवचनीयमिति वास्य[2] संज्ञा भवति । तं श्रुतमाचार्याय वेदयीत ब्रह्मचारी ॥

ब्रह्मभ्य ओदनो ब्रह्मौदनः । ब्रह्मशब्दो ब्राह्मणवाचकः । तेन ब्राह्मण-भोजनं विधास्यमानमत एव चरोर्भवति । अनुप्रवचननिमित्तमनुप्रवचनीयम् । पाक-यज्ञविधानेन ब्रह्मचारी अनुप्रवचनीयं श्रपयित्वाचार्याय वेदयीत श्रुतः स्थालीपाक इति ॥ (१०)

आचार्यः समन्वारब्धे जुहुयात् सदसस्पतिमद्भुतम्—इति ॥ ११ ॥

पश्चादाचार्यः समन्वारब्धे ब्रह्मचारिणि—सदसस्पतिमद्भुतम्—इत्यनेन मन्त्रेण प्रथमामाहुतिं जुहोति ॥

ततः समन्वारब्धे ब्रह्मचारिणि इध्माधानाद्याघारान्तं कृत्वा अनया जुहुयात् ॥ (११)

सावित्र्या द्वितीयम् ॥ १२ ॥

सावित्री प्रथमा ऋक् । तया द्वितीयां जुहोति । द्वितीयग्रहणम-पार्थकम्[3] । उपदेशादेव द्वितीया भवति । द्वितीयेत्युच्यते अधिकारार्थम् । अधिकारे सति किं प्रयोजनम् ॥

[1] A. ब्रह्मणासामर्थ्यां. L. ब्राह्मणसामर्थ्यात् .
[2] A. वाहन्य. L. वादन्य.
[3] A. L. have तेन extra before द्वितीयग्रहणं.

सावित्री तत्सवितुर्वरेण्यम्—इत्येषा प्रसिद्धा । द्वितीयग्रहणमुत्तरार्थम् ॥(१२)

यद्यत् किञ्चात उर्ध्वमनूक्तं स्यात् ॥ १३ ॥

यदि नोच्यते यद्यत्किंचात ऊर्ध्वमिति तृतीया प्रसज्येत । अतोऽधिकारः क्रियते । कथम् । अनूक्तेन सावित्र्या च एका आहुतिः स्यादिति । यद्यत् किंचात ऊर्ध्वमित्युक्तं भवति । तत्रानेकधा प्रतिपन्नाः । केचित्तावत्प्रतिमण्डलं होममिच्छन्ति । अन्ये[1] प्रत्यनुवाकम् । अन्ये प्रतिसूक्तम् । प्रत्यृचमपरे । सर्वथा चोपपद्यते । यः शक्यते स कर्तव्यः । अस्य तु वाक्यस्य नैवायमर्थः । किं कारणम् । अनुशब्देनोदितत्वात् । यत्रानुशब्दो भवति तत्रानुप्रवचतीयं प्राप्नोति । यथा महानाम्नी सुकृतमिति व्रतानुप्रवचने प्राप्नोति । उपनिषदि च तत्र प्रत्यृचमिच्छन्ति ॥

अत्र सावित्री अनूक्तेति कृत्वा सावित्र्या द्वितीयं जुहोति । अत ऊर्ध्वमपि महानाम्नयादिव्रतेषु यद्यदनूक्तं तेन तेन द्वितीयं जुहोति । एतदुक्तं भवति । महानाम्नयादिव्रतेषु श्रवणान्ते अनुप्रवचनीयहोमः कार्यः । तत्र सावित्र्याः स्थाने—महानाम्नीभ्यः स्वाहा । महाव्रताय स्वाहा । उपनिषदे स्वाहा—इत्येवं द्वितीयं जुहोति । अन्यत् समानमिति । द्वितीयग्रहणं महानाम्नयादिनामधेयेन होमार्थम् । इतरथा मन्त्रेण होमे क्रियमाणे प्रतिमन्त्रं स्वाहाकारः स्यात् । स च प्रदानार्थ इति कृत्वा अनेका आहुतयः स्युः । ततश्चोत्तरासां द्वितीयत्वं न स्यात् । तस्मात् द्वितीयग्रहणम् ॥ (१३)

ऋषिभ्यस्तृतीयम् ॥ १४ ॥

तत्र संशयः किमयं मन्त्रः उत उपदेश इति । येषां मन्त्रः तेषां ऋषिभ्यः स्वाहा इति प्राप्नोति । येषामुपदेशः तेषां यावन्त ऋषय

[1] A. has न्येतृच extra before अन्ये.

उक्ताः तेषां प्रत्यृषि होमः प्राप्नोति । तत्रायं मन्त्र इत्युच्यते । कथं पुनर्ज्ञायते[1] । तृतीयग्रहणात् । नेत्युच्यते । तृतीयग्रहणस्येदं प्रयोजनम् । द्वितीयग्रहणेऽनुवर्तमाने अयमपि[2] द्वितीय एव स्यात् । तस्मात्तृतीयग्रहणं कर्तव्यम् । अथ ऋषिभ्यस्तृतीयमिति संख्यावचनं किमर्थम् । तत्राप्यापातत अन्या ऋषयः । तत्रानेकषष्ट्या ऋयय्योच्चदासवानुच्यते (?) । तृतीयां आहुतिमिच्छन्ति । तत्प्रयोजनम् । एवमेकेऽनुप्रवचनमिच्छन्ति । बहुधा चात्र विप्रतिपत्तिः । आगमस्त्वयं चानुपवचनीयो महानाग्नीषु महाव्रते उपनिषदि च इति । नान्यत्रेति । एवं ब्रुवतामृषिभ्य इति मन्त्रोऽयमिति ज्ञापितं भवति ॥

तृतीयवचनमृषिभ्य इत्यस्य विधायकत्वं निवर्त्य मन्त्रत्वज्ञापनार्थम् । तेन ऋषिभ्यः स्वाहेति जुहोति ॥ (१४)

सौविष्टकृतं चतुर्थम् ॥ १५ ॥

अथ संख्याविधानानि किमर्थानि । नियमार्थानि । नियमे सति आज्यभागो निवर्तते ॥

सङ्ख्यावचनं नियमार्थम् । चतुर्थमेव न षष्ठमिति । तेनाज्यभागौ न भवतः ॥ (१५)

ब्राह्मणान् भोजयित्वा वेदसमाप्तिं वाचयीत ॥ १६ ॥

तत एव ब्रह्मचारिणश्चरोः ब्राह्मणान् भोजयति । कस्मात् । अधिकृतत्वात् । तस्य च ब्राह्मणार्थत्वात् ॥

[1] The commentary on the Sūtra up to this is missing in A. and L. It is restored from Trivandram MS. Perhaps a portion at the end of the last Sūtra is also lost.

[2] A. L. प्रथम for अयमपि.

संस्थाजपान्तं कृत्वा ब्राह्मणान् भोजयित्वा वेदसमाप्तिं भवन्तो ब्रुवन्त्विति ब्रूयात् । ते च वेदसमाप्तिरस्त्विति ब्रूयुः ॥ (१६)

अत उर्ध्वमक्षारलवणाशी ब्रह्मचार्यधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा ॥ १७ ॥

अत ऊर्ध्वमेते नियमा भवन्ति[1] । अक्षारलवणाशित्वम् । ब्रह्मचारिग्रहणमाचार्यनिवृत्त्यर्थम् । कियन्तं कालमिति । त्रिरात्रं द्वादशरात्रं संवत्सरं वेति । अत ऊर्ध्वमिति कस्मात् । संबन्धकरणार्थम् । संबन्धे किं प्रयोजनम् । कथमेतानि व्रतानि अत ऊर्ध्वमेव स्युः न प्रागिति सिद्धं भवति । प्राक्[2] भोजने अक्षारलवणाशित्वं न प्रसज्येत । भुक्तवन्तं अभुक्तवन्तं वा[3] कुमारमुपनयन्तीत्यनियमः[4] सिद्धो भवति ॥

अत ऊर्ध्वमिति कस्मात् । पूर्वेण सम्बन्धकरणार्थम् । प्रयोजनमुपरिष्टाद्वक्ष्यामः । ब्रह्मचारिवचनमाचार्यनिवृत्त्यर्थम् ॥ (१७)

चरितव्रताय मेधाजननं करोति ॥ १८ ॥

योऽयं नियम उक्तः तस्यान्ते मेधाजननं नाम[5] कर्म करोति[6] । चरितव्रतायेति न वक्तव्यम् । तदपि सम्बन्धार्थमेव । संबन्धे सति किं प्रयो-

[1] A. L. अत ऊर्ध्वमिति नियमार्थं भवति.

[2] A. L. यत् for प्राक्.

[3] A. L. omit अभुक्तवन्तं वा.

[4] A. कुमारमुपनयन्तीत्यर्थं नियमः L. कुमारमुपनयन्तीत्यत्र नियमः

[5] A. L. omit नाम.

[6] A. L. तत्करोति.

जनम्। यत्र मेधाजननं तत्र कथं ब्रह्मचर्यं स्यादिति। यत्र ब्रह्मचर्यं तत्रानुप्रवचनीयम्। एतत्प्रयोजनम्। क्व पुनः मेधाजननं नामास्ति। उत्तरत्र वक्ष्यति—कृताकृतमिति। तत्र व्रतस्यास्य कृताकृतत्वं भवति॥

चरितव्रतायेति वचनं मेधाजनेन व्रतस्य सम्बन्धार्थम्। यत्रोपनयने मेधाजननमस्ति तत्रैव व्रतचर्या। यत्र व्रतचर्या तत्रैवानुप्रवचनीयम्। उपनीतपूर्वस्य मेधाजननाभावे त्रितयमपि निवर्तते॥ (१८)

अनिन्दितायां दिश्येकमूलं पलाशं कुशस्तम्बं वा पलाशापचारे प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चन्तं वाचयति—सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा अस्येवं मां सुश्रवः सुश्रवसं कुरु। यथा त्वं देवानां यज्ञस्य निधिपोऽस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासम्—इति॥ १९॥

तत्र तिस्रो दिशः निन्दिताः दक्षिणा प्राग्दक्षिणा प्रत्यग्दक्षिणेति। अन्याः सर्वा अनिन्दिताः। एकमूलं पलाशं त्रिशाखमित्यर्थः। परिषिञ्चति। कुशस्तम्बं वा पलाशापचारे। पलाशाभावे कुशस्तम्बं वा परिषिञ्चति। अथ पुनः पलाशग्रहणं कुर्वन्नेतत् ज्ञापयति। अनेकमूलस्याप्यभावे कुशस्तम्बं परिषिञ्चेत। ब्रह्मचारी परिषिञ्चति। तं परिषिञ्चन्तं आचार्यस्त्रिरेव वाचयति। सुश्रव इत्येतं मन्त्रम्[1]। एतावदुपनयनम्॥

इदं मेधाजननं। तिस्रो निन्दिता दिशः। दक्षिणा प्राग्दक्षिणा प्रत्यग्दक्षिणेति। अन्याः सर्वा अनिन्दिताः। तस्यां दिश्येकमूलं पलाशं कुशस्तम्बं वा पलाशाभावे। प्रदक्षिणमुदकुम्भेन त्रिः परिषिञ्चन्तं ब्रह्मचारिणं

[1] A. L. have only इत्यन्तं for इत्येतं मन्त्रम्.

वाचयति सुश्रवः इति मन्त्रम् । एकमूलमशाखमित्यर्थः । पुनः पलाशग्रहणमनेकमूलस्याप्यभावे कुशस्तम्बं परिषिञ्चेदिति ॥ (१९)

एतेन वापनादिपरिदानान्तं व्रतादेशनं व्याख्यातम् ॥ २० ॥

वापनादिपरिदानान्तं यत्कर्म तद्व्रतादेशनं कर्तव्यमित्यर्थः । वापनादिग्रहणमलंकारनिवृत्त्यर्थम् । काय त्वा परिददामीति परिदानम्[1] । परिदानग्रहणं उत्तरकर्मनिवृत्त्यर्थम्[2] ॥

व्रतादेशनं यदस्माभिर्व्याख्यातं संवत्सरावमं चारयित्वा व्रतमनुयुज्य इति संवत्सरमादिशेत् इति च । तत्राप्येतेन प्रकारेण वापनादि परिदानान्तं कार्यमित्यर्थः । वापनादिग्रहणमलङ्कारनिवृत्त्यर्थं । काय त्वा परिददामि इत्येतत्परिदानम् । परिदानान्तवचनमुपरितनतन्त्रनिवृत्त्यर्थम् ॥ (२०)

इत्यनुपेतपूर्वस्य ॥ २१ ॥

उपनयनविधानं अनुपेतपूर्वस्य भवति । उत्तरविवक्षयेदमारभ्यते । उपेतपूर्वस्य विशेषं वक्ष्यति ॥

एतदुपनयनविधानमनुपेतपूर्वस्य । उत्तरविवक्षयेदमारभ्यते ॥ (२१)

अथोपेतपूर्वस्य ॥ २२ ॥

यं विशेषं वक्ष्यामः स उपेतपूर्वस्य भवति ॥

अनन्तरमुपेतपूर्वस्य विशेषं वक्ष्यामः ॥ (२२)

[1] A. L. परिदानानन्तरम् .

[2] A. L. इत उत्तरं for परिदानग्रहणं उत्तर.

कृताकृतं केशवपनं मेधाजननं च ॥ २३ ॥

कृताकृतं केशवपनं[1] भवति । मेधाजननं च कृताकृतं भवति ॥

कृताकृतमिति वर्तते ॥ (२३)

अनिरुक्तं परिदानम् ॥ २४ ॥

अनिरुक्तं परिदानमुच्यते[2] ॥

परिदानमनिरुक्तमिति न भवतीत्यर्थः ॥ (२४)

कालश्च ॥ २५ ॥

कालश्चानियतः ॥

उदगयनादिरनिरुक्तः ॥ (२५)

तत्सवितुर्वृणीमहे—इति सावित्रीम् ॥ २६ ॥

पूर्वस्याः सावित्र्याः स्थाने एतां सावित्रीं प्रयुञ्जीत । प्रायश्चित्तत्वेन पनरुपनयनप्राप्तौ एवं कुर्यात् ॥ (२६)

इति प्रथमे द्वाविंशतितमा कण्डिका

---

[1] A. has only वपनं L. omits केशवपनं.

[2] A. L. परिदानोच्यते.

ऋत्विजो वृणीतेऽन्यूनानतिरिक्ताङ्गान् ये मातृतः पितृतश्चेति यथोक्तं पुरस्तात् ॥ १ ॥

ऋत्विजो वृणीते संभजन्ते[1] । कर्मार्थं परिग्रहं करोति । एतदुक्तं भवति । अन्यूनान् वृणीते अनतिरिक्तांश्च । किं षोडशभ्यः[2] अन्यूनान् अनतिरिक्तांश्च[3] । नेत्युच्यते । प्रमाणतः परिमाणतश्च[4] । तत्र प्रमाणतो नातिदीर्घाः नातिह्रस्वाः । परिमाणतश्च पञ्चाङ्गुलय इति[5] । षडङ्गुलयस्त्रिरङ्गुलयो वा न भवन्ति । एवं शास्त्रोक्तात् प्रमाणात् परिमाणाच्चान्यूनांश्चानतिरिक्तांश्च भवन्ति । ये मातृतः पितृतश्चेति व्याख्यातं पुरस्तात् । यादृशैः ऋत्विग्भिर्भवितव्यम् ॥

प्रमाणतः परिमाणतश्चान्यूनाङ्गाननतिरिक्ताङ्गांश्च ऋत्विजः सम्भजन्ते । ये मातृतः पितृतश्चेत्युक्तलक्षणयुक्ताश्च ते भवेयुः । तत्र प्रमाणतो नातिदीर्घा नातिह्रस्वाः । परिमाणतश्चतुरङ्गुलयः षडङ्गुलयो वा न भवन्ति ॥ (१)

यून ऋत्विजो वृणीत इत्येके ॥ २ ॥

एके आचार्या युवानो वरयितव्या इति मन्यन्ते । पञ्चधा वयः कल्पन्ते । बालो युवा मध्यो वृद्धः स्थविर इति । तत्र ये युवानस्तेषां वरणमिच्छन्ति । अन्ये पुनः कर्मकरणसमर्थानां वरणमिच्छन्ति । अथ ऋत्विगधिकारे वर्तमाने ऋत्विग्ग्रहणं किमर्थम् । अनृत्विजां मा भूदिति ।

[1] A. L. वसन्ते.
[2] A. कि . . . शौत्यः
[3] L. omits the entire sentence from किं.
[4] A. L. omit परिमाणतः
[5] After इति there is a long break in A. up to कौषीतकि in Sūtra 5.

नैवानृत्विजां प्राप्नोति । उच्यते[1] । वरणसामान्यादनृत्विजामयं[2] गुणः प्रसज्येत । तन्निवृत्त्यर्थमृत्विग्ग्रहणम् । के[3] पुनस्ते । चमसाध्वर्यवः ॥

अन्ये कर्मसमर्थानित्याहुः । पुनर्ऋत्विग्ग्रहणं वरणसामान्यादनृत्विजामपि चमसाध्वर्युप्रभृतीनामेतद्गुणप्राप्तौ तन्निवृत्त्यर्थम् ॥ (२)

ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारमथाध्वर्युमथोद्गातारम् ॥ ३ ॥

तत्र ब्रह्मणः प्रथमं वरणमुपदिश्यते । पश्चाद्धोतुरध्वर्युरुद्गातुरिति । ब्रह्माणमेवेत्येवकारः किमर्थः । अवधारणार्थः । किमर्थं अवधारयति[4] । ब्रह्मणः प्रथमं वरणं यथा स्यादिति । यद्येवं नार्थः एवकारेण । उपदेशादेव ब्रह्मणः प्रथमं सिद्धम् । एवं तर्हि नियमार्थ एवकारः । कथं ब्रह्मणः कुर्वन् होत्रादीनामनियतः क्रमो भवतीति ॥

एवकारो नियमार्थः । कथं ब्रह्मण एव प्रथमं वरणं स्यादिति । एवं नियमं कुर्वता होत्रादीनामनियतः क्रमो भवतीत्येतत् साधितम् ॥ (३)

सर्वान् वा येऽहीनैकाहैर्याजयन्ति ॥ ४ ॥

सर्वान् वा वृणीते येऽहीनैकाहैर्याजयन्ति । तत्राहीनैकाहग्रहणं न कर्तव्यम् । सर्वान् वेत्युच्यमाने शमित्रादीनामपि वरणं प्राप्नोति । ऋत्विगधिकारान्न भविष्यन्ति । येषां चत्वार[5] ऋत्विजस्तेषां भवत्येव प्रयोजनम् ।

[1] L. उग्र for उच्यते.
[2] L. वरणसामान्यादृत्विजामयं.
[3] L. केन for के.
[4] L. omits अव.
[5] L. omits the word.

कथम्। सर्वान् वा कर्तॄन्[1] इत्यध्याहारः कर्तव्यो भवति। तस्मात्[2] ऋत्विक्शब्दस्याध्याहारो न शक्यते कर्तुम्। कस्मात्। वरणस्याम्नातत्त्वात्। सर्वेषां तेन कर्तॄणामिति[3] वा ध्याहारः[4] क्रियते। एवं सति शमित्रादीनामपि प्रसज्येत। तन्निवृत्यर्थं अहीनैकाहग्रहणं कर्तव्यम्। येषां पुनः ऋत्विक्शब्दोऽयं सर्वेषु वर्तते तेषामेवातिरिच्यते। तेषामपि तदेव प्रयोजनं सर्वेषु वर्तते—प्रतिप्रस्थातादिषु होत्रका उपह्वयध्वमिति। ननु च ऋत्विगधिकारात् भविष्यति। उच्यते। स्यात्। कस्मात्। अत्र ऋत्विग्वरणदर्शनात्। उच्यते। अभिधानान्न भविष्यति। सामान्यवरणेन प्रसङ्गः स्यात्। आपो मे होत्रेत्यत्र होत्रशब्दात्। उच्यते। होतृशब्दोऽयं अहोतृषु ऋत्विजेष्वपि वर्तते। एवं शमित्रादिष्वपि यथा स्यात्। न सामान्येन वरणं स्यात्। शमितृनिवृत्त्यर्थं वचनमिदमारभ्यते अहीनैकाहैर्याजयन्ति इति ॥

अहीनैकाहैर्याजयन्तीति वचनं शमितृनिवृत्त्यर्थम्। कथं वा प्राप्नुयात्। सामान्यवरणप्रसङ्गात्। आपो मे होत्राशंसिन इति होत्रकान् इत्यत्र होत्रकशब्दो मुख्यवर्जितेषु वर्त्तते। होत्रका उपह्वयध्वमितीतरान् इत्यत्र मुख्यवर्जितेषु होत्रकशब्दस्य दर्शनात्। ततश्च यथा प्रतिप्रस्थात्रादिषु वर्त्तते एवं शमित्रादिष्वपि वर्त्तते होत्रकशब्द इति ॥ (४)

सदस्यं सप्तदशं कौषीतकिनः समामनन्ति। स कर्मणामुपद्रष्टा भवतीति। तदुक्तमृग्भ्याम्—यमृत्विजो बहुधा कल्पयन्ते—इति ॥५॥

[1] L. कर्तृक.
[2] L. omits इत्यध्याहारः कर्तव्यो भवति। तस्मात्.
[3] L. कर्तृनिति.
[4] L. वाक्याध्याहारः.

सदसि भवः सदस्यः । सप्तदशो भवतीति कौषीतकिन[1] आचार्या मन्यन्ते । किमसौ करोति । स कर्मणामुपद्रष्टा भवतीति । उपद्रष्टेति यागसहायत्वमसौ करोतीति । असावध्वर्युः । ऋग्भ्यामभिहितो भवति यस्मृत्विज[2] इति । तत्र सप्तदशग्रहणं न कर्तव्यम् । उपदेशादेवायं सप्तदशो भवति । एवं सिद्धे यत् सप्तदशग्रहणं[3] करोति तत् ज्ञापयति—अयमपि ऋत्विक्सधर्मा भवतीति । ऋत्विक्सधर्मत्वे किं[4] प्रयोजनम् । उपस्थानं प्रसर्पणमित्येवमादि सामान्यं[5] कर्म प्रसिद्धं भवति । अथवा सप्तदशग्रहणं नियमार्थम् । कथमेक एव सदस्यः स्यादिति । अन्येषां मते यः[6] सदस्यो दृष्टः तन्निदर्शनार्थं सप्तदशग्रहणम् । कौषीतकिनः[7] कल्पे समामनन्ति । न सूत्रतः । कथमेतद्गम्यते । मन्त्रलिङ्गोपदेशात् ॥

सदसि भवः सदस्यः । सप्तदशग्रहणमृत्विक्सधर्मा भवतीति ज्ञापनार्थम् । तेनोपस्थानप्रसर्पणादि सामान्यविहितं सिद्धम् । अथवा नियमार्थम् । कथमेक एव सदस्यः स्यादिति । शास्त्रान्तरेऽनेके सदस्या दृष्टाः । तन्निवृत्त्यर्थम् । स च कर्मणा-मुपद्रष्टा भवतीत्येवं कौषीतकिन आचार्या मन्यन्ते । ऋग्भ्यां चायमर्थ उक्तः ॥ (६)

होतारमेव प्रथमं वृणीते ॥ ६ ॥

एवकारोऽवधारणार्थः । किमवधारयति । होतारमेव प्रथमं वृणीते न ब्रह्माणम् । एवं सति ब्रह्मण उपदेशोऽपार्थकः । उच्यते । नापार्थकः ।

[1] The break in A extends up to कौषीतकि.

[2] A. ऋग्भ्यामभिहितोयमृत्विज.

[3] A. L. omit from न कर्तव्यम् up to सप्तदशग्रहणम्.

[4] A. सधर्मत्वे किं L. सधर्मलोकम्.

[5] A. L. समान.

[6] A. L. कः.

[7] The break in A extrends up to कौषीतकि.

विनिविष्टविषयावेतौ । यदा चतुर्णां वरणं तदा ब्रह्मण एव नान्यस्य । यदा सर्वेषां वरणं तदा होतुरेव नान्यस्येति । द्वयोरवधारितयोः होतृब्रह्मणोः[1] विकल्पमिच्छन्ति ॥

एवकारोऽवधारणार्थः । होतारमेव न ब्रह्माणमिति । एवं चेत् पूर्वेण विरोधः । न । यदा चतुर्णां वरणं तदा ब्रह्मणः प्रथमं वरणम् । यदा सर्वेषां तदा होतुः प्रथमं वरणमिति ॥ (६)

अग्निर्मे होता स मे होता होतारं त्वामुं वृणे—इति होतारम् ॥ ७ ॥

अग्निर्मे होतेत्यनेन मन्त्रेण वृणीते होतारम् । तत्र होतृग्रहणमपार्थकम् । कस्मात् । अधिकृतत्वात् । उच्यते । होतृग्रहणं प्रयोजनार्थं क्रियते । किं प्रयोजनम् । प्रथममेव वरणे होतुरयं[2] मन्त्रः । द्वितीयवरणे न स्यात् । इष्यते च । तदर्थं होतृग्रहणं क्रियते ॥

अनेन होतारं वृणीते । अमुमित्यस्य स्थाने होतुर्नाम वाच्यम् । पुनर्होतृग्रहणं होतृवरणे आम्नातो मन्त्र उत्तरत्रानुवर्त्तते इति ज्ञापनार्थम् ॥ (७)

चन्द्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वामुं वृणे—इति ब्रह्माणम् ॥ ८ ॥

अयं ब्रह्मणो वरणे मन्त्रः । उत्तरेषां चानुप्रदर्शनार्थः[3] ॥

कृत्स्नपाठोऽनुवृत्तिमार्गप्रदर्शनार्थः ॥ (८)

[1] A. L. omit होतृ.

[2] A. वरणं प्रथमते. L. वरणं प्रथमेते.

[3] A. has कृष्णो घ्यन्तय extra after this. L. omits उत्तरेषां चानुप्रदर्शनार्थः.

आदित्यो मेऽध्वर्युः—इत्यध्वर्युम् । पर्जन्यो म उद्गाता—इत्युद्गातारम् । आपो मे होत्राशंसिन्यः—इति होत्रकान् । रश्मयो मे चमसाध्वर्यवः—इति चमसाध्वर्यून् । आकाशो मे सदस्यः—इति सदस्यम् । स वृतो जपेत्—महन्मेऽवोचो भगो मेऽवोचो भगो मेऽवोचो यशो मेऽवोचः स्तोमं मेऽवोचः कॢप्तिं मेऽवोचस्तृप्तिं मेऽवोचो भुक्तिं मेऽवोचः सर्वं मेऽवोचः—इति ॥ ९ ॥

आदित्यो मेऽध्वर्युरित्यध्वर्युं वृणुयात् । पूर्ववदनुवृत्तिर्मन्त्रस्य । पर्जन्यो मे उद्गातेत्युद्गातारं वृणोति । आपो मे होत्राशंसिन्य इति होत्रकान् । तत्र होत्रका[1] उपह्वयध्वमित्येतत् । रश्मयो मे चमसाध्वर्यव इति चमसाध्वर्यून् वृणोति । आकाशो मे सदस्य इति सदस्यं वृणोति । स वृतो जेपत्—महन्मेऽवोचः इत्येतं मन्त्रम् । स इत्येतदतिरिच्यते । तद्वक्ष्यते । अन्यतरस्य मा भूदिति । वरणग्रहणाद्भविष्यति सर्वेषाम् । एवं तर्हि सग्रहणं क्रियते कथं वरणादनन्तर एवायं जपः स्यादिति । इतरथा हि सर्वेषां यदा[2] वरणं कृतं स्यात्तदा ग्रहणं स्यात् । तथा मा भूदिति । तेन सग्रहणमनन्तरार्थं क्रियते ॥

सग्रहणं कथम् । वरणानन्तरमेव जपः स्यात् सर्वेषां वरणे कृते माभूदिति । वृतग्रहणं ये ये वृतास्ते ते जपेयुरित्येवमर्थम् ॥ (९)

जपित्वा—अग्निष्टे होता स ते हाता होताहं ते मानुषः—इति होता प्रतिजानीते ॥ १० ॥

जपित्वा अग्निष्टे होतेत्यनेन मन्त्रेण होता प्रतिजानीते । अथ जपित्वेति जपग्रहणं भूयः कथं क्रियते । कथमन्यमपि जपित्वा प्रतिजानीया-

[1] A. has के extra before this.

[2] A. L. omit यदा.

दिति । कः पुनरसौ जपः । तन्मामवतु तन्मा विशतु इत्ययम् । उच्यते । यद्येवं कस्मादसौ जप इहैव न पठ्यते । अनित्यत्वादिह नोपदिश्यते । कथं पुनरसावनित्य इति । तदुत्तरत्रैव वक्ष्यामः ॥

जपित्वेति वचनं तन्मामवतु तन्मा विशतु इत्येतमपि जपं जपित्वेत्येवमर्थम्। इहैव तर्हि कस्मान्न पठितः । अनित्यत्वात् । अनित्यत्वन्तु वक्ष्यामः ॥ (१०)

चन्द्रमास्ते ब्रह्मा स ते ब्रह्मा ॥ ११ ॥

इति ब्रह्मा प्रतिजानीते[1] ॥

तेशब्दपाठः प्रतिवचनस्यानुवृत्तिमार्गप्रदर्शनार्थः ॥ (११)

एवमितरे यथादेशम् । तन्मामवतु तन्मा विशतु तेन भुक्षिषीय— इति च याजयिष्यन् ॥ १२ ॥

इतरे अध्वर्य्वादयः यथादेशं प्रतिजानते[2] । तन्मामवतु तन्मा विशतु इत्येतं मन्त्रं याजयिष्यन् जपति । अस्ति पुनः कश्चित् अयाजयिष्यन्[3] यो हि ब्रियते । अस्तीति ब्रूमः । यदा अग्न्याधेये चतुर्णां वरणं भवति तदा अयाजयितारस्ते भवन्ति । ननु च तत्रापि वै याजयितारस्ते भवन्तीति । तदसंवरणम् । सर्वकर्मार्थं वरणमिति । यत्र सोमाङ्गं वरणं तत्रासौ याजयिष्यति । तेन तत्रायं जपो भवति । तेनायमनित्यः ।

[1] A. L. omit this passage.
[2] A. L. प्रतिजानीते.
[3] A. L. अयाजयिष्यन्त इति.

ईदृग्लक्षणैः ऋत्विग्भिः कर्तव्यम् । एतदुक्तं भवति । कथं कीदृग्लक्षणैर्याजयितव्यमित्युच्यते ॥

जपतीति शेषः । यदा अग्न्याधेये चतुर्णां वरणं भवति तदा याजयितारस्ते न भवन्ति । यत्तु सोमाङ्गं वरणं भवति तत्र याजयितारो भवन्ति । तेन सोमाङ्गवरणे एवायं जपो नाग्न्याधेये । तेनायमनित्यः ॥ (१२)

न्यस्तमार्त्विज्यमकार्यम् ॥ १३ ॥

न्यस्तं त्यक्तम् । यदा विवादेन आर्त्विज्यं त्यक्तं भवति तदा न कर्तव्यम् । अन्यस्य कृतं आर्त्विज्यं न कर्तव्यम् । एवं सति अहीनानामुपदेशोऽपार्थकः । तस्मात्पाठान्तरं वर्णयति ॥

ऋत्विग्भिर्विवादेन त्यक्तमार्त्विज्यमकार्यम् ॥ (१३)

अहीनस्य नीचदक्षिणस्य ॥ १४ ॥

नीचदक्षिणस्य अल्पदक्षिणस्येत्यर्थः । तस्य न कर्तव्यमिति वर्णयन्ति । एवं वर्णयत् अल्पदक्षिणा भवन्तीत्येतत्प्रदर्शितं भवति । श्रुतिदर्शनाच्च । तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यप्यल्पिकापीति । ये वा अहीना यथोक्तदक्षिणाः तत्र कर्तव्यं इति श्रुतिर्दर्शयति । न पापः पुरुषो याज्यो द्वादशाहेन—इत्युक्त्वा पश्चाद्ब्रूते[1]—तस्माद्यद्याज्यः प्रतिगृह्णन्तो वैते तमयाजयन् । तस्मात्प्रतिगृह्णता याज्यम्—इति । तदेतत् ज्ञापयति । यथोक्तदक्षिणे अहीनाः कर्तव्या इति ॥

[1] A. यत्वादते L. यज्वादृते.

अल्पदक्षिणस्याहीनस्यार्त्विज्यमकार्यम् । ततो ज्ञायते एकाहस्याल्पदक्षिणस्यापि कार्यमिति । विज्ञायते च तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यप्यल्पिकापीति ॥ (१४)

व्याधितस्यातुरस्य ॥ १५ ॥

व्याधितस्यातुरस्य च न कर्तव्यमार्विज्यम् ॥

व्याधितो ज्वरादिगृहीतः । आतुरस्तल्पगतः ॥ (१५)

यक्ष्मगृहीतस्य ॥ १६ ॥

यक्ष्मगृहीतस्य च न कर्तव्यम् ॥

यक्ष्मगृहीतः क्षयव्याधिगृहीतः ॥ (१६)

अनुदेश्यभिशस्तस्य ॥ १७ ॥

यः सहदेशिना अभिशस्तस्तस्य च न कर्तव्यमार्विज्यमित्येके । अन्ये पुनरनुदेश्यभिशस्त इति श्राद्धे यः प्रतिषिद्धस्तस्य न कर्तव्यमिति[1] ॥

सदेशिनाभिशस्तस्यैवमेके । अन्ये तु श्राद्धे प्रतिषिद्धस्येत्याहुः ॥ (१७)

क्षिप्तयोनेरिति चैतेषां ॥ १८ ॥

क्षिप्तयोनिरिति यस्य माता एकस्मिन् भर्तरि नावतिष्ठते सः[2] । तस्य च न कर्तव्यम् । एतेषामन्येषां चैवं प्रकाराणाम् ॥

[1] A. omits from एके । अन्ये पुनः up to this.

[2] A. L. omit सः .

क्षितयोनिर्नाम यस्य माता स्तभर्त्तरि नावतिष्टते। अकार्यमिति सर्वत्र सम्बन्धनीयम्। इति चैतेषामिति वचनमन्येषामप्येवंप्रकाराणां न कार्यमित्येवमर्थम् ॥ (१८)

सोमप्रवाकं परिपृच्छेत्—को यज्ञः क ऋत्विजः का दक्षिणा—इति ॥ १९ ॥

सोमं यः प्रथमं निवेदयति असौ सोमप्रवाक इत्युच्यते। तं पृच्छेत्। किमिति। को यज्ञः के ऋत्विजः का दक्षिणा इति। एवं पृच्छेत् ॥

यः सोमं प्रथमं निवेदयति इदं त्वया अस्मिन् कार्यमिति स सोमप्रवाकः। तमेवं पृच्छेत् ॥ (१९)

कल्याणैः सह सम्प्रयोगः ॥ २० ॥

पृष्ट्वा कल्याणो यज्ञः कर्तव्यः। अप्रतिषिद्ध इत्यर्थः। तथा कल्याणैः ऋत्विग्भिः सह कर्म कर्तव्यम्। शास्त्रचोदितैरित्युक्तं भमति। तथा दक्षिणात्र कल्याणैः स्युरिति न तं ध्यानवृद्धाः। एतैः कल्याणैः तथा दक्षिणा अपि परिपृच्छेत् ॥

कल्याणे यज्ञे कार्यम्। कल्याणैर्ऋत्विग्भिः सह कार्यम्। दक्षिणा अपि कल्याण्यो यदि स्युः तथा सति कार्यं नान्यथा ॥ (२०)

न मांसमश्नीयुर्न स्त्रियमुपेयुरा क्रतोरपवर्गात् ॥ २१ ॥

आ क्रतुपरिसमाप्तेः क्रत्वादौ प्रभृति आ[1] अपवर्गादेते नियमा भवन्ति। अथ वरणादौ कस्मान्न भवति। वरणादौ[2] कल्प्यमाने[3] दोषः।

[1] A. L. omit आ.
[2] A. L. have नियमादौ.
[3] L. कल्पने.

यदा मध्यमायामुपसदि वरणं भवति तदा प्रागनियमः प्राप्नोति । तस्मात् क्रत्वादौ नियमा अध्यवसीयन्ते ॥

क्रत्वादिप्रभृति आ अपवर्गात् एते नियमा भवन्ति । वरणप्रभृतीति कल्प्यमाने यदि मध्यमोपसदि वरणं भवति तदा प्रागनियमः प्रसज्येत । तस्मात् क्रत्वादिप्रभृतीति युक्तम् । मध्यमोपसदि च शास्त्रान्तरे वरणं दृष्टम् ॥ (२१)

एतेनाग्ने ब्रह्मणा वावृधस्व —इति दक्षिणाग्नावाज्याहुतिं हुत्वा यथार्थं प्रव्रजेत् ॥ २२ ॥

एतेनाग्ने इत्येतयर्चा दक्षिणाग्नावाज्याहुतिं हुत्वा यथार्थं प्रव्रजेत् । गच्छेदित्यर्थः । तेनादौ एषा आहुतिर्भवतीत्येवमेके । अन्ये पुनरन्ते एतामाहुतिमिच्छन्ति । कस्मात् । अन्तोपदेशात् शास्त्रान्तरोपदेशाच्च । मन्त्रलिङ्गदर्शनाच्च । एवं सति यथार्थं प्रव्रजेदित्यस्य कोऽर्थः । अनियमो भवतीत्यर्थः । आहुत्या ऊर्ध्वमिति ॥

क्रत्वन्ते स्वस्य दक्षिणाग्नौ एतेनाग्ने इत्येतया आज्याहुतिं जुहोति । नैमित्तिकत्वात् शास्त्रान्तरदर्शनाच्च मन्त्रलिङ्गाच्च । चकृमेति हि भूतप्रत्ययः । तेन क्रत्वन्ते इति सिद्धम् । यथार्थं प्रव्रजेदिति यथार्थमाचरेत् । अनियमो भवतीत्यर्थः । हुत्वा अनियमो भवतीति ब्रुवन् समाप्तेऽपि क्रतौ होमपर्यन्तं नियमा भवन्तीति ज्ञापयति । आज्याहुतिवचनं तन्त्रनिवृत्त्यर्थमिष्यते । न परिस्तरणविकल्पार्थम् ॥ (२२)

एवमनाहिताग्निर्गृह्ये इमामग्ने शरणिं मीमृषो नः—इत्येतयर्चा॥२३॥

अनाहिताग्निः गृह्ये आज्याहुतिं जुहोति—इमामग्ने इत्येतयर्चा । अथ कस्मादाम्नातमेतस्मिन्[1] प्रकरणे इति । मधुपर्कविवक्षया[2] कार्यः ।

[1] A. L. समाम्नातमेतास्मन् for अथ कस्मादाम्नातमेतस्मिन्.
[2] A. मधुपर्केपि वेस्थराः L. मधुपर्के निवेष्टरः.

कस्यासौ[1] देय इति । येषां[2] ऋत्विजां वरणं समाम्नातम् । तेन प्रसङ्गेन इहाम्नातम् ॥

एतयेति वचनमेतया जुहुयादेवेत्येवमर्थम् । तेनात्रापि तन्त्रं न भवति । ऋचेति वचनमकृतविवाहोऽप्यार्त्विज्यं कृतवानेतया लौकिकाग्नौ जुहुयादित्येवमर्थम् । मधुपर्कप्रसङ्गादत्र ऋत्विग्वरणमाम्नातम् ॥ (२३)

इति प्रथमे त्रयोविंशतितमा कण्डिका

ऋत्विजो वृत्वा मधुपर्कमाहरेत् ॥ १ ॥

आहरति इति दानकर्मा । दद्यात् । इत्येतदुक्तं भवति ॥

दद्यादित्यर्थः ॥ (१)

स्नातकायोपस्थिताय ॥ २ ॥

स्नातकायोपस्थिताय गृहमभ्यागताय मधुपर्को देयः ॥

उपस्थिताय कृतसमावर्तनाय तस्मिन्नहनि गृहानभ्यागताय विवाहार्थिने च ॥ (२)

राज्ञे च ॥ ३ ॥

[1] A. तस्यादै. L. तस्यादौ.
[2] A. त्वा. L. त्वां.

राज्ञे च गृहमभ्यागताय देयः ॥

उपस्थिताय ॥ (३)

आचार्यश्वशुरपितृव्यमातुलानाञ्च ॥ ४ ॥

एतेषां च मधुपर्को देयः । अथ पूर्वयोः पृथगुपदेशः कस्मात् क्रियते इति । समासेनैव पाठः कर्तव्यः यथा उत्तरेषाम् । उच्यते । अतुल्यत्वात्पृथगुपदेशः । कथमतुल्यत्वमिति । स्नातकाय तदहरेव । कथं गम्यते । उपस्थितवचनात् । यत्रैनं पूजयिष्यन्तो भवन्तीति वचनाच्च मधुपर्कोऽस्य दातव्य इत्येतद्वेदितं भवति । राज्ञे पुनरहरहरुपस्थिताय देयः । आचार्यादीनां प्रतिसंवत्सरोषितानां देय इति । कथं पुनरेतत् गम्यते यथा एते विशेषा भवन्तीति । स्नातकाय तावत् गम्यते यथा तस्मिन्नहनि आगताय[1] देय इति । तथाचार्यादीनां प्रतिसंवत्सरं च शास्त्रान्तरदर्शनात् । तत्राप्रतीतपदार्थत्वात् । मधुपर्को लोके स्वयमेव विदधाति ॥

आचार्यादीनां पूर्वयोरसमासेन निर्देशस्त्वतुल्यत्वज्ञापनार्थः । तेन स्नातकाय तदहरेव देयः । यत्रैनं पूजयिष्यन्तो भवन्तीति वचनात् विवाहार्थिने च । राज्ञे त्वहरहरभ्यागताय । आचार्यादीनां प्रतिवत्सरोषितागतानाम् । शास्त्रान्तरदर्शनाद्विशेषो लब्धः ॥ (४)

अप्रसिद्धत्वान्मधुपर्कस्वरूपमाह—

दध्नि मध्वानीय ॥ ५ ॥

दध्नि मधु आनयति । तत्रासेचनकर्मा आनयतिः[2] । निषिञ्चतीत्येतदुक्तं भवति ॥

[1] A. L. विवाहे for आगताय.

[2] A. L. omit this.

आनयतिरत्रासेचनकर्मा । आसिच्येत्यर्थः ॥ (९)

सर्पिर्वा मध्वलाभे ॥ ६ ॥

सर्पिर्वा निषिञ्चति । मधु वेति सिद्धम् । मध्वलाभवचनं अपार्थकम् । अलाभवचनं क्रियते कथमलाभे वाचनिकः प्रतिनिधिः[1] स्यादिति । इतरथा हे सामान्यात् प्रतिनिधिरिति कृत्वा अन्यत् किंचित्[2] प्रतिनिधीयते । तन्निवृत्त्यर्थं वचनमिदमारभ्यते । तत्र मधुपर्कस्य दानं वक्तव्यम् । प्रतिग्रहश्च । तत्र दानं प्रथमं विधीयते । कस्मात् । अल्पत्वात्तस्य ॥

इदं वचनं मध्वलाभे अयमेव प्रतिनिधिर्भवति नान्यस्तैलादिरित्येवमर्थम् ॥ (६)

अल्पत्वाद्दातुः कर्म पूर्वमाह—

विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते ॥ ७ ॥

तत्र विष्टर इत्यासनमुच्यते । पाद्यमिति । पादार्थमुदकं पाद्यमिति । तथार्घार्थमुदकमर्घ्यम्[3] । आचमनार्थमुदकमाचमनीयमिति । मधुपर्क उक्तः प्राक् । गौरिति पशुद्रव्यं किंचिन्निर्दिश्यते । एतेषां विष्टरादीनां द्रव्याणां एकैकस्य[4] त्रिस्त्रिर्निवेदनं भवति । तत्र एतेषामिति न वक्तव्यम् । कस्मात् ।

[1] A. L. प्रतिषेधः .

[2] A. L. अपदुष्यं for अन्यत् किंचित् .

[3] A. L. have only तथार्घ्यमुदकमेव.

[4] A. has here the following before त्रिस्त्रिः Extra : द्वयोः प्रवृत्तिः । तेन क्षत्रियवैश्ययोः प्रवृत्तिरनियमश्च । किं पुनरत्र न्याय्यं स्यात् । उच्यते । क्रमो नियम्यते ।

अधिकृतत्वात्। उच्यते नियमार्थमिदमारभ्यते। इतरथा विष्टरादीनां निवेदनं स्यात्[1]। तत्र भोजनस्यापि निवेदनं प्राप्नोति। तन्निवृत्त्यर्थो नियम उच्यते। अस्ति भोजनमिति। अस्तीति ब्रूमः। उत्तरत्र वक्ष्यामः॥

विष्टर इत्यासनम्। पाद्यार्थमर्घ्यार्थमाचमनार्थञ्चोदकं तथोक्तम्। एतेषामिति वचनं एतेषामेव त्रिर्निवेदनं यथा स्यात् भोजनस्य मा भूदिति। भोजनञ्च देयमिति वक्ष्यामः। ऋत्विजां मधुपर्कदाने द्वे गती सम्भवतः पदार्थानुसमयः काण्डानुसमय इति। तत्र पदार्थानुसमयो नाम सर्वेषां वरणक्रमेण विष्टरं दत्वा ततः पाद्यन्ततोऽर्घ्यमिति। काण्डानुसमयो नाम एकस्यैव विष्टरादिगोनिवेदनान्तं समाप्य ततोऽन्यस्य सर्वं ततोऽन्यस्येति॥ (७)

अथ ग्रहीतुः कर्माह—

अहं वर्ष्म सजातानां विद्युतामिव सूर्यः। इदन्तमधितिष्ठामि यो मा कश्चाभिदासति—इत्युदगग्रे विष्टर उपविशेत्। आक्रम्य वा॥ ८॥

अहं वर्ष्म सजातानां इत्यनेन मन्त्रेण उदगग्रे विष्टरे उपविशति। आक्रमणं वा पादाभ्यां करोति। तेनाक्रमणस्य च विकल्पः॥

पद्भ्यामाक्रम्य वा विष्टरौ। एतयोर्विकल्पः॥ (८)

पादौ प्रक्षालापयीत दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्॥ ९॥

पादयोः प्रक्षालनं विधीयते। कथं पुनस्तत्कर्तव्यमिति। तत्र आह—दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्। यदा ब्राह्मणः प्रक्षालयिता तदा दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्॥

अत्र वचनात् अग्रे प्रयच्छेदित्युक्ते सनिम्यते। यथा पश्चात् सव्यमिति पादयोः क्रम इत्येतत् सिद्ध इत्यस्य. This ought to come under sūtra 10 below.

[1] L. has निवेदनं न स्यात्.

पश्चात्सव्यम् । कुतः अग्रेवचनात् ॥ (९)

सव्यं शूद्राय ॥ १० ॥

यदा शूद्रस्तदा सव्यमग्रे प्रयच्छति । तत्र संशयः । किं प्रक्षालयिता नियम्यते[1] । आहोस्वित्क्रमनियम इति । किंचातः । यदि तावत् प्रक्षालयितुर्नियमः क्षत्रियवैश्ययोरप्रसङ्गः । अथ पुनः पादयोः क्रमो नियम्यते ब्राह्मणशूद्रयोः[2] प्रवृत्तिः । तेन क्षत्रियवैश्ययोः प्रवृत्तिरनियमश्च । किं पुनरत्र नियमः स्यात् । उच्यते । क्रमो नियम्यते । अत्र वचनात् । अग्रे प्रयच्छेदित्युक्ते स नियम्यते । यदा पश्चात्सव्य इति पादयोः क्रम इत्येतत् सिद्धं भवति ॥

अग्रे प्रयच्छेत् । पश्चाद्दक्षिणम् । क्षत्रियवैश्यौ यदा प्रक्षालयितारौ तदा सव्यं वा पूर्वं दक्षिणं वा । नास्ति नियमः ॥ (१०)

प्रक्षालितपादोऽर्घ्यमञ्जलिना प्रतिगृह्य ॥ ११ ॥

पादौ प्रक्षाल्य अर्घ्यमञ्जलिना प्रतिगृह्णाति ॥

प्रक्षालितपादग्रहणमानन्तर्यार्थम् । प्रक्षालनानन्तरमर्घ्यमेव गृह्णीयादिति । गन्धमाल्यादिसंयुक्तमुदकमर्घ्यमित्युच्यते ॥ (११)

अथाचमनीयेनान्वाचामति—अमृतोपस्तरणमसि—इति॥ १२॥

[1] A. L. have किं प्रयोजनं यतश्चतुरोतीति नियम्यते ।

[2] After शूद्र A omits a long passage which was already found extra under Sūtra 7. The omission extends up to सिद्धं.

अथाचमनीयेनाचामति—अमृतोपस्तरणमसि—इत्यनेन मन्त्रेण। तत्र प्रक्षालितपादग्रहणं न कर्तव्यम्। कल्पितक्रमादेव सिद्धम्। तत्क्रियतेऽनन्तरार्थम्। कथं प्रक्षालनादनन्तरमर्घ्यप्रतिग्रहमेव कुर्यात् नान्यत्। किंपुनरन्यत् प्राप्नोति। अन्यान्यप्यर्हणीयानि यानि द्रव्याणि गन्धमाल्यादीनि प्राप्नुवन्ति तन्निवृत्त्यर्थमारभ्यते। अथशब्दश्च तदर्थ एव। कथमर्घ्यप्रतिग्रहादनन्तरमाचमनीयं स्यात्। तस्मादुभयत्रापि गन्धमाल्यादीनां प्रतिषेधः। तानि उपरते कर्मणि दातव्यानि। आचमनीयेनाचामतीति। आचमनादनन्तरमेवेदमिति। तत्रान्यच्छौचार्थमाचमनं नेच्छन्ति। कस्मात्। निदर्शनात्। सोमे च प्राणाहुतिषु च मधुपर्के च नोच्छिष्टा भवन्तीति। इह च दर्शनाद्यत्र यत्राचमनमभिप्रेतं तत्र तत्र विदधाति—आचान्तोदकायेति। तदेतन्नोपपद्यते। कस्मात्। सोमे नोच्छिष्टविधानात्। मन्यामहे यत्राचमनं न प्रतिषेधति तत्र शौचार्थमाचमनं प्रसज्येत इति। ननु चैवं सत्याचान्तोदकस्य वचनं अपार्थकम्। नेत्युच्यते। अन्यार्थं च तत्॥

अथशब्दस्त्वानन्तर्यार्थः। अर्घ्यानन्तरमाचमनीयमेवेति। तेन गन्धमाल्यादीनि परिसमाप्ते कर्मणि दातव्यानि। आचामतीत्युदकं पिबतीत्यर्थः। अत्र शौचार्थमाचमनं न भवति। कुतः। स्मृतेः मधुपर्के च सोमे च अप्सु-प्राणाहुतीषु च नोच्छिष्टा भवन्ति इति। उत्तरत्र विधानाच्च आचान्तोदकाय गाम् इति। एवमेके। तदयुक्तम्। कुतः। सोमे अनुच्छिष्टविधानाद्यत्राचमनं न प्रतिषेधति तत्र शौचार्थमाचमनं भवतीति गम्यते। आचान्तोदकवचनमन्यार्थम्॥ (१२)

मधुपर्कमाह्रियमाणमीक्षेत—मित्रस्य त्वा चक्षुषा प्रतीक्षे—इति॥ १३॥

मधुपर्कमाह्रियमाणमीक्षेत मित्रस्य त्वा—इत्यनेन मन्त्रेण। आह्रियमाणमानीयमानमित्यर्थः। ईक्षेत पश्येत इत्यर्थः॥

मधुपर्कमाह्रियमाणमानीयमानमीक्षेत मन्त्रेण ॥ (१३)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि—इति तदञ्जलिना प्रतिगृह्य मधु वाता ऋतायतः—इति तृचेनावेक्ष्यानामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य वसवस्त्वा गायत्रेण छन्दसा भक्षयन्तु—इति पुरस्तान्निमार्ष्टि ॥ १४ ॥

देवस्य त्वा—इत्यनेन मन्त्रेणाञ्जलिना प्रतिगृह्णाति । मधुपर्कमाहृतमानीतं प्रतिगृह्य मधु वाताः—इत्यनेन तृचेन[1] अवेक्षति । अवलोकयतीत्यर्थः । अवलोक्यानामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोडयति । तत्रानामिकायां विवदन्ति । केचिदुपकनिष्टिकां मन्यन्ते । केचिन्मध्यमाम् । ननु चोभयोरपि नामास्तीति । तत्राप्येके[2] मध्यमामनामिकां मन्यन्ते[3] । देशेनास्या व्यपदेशः । तेन सा अनामिकेति । अन्ये[4] पुनरुपकनिष्ठिकां व्यपदिशन्ति । इति । तस्मात्सा अनामिकेति । आगमस्य विशेषः । आलोड्य वसवस्त्वा—इत्यनेन मन्त्रेण पुरस्तान्निमार्ष्टि । लेपमपनयतीत्यर्थः ॥

अनामिकेति केचिन्मध्यमामाहुः । कुतः । देशेनैव समाख्या । न तु तस्या नाम विद्यते अङ्गुष्ठादिवत् । अन्ये तूपकनिष्ठिकामाहुः । कुतः । कनिष्ठिकया ह्यसौ व्यपदिश्यते । न तु तस्या नामास्तीति । आगमाद्विशेषो ज्ञेयः । तृचेनावेक्ष्य ततः सव्ये पाणौ कृत्वा प्रदक्षिणमालोड्य वसवस्त्वेति पुरस्तान्निमार्ष्टि । अङ्गुलिगतं लेपमपनयतीत्यर्थः ॥ (१४)

[1] A. तृचमन्त्रेण. L. तृचेन मन्त्रेण.
[2] A. तत्राप्ये . . . L. तत्रापि.
[3] A. has ते ब्रुवन्ते extra after this.
[4] A. L. ये.

रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्तु—इति दक्षिणतः । आदित्यास्त्वा जागतेन छन्दसा भक्षयन्तु—इति पश्चात् । विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्तु—इत्युत्तरतः । भूतेभ्यस्त्वा—इति मध्यात् त्रिरुद्गृह्य ॥ १५ ॥

एवमुत्तरैः प्रतिदिशं लेपमपनयति इति । भूतेभ्यस्त्वा इति मध्यात् त्रिरुद्गृह्णाति । ऊर्ध्वमुत्क्षिपतीत्यर्थः[1] ॥

मन्त्रेण मध्यात् त्रिरुद्गृह्य निमार्ष्टि । ऊर्ध्वं त्रिरुत्क्षिपतीत्यर्थः । मन्त्रावृत्तिरुक्ता ॥ (१५)

ततो भूमौ निधाय पात्रम्—

विराजो दोहोऽसि—इति प्रथमं प्राश्नीयात् । विराजो दोहमशीय—इति द्वितीयम् । मयि दोहः पद्यायै विराजः—इति तृतीयम् ॥ १६ ॥

विराजो दोहोऽसि—इति प्रथमं प्राश्नीयात् । प्रथमग्रहणमपार्थकम् । तस्मात् पूर्वमेव पक्षं[2] दृष्ट्वा अन्यथा वर्णयन्ति त्रिः[3] उद्गृह्य प्रथममुद्ग्राहं प्राश्नीयादिति । अथ द्वितीयमुद्ग्राहं विराजो दोहमशीय—इति प्राश्नीयात् । एवमेके । एतस्मिन्नपि पक्षे तृतीयग्रहणमपार्थकम् । तस्मात्पूर्व एव पक्षः । मन्त्राश्च प्राशनं चोक्तम् ॥

सङ्ख्यावचनानि तु सर्वप्राशनपक्षे त्रिभिरेव मन्त्रैर्यथा सर्वं प्राशितं भवति तथा प्राश्नीयादित्येवमर्थानि । एवं भाष्यकारः । अन्ये त्वन्यथा व्याचख्युः ।

[1] A. L. ऊर्ध्वमुत्क्षिपतीत्यनेन मन्त्रेण.

[2] A. omits तस्मात् पूर्वमेव पक्षं.

[3] A. L. omit त्रिः .

भूतेभ्यस्त्वेति मध्यात्त्रिरुद्गृह्य विराजो दोहोऽसीति प्रथममुद्ग्राहं प्राश्नीयात् । विराजो दोहमशीयेति द्वितीयमुद्ग्राहम् । मयि दोह इति तृतीयमुद्ग्राहम् । तृतीयवचनं सर्वप्राशनपक्षे तृतीयेन प्राशनेन यथा सर्वं प्राशितं भवति तथा प्राश्नीयादित्येवमर्थम् । पद्यायै विराज इत्यत्र विराज इति षष्ठी । कुतः । पूर्वयोस्तथा दृष्टत्वात् । पद्यायै इत्यापि चतुर्थी षष्ठ्यर्थे । तेन तत्सामानाधिकरण्ये सत्यपि षष्ठ्येव युक्ता कल्पयितुम् ॥ (१६)

न सर्वम् ॥ १७ ॥

न सर्वं मधुपर्कं प्राश्नीयात् ॥

प्राश्नीयात् न सर्वम् ॥ (१७)

न तृप्तिङ्गच्छेत् ॥ १८ ॥

न च तृप्तिं गच्छेत् ॥

तृप्तिञ्च न गच्छेत् ॥ (१८)

ब्राह्मणायोदङ्ङुच्छिष्टं प्रयच्छेत् । अलाभेऽप्सु ॥ १९ ॥

दद्यादित्यर्थः । ब्राह्मणालाभे अप्सु निषिञ्चेत् ॥

ब्राह्मणाय उच्छिष्टं उद्धृतादवशिष्टं उदङ्मुखो मधुपर्कं प्रयच्छेत् । ब्राह्मणालाभे अप्सु निषिञ्चेत् ॥ (१९)

सर्वं वा ॥ २० ॥

सर्वं वा प्राश्नीयात् ॥

प्राश्नीयात् ॥ (२०)

अथाचमनीयेनान्वाचामति—अमृतापिधानमसि—इति ॥ २१ ॥

अथाचमनीयेनान्वाचामति—अमृतापिधानमसि—इत्यनेन मन्त्रेण ॥

यत्तत्पूर्वमाचमनीयं निवेदितं तेनान्वाचामति मन्त्रेण ॥ (२१)

सत्यं यशः श्रीर्मयि श्रीः श्रयताम्—इति द्वितीयम् ॥ २२ ॥

सत्यं यशः—इत्यनेन द्वितीयमन्वाचामति ॥

द्वितीयग्रहणमाचमनीयप्राप्त्यर्थम् । इतरथा मन्त्रस्योत्तरेण सम्बन्धः स्यात् ॥

आचान्तोदकाय गां वेदयन्ते ॥ २३ ॥

तत्राचान्तोदकवचनमपार्थकम् । कस्मात् । आचमनस्य प्राप्तत्वात् । उच्यते । नेदं शौचार्थमाचमनं चोद्यते । किमर्थं तर्हि । कर्माङ्गमाचमनं चोद्यते । दर्शपूर्णमासवत् । अथोदकवचनमपार्थकम् । कस्मात् । आचमनं हि उदकेनैव भवति । उच्यते । उदकं क्रियते आचमनीयनिवृत्त्यर्थम् । गां वेदयन्ते ॥

आचान्तग्रहणं शौचार्थमाचमनं कृत्वा कर्माङ्गमप्याचमनं कुर्यादित्येवमर्थम् । उदकवचनमाचमनीयनिवृत्त्यर्थम् । तेनाचमने उदकान्तरं भवति ॥ (२३)

हतो मे पाप्मा पाप्मा मे हत—इति जपित्वोङ्कुरुत—इति कारयिष्यन् ॥ २४ ॥

हतो मे पाप्मा पाप्मा मे हत इति जपित्वा ओं कुरुतेति कारयिष्यन् मारयिष्यन्[1] चेद्भवति । मारयिष्यन् यदि[2] भवतीत्यर्थः ॥

इमं मन्त्रं जपित्वा ओं कुरुतेति ब्रूयात् यदि कारयिष्यन्मारयिष्यन् भवति। तदा च दाता आलभेत । तत्र देवताः प्रागुक्ताः ॥ (२४)

माता रुद्राणां दुहिता वसूनाम्—इति जपित्वा ओं उत्सृजत—इत्युत्स्रक्ष्यन् ॥ २५ ॥

माता रुद्राणाम्—इति जपित्वा ओं उत्सृजत इति उत्स्रक्ष्यन् यदि भवति । इहागत्य स्मृतम् । मयि दोहः पद्यायै विराजः इति चतुर्थी षष्ठी वा इति । कुतः संशयः । तुल्यत्वात् । तत्र चतुर्थीमित्येके । कस्मात् । पूर्ववदेव[3] चतुर्थीदर्शनात् पद्यायै इति । अन्ये पुनः षष्ठीं मन्यन्ते । कस्मात् । अपूर्वात् । परयोश्च दर्शनात् । कः पुनरत्र निर्णयः । षष्ठीति । येऽपि चतुर्थीमुपदिशन्ति ते षष्ठीमेव विपरिणमन्ति । तेनोभयथापि शक्यते कल्पयितुम् ॥

यद्युत्स्रक्ष्यन् भवति तदा एतां जपित्वा ओं उत्सृजतेति ब्रूयात् ॥ (२५)

नामांसो मधुपर्को भवति भवति ॥ २६ ॥

तत्रोच्यते । मधुपर्के किं मांसं देयमिति । नेत्युच्यते । इदं मधुपर्कभोजनं अमांसं न भवति इत्ययमर्थः । तस्मादनेनाभ्युपायेन भोजनमनुयोजितं भवति नामांसो मधुपर्को भवति इति ॥

[1] A. has यदि before कारयिष्यन्.
[2] L. omits यदि.
[3] L. पूर्वपदे.

मधुपर्काङ्गं भोजनं अमांसं न भवतीत्यर्थः । कुतः । मांसस्य भोजनाङ्गत्वेन लोके प्रसिद्धत्वात् । अनेनाभ्युपायेन भोजनमप्यत्र विहितं भवति । पशुकरणपक्षे तन्मांसेन भोजनम् । उत्सर्जनपक्षे मांसान्तरेण । अध्यायान्तलक्षणार्थं द्विवचनं मङ्गलार्थञ्च ॥ (२६)

इति प्रथमे चतुर्विंशतितमा कण्डिका

प्रथमोऽध्यायः समाप्तः

കേരള സാഹിത്യ അക്കാദമി

तस्मिन् सर्वविषयाधिष्ठाने मनसि स्वाधीने सुकर एव कार्यशेषः । किञ्च याः किलाद्यास्तत्र तिस्रः प्रकृतयस्तासु यस्तीक्ष्णोपायैः संयमित-वृद्धिः श्लेष्मा तस्योपचयं केनाप्युपायेन विधाय तेनैव तावपि क्षोभयितुं शक्येते ।

वास्थिरस्वभावम् । किञ्च विषयेषु — रूप-रस-गन्ध-शब्द-स्पर्शाख्येषु पञ्चेन्द्रिय-गोचरेषु वाह्येषु भावेषु । निसर्गदुर्दान्तं-स्वभावत एव सुतरामनियन्त्रितप्रसरम् । भवतीति शेषः । तत्-तस्माद्धेतोः । कामादिभिः-कामप्रभृतिभिः ; क्रोध-लोभाद-यश्चादिशब्देन गृह्यन्ते । एतैः-अस्माकं सन्निहितैरित्यर्थः ; कामक्रोधादीनां मानसिक-विकाराणां पाण्डुप्रभृतीनां शारीरविकाराणां च परस्परसन्निहितसम्बन्धं सूचयति एतैरिति शब्दः । शनकैः-क्रमेण । भेदयितुं-जीवेन सह मनसो विद्यमानं सौजन्यं विघटयितुम् । शक्यते ।

"अपि च प्रभूतमदमेदुरात्मनो विषयाटवीषु विविधासु धावतः ।
स्वबलेन हन्त मनसो निवर्तनं बिसतन्तुनेव सुरदन्तियन्त्रणम् ॥"

इति सङ्कल्पसूर्योदये श्रीवेदान्तदेशिकेनाभिहितरीत्या निसर्गचञ्चलं विशिष्य विषयव्यापृतं मनः कामादिसाहाय्यतः स्ववशीकर्तुं सुशकमेवेति पाण्डुः स्वयमा-लोच्य, किञ्चिदिवानेन स्वस्य स्वसुहृदां च समाश्वासनमासादितुं अभिलषति ॥३९॥

तस्मिन्निति । तस्मिन्-तादृशचञ्चलादिगुणविशिष्टे । सर्वेषां ज्ञानेन्द्रिया-दिभिः ग्राह्याणां विषयाणां शब्दादीनाम्, अधिष्ठाने-आश्रयत्वेनावस्थिते । मनसि ।

"तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि, इतराणि पञ्च कर्मेन्द्रियाणि, उभयात्मकं मनः"

इत्युक्तरीत्या मनसः सर्वेन्द्रियात्मकत्वात् सर्वविषयाणामपि नैसर्गिकमधिष्ठान-त्वमपि तस्य संघटते । कार्यशेषः-अवशिष्टः दशानां ज्ञानेन्द्रिय-कर्मेन्द्रियाणां वशीकरणरूपः कर्मसमुदायः । आद्याः-प्रधानाः । अनेन सत्त्व-रजस्तमोरूपाः महदहङ्कारबुद्धिप्रभृतयस्तत्त्वविशेषाश्च जीवराजस्य प्रकृतिष्वन्तर्भवन्तीति मन्त-

विज्ञानोऽयं यद्यपि स्वाभिभक्तस्तत्राप्यस्यासन्निधाने विविक्ते ।
भेदो राज्ञस्तस्य तैस्तैरुपायैः शक्यः कर्तुं ज्ञानशर्मोपजापैः ॥४०॥

एवं राज-मन्त्रिणोर्विरोधेन विश्लिष्टे प्रकृतिमण्डलेऽचिरादेव हस्तगता महा-
राजस्य यक्ष्मणो जयलक्ष्मीः ।

कर्णमूलः—(सहर्षम्) साधु चिन्तिता मन्त्रिवर्येण राजतन्त्रनीतिः ।

पाण्डुः—भद्र, महाराजनिकटं गतो नाद्याप्यायाति कासः ।

व्यम् । (वाताद्यास्तत्र तिस्रः प्रकृतयः इत्यपि पाठः ।) तीक्ष्णोपायैः-तिक्त-कटु-कषायप्रायाणां स्पर्शतो वीर्यतश्चोष्णानाम् औषधान्नविहाराणां प्रयोगैः । केनाप्युपायेन-उपायान्तरेण ; स्वाद्वम्ललवणप्रायाणां स्पर्शतो वीर्यतश्च शीतानाम् आहार-विहारादीनां प्रयोगेणेति यावत् । "रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः । तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् । कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते" इति प्रमाणानुरोधेनात्र कफस्य शमन-प्रकोपनोपाया उपपाद्यन्ते ।

विचक्षणस्य विलक्षणज्ञाननिधेर्विज्ञानशर्मणः साहाय्येनोपबृंहितबलो जीवः कथमभिभवनीय इत्याकाङ्क्षायां तत्रोपायमाह **विज्ञानोऽयमिति** । अयं विज्ञानः-त्रिवर्गसाधकः सचिवः । यद्यपि स्वामिभक्तः-स्वकीये राज्ञि विश्वस्त-हृदयः । तत्रापि-तथा विद्यमानेऽपि । अस्य-विज्ञानशर्मणः । असन्निधाने-तद्विरहिते समये । विविक्ते-जीवे एकान्ततस्स्थिते सति । ज्ञानशर्मोपजापैः-ज्ञान-शर्माख्यापवर्गसाधकमन्त्रिकृतविप्रलम्भवचनैः ; सुहृद्भेदविधायकरूपैरिति भावः । तैस्तैः-अनेकरूपैः । उपायैः-नीतिप्रयोगैः । तस्य राज्ञः-जीवराजस्य । भेदः-विज्ञानशर्मायत्तस्य सौहृदस्य विश्वासस्य च विच्छेदः । कर्तुं शक्यः-तन्मैत्री-विघटनविधानं साध्यमेवेति भावः ॥ ४० ॥

एवमिति । एवं-स्वात्मना पूर्वं संभावितरीत्येत्यर्थः । प्रकृतिमण्डले ।

(प्रविश्य)

गलगण्डः—देव, महाराजपादमूलात् कासः प्राप्तः ।

पाण्डुः—त्वरितं प्रवेशय ।

(ततः प्रविशति गलगण्डेनानुगम्यमानः कासः । कासो जानुभ्यां प्रणम्य किञ्चिदुपसर्पति ।)

पाण्डुः—भद्र, कीदृशो मयि राजनियोगः ।

कासः—(करपिहितमुखः, कर्णे) एवमिव ।

पाण्डुः—भद्र, तदर्थमेवेयं बद्धपरिकरता । तिष्ठ त्वमत्रैव । राजानमिमुदन्तमन्यमुखेन प्रापयिष्ये ।

(नेपथ्ये यामप्रहरध्वनिः ।)

पाण्डुः—(श्रुत्वा सैनिकान् प्रति) तदहमिदानीं कार्यशेषं निर्वर्त्य प्रकृतकार्यार्थं संनह्यामि । भवन्तोऽपि तावत्—

विश्लिष्टे-अधिगतान्योन्यानुकूल्यविच्छेदे । देवेति । महाराजपादमूलात्-यक्ष्मणः सकाशात् । करपिहितेति । आस्योद्भूतसृणिकाकणिकावाहिनिश्वासवातनिवारणपूर्वकं स्वामिसन्निधौ प्रह्वीभावप्रकटनाय सेवकजनैः करेण मुखपिधानं सल्लापसमये क्रियत इति सर्वविदितोऽयं संप्रदायः । अथवा विषयस्यातिगूढस्य तृतीयपुरुषात् गोपनाय च मुखमेवं करेण सामान्यतः पिधीयते । कर्णे-श्रोत्रस्यातीवान्तिके । एवमिव-एवं संदिष्टं महाराजेनेति भावः । पूर्वस्मिन्नङ्के "अस्मत्सैन्यैर्निरोधं कृतमगणयता" इति पद्ये विद्यमानो विषयस्तादृशः कश्चिदपरश्च एवमिवेति कर्णान्तिके कथ्यते । यामप्रहरेति । यामे-यामान्ते, एकैकस्य च यामस्यावसान इत्यर्थः ; कृतः प्रहरः-घण्टादीनां ताडनम्, तस्य ध्वनिः-यामावसानद्योकशब्दः । समुद्भूत इति शेषः । श्रुत्वेति । कार्यशेषं-स्वगृहे कर्णमूलादिभिः सह समालोचितस्य कार्यस्यावशिष्टमपि भागम् । निर्वर्त्य-सम्यगालोचनया निष्पाद्य । प्रकृतकार्यार्थं-यक्ष्मादिष्टकर्मनिर्वहणार्थम् । संनह्यामि-यतिष्ये ।

बिभ्राणास्तान्युपमितमहाभोगिभिर्बाहुदण्डै-
र्येषां येषां दधति निजतां यानि यान्यायुधानि ।
स्वस्वस्थानेष्ववहितमनोवृत्तयस्त्यक्तशङ्काः
सर्वे तिष्ठन्त्वरिपुरमभिव्याप्य सैन्याः प्रवीराः ॥ ४१ ॥

(इति निष्क्रान्ताः सर्वे ।)

। इति द्वितीयोऽङ्कः ।

कास-कर्णमूलादीनपि इतः कर्तव्ये कर्मण्यादिशति बिभ्राणा इति । सर्वे । प्रवीराः-विक्रमेण विशिष्टाः । सैन्याः-योधाः । उपमिताः महाभोगिना यैस्तैः ; अति-स्थूलसर्पभोगसदृशैरित्यर्थः । बाहुदण्डैः-बलवद्दण्डाकारैर्भुजैः । यानि यानि आयु-धानि-गदा-खड्ग-धनुःप्रभृतीनि प्रहरणानि । येषां येषां-सैनिकानाम् । निजतां-स्व-कीयताम् । दधति-स्वकीयत्वेन तिष्ठन्तीत्यर्थः । व्याधिपक्षे कुष्टस्य विविधाः व्रणाः, अर्शसो गुदाङ्कुराः, अतीसारस्य रेचनम् , ज्वरस्य दाहरूपोऽग्निः इत्येवमादीनि क्रमशः स्वीयानि प्रहरणानि भवन्ति । तानि तानि-आयुधानि । बिभ्राणाः-आदाय धृतवन्तः सन्तः । अवहितमनोवृत्तयः-सावधानचित्ताः । त्यक्तशङ्काः-साध्वसर-हिताः । वित्रासजनकं शात्रवबलविहितं विविधमायोधनकोलाहलमवलोक्य मनसि भयं मात्रयाप्यनाहितवन्त इति भावः । स्वस्वस्थानेषु-तत्तदुचितत्वेन नियमितेषु स्थलेषु । अरिपुरं-शत्रुनगरम् । अभिव्याप्य-समन्ततो रुध्वा । तिष्ठन्तु । सैनिकैः सर्वैरपि सायुधपाणिभिः साध्वसरहितैः सावहिति संभूय सपत्नपुराभियोग एव संप्रति विधातव्य इति यावत् ॥ ४१ ॥

इति वैद्यरत्नबिरुदाङ्कितेन, आयुर्वेदभूषण-आयुर्वेदाचार्येत्याद्युपाधिभाजा मेल्पाक्कं पण्डित
दुरैस्वाम्यय्यङ्गार्महोदयेन मूलग्रन्थस्य समग्रस्य संशोधनपूर्वकं विरचितायां
नन्दिन्याख्यायां व्याख्यायां
द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः

(ततः प्रविशति पश्चाद्बद्धं पुरुषं किङ्करेण विकर्षन् विचारो नागरिकः ।)

नागरिकः—अङ्ग गद, कस्त्वमसि ।

पुरुषः—(स्वगतम्) किमहं ज्ञातोऽस्म्यनेन गद इति ।

नागरिकः—किं विचारयसि । यदि सत्यं गदसि ततो मोक्ष्यसे ।

पुरुषः—(स्वगतम्) नाहमनेन ज्ञातः ।

एतावता निर्वृत्तानामितो निर्वर्तिष्यमाणानां च कथावस्तूनां संक्षिप्योपपादकं विष्कम्भं नामार्थोपक्षेपकं कथासङ्घटनार्थं प्रस्तौति तृतीयाङ्कारम्भे । एष च शुद्धविष्कम्भः ; यत्र हि मध्यमगुणविशिष्टैः पात्रैः शुद्धसंस्कृतवाण्यैव व्यवहारः प्रचलेत् । अन्यस्तावत् मिश्रविष्कम्भः, स च संस्कृत-प्राकृतभाषामयो नीचैः नीच-मध्यमैर्वा पात्रैः प्रवर्तेत । "वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥ मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः" इति तल्लक्षणम् ।

ततःप्रविशतीति । भुजयुगस्य च पश्चादाकृष्य बन्धनं पश्चाद्बन्धनमित्युच्यते ; तया रीत्या बद्धं पुरुषम् । किङ्करेण विकर्षन्-स्वचोदितेन भृत्येन कृतार्कर्षणः सन्नित्यर्थः । विचारः-तदाख्यः । नागरिकः-नगररक्षकः पुरुषः । अङ्गेति संबोधने । गद-वद । गद-हे ह्लदद इति सुबन्तत्वेन व्याधिसम्बोधनार्थे च गद-

बिभ्राणो मुखबाहुवक्षसि कृतं पुण्ड्रत्रयं भस्मना
हस्तोपात्तविशुद्धताम्रकलशो रुद्राक्षमाली गले ।
धृत्वा वैदिकवेषमाविशमिह स्वस्वामिना प्रेरितो
हृद्रोगोऽहमरेरवेक्षितुमना जीवस्य राज्ञः स्थितिम् ॥ १ ॥

शब्दः श्लेषयात्र प्रयुक्तः; येन किल बद्धस्य पुरुषस्य वक्ष्यमाणरीत्या संशयोत्पत्तेरवकाशः समुद्भवेत् । गद इति-हृद्गद इति । गदसि-वदसि । गदसीति सुस्पष्टं तिङन्तत्वद्योतनेन पूर्वनिर्दिष्टो गदशब्दश्च वचनार्थकस्तिङन्त इति पुरुषेणावगम्येतेति तथा प्रयोगः । अत एवानन्तरमेव पुरुषश्चिन्तयति नाहमनेन ज्ञात इति । (यदि सत्यं गदोऽसि इत्यसाधुः पाठः ।)

कुतो वाहं गद इति नागरिकादिभिः नावगम्यत इत्यत्र स पुरुष एव स्वयं हेतुमाह **बिभ्राण इति** । अहं-पुरुषान्तरत्वेन धृतवेषः पुरुषः । हृद्रोगः-हृद्गदः; नान्यः । हृद्रोगो नाम—"दूषयित्वा रसं दोषा विगुणा हृदयं गताः । हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते" इति, "अत्युष्णगुर्वन्नकषायतिक्तैः श्रमाभिघाताध्यशनप्रसङ्गैः । सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः" इति च तत्कारणलक्षणानि । स्वस्वामिना-आत्मनः प्रभुणा पाण्डुना राजयक्ष्मणा वा । प्रेरितः । वैदिकवेषं-वैदिकस्येव बाह्यमण्डनम् । न तु वस्तुतोऽस्य वैदिकत्वमिति भावः । धृत्वा । वेषस्वरूपमेव विवृणोति बिभ्राण इत्यादिना । मुख-बाहु-वक्षसि-एतेष्ववयवेषु; प्राण्यङ्गत्वादेकवद्भावः । भस्मना कृतम् । पुण्ड्रत्रयं-रेखात्रयविन्यस्तान् पुण्ड्रानिति यावत् । बिभ्राणः-धारयन् । हस्ते उपात्तः-गृहीतः, विशुद्धःनिर्मलोज्ज्वलः, ताम्रकलशः येन सः । गले-कण्ठे । रुद्राक्षमाली-रुद्राक्षमालावान् । एवंभूतः सन् । अरेः-शत्रुभूतस्य जीवस्य राज्ञः-जीवराजस्य । स्थितिं-सन्निवेशप्रकारम् । अवेक्षितुमनाः-दिदृक्षुः सन् । इह-जीवनगरे । आविशं-प्रविष्टवानस्मि । सपत्नजनेभ्यः स्वात्मनो गोपनाय धृतवैदिकवेषः शत्रुनगरं प्रविष्टोऽस्मीति यावत् ॥१॥

अनन्तरमनेन नागरिकेण झटिति गृहीत्वा बध्वा च विकृष्टोऽस्मि । भवतु एवं ब्रवीमि । (प्रकाशम्) आर्य, मुञ्च माम् । विप्रश्निकतामुपजीव्येदं जठरहतकं पुष्णामि ।

नागरिकः—अस्त्वेतत् । कुतो रात्रिसञ्चारः ।

पुरुषः—यस्य कस्यचित् यत्किञ्चित् भावि फलमुक्त्वा पारितोषिकं गृह्णामीति ।

नागरिकः—किं दिवसस्ते तत्कर्मणो न पर्याप्तः ।

पुरुषः—बाढम् । श्रूयताम्—

यामो यात्यविलम्बितं दिनमुखे स्नानादिभिः कर्मभिः
पश्चाद्भिक्षितुमारभे प्रतिदिनं धान्यानि वा तण्डुलान् ।
तैरन्नान्युपपाद्य पञ्च च महायज्ञान् विधायाश्नति
श्रीकण्ठाय निवेद्य मय्यतिथये दत्वा च गच्छत्यहः ॥ २ ॥

अनन्तरमिति । वैदिकवेषेण नगरप्रवेशानन्तरम् । (अनन्तरमनेन नागरिकेण संयमितः इति संक्षिप्तं पाठान्तरम् ।) एवं ब्रवीमि-मनस्यालोचितमुपायमनुरुध्य वदामीति यावत् । विप्रश्निकतां-दैवज्ञत्वम् । उपजीव्य-जीवनोपायत्वेनावलम्ब्य । इदं जठरहतकमिति स्वोदरपोषणे मुहुरनुभूयमानं परिश्रममालोच्य एवं सनिर्वेदमभिधीयते । कुतो रात्रिसञ्चारः-विप्रश्निकोपजीविनः किमर्थं रात्रिवेलायामितस्ततश्चङ्क्रमणमित्यर्थः । यस्य कस्यचिदिति । भावि फलं-कालान्तरभाविशुभाशुभरूपं परिणामविषयम् । पारितोषिकं-सबहुमानं दीयमानमुपायनम् । **बाढमिति** नागरिकोक्तं 'किं दिवसस्ते न पर्याप्तः' इति वचनं दृढीकरोति । दिवसस्यापर्याप्तत्वमेव निरूपयति श्रूयतामिति ।

याम इति । दिनमुखे-प्रभातकाले । स्नानादिभिः-स्नान-सन्ध्यावन्दन-जपादिभिः । कर्मभिः । यामः-दिनस्य प्रथमः प्रहरः । अविलम्बितं-अतित्वरितमिव ।

किङ्करः—अये युक्तमिदम्। इह तु यामादूर्ध्वं रुध्यते नगरसंचारः।

पुरुषः—यदिदानीं यामादूर्ध्वं कालस्तर्हि न संचरामि, निद्रास्थानं गच्छामि।

किङ्करः—कुत्र निद्रास्थानम्।

पुरुषः—धर्मशालायाम्।

याति-प्रचलति। पश्चात्-प्रथमयामानन्तरम्। प्रतिदिनम्। धान्यानि-व्रीहि-यव-गोधूमादीनि। तण्डुलान् वा। भिक्षितुं-याचितुम्। आरभे। ततः, तैः-भिक्षया सम्पादितैस्तण्डुलादिभिः। अन्नानि-ओदनव्यञ्जनादीनि। उपपाद्य-विपाच्य। पञ्चमहायज्ञान्—ब्रह्मयज्ञ-पितृयज्ञ-देवयज्ञ-भूतयज्ञ-मनुष्ययज्ञाभिधान्। "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्" इति महायज्ञपञ्चकं मनुना विवृतम्। विधाय-निर्वर्त्य। श्रीकण्ठाय-महेश्वराय। तानि निवेद्य-समर्प्य। अतिथये दत्वा च। भगवन्निवेदनानन्तरमागच्छद्भ्यः सर्वेभ्यश्च प्रदाय। देव-मनुष्ययोः पूजनं यद्यपि पञ्चमहायज्ञेषु भवत्यन्तर्गतं तथापि परमेश्वरस्य परस्तादतिथेश्च सपर्या विशिष्य कर्तव्येत्याशयेन पुनस्तयोः पूजनं प्रत्येकं प्रत्यपादि। मयि अश्नति-भुञ्जाने सति। अहः-दिवसः। गच्छति-अवसानं याति। प्रातरारभ्य यावत् सार्यम् आह्निककृत्यानां अनुष्ठानायापि नालं भवति कालः, अतो विप्रश्निकजीविकायै ममावकाश एव नोपलभ्यत इति भावः। (तेरन्नाद्युपपाद्य धूर्जटिमुखान् देवान् निवेद्यातिथीन् संतर्प्याश्नत एव याति दिवसः शेषः कुतः सञ्चरः इत्युत्तरार्धस्य पाठान्तरम्। अस्यार्थः सुगमः। शेषः कुतः सञ्चरः-अवशिष्टो दिवसः सञ्चाराय कुतः; बहिः सञ्चरणाय दिवसे नैवास्त्यवकाश इत्यर्थः।) कपटवेषस्य कापटिकीयं वाचोयुक्तिः॥ २॥

अये इति। यामादूर्ध्वं-रात्रौ प्रथमप्रहरादनन्तरम्। नगरसंचारः-नगरे वीथीषु जनानाम् इतस्ततो गमनागमनम्। (निद्रास्थानम् इति स्थाने स्वप्स्यामीति

षड्जाद्यौ मध्यमाद्यौ च चत्वार: स्युर्द्विधा द्विधा ।
चतुर्धा ऽन्ये दशेत्यष्टाचत्वारिंशदमी क्रमा: ॥ ४१ ॥
सविंशति: सप्तशती प्रागुक्ता गुणिता क्रमै: ।
चतुस्त्रिंशत्सहस्राणि षष्ट्या पञ्च शतानि च ॥ ४२ ॥

षड् (६) भेदा: । द्विस्वराणां प्रस्तारे द्वौ (२) भेदौ । एकस्वरप्रस्तार एक: (१) ॥ ३७, ३८ ॥ एकस्वरादितानानां नामविशेषं कथयति—**आर्चिक** इति । एकस्वर आर्चिक इत्युच्यते । द्विस्वरो गाथिक: । त्रिस्वर: सामिक: । चतु:स्वर: स्वरान्तर: । पञ्चस्वरस्यौडुवत्वं षट्स्वरस्य षाडवत्वं च वक्ष्यति । सप्तस्वर: संपूर्ण:, सप्तभ्यो ऽधिकस्वराभावात् । तथा चाह नारद:—

'आर्चिको गाथिकश्चैव सामिकश्च स्वरान्तर: ।
औडुव: षाडवश्चैव संपूर्णश्चैव सप्तम: ॥
एकस्वरप्रयोगो हि आर्चिकस्त्वभिधीयते ।
गाथिको द्विस्वरो ज्ञेयस्त्रिस्वरश्चैव सामिक: ॥
चतु:स्वरप्रयोगो हि स्वरान्तरक उच्यते ।
औडुव: पञ्चभिश्चैव षाडव: षट्स्वरो भवेत् ॥
संपूर्ण: सप्तभिश्चैव विज्ञेयो गीतयोक्तृभि: ।'

इति ॥ ३९ ॥ एवं षाडवादीनां प्रतिक्रमं संख्यामुक्त्वा षाडवक्रमसंख्याऽर्थमाह—**उक्ता: शुद्धादिभेदेनेति** । ग्रामद्वये चतुर्दश मूर्च्छना अन्त्यैकैकस्वरापकर्षेण यदा षाडवा: क्रियन्ते तदा निषादगांधारयुक्ता भेदाश्चतुर्विधा भवन्ति शुद्धा: काकली-कलिता: सान्तरास्तद्द्वयोपेता इति । तयोर्निषादगांधारयोरेकैकहीनास्तु द्वेधा निषादहीनौ शुद्धौ सान्तरौ, गांधारहीनौ शुद्धौ काकलीकलितौ ॥ ४० ॥

(क०) **षड्जाद्यौ मध्यमाद्यौ चेति** । षड्जग्राम औत्तरमन्द्र: क्रम: षड्जाद्य:, मध्यमग्रामे शौद्धमध्यम: षड्जाद्य:, एतौ षड्जाद्यौ । मध्यमग्रामे सौवीर: क्रमो मध्यमाद्य:, षड्जग्रामे मात्सरीकृत: क्रमो मध्यमाद्य:, एतौ मध्यमाद्यौ । मिलित्वा चत्वारो द्विधा द्विधा स्यु: प्रत्येकं द्विधा भवन्ति ;

इति षाडवसंख्या स्यादथ पञ्चस्वरान्ब्रुवे ।
गाद्यौ धाद्यौ निषादाद्यौ चतुर्भेदाः षडौडुवाः ॥ ४३ ॥
अष्टावन्ये द्विधेत्येवं चत्वारिंशदिमे क्रमाः ।
सविंशतौ शते तैश्च गुणिते ऽष्टौ शतानि तु ॥ ४४ ॥
चत्वारि च सहस्राणि संख्या पञ्चस्वरेष्विति ।
चतुःस्वरेषु न्याद्यौ द्वौ चतुर्धा द्वादशापरे ॥ ४५ ॥
क्रमा द्विधेति द्वात्रिंशच्चतुर्विंशतिताडिता ।
शतानि सप्ताष्टषष्ट्या स्याच्चतुःस्वरसंमितिः ॥ ४६ ॥
त्रिस्वरेषु तु माद्यौ द्वावभेदौ द्वादशापरे ।
द्विधा षड्विंशतिरिति क्रमास्ते षड्भिराहता ॥ ४७ ॥
षट्पञ्चाशच्छतं च स्युर्द्विस्वरेषु पुनर्द्विधा ।
रिगधन्यादयो ऽष्टौ स्युः शुद्धास्तदितरे क्रमाः ॥ ४८ ॥
द्वाविंशतिस्ते तु चतुश्चत्वारिंशद् द्विताडिता ।

निगयोरेकैकहीनत्वादित्यर्थः । अन्ये दश चतुर्धेति । निगयुक्तत्वादित्यर्थः । गाद्यौ धाद्यावित्यादिष्वप्येवं द्रष्टव्यम् ॥ ४१–४८- ॥

(सु०) चतुर्दशसु के चतुर्धा के च द्वेधेत्यपेक्षायामाह—**षड्जाद्याविति** । ग्रामद्वयमूर्च्छनासु षड्जाद्यौ द्वौ भेदौ निषादहीनत्वाद् द्विप्रकारौ शुद्धौ सान्तराविति । मध्यमाद्यौ च द्वौ भेदौ गांधारहीनत्वाद् द्विप्रकारौ शुद्धौ काकलीकलिताविति । अन्ये तु दश भेदाश्चतुर्धा शुद्धाः सान्तराः काकलीकलितास्तद्द्वयोपेता इति । एवमष्टाचत्वारिंशत् (४८) षाडवाः क्रमा भवन्ति । प्रतिक्रमं च विंशत्युत्तराणि सप्त शतानि (७२०) । तान्यष्टाचत्वारिंशता गुणितानि चतुस्त्रिंशत्सहस्राणि षष्ट्यधिकानि पञ्च शतानि च (३४५६०) क्रमैः सह षाडवकूटतानभेदा भवन्ति । पञ्चस्वरान्क्रमान्परिगणयति—**गाद्याविति** । ग्रामद्वये गांधाराद्यौ द्वौ भेदौ, धैवताद्यौ द्वौ, निषादाद्यौ द्वौ । एवं षडौडुवाः पञ्चस्वरा भेदा निषादगां-

एकस्वरास्त्वभेदत्वान्मौला एव चतुर्दश ॥ ४९ ॥
षड्जादेः शुद्धमध्याया भेदकं पञ्चमं विना ।
चतुःस्वरे क्रमद्वंद्वे ऽष्टाचत्वारिंशदीरिताः ॥ ५० ॥

धारयुक्तत्वाच्चतुःप्रकाराः । अन्ये ऽष्टौ भेदास्तु चत्वारो निषादहीनाश्चत्वारश्च गांधारहीनाः, तस्माद् द्विप्रकाराः । एवं चत्वारिंशत् (४०) औडुवाः क्रमा भवन्ति । प्रतिक्रमं च विंशत्युत्तरं शतम् (१२०) भेदा भवन्ति । अतश्च विंशत्युत्तरे शते चत्वारिंशता गुणिते ऽष्टशताधिकानि चत्वारि सहस्राणि (४८००) पञ्चस्वराः कूटतानाः क्रमैः सह भवन्ति ॥ ४१–४४- ॥ चतुःस्वरान्क्रमान्परिगणयति—**चतुःस्वरेष्विति** । ग्रामद्वये चतुर्दशसु मूर्च्छनाभेदेषु मध्ये निषादाद्यौ द्वौ भेदौ चतुःस्वरौ निषादगांधारयुक्तत्वाच्चतुर्धा । अपरे द्वादश भेदा एकैकयुक्तत्वाद् द्विधा । एवं द्वात्रिंशत् (३२) चतुःस्वराः क्रमा भवन्ति । प्रतिक्रमं चतुर्विंशतिः (२४) भेदाः । अतश्चतुर्विंशत्या गुणितायां द्वात्रिंशत्यष्टषष्ट्यधिकानि सप्त शतानि (७६८) चतुःस्वराः कूटतानाः क्रमैः सह भवन्ति ॥ -४५, ४६ ॥ त्रिस्वरान्क्रमान्गणयति—**त्रिस्वरेष्विति** । त्रिस्वराणां चतुर्दशानां क्रमाणां मध्ये माद्यौ मध्यमाद्यौ द्वौ भेदौ निषादगांधारहीनत्वादभेदौ भेदशून्यौ । अपरे द्वादश भेदा निषादगांधारयोरैकैकयुक्तत्वाद् द्विप्रकाराः । एवं षड्विंशतिः (२६) त्रिस्वराः क्रमाः संपद्यन्ते । प्रतिक्रमं च षड् (६) भेदाः । ततश्च षड्भिर्गुणितायां षड्विंशतौ षट्पञ्चाशदुत्तरं शतम् (१५६) त्रिस्वराः कूटतानाः क्रमैः सह भवन्ति । द्विस्वरान्क्रमान्परिगणयति—**द्विस्वरेष्विति** । ग्रामद्वये चतुर्दशानां द्विस्वराणां मध्य ऋषभाद्यौ द्वौ भेदौ, गांधाराद्यौ द्वौ, धेवताद्यौ द्वौ, निषादाद्यौ द्वौ । एवमष्टौ भेदा निषादगांधारयोरैकैकयुक्तत्वाद् द्विधा । अपरे तु षड् भेदा उभयहीनत्वाच्छुद्धाः सान्तरत्वादिभेदहीनाः । एवं द्विस्वरा द्वाविंशतिः (११) क्रमा भवन्ति । प्रतिक्रमं च भेदद्वयम् (२) । अतश्च ते द्वाविंशतिर्भेदा द्वाभ्यां गुणितायां द्वाविंशतौ चतुश्चत्वारिंशद् (४४) द्विस्वराः कूटतानाः क्रमैः सह भवन्ति ॥ ४७–४८- ॥

(क०) **एकस्वरास्त्विति** । तुशब्दो द्विस्वरादिक्रमवैषम्यद्योतनार्थः । वैषम्यं चात्र काकल्यन्तरप्रयुक्तभेदराहित्यम् । अभेदत्वात्प्रस्तारप्रयुक्तभेदर-

तानाश्चिस्वरयोस्त्वेते द्वादश द्विस्वरे द्वयम् ।
एक एकस्वरस्ते त्रिषष्टिरौत्तरमन्द्रकैः ॥ ५१ ॥
पुनरुक्ता मतास्तानैर्न्यादिमार्गीक्रमाः पुनः ।
पञ्चस्वरा ये चत्वारस्तत्तानानां चतुःशती ॥ ५२ ॥
अशीत्यभ्यधिका चातुःस्वरी षण्णवतिर्भवेत् ।
द्वादश त्रिस्वरद्वंद्वे चत्वारो द्विस्वरद्वये ॥ ५३ ॥
एक एकस्वरस्तानस्तेषां पञ्चशती त्रियम् ।
त्रिनवत्या युता तानैरभिन्ना रजनीगतैः ॥ ५४ ॥

हितत्वात् । मौला मूले भवाः, शुद्धा इत्यर्थः । चतुर्दशैव ; अत्रान्ययोगव्यवच्छेदार्थमवधारणम् । अयमभिप्रायः—यद्यपि निगयोः काकल्यन्तरावस्थाऽऽपत्त्या मूर्च्छनाभेदकत्वं तथा ऽप्येकैकस्वरयोस्तयोः स्वरान्तरयोगमन्तरेण स्वगतसूक्ष्मभेदस्यालक्ष्यमाणत्वाच्छुद्धयोरेव गणना, न काकल्यन्तरयोरिति । यदा पुनः षड्जग्रामे मध्यस्थानस्थितषड्जस्थान एव निषादाद्यारम्भेण रजन्यादयो मूर्च्छना भवेयुरिति तथा मध्यमग्रामे मध्यस्थानस्थितमध्यमस्थान एव गांधाराद्यारम्भेण हारिणाश्वादयो मूर्च्छना भवेयुरिति च पक्षः, तदा ग्रामयोर्भेदकपञ्चमाभावे ऽपि मूर्च्छनानां स्थानभेदस्य विद्यमानत्वात्कूटतानपौनरुक्त्याभाव एव । यदा पुनर्ग्रामयोर्मूर्च्छनानां तदधोऽधःस्थस्वरारम्भपक्षस्तदा तु मध्यमग्रामीणानां शुद्धमध्यामार्गीपौरवीगतानां तानानां षड्जग्रामीणैरुत्तरमन्द्रारजन्युत्तरायतागतैर्यथायोगं षट्स्वरादिभिस्तानैः सह स्थानभेदाभावाद्भेदकपञ्चमाभावेन पौनरुक्त्यं निश्चित्य तत्र शुद्धाश्रयत्वेन प्रथमोक्तान्षाड्जग्रामिकान्गणनायां संस्थाप्य तदपेक्षया पुनरुक्तान्माध्यमग्रामिकानपनेतुं तान्परिगणयति—**षड्जादेः शुद्धमध्याया** इत्यादिना ।

ननु शुद्धमध्याया इत्यनेनैव षड्जादित्वे सिद्धे षड्जादेरिति विशेषणं व्यर्थमिति चेत्, न; अशुद्धमध्याया: प्रथमादिस्वरारम्भक्रमात्क्रमसप्तक-वत्त्वेन तावत्येवोक्तक्रमविषयः संदेहः स्यात्; तन्निवर्तकत्वेन विशेषणमर्थव-दिति। एवं न्यादिमार्गीत्यत्र धैवतादेस्तु पौरव्या इत्यत्राप्यवगन्त-व्यम् ॥ -४९—५४ ॥

(सु०) एकस्वरास्तु भेदाभावाच्चतुर्दशैव भवन्तीत्याह—एकस्वरास्त्विति। एवं क्रमैः पुनरुक्तैश्च सह लक्षत्रयं द्वाविंशतिः सहस्राणि पञ्च शतानि द्व्यशीतिश्च (३२२५८२) भेदा भवन्ति। एतेषु पृथक्कर्तुं पुनरुक्तान्कूटतानान्कथयति—षड्-जादेरिति। मध्यमग्रामे चतुर्थी मूर्च्छना षड्जादिः शुद्धमध्या। तस्याश्चतुःस्वरं क्रमद्वयं शुद्धं सान्तरं च। तत्र ग्रामद्वयमूर्च्छनानां भेदकं चतुःश्रुतिकत्वेन त्रिश्रुति-कत्वेन च द्विविधं पञ्चमं विना ऽष्टाचत्वारिंशद्भेदाः पुनरुक्ताः ॥ -४९—९० ॥ त्रिस्वरयोस्तु द्वयोः क्रमयोः शुद्धसान्तरयोर्द्वादश भेदाः पुनरुक्ताः। द्विस्वरे निषा-दगांधारहीनत्वादेकस्मिन्ग्रामे भेदद्वयं पुनरुक्तम्। एकस्वरस्त्वेक एव पुनरुक्तः। एवं शुद्धमध्यायास्त्रिषष्टिर्भेदाः। औत्तरमन्द्रकैः षड्जग्रामे प्रथममूर्च्छनोत्तरमन्द्रा षड्जादिभिरेव तत्संबन्धिभिः कूटतानैः सह पुनरुक्ताः। अन्यानपि पुनरुक्तान्गण-यति—न्यादिमार्गीति। मध्यमग्रामे निषादादिर्हि पञ्चमी मूर्च्छना मार्गी। तस्यां पञ्चस्वराश्चत्वारः क्रमा भवन्ति, निषादगांधारयुक्तत्वात्। तेषां भेदा अशीत्यभ्यधिकं शतचतुष्टयम्। चतुःस्वरसंबन्धिनी चातुःस्वरी षण्णवतिः। कूटतानानां पुनरुक्ताश्चतुःस्वरा अपि निषादगांधारयुक्तत्वाच्चत्वारः क्रमाः। प्रति-क्रमं च चतुर्विंशतिर्भेदाः। अतः षण्णवतेः पौनरुक्त्यम्। त्रिस्वरं तु क्रमद्वयमेव, निषादयुक्तत्वात्। तत्र द्वादश भेदाः। द्विस्वरं क्रमद्वयं निषादयुक्तत्वात्। तस्य चत्वारो भेदाः। एकस्वर एक एव। यद्यपि निषादस्य शुद्धत्वेन काकली-त्वेन च द्वैविध्यं संभवति, तथा ऽप्येकस्वरस्य क्रमत्वेनानुपेयत्वान्न भेदादरः। एवं त्रिनवत्या युता पञ्चशती रजनीगतैस्तानैः सह पुनरुक्ताः। रजनी षड्जग्रामे द्वितीया मूर्च्छना निषादादिः ॥ ९१—९४ ॥

धैवतादेस्तु पौरव्याश्चत्वारः षट्स्वराः क्रमात् ।
तत्तानानां तु साशीतिः शताष्टाविंशतिर्मता ॥ ५५ ॥
औडुवानां चतुर्णां प्रागुक्ता संख्या चतुःस्वरौ ।
त्रिस्वरौ द्विस्वरावेकस्वरः प्रागुक्तसंख्यकाः ॥ ५६ ॥
पञ्चविंशतिसंयुक्ता चतुस्त्रिंशच्छती त्वियम् ।
तानानां सदृशाकारा स्यात्तानैरौत्तरायतैः ॥ ५७ ॥
इत्येकाशीतिसंयुक्तं सहस्राणां चतुष्टयम् ।
तानानां पुनरुक्तानां पूर्णापूर्णैः सह क्रमैः ॥ ५८ ॥

(क०) **धैवतादेस्तु पौरव्या** इति । अत्र धैवतस्य ग्रामभेदकत्वं नाशङ्कनीयम्, तस्योपलक्षणतया पूर्वमभेदकत्वप्रतिपादनात् ॥ ५५–५७ ॥

(सु०) पुनरपि पुनरुक्तान्गणयति—**धैवतादेरिति** । मध्यमग्रामे षष्ठी मूर्च्छना धैवतादिः पौरवी । तस्या निषादगांधारयुक्तत्वात्षट्स्वराश्चत्वारः क्रमा भवन्ति । प्रतिक्रमं च सप्त शतानि विंशत्युत्तराणि । चतुर्णां क्रमाणामशीत्यभ्यधिकान्यष्टाविंशतिः शतानि भेदाः पुनरुक्ताः । सर्वत्र भेदकं पञ्चमं विनेत्यनुषङ्गो योज्यः । तस्या एव पौरव्या औडुवाः पञ्चस्वरा निषादगांधारयुक्तत्वाच्चत्वारः क्रमाः । तेषां प्रागुक्ता संख्या ऽशीत्यभ्यधिका चतुःशती । चतुःस्वरौ द्वौ क्रमौ निषादयुक्तत्वात् । तयोरष्टाचत्वारिंशद्भेदा भवन्ति । त्रिस्वरौ निषादयुक्तत्वाद् द्वौ क्रमौ । तयोर्द्वादश भेदाः । द्विस्वरावपि निषादयुक्तत्वाद् द्वौ क्रमौ । तयोश्चत्वारो भेदाः । एकस्वरस्त्वेक एव । एवं पञ्चविंशतिसंयुक्तानि चतुस्त्रिंशच्छतानि सदृशाकाराणि पुनरुक्तानि भवन्ति । कैः सह पौनरुक्त्यम्? अत आह—**औत्तरायतैरिति** । उत्तरायता षड्जग्रामे तृतीया मूर्च्छना धैवतादिः । तत्संबन्धिभिः कूटतानैः सह पौनरुक्त्यमित्यर्थः ॥ ५५—५७ ॥

(क०) **पूर्णापूर्णैः सह क्रमैरिति** । तत्र पूर्णाः क्रमाः प्रथमादिस्वरारम्भादित्यादिना लक्षणेन निष्पन्ना द्वानवतियुतशतत्रयसंख्याकाः ।

अपनीयेत चेदेषा कूटतानमितिर्भवेत् ।
लक्षत्रयं सप्तदश सहस्राणि शतानि च ॥ ५९ ॥
नवत्रिंशद्युतानीति ज्ञानोपायो ऽत्र कथ्यते ।

अपूर्णा द्व्यशीत्युत्तरशतसंख्याकाः । उभये चतुःसप्तत्यधिकपञ्चशतसंख्याकाः । नन्वेतैः क्रमैः सहिते पुनरुक्तताना नामेकाशीतियुक्तसहस्रचतुष्टयं द्व्यशीत्युत्तर-पञ्चशताधिकद्वाविंशतिसहस्रसहितलक्षत्रयमितात्तानराशेरपनीते सत्यवशिष्टकूट-तानसंख्या लक्षत्रयं सप्तदश सहस्राणि नव शतानि सप्तविंशतिश्चेति दृश्यते । अत्र त्रिंशद्युतानीति कथमुपपद्यत इति चेत्, ब्रूमः—अत्रैकस्वरतानानां चतुर्दशानां मध्ये शुद्धमध्यामार्गीपौरवीगतेषु त्रिष्वेकस्वरतानेषु पुनरुक्तत्वेना-पनीतेष्वेकादशैवेतरेष्वेषां क्रमत्वाभावे ऽपि कूटतानत्वाभावादपनेयत्वेन क्रम-राशौ निवेशिताः, त्रयस्तु न निवेशिता इति तैः सह त्रिंशद्युतानीत्युपपद्यत इति । एवं तर्हि शुद्धमध्याऽऽदिष्वेव द्विस्वरादिष्वेकत्रिंशत्क्रमेषु पुनरुक्त-तानत्वेनापनीतेषु तेषामपि क्रमराशावननुप्रवेशादेकषष्टियुक्तानीति पठितव्यं स्यादिति चेत्, सत्यम् । अत्रोच्यते—पुनरुक्ततानत्वाकारेणापनीतानामपि तेषां क्रमत्वसंभवात्क्रमराशावनुप्रविष्टानां क्रमत्वप्रयुक्त्या ऽपि पुनरपनेय-त्वमाकारद्वयवशाद् बृहस्पतिसवानुष्ठानवदुपपद्यते । यथैकस्यापि बृहस्पतिसव-स्याश्वमेधाङ्गत्वेन प्राधान्येन चानुष्ठेयत्वम्, लोके च यथैकस्यापि देवदत्तस्य पाठकत्वपाचकत्वोपाधिवशाद्भेदेन परिगणनात्कार्यान्तरान्वयः, तद्वत्त्रयाणामेक-स्वराणामनुक्रमत्वाभावेनाकारद्वयासंभवान्न पुनरपनेयत्वम्, द्विस्वरादीनामेक-त्रिंशत्तानानामाकारद्वयसंभवात्पुनरपनेयत्वमेव; अन्यथा तु दोषः स्यादिति मत्वा त्रिंशद्युतानीति सुष्ठूक्तं निःशङ्कशार्ङ्गदेवेन । ये तु मन्यन्ते—

'त्यक्तानां न सकृत्त्यागः कथमप्युपपद्यते' इति निर्णीय,

'सहस्रैः सप्तदशभिर्युतं लक्षत्रयं तथा ।
शतानि नव षष्टिश्च सैका कूटाः समासते ॥'

इति, ते प्रष्टव्याः—अथैकत्रिंशत्तानानां सकृत्त्यागः पुनरुक्तत्वेन वा क्रमत्वेन वा? यदि पुनरुक्तत्वेनैव त्यज्येरंस्तदा तेषां क्रमत्वेन त्याज्येष्वपरिगणनात्केवलकूटतानपरिगणनावसरे क्रमाणामपि ग्रहणात् 'कूटाः समासते' इति वदतां व्याहतिः स्यात् । किं च तेषां पुनरुक्ताकारवत्तया च पुनरुक्तपरित्यागो ऽपि साकल्येन न कृतः स्यात् । अथ क्रमत्वेनैव परित्यागस्तदा पुनरुक्तत्वेन त्याज्येष्वपरिगणनादपुनरुक्तकूटतानेयत्ताऽभिधानावसरे पुनरुक्तानामपि तेषां ग्रहणात् 'त्रिषष्टिः परिकीर्तिता' इत्यादिना शुद्धमध्याऽऽदिषु क्रमैः सह पुनरुक्तान्परिगणयतां व्याहतिः स्यात् । तेषां क्रमाकारवत्तया च क्रमत्यागो ऽपि साकल्येन न कृतः स्यादिति तत्रभवतां मीमांसामांसलितधियाम् 'षष्टिश्च सैका कूटाः' इति महदिदं ग्रन्थनिर्माणकौशलम् !

संगीतरत्नाकरभावबोद्धा श्रीकल्लिनाथः सुधियां मतेन ।
अपौनरुक्त्यात्क्रमकूटतानसंख्याविरोधं त्विह पर्यहार्षीत् ॥
५८—५९ ॥

(सु०) एवं शुद्धमध्यामार्गीपौरवीणां पुनरुक्तान्कूटतानान्मिलितान्परिगणयति—इत्येकाशीतीति । एवं पुनरुक्तानां तानानां सहस्रचतुष्टयमेकाशीत्यधिकं भवति । पुनरुक्तकूटतानापनयने पूर्णापूर्णक्रमापनयने च निष्कृष्टां कूटतानसंख्यां कथयति—लक्षत्रयमिति । पूर्णाः क्रमा द्वानवत्यधिकं शतत्रयम् । षाडवा अष्टाचत्वारिंशत् । औडुवाश्चत्वारिंशत् । चतुःस्वरा द्वात्रिंशत् । त्रिस्वराः षड्विंशतिः । द्विस्वरा द्वाविंशतिः । एकस्वरा एकादश । यद्यप्येकस्वराश्चतुर्दश, तथाऽपि षड्जनिषादधैवतानां पुनरुक्तमध्ये ऽपनीतत्वादवशिष्टा एकादशैव गण्यन्ते ।

अङ्कानेकादिसप्तान्तानूर्ध्वमूर्ध्वं लिखेत्क्रमात् ॥ ६० ॥
हते पूर्वेण पूर्वेण तेषु चाङ्के परे परे ।
एकस्वरादिसंख्या स्यात्क्रमेण प्रतिमूर्च्छनम् ॥ ६१ ॥

एवमेकसप्तत्यधिकानि पञ्च शतानि क्रमा भवन्ति । पुनरुक्ताश्चैकाशीत्यधिकं सहस्र-चतुष्टयम् । एतेषामैक्ये चत्वारि सहस्राणि षट् शतानि द्वापञ्चाशत् (४६९२) । क्रमपुनरुक्तसहितकूटतानसंख्या तु लक्षत्रयं द्वाविंशतिः सहस्राणि पञ्च शतानि द्वयशीतिश्च (३२२९८२) । क्रमपुनरुक्तापनयने तु लक्षत्रयं सप्तदश सहस्राणि नव शतानि त्रिंशच्च (३१७९३०) पूर्णापूर्णाः कूटतानाः संपन्नाः । ननु यथा पञ्चमो ग्रामद्वये भेदकश्चतुःश्रुतिकत्वात्त्रिश्रुतिकत्वाच्च, तथा त्रिश्रुतिकत्वाच्चतुः-श्रुतिकत्वाच्च धैवतः कथं भेदको न भवति? ब्रूमः—यद्यपि धैवतः षड्जग्रामे त्रिश्रुतिर्मध्यमग्रामे च चतुःश्रुतिः, तथा ऽपि स्वस्थानं न परित्यजति, केवलं तु मध्यमग्रामे पञ्चमान्त्यश्रुतिग्रहणमात्रम् । ततश्च यदा पञ्चमसहचरितो धैवत उच्चार्यते तदैव तस्य विकृतत्वप्रतीतिर्नान्यदेति न किंचिदेतत् । कूटतानानां बहुत्वात्स्वरूपपरिज्ञानं दुःसंपादमिति लाघवेन परिज्ञानोपायं वक्तुं प्रतिजा-नीते—**ज्ञानोपाय इति** ॥ ९८–९९- ॥

(क०) परिगणितपूर्णापूर्णतानसंख्यापरिज्ञानोपायमाह — **अङ्कानेकादिसप्तान्तानिति** । तेषु सप्तस्वङ्केषु परे परे द्व्यङ्कादौ पूर्वेण पूर्वेणैकाङ्का-दिना हते गुणिते सति । अयमर्थः—प्रथमं पूर्वेणैकाङ्केन परे द्व्यङ्के गुणिते द्विसंख्या जायते । ततो जातं द्विसंख्याऽङ्कं पूर्वं कृत्वा तेन परे त्र्यङ्के गुणिते षट्संख्या जायते । षट्संख्यया परे चतुरङ्के गुणिते चतुर्विंशतिसंख्या जायते । तया परे पञ्चाङ्के गुणिते विंशत्युत्तरशतसंख्या जायते । तया परे षडङ्के गुणिते सविंशतिः सप्तशती जायते । तया परे सप्ताङ्के गुणिते चत्वारिंशदुत्तरपञ्चसहस्रसंख्या जायते । एवमुक्तरीत्या गुणितव्यम् । एवं कृते

क्रमं न्यस्य स्वरः स्थाप्यः पूर्वः पूर्वः परादधः ।
स चेदुपरि तत्पूर्वः पुरस्तूपरिवर्तिनः ॥ ६२ ॥
मूलक्रमक्रमात्पृष्ठे शेषाः प्रस्तार ईदृशः ।

सति प्रतिमूर्च्छनं क्रमेणैकस्वरादिसंख्या स्यात्, एकस्वरादितानानां संख्या भवेत् ॥ -६०, ६१ ॥

(सु०) संख्यापरिज्ञानोपायं कथयति—**अङ्कानिति** । एकादिसप्तान्तानङ्कानूर्ध्वमूर्ध्वं लिखेत् । प्रथममेकाङ्को लेखनीयः, तस्योर्ध्वप्रदेशे द्व्यङ्कः, ततस्त्र्यङ्कः, ततश्चतुरङ्कः, ततः पञ्चाङ्कः, ततः षडङ्कः, ततः सप्ताङ्क इति । ततः परे परे तूर्ध्वस्थे ऽङ्के पूर्वेणाधःस्थितेनाङ्केन हते गुणिते सति प्रतिमूर्च्छनमेकस्वरद्विस्वरादिसंख्या स्यात् । एकेन द्व्यङ्के गुणिते द्वावेव, 'एकेन गुणितं तदेव भवति' इति न्यायात् । द्वाभ्यां त्र्यङ्के गुणिते षट् । षड्भिश्चतुरङ्के गुणिते चतुर्विंशतिः । चतुर्विंशत्या पञ्चाङ्के गुणिते विंशत्युत्तरं शतम् । विंशत्युत्तरेण शतेन षडङ्के गुणिते विंशत्युत्तरा सप्तशती । विंशत्युत्तरया सप्तशत्या सप्ताङ्के गुणिते पञ्च सहस्राणि चत्वारिंशदुत्तराणि भवन्ति । एषैवैकस्वरादिसंख्या ॥ -६०–६१ ॥

(क०) उक्तसंख्यानिदर्शनार्थमुद्देशक्रमेण प्रस्तारं लक्षयति—**क्रमं न्यस्येति** । क्रमं षष्ट्युत्तरपञ्चशतसंख्यया परिगणितेषु पूर्णापूर्णक्रमेष्वन्यतमं न्यस्य लिखित्वा पूर्वः पूर्वः स्वरः परादधः स्थाप्य इति । उत्तरमन्द्रायां तावत् सरिगमेति चतुःस्वरं क्रमं लिखित्वा तस्मिन्क्रमे पूर्वः षड्जः परादृषभादधः स्थाप्यः । अत्र पूर्वः पूर्व इति वीप्सा ऽऽ प्रस्तारपरिसमाप्तेः प्रतितानं सकृत्करणविषया ऽवगन्तव्या नैकतानविषया । एकतानविषयत्वे तु पुरस्तूपरिवर्तिन इत्यस्य क्वचिदपि न संभवः । तेन परिगणिततानभेदा अपि न संभवेयुः । तस्मादेकवारमेव पूर्वः स्वरः परादधः स्थाप्यः । स चेदुपरि

तत्पूर्व इत्यस्य लक्षणांशस्य नायं विषय: । **पुरस्त्वि**ति । लिखितस्वरापेक्षया तत्पङ्क्तौ क्रमेण लेखनोचिते देशे लिखितो यस्तस्य दक्षिणभाग इत्यर्थ: । उपरिवर्तिन: पुरोदेशस्योर्ध्वपङ्क्तिस्थिता: स्थाप्या इत्यूह्यम् । अनेनात्र षड्जानन्तरं गमौ स्थाप्यौ । पृष्ठे प्रथममधोलिखितस्वरस्य पश्चाद्देशे लिखितो यस्तस्य वामभाग इत्यर्थ: । शेषा: क्रमापेक्षया लिखितेभ्यो ऽवशिष्टा: स्वरा:, मूलक्रमक्रमात्, मूलक्रम: ; उत्तरमन्द्रायां क्रमेण षड्जादिसप्त-स्वराद्या: क्रमा: सप्त, तत्र षड्जाद्य: क्रमो मूलक्रम:, तस्मिन्स्वराणां य: क्रमो व्यवहितत्वेनाव्यवहितत्वेन वा तस्मात् ; स्थाप्या इति शेष: । शेषा इति बहुवचनं संभवद्विषयम् । अनेनात्रावशिष्ट ऋषभ: पृष्ठे लिख्यते । एवं च सति रिसगमेति प्रथम: कूटतान: प्रस्तारे निष्पद्यते । अथास्मिंस्ताने यद्यप्यृषभात्षड्ज: पूर्वस्तथा ऽपि स चेदुपरि, स पूर्व उपरि चेदुपरितन्यायमेव पङ्क्तावुत्तरत्र वर्तते चेत्, तदा तत्पूर्व उपरि वर्तमानात्पूर्व: स्थाप्य इति । अत्रोपरि वर्तमानात्षड्जादस्मिन्क्रमे पूर्वाभावादेवर्षभषड्जयोरध: स्थाप्यौ न संभवत: । गांधारस्याधस्तान्मूलक्रमापेक्षयर्षभस्य पूर्वत्वात्तस्योपरि वर्तमान-त्वाभावाच्चर्षभ: स्थाप्य: । पुरस्तूपरिवर्तिन इत्यृषभानन्तरं मध्यम: स्थाप्य: । अत्रापि बहुवचनं संभवद्विषयम् । मूलक्रमक्रमादिति पृष्ठे षड्जगांधारौ स्थाप्यौ । तदा सगरिमेति द्वितीय: कूटतान: । एवं मूलक्रमावरोहावधि प्रस्तारे क्रियमाणे तत्तत्क्रमोक्तसंख्याका: कूटताना उत्पद्यन्ते । तत: प्रस्तार एव न संभवति ॥ ६२, ६३- ॥

(सु०) सप्तस्वरक्रमरूपपरिज्ञानार्थं प्रस्तारं कथयति—क्रमं न्यस्येति । क्रमं प्रथमतो न्यस्य स्थापयित्वा । सरिगमपधनीति क्रम: । क्रमापेक्षया पूर्व: पूर्व: स्वर: परादधो ऽध: स्थापनीय: । पूर्व: पूर्व इति वीप्सया लभ्यमर्थं विशदयति—स चेदिति । स पूर्व: स्वर उपरिभागे वर्तते चेत्तदा तस्यापि पूर्व: स्वरो लेखनीय: । सो ऽपि चेदग्रे वर्तते तदा तत्पूर्व: । सो ऽपि चेत्परवर्ती

तदा तस्यापि पूर्वः। एवं निषादमारभ्य षड्जपर्यन्तं विचारणीयम्। तत्रापि षड्जपर्यन्ताः स्वराः पुरस्तात्तिष्ठन्ति चेत्तं स्वरं विहाय द्वितीये स्वरे प्रस्तारश्चिन्तनीयः। तत्रापि षड्जपर्यन्ताः स्वराः पुरस्तात्तिष्ठन्ति चेत्तदा ऽन्यस्मिन्स्वरे प्रस्तारश्चिन्तनीयः। एवं विचार्य पूर्वस्मिन्स्वरे दत्ते, उपरिवर्तिनः स्वराः सन्ति चेत्पुरःप्रदेशे त एव देयाः। शेषा अवशिष्टाः स्वरा मूलक्रमक्रमेण पृष्ठे पूर्वप्रदेशे देयाः। अवशिष्टेषु स्वरेषु मूलक्रमेण यः पूर्वः स पूर्वं देयः। यस्तु ततो ऽनन्तरः स तदनन्तरं देयः। ईदृशो ऽयं प्रस्तारो बोद्धव्यः। तत्र दृष्टान्तार्थं चतुःस्वरः प्रस्तारः प्रदर्श्यते—सरिगमेति पूर्वं क्रमः संस्थाप्यः। षड्जस्याधस्तात्पूर्वस्वराभावात्स्वरो न स्थाप्यते। ऋषभस्य त्वधस्तात्तत्पूर्वः षड्जो देयः। उपरिगौ गांधारमध्यमौ पुरो देयौ। अवशिष्ट ऋषभः पश्चाद्देयः। एवं रिसगमेति द्वितीयो भेदः। तत ऋषभस्याधस्तात्षड्जो देयत्वेनासीत्। स चोपर्यग्रे वर्तते। तेनर्षभान्न प्रस्तारः। षड्जस्य पूर्वस्वराभावात्ततो ऽपि न प्रस्तारः। तेन गांधारस्याधस्तादृषभो देयः। पुरस्तूपरिवर्ती मध्यमो देयः। पूर्वशून्यक्रमे मूलक्रमात्षड्जगांधारौ देयौ। ततः सगरिमेति तृतीयो भेदः। ततो ऽनन्तरं गांधारस्याधस्तात्पूर्वमृषभो देयो भवति। परं तु स पुरस्ताद्विधते। तस्य पूर्वः षड्जो देयः। पुरो रिमौ पश्चाद्गः। एवं गसरिमेति चतुर्थो भेदः। तत ऋषभस्याधस्तात्षड्जो देयः। पुरो मः। पश्चाद्रिगौ। एवं रिगसमेति पञ्चमो भेदः। ततो ऽनन्तरं गांधारस्याधस्तादृषभः। पुरः समौ। पश्चाद्गः। एवं गरिसमेति षष्ठो भेदः। ततो मध्यमस्याधस्ताद्गांधारः। पश्चात्सरिमाः। एवं सरिमगेति सप्तमो भेदः। तत ऋषभस्याधस्तात्षड्जः। पुरो मगौ। पश्चाद्रिः। एवं रिसमगेत्यष्टमो भेदः। ततो मध्यमस्याधस्तादृषभः। पुरो गः। पश्चात्समौ। एवं समरिगेति नवमो भेदः। ततो मध्यमस्याधस्तात्षड्जः। पुरो रिगौ। पश्चान्मः। एवं मसरिगेति दशमो भेदः। तत ऋषभस्याधस्तात्षड्जः। पुरो गः। पश्चाद्रिमौ। एवं रिमसगेत्येकादशो भेदः। ततो मध्यमस्याधस्तादृषभः। पुरः सगौ। पश्चान्मः। एवं मरिसगेति द्वादशो भेदः। ततो गांधारस्याधस्तादृषभः। पश्चात्सगमाः। एवं सगमरीति त्रयोदशो भेदः। ततो गांधारस्याधस्तात्षड्जः। पुरो मरी। पश्चाद्गः। एवं गसमरीति चतुर्दशो भेदः। ततो मध्यमस्याधस्ताद्गांधारः। पुरो रिः। पश्चात्समौ। एवं समगरीति पञ्च-

सप्ताद्येकान्तकोष्ठानामधो ऽधः सप्त पङ्क्तयः ॥ ६३ ॥

दशो भेदः। ततो मध्यमस्याधस्तात्षड्जः। पुरो गरी। पश्चान्मः। एवं मसगरीति षोडशो भेदः। ततो गांधारस्याधस्तात्षड्जः। पुरो रिः। पश्चाद्मौ। एवं गमसरीति सप्तदशो भेदः। ततो मध्यमस्याधस्ताद्गांधारः। पुरः सरी। पश्चान्मः। एवं मगसरीत्यष्टादशो भेदः। तत ऋषभस्याधस्तात्षड्जः। पश्चाद्रिगमाः। एवं रिगमसेत्यूनविंशतितमो भेदः। ततो गांधारस्याधस्ताद्दषभः। पुरो मसौ। पश्चाद्गः। एवं गरिमसेति विंशतितमो भेदः। ततो मध्यमस्याधस्ताद्गांधारः। पुरः सः। पश्चाद्रिमौ। एवं रिमगसेत्येकविंशतितमो भेदः। ततो मध्यमस्याधस्ताद्दषभः। पुरो गसौ। पश्चान्मः। एवं मरिगसेति द्वाविंशतितमो भेदः। ततो गांधारस्याधस्ताद्दषभः। पुरः सः। पश्चाद्गमौ। एवं गमरिसेति त्रयोविंशतितमो भेदः। ततो मध्यमस्याधस्ताद्गांधारः। पुरो रिसौ। पश्चान्मः। एवं मगरिसेति चतुर्विंशतितमो भेदः। ततो विपरीतक्रमसद्भावात्प्रस्तारलक्षणाभावाच्च प्रस्तारो नास्ति। अनेनैव प्रकारेण पञ्चस्वरादिषु प्रस्तारः कर्तव्यः। तत्र सरिगमपेति पञ्चस्वरप्रस्तारे पान्ताश्चतुर्विंशतिः। ततो मान्ताश्चतुर्विंशतिः। ततो गान्ताश्चतुर्विंशतिः। ततो र्यन्ताश्चतुर्विंशतिः। ततः सान्ताश्चतुर्विंशतिः। एवं पञ्चस्वरप्रस्तारे विंशत्युत्तरं शतं भेदा भवन्ति। सरिगमपधेति षट्स्वरप्रस्तारे धान्ता विंशत्युत्तरं शतम्। पान्ताश्च विंशत्युत्तरं शतम्। मान्ताश्च विंशत्युत्तरं शतम्। गान्ताश्च विंशत्युत्तरं शतम्। र्यन्ताश्च विंशत्युत्तरं शतम्। सान्ताश्च विंशत्युत्तरं शतम्। एवं विंशत्युत्तराणि सप्त शतानि षट्स्वरभेदा भवन्ति। सरिगमपधनीति सप्तस्वरप्रस्तारे तु निषादान्ता विंशत्युत्तराणि सप्त शतानि। ततो धान्ता विंशत्युत्तराणि सप्त शतानि। ततः पान्तास्तावन्ति। ततो मान्तास्तावन्ति। ततो गान्तास्तावन्ति। तत ऋषभान्तास्तावन्ति। ततः सान्तास्तावन्ति। एवं सप्तस्वरप्रस्तारे चत्वारिंशदुत्तराणि पञ्च सहस्राणि भेदा भवन्ति ॥ ६२, ६३- ॥

(क०) एवं प्रस्तुतेषु कूटेषु नष्टोद्दिष्टतानबोधार्थं खण्डमेरुं लक्षयति— **सप्तादीति**। सप्ताद्येकान्तकोष्ठानाम्, सप्तादयो येषां ते सप्तादयः,

तास्वाद्यायामाद्यकोष्ठे लिखेदेकं परेषु खम् ।
वेद्यतानस्वरमितान्न्यस्येत्तेष्वेव लोष्टकान् ॥ ६४ ॥

एको ऽन्तो येषां त एकान्ता इति तद्गुणसंविज्ञानो बहुव्रीहिः । सप्तादयश्च त एकान्ताश्च कोष्ठा इति ततः कर्मधारयः । तेषां सप्त पङ्क्तयो ऽधो ऽधः क्रमेण लेखनीया इति शेषः । अयमर्थः—आदौ सप्तकोष्ठान्वितां तिर्यक्पङ्क्तिं लिखेत् । तदधोऽध आदिमैकैककोष्ठह्रासात्क्रमेण षट् पङ्क्तीर्लिखेत् । तदा सप्ताद्येकान्तकोष्ठानां सप्त तिर्यक्पङ्क्तयो भवन्ति । अत्रैव चैकादिसप्तान्तकोष्ठानामूर्ध्वाधःस्थिताः पङ्क्तयश्च सप्त दृश्यन्ते । तासु तिर्यक्पङ्क्तिष्वाद्यायां सप्तकोष्ठायां पङ्क्तावाद्यकोष्ठ एकमेकसंख्याऽङ्कं लिखेत् । परेषु द्वितीयादिषु तत्पङ्क्तिकोष्ठेषु खं शून्याङ्कम्, बिन्दुमित्यर्थः । खमिति जातावेकवचनम् । तेष्वेवाद्यपङ्क्तिकोष्ठेष्वेव वेद्यतानस्वरमितान्, नष्टत्वेन वोद्दिष्टत्वेन वा जिज्ञास्यो वेद्यः, तस्य तानस्य यावन्तः स्वरास्तैर्मितांस्तत्समसंख्याकान् । लोष्टकानिति चालनोचितद्रव्योपलक्षणम् ॥ -६३, ६४ ॥

(सु०) एवं प्रस्तारमुक्त्वा प्रस्तारणे ऽप्यशक्तस्य लघूपायेन भेदपरिज्ञानार्थं नष्टोद्दिष्टे विवक्षुस्तदुपायभूतं खण्डमेरुं कथयति—**सप्ताद्येकान्तेति** । सप्त पङ्क्तयो ऽधोऽधस्तात्स्थापनीयाः । कियतां कोष्ठकानामित्यपेक्षायामाह—सप्ताद्येकान्तकोष्ठानामधो ऽधः सप्त पङ्क्तयः स्थाप्याः । उत्कृष्टापकृष्टसंख्याकथनेनार्थतो मध्यसंख्यासिद्धिः । ततश्च सप्तकोष्ठिका प्रथमा पङ्क्तिः कर्तव्या । द्वितीया तस्या अधस्तात्षट्कोष्ठिका । तृतीया तस्या अधस्तात्पञ्चकोष्ठिका । चतुर्थी तस्या अधस्ताच्चतुःकोष्ठिका । पञ्चमी तस्या अधस्तात्त्रिकोष्ठिका । षष्ठी तस्या अधस्ताद् द्विकोष्ठिका । सप्तमी तस्या अधस्तादेककोष्ठिका । एवं खण्डमेरुसंस्थानमुक्त्वा ऽङ्कनिवेशनार्थमाह—**तास्वाद्यायामिति** । तासु सप्तसु पङ्क्तिषु मध्य आद्यायां सप्तकोष्ठिकायां पङ्क्तावाद्यकोष्ठ एकाङ्कं लिखेन्निवेशयेत् । परेषु कोष्ठेषु

प्राक्पङ्क्त्यन्त्याङ्कसंयोगमूर्ध्वाधःस्थितपङ्क्तिषु ।
शून्यादधो लिखेदेकं तं चाधो ऽधः स्वकोष्ठकान् ॥ ६५ ॥
कोष्ठसंख्यागुणं न्यस्येत्खण्डमेरुरयं मतः ।

खं शून्यं लिखेत् । तेष्वेव प्रथमपङ्क्तिकोष्ठकेषु लोष्टकान्कर्करान्न्यस्येत्स्थापयेत् । कियतो लोष्टकान्? वेद्यतानस्वरमितान्; वेद्यो यस्तानस्त्रिस्वरश्चतुःस्वरः पञ्चस्वरः षट्स्वरः सप्तस्वरो वा तत्स्वरसंख्याकान् । यदि त्रिस्वरो जिज्ञासितस्तदा ऽऽदित आरभ्य त्रिषु कोष्ठकेषु त्रीँल्लोष्टकान्न्यस्येत् । यदि चतुःस्वरो जिज्ञासितस्तदा ऽऽदित आरभ्य चतुर्षु कोष्ठकेषु चतुरो लोष्टकान्न्यस्येत् । यदि पञ्चस्वरो जिज्ञासितस्तदा पञ्चेत्यादि द्रष्टव्यम् । लोष्टन्यसनोपयोगमनुपदमेव वक्ष्यति ॥ ६३, ६४ ॥

(क०) ऊर्ध्वाधःस्थितपङ्क्तिषूर्ध्वाधःस्थितकोष्ठानां पङ्क्तिषु । अत्र स्थितेति विशेषणपदस्य विशेष्यकोष्ठपदसापेक्षत्वेन समासः । प्राक्पङ्क्त्यन्त्याङ्कसंयोगम्, प्राक्पङ्क्तेः प्राक्पङ्क्त्योः प्राक्पङ्क्तीनां वा यथासंभवमन्त्याङ्कस्यान्त्याङ्कयोरन्त्याङ्कानां वा संयोगम्, संयोगोत्पन्नमङ्कान्तरमित्यर्थः । संनिहितपरपङ्क्तौ शून्याद् बिन्द्वाक्रान्तकोष्ठादधःकोष्ठे लिखेत् । एतदुक्तं भवति—द्वितीयपङ्क्तौ प्राक्पङ्क्त्यन्त्याङ्कस्यैकत्वेन संयोगस्याभावादेकाङ्कमेव लिखेत् । तृतीयपङ्क्तौ तु प्राक्पङ्क्त्योरन्त्याङ्कयोः संभवेन तत्संयोगोत्पन्नं द्व्यङ्कं शून्यादधो लिखेदिति । तं च द्व्यङ्कादिकं च स्वकोष्ठकात्स्वेनाधिष्ठितं कोष्ठमारभ्याधो ऽधः; कोष्ठसंख्यागुणम्, कोष्ठयोः कोष्ठानां वा संख्या कोष्ठसंख्या, तस्या गुणो यस्मिन्कर्मणीति क्रियाविशेषणम् । अयमर्थः—तृतीयपङ्क्तौ द्व्यङ्काधिष्ठितकोष्ठेन सहाधःकोष्ठस्य द्वितीयस्य संभवात्तत्र द्व्यङ्कं द्विगुणीकृत्य चतुरङ्कं लिखेत् । चतुर्थपङ्क्तावपि प्राक्पङ्क्तीनामन्त्याङ्कानां संयोगिनां षडङ्कं तत्र शून्यादधो लिखेत् । ततः संनिहिताधः-

कोष्ठे तं कोष्ठसंख्यया द्विगुणीकृत्य द्वादशाङ्कं लिखेत्। ततो ऽप्यधःकोष्ठे तं षडङ्कमेव कोष्ठसंख्यया त्रिगुणीकृत्याष्टादशाङ्कं लिखेत्। एवं पञ्चम्यादिषु पङ्क्तिषु प्राक्पङ्क्त्यन्त्याङ्कसंयोगादिप्रकारेण लिखेदिति ॥ ६५, ६५- ॥

(सु०) द्वितीयपङ्क्तावङ्कविन्यासं कथयति—**प्राक्पङ्क्ती**ति। ऊर्ध्वाधःस्थितपङ्क्तिष्वधःस्थिता याः पङ्क्तयस्तासु प्राक्पङ्क्त्यन्त्याङ्कसंयोगं लिखेत्। यद्येका प्राक्पङ्क्तिस्तर्हि तस्या अन्त्याङ्को लेख्यः। यदि प्राक्पङ्क्ती द्वे तदा तयोः संयोगो लेख्यः। यदि बह्व्यः प्राक्पङ्क्तयस्तदा तासां संयोगो लेख्यः। क्व लेख्य इत्यपेक्षायामाह—**शून्यादध** इति। तं चान्त्याङ्कसंयोगरूपमङ्कं स्वकोष्ठकात्, यत्रासावङ्कः स्थापितस्तत्स्वकोष्ठकम्, तस्मादधो ऽधो ऽधराधरकोष्ठकेषु कोष्ठसंख्यागुणितं न्यस्येत्। द्वितीयकोष्ठके द्विगुणं तृतीयकोष्ठके त्रिगुणं चतुर्थकोष्ठके चतुर्गुणं पञ्चमकोष्ठके पञ्चगुणं षष्ठकोष्ठके षड्गुणमिति। ततश्च षट्कोष्ठिकाया द्वितीयपङ्क्तेः प्रथमकोष्ठे प्राक्पङ्क्तेरेकस्या अन्त्याङ्क एकाङ्को देयः। अधः कोष्ठाभावाद् द्वैगुण्यादि नास्ति। तस्या एव पङ्क्तेर्द्वितीयकोष्ठे द्वयोः प्राक्पङ्क्त्योरन्त्याङ्क एक एकश्च, अनयोः संयोगे द्वयङ्को देयः। तस्याधःकोष्ठके तमङ्कं द्विगुणं चतुरङ्कं दद्यात्। तृतीयकोष्ठके प्राक्पङ्क्तयस्तिस्रः। तासामन्त्याङ्का एक एकश्चत्वारः। तेषां संयोगात्षडङ्को देयः। द्वितीयाधःकोष्ठके द्विगुणः षड् द्वादशाङ्को देयः। तदधःकोष्ठके त्रिगुणः षडष्टादशाङ्को देयः। द्वितीयपङ्क्तिचतुर्थकोष्ठके प्राक्पङ्क्तयश्चतस्रः। तासामन्त्याङ्का एक एकश्चत्वारो ऽष्टादश। तेषां संयोगे चतुर्विंशतिर्देया। तदधो द्वितीयकोष्ठके द्विगुणा ऽष्टाचत्वारिंशत्। तदधस्तृतीयकोष्ठके त्रिगुणा द्वासप्ततिः। तदधश्चतुर्थकोष्ठके चतुर्गुणा षण्णवतिः। द्वितीयपङ्क्तिपञ्चमकोष्ठके प्राक्पङ्क्तयः पञ्च। तासामन्त्याङ्का एक एकश्चत्वारो ऽष्टादश षण्णवतिः। तेषां संयोगे विंशत्युत्तरं शतं देयम्। तदधो द्वितीयकोष्ठके द्विगुणं चत्वारिंशदधिकं शतद्वयं देयम्। तृतीयकोष्ठके त्रिगुणं षष्ट्यधिकं शतत्रयम्। चतुर्थकोष्ठके चतुर्गुणमशीत्यधिकं शतचतुष्टयम्। अधःकोष्ठके पञ्चमे पञ्चगुणं षट्शती। द्वितीयपङ्क्तेः षष्ठकोष्ठे प्राक्पङ्क्तयः षट्। तासामन्त्याङ्का एक एकश्चत्वारो ऽष्टादश षण्णवतिः षट्शती। तेषां संयोगे विंशत्युत्तरा सप्तशती देया। तदधो द्वितीयकोष्ठके द्विगुणा सा चत्वारिंशदधिकानि चतुर्दश शतानि देयानि। तृतीयकोष्ठके त्रिगुणा

तच्च समीक्षेत कुर्यादित्यर्थः । तन्मातापितरौ विज्ञायेताम्[1] । तदभिवादनीयं नाम मातापितरौ कुर्याताम् । आ उपनयनात् । प्रवासादेत्य उत्तरार्थं कुर्वन्ति । एवमेते द्वे नामनी विहिते । पूर्वं नाम गुह्यं उत्तरं व्यावहारिकम् । इत्येवमेके । अन्ये पुनः नाम चास्मै दद्युः । कारयेयुरित्यर्थः । कस्मिन् काले तन्नाम कर्तव्यम् । आचारतः कालाः । केषां चिद्दशरात्रे । केषांचिदन्यस्मिन् काले । तेनैतदेव सांव्यवहारिकं नाम । अभिवादनीयं च समीक्षेत । अनेन[2] नाम्नाभिवादयति । एतच्च मातापितरौ विज्ञायेतां तावद्यावदुपनयनमिति । उपनीतस्य सतस्तस्य माताप्येतत्समाचष्टे अनेन[3] नाम्ना अभिवादयस्वेति । तेन पूर्वं सांव्यवहारिकं उत्तरमभिवादनीयमिति सिद्धं भवति[4] ॥

येन नाम्ना उपनीतः अभिवादयते तच्च समीक्षेत कुर्यादित्यर्थः । तच्च मातापितरावेव विद्यातामोपनयनात् उपनीतस्य त्वाचक्षते अनेन नाम्नाभिवादयस्वेति ॥ (१०)

प्रवासादेत्य पुत्रस्य शिरः परिगृह्य जपति अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मूर्द्धनि त्रिरवघ्राय ॥ ११ ॥

प्रवासादागतस्य पुत्रस्य शिरः परिगृह्य सर्वतो गृहीत्वा । मूर्धनि त्रिरवघ्राय मूर्ध्नः त्रिरवघ्राणं करोति । अवघ्राणं कृत्वा अथ जपति अङ्गादङ्गादित्येतं मन्त्रम् ॥

[1] विद्यातां is another reading of the text.
[2] A. L. have मन्त्रेण after अनेन.
[3] A. has ते च and L. ते न before अनेन.
[4] L. omits सिद्धं भवति.

प्रवासादागत्य गृहानीक्षेताप्यनाहिताग्निरित्यादिसूत्रोक्तमार्गेण विधिं कृत्वा पुत्रस्य शिरः परिगृह्य सर्वतो गृहीत्वा मूर्द्धनि त्रिरवघ्राय ततो जपति अङ्गादङ्गा-दिति ॥ (११)

आवृतैव कुमार्यै ॥ १२ ॥

कुमार्याः आवृतैव कर्म कर्तव्यं अमन्त्रकम् । तत्रैके अनन्तरं कर्मोप-दशन्ति । ननु चैवं सति जातकर्म समन्त्रकं प्राप्नोति । कुमारग्रहणं न भवति । अन्ये पुनरुभयं कर्म आवृता इच्छन्ति । कस्मात् । उभयोर्वि-शेषोऽयमिति । आवृतैव कुमार्यै इत्येवमुभयथा संप्रतिपन्नाः ॥

कुमार्यास्तु अमन्त्रकं कुर्यादिति । अनन्तरस्य चायं शेष इत्येके । अन-न्तरस्य जातकर्मणश्चेत्यपरे ॥ (१२)

इति प्रथमे पञ्चदशी कण्डिका

षष्ठे मास्यन्नप्राशनं ॥ १ ॥

जन्मनः प्रभृति यः षष्ठो मासः तस्मिन् षष्ठे मासि अन्न-प्राशनं कर्तव्यम् ॥

जन्मप्रभृति षष्ठे मासे न गर्भप्रभृति जाताधिकारात् । तत्रान्नप्राशनं नाम कर्म कार्यम् ॥ (१)

आजमन्नाद्यकामः ॥ २ ॥

अजस्येदमाजम् । तत्राजमिति तद्धितनिर्देशे संशयः । आजं क्षीरं आजं मांसं दधि घृतमिति । तत्र मांसमित्युच्यते । कुतः । तैत्तिरेण सहोपदेशात् ॥

अजस्येदमाजम् । तैत्तिरसाहचर्यान्मांसस्यात्र ग्रहणं न क्षीरदधिघृतानाम् ॥ (२)

तैत्तिरं ब्रह्मवर्चसकामः ॥ ३ ॥

तैत्तिरं मांसं ब्रह्मवर्चसकामः प्राश्नीयात् । तत्रोच्यते । किमनयोर्व्यञ्जनेनोपदेशः आहोस्विदन्नत्वेनोपदेश इति । किं चातः । यदि तावद्व्यञ्जनत्वेनोपदेशः ओदनस्यैते व्यञ्जने भवतः कामसंयोगेन । अथान्नत्वेन एतावैव प्राशयेत्[1] । तत्र व्यञ्जनत्वेनोपदेशः । कस्मात् । लोके व्यञ्जने एते दृष्टे । तथा दृष्टत्वादिहापि व्यञ्जने एते भवतः ॥

तित्तिरेरिदं तैत्तिरम् । आजतैत्तिरयोर्व्यञ्जनत्वेनोपदेशो नान्नत्वेन तथा लोके प्रसिद्धत्वात् । तेनान्नमपि सिद्धम् ॥ (३)

घृतौदनं तेजस्कामः ॥ ४ ॥

प्राश्नीयात् । तत्र संशयः । किं घृतमिश्र ओदनः घृतौदनः[2] आहोस्वित् घृतेन संस्कृत ओदनो घृतौदन इति । उच्यते । घृतेन संस्कृत ओदनो घृतौदन इत्युच्यते[3] । कथम् । ओदनग्रहणात् । यदि हि[4] घृतमि-

[1] A. L. तथान्नत्वेनैव तावदेव प्राशयेत.
[2] L. omits घृतौदनः
[3] L. omits the whole sentence.
[4] L. omits हि.

श्र ओदन अभिप्रेतः[1] स्यात् घृतं तेजस्काम इत्येवमाचक्षेत । ननु चैवं सति घृतमात्रस्यैव प्राशनं प्राप्नोतीति । न प्राप्स्यति । कस्मात् । यथा पूर्वयोः व्यञ्जनत्वेनोपदेशः कल्प्यते एवमिहापि व्यञ्जनत्वेनोपदेशः कल्प्यते[2] । एवं सति[3] यदोदनग्रहणं करोति तत् ज्ञापयति—घृतेन संस्कृत ओदनो घृतौदनः इति[4] ॥

घृतसंस्कृत ओदनो घृतौदनः । कुतः ओदनग्रहणात् । यदि हि घृतमिश्रोऽभिप्रेतः स्यात् घृतं तेजस्काम इत्येवावक्ष्यत् । ततश्च पूर्ववद्व्यञ्जनत्वेनान्नमपि सिध्यत्येव । सृते नेदीयसि घृतसेके कृते घृतसंस्कृतो भवति न तु घृते श्रपणम् । विक्लेदानुपपत्तेः ॥ (४)

दधिमधुघृतमिश्रमन्नं प्राशयेत् अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे इति ॥ ५ ॥

दध्यादिभिर्द्रव्यैरकामसंयोगे प्राश्नीयात् । अन्नपते इत्ययं प्राशनमन्त्रः । तत्र किमयं प्राशनमन्त्र अनन्तरे एव प्राशने भवति आहोस्वित्सर्वेषु प्राशनेष्विति[5] । तत्रानन्तरविधानात्तत्रैव प्राप्नोति । नेत्युच्यते । सर्वत्र संभवति । यथा अन्नमिह विहितं सर्वेषु भवति तद्वद्भविष्यति । किं पुनः कारणमिहान्नातमन्यत्र भवतीति । नित्यमिदं प्राशनम् । पूर्वेण च कामसंयोगो विधीयते । कामसंयुक्तश्चार्थश्चोद्यमानो नित्यं तावत्तिष्ठति ।

[1] A. घृतमिश्रोऽभिप्रेतः

[2] L. omits एवमिहापि व्यञ्जनत्वेनोपदेशः कल्प्यते.

[3] A. सिद्धे for सति.

[4] इति not in A. and L.

[5] L. has अन्नेषु before प्राशनेष्विति.

तेन व्यञ्जनकामसंयोगेन[1] योज्यमानं व्यञ्जनमेवाधिकरोति । यदन्यत्सर्वं नित्यवदेव तद्भवति । तेन मन्त्रश्च ओदनश्च सर्वत्र भवतीति सिद्धम् । एवं ब्रुवतो दोषः । यत्र व्यञ्जनं ओदनं चोपदिश्यते तत्र मन्त्रो न प्राप्नोति । यथा घृतौदनं तेजस्काम इति । प्राप्नोतीत्युच्यते । कस्मात् । तुल्यत्वात् । कामसंयोगस्य परो न व्यञ्जनधर्मो भवति । स उपदेशः अन्नस्य प्राप्नोति प्राशने विहितत्वात् । तेन यत्र प्राशनं तत्र मन्त्रः । घृतौदनं तेजस्कामसंयोगेन दृष्टं तस्माद्भवति ॥

अकामसंयोगेन दध्यादिमिश्रमन्नं प्राशयेत् अन्नपतेऽन्नस्य न इति मन्त्रेण । अयं मन्त्रः सर्वप्राशनेष्वपि भवति । कुतः । प्राशनसहितत्वात् मन्त्रस्य । प्राशयेदित्यस्य च सर्वशेषत्वात् । आजं प्राशयेदित्यादि ॥ (५)

आवृतैव कुमार्यै ॥ ६ ॥

कुमार्या आवृता इदं कर्म कर्तव्यम् । अमन्त्रकमित्यथः ॥

कुमार्यास्त्वमन्त्रकमन्नप्राशनं कार्यमित्यर्थः ॥ (६)

इति प्रथमे षोडशी कण्डिका

तृतीये वर्षे चौलम् । यथाकुलधर्मं वा ॥ १ ॥

जन्मनः प्रभृति तृतीयं वर्षम् । तस्मिन् तृतीये वर्षे चौलकर्म कर्तव्यम् । यस्मिन् काले कुलधर्मः तस्मिन् वा चौलकर्म कर्तव्यम् । तेन

[1] L. has कामव्यञ्जनसंयोगेन.

पूर्वेण कालेन सहायं विकल्प्यते । यस्य कुलधर्मे अन्यः कालो न[1] भवति यस्यापि कुलधर्मत्वेन न कश्चित्कालश्चोदितः तस्य तृतीये एव वर्षे भवति ॥

कुलधर्मोपदिष्टे वा काले चौलं कार्यम् । जन्मप्रभृति तृतीये वर्षे वा कार्यमिति व्यवस्थितविकल्पः । केषाञ्चिदुपनयनेन सह स्मर्यते इति ॥ (१)

उत्तरतोऽग्नेर्व्रीहियवमाषतिलानां पृथक् पूर्णशरावाणि निदधाति ॥ २ ॥

अग्नेरुत्तरतो व्रीह्यादीनां द्रव्याणां शरावाणि पृथक् कारयित्वा निदधाति स्थापयति । तत्र पृथग्ग्रहणं न कर्तव्यम् । कस्मात् । द्रव्यभेदादेव भेदः सिद्ध इति । उच्यते । न शरावभेदार्थं पृथग्ग्रहणम् । किंतु द्रव्यभेदार्थमेव[2] । इह समासोपदेशान्मिश्रितानां पूरणं प्राप्नोति । न भविष्यति । यथा व्रीहियवमाषतिलैरिति[3] सत्यपि समासोपदेशे एकमेव द्रव्यं प्रसज्येत । तन्निवृत्त्यर्थं पृथग्ग्रहणं क्रियते । कथं पृथग्भूतानां सर्वेषां द्रव्याणां शरावाणि निधीयेरन्निति ॥

प्रणीताप्रणयनोत्तरकाले उत्तरतोऽग्नेः व्रीहियवमाषतिलानां पूर्णशरावाणि निदधाति स्थापयति । पृथग्ग्रहणं द्रव्यभेदार्थम् । पृथक् पूरयित्वा निदध्यादिति । अन्यथा समासोपदेशन्मिश्रितानां पूरणं स्यात् । यया सर्पिर्मधुनी हिरण्यनिकाषमित्यमिश्रितानां प्राशनम् । अथवा सत्यपि समासोपदेशे यथाकामं व्रीहियवतिलैरित्यत्रैकं द्रव्यं भवति । एकेन कृतार्थत्वात् । एवमिहाप्येकं द्रव्यं प्रसज्येत । तन्निवृत्त्यर्थं पृथग्ग्रहणम् ॥ (२)

कथं पृथग्भूतानां सर्वेषां द्रव्याणां पूर्णशरावाणि निधीयेरन्निति ।

[1] A. L. omit न.

[2] A. L. द्रव्यार्थमेव.

[3] L. has व्रीहितिलमिश्रैः माषैः सह इति.

पश्चात्कारयिष्यमाणो मातुरुपस्थ आनड्डुहं गोमयं नवे शरावे शमीपर्णानि चोपनिहितानि भवन्ति ॥ ३ ॥

पश्चादग्नेः कारयिष्यमाणः कुमारो मातुरुपस्थे अवस्थापितो[1] भवति । आनड्डुहं गोमयं नवे शरावे कृत्वा शमीपर्णानि च अन्यस्मिन्नेव शरावे कृत्वा पश्चादग्नेर्निदधाति ॥

अग्नेः पश्चात्कारयिष्यमाणः कुमारः । तन्प्रयुक्तं हि चौलम् । एवं च कृत्वा संस्कारकर्मसु व्यवायपरिहारेषु कार्येषु कुमारोऽन्तरतम इति दर्शितं भवति । मातुरुपस्थे उत्सङ्गे आस्ते । आनड्डुहं गोमयं नवे शरावे उपनिहितं भवति । शमीपर्णानि चान्यस्मिन् नवे शरावे उपनिहितानि भवन्ति ॥ (३)

मातुः पिता दक्षिणत एकविंशतिकुशपिञ्चूलान्यादाय ॥ ४ ॥

तत्र मातुर्दक्षिणतः पिता एकविंशतिकुशपिञ्जूलानि गृहीत्वा आस्ते । अन्ये पुनर्मातुरेव पिता दक्षिणतः स्यात् । न[2] अग्नेर्दक्षिणतः । अथ मातृग्रहणं किमर्थम् । मातुर्दक्षिणतः पिता स्यात् । इतरथा अग्नेर्दक्षिणतः स्यात् ॥

मातुर्दक्षिणतः पिता एकविंशतिकुशपिञ्जूलान्यादायास्ते । मातुर्ग्रहणं मातुः सकाशात् दक्षिणतो यथा स्यात् तथा । अग्नेर्दक्षिणतो मा भूदिति ॥ (४)

ब्रह्मा वैतानि धारयेत् ॥ ५ ॥

ब्रह्मा वैतानि धारयेत् कुशपिञ्जूलानि ॥

एतानि कुशपिञ्जूलानि ब्रह्मा वा धारयेत् यद्यस्ति ॥ (५)

[1] L. omits मातुरुपस्थापितो.

[2] A. L. omit न.

पश्चात्कारयिष्यमाणस्यावस्थाय शीतोष्णा अपः समानीयोष्णेन वा य उदकेनेहीति ॥ ६ ॥

कारयिष्यमाणस्य पश्चिमे देशे स्थित्वा शीतोष्णा अपः समानयति उष्णेन वा य उदकेनेहीति अनेन मन्त्रेण । तत्र समानयनं पुनर्युगपदुभाभ्यां पाणिभ्याम् । न तु च दक्षिणकारिता विहन्यते इति ॥

आघारान्तं कृत्वा पूर्वोक्ता आहृतीर्हुत्वा कुमारस्य पश्चिमदेशे स्थित्वा शीतमुदकमुष्णं चोदकमुभाभ्यां पाणिभ्यां गृहीत्वा अन्यस्मिन् पात्रे युगपन्निनयति मन्त्रेण । समित्येकीभावे न तु दक्षिणाङ्गकारितया भाव्यम् । कथमुभाभ्यां पाणिभ्यामिति । उच्यते । अनियमे प्राप्ते नियमार्था या सा परिभाषा न तु दक्षिणाङ्गविधायिका ॥ (६)

तासां गृहीत्वा नवनीतं दधिद्रप्सान् वा प्रदक्षिणं शिरस्त्रिरुन्दति अदितिः केशान्वपत्वाप उन्दन्तु वर्चस इति ॥ ७ ॥

तासामपां एकदेशं[1] गृहीत्वा नवनीतं दधिद्रप्सान् वा प्रदक्षिणं शिरस्त्रिरुन्दति[2] । क्लेदयतीत्यर्थः । अदितिः केशान् वपतीत्यनेन मन्त्रेण । तासामिति न वक्तव्यम् । अधिकृतत्वात्तासाम् । नेत्युच्यते । अक्रियमाणे तासां ग्रहणमेव प्राप्नोति । एवं सति समानयनमपार्थकम् । उत्तरार्थं समानयनं स्यात् । शीतोष्णाभिरद्भिरवर्थं कुर्वाण इति । तेन तासांग्रहणमवश्यं कर्तव्यं एकदेशग्रहणार्थम् ॥

तासामपामेकदेशं गृहीत्वा नवनीतं च गृहीत्वा तदभावे दधिद्रप्सान् वा गृहीत्वा प्रदक्षिणं शिरस्त्रिरुन्दति क्लेदयति मन्त्रेण । मन्त्रावृत्तिरुक्ता । तासांग्रहणं

[1] A. L. omit एकदेशं. A. has आपः for अपां.

[2] L. omits all words from दधि and puts इति after नवनीतं.

5*b*. Therefore[24] the differentiation goes along with things substantially non-existent.

The difference in forms lies only in the empirical things,[25] but not in the atoms[26]. The[27] pot and other things are only empirically true.

5*c-d*. For, if you remove one by one the atoms [of the pot, etc.] the perception illuminating the image of the pot, etc. will immediately vanish away.

Even[28] if that which is connected with them (*sambandhin*) is excluded, what substantially exist, do not cease to produce their own cognitions, as for example, the colour [blue,][29] etc.

precisely their unique character. Therefore how could one differentiate the perception [by means of] the difference of atoms? One will assert to this that the state of combination is gross. Now, since the atoms exist in substance, they ought to exist in "being which has no extension", otherwise, if they had extension (*digbhāga*), they would not be capable of existing in substance. Therefore, since the atoms are not extended, wherefrom comes the difference of arrangement?

[24] Having thus refuted the difference of forms of atoms, the author concludes the following.

[25] Because they are extended.

[26] Because they are not extended.

[27] According to the Vaiśeṣikas, the vase, [cup], etc. are substantially existent. If the Vaiśeṣika asks: How do you know that what are called vase, [cup], etc. exist by convention? The author replies the following.

[28] [The Vaiśeṣika continues:] If one would exclude [entirely] the atoms one after another, the perception which possesses the representation of the vase, etc. having not arisen, how might it result form this that the vase, [cup], etc. might exist conventionally? The author replies the following.

[29] If the vase, [cup] etc. were substantial beings, if even what is connected with them, was entirely excluded, they would not cease [to produce] the perception [of colour, etc].

[The Vaiśeṣika replies:] If one excludes entirely the atoms one after another, the cohesion (*samyoga*) which produces (*ārambha*)

It is [30], therefore, rationally deduced that the objects of different sensual cognitions do not exist externally.

6*a-c*. It [31] is the object (*artha*) which exists internally in knowledge itself as a knowable aspect and which appears to us as if it exists externally.

Though [32] the external things are denied, what exists internally in knowledge itself [*i.e.* its knowable aspect]

the substance, being destroyed, and [consequently, if] the vase is destroyed, is it not that the perception does not arise any more? What prevents the vase, [cup] etc. from being existent [substiantally] always (*sarvadā*) and wherever this may be (*sarvatra*) [without their destruction].

[The author replies:] If the vase and other substantial things formed of parts (*avayavidravya*) exist beyond the atoms, when one says that the vase, [cup] etc. are constituted by atoms, is he willing to say (1) that the atoms exist in proper being as numerous as they may be, or (2) that they exist partly? In the [second] case, what is beyond the elements that produce one whole (*avayavin*) exists by means of a single element of this whole owing to which this [whole] is going to exist there; if [as in the first case] what is beyond the constituent elements does not exist that is going to exist in [its] proper nature [*svarūpeṇa*] howerer numerous the atoms may be; thus, the atoms as numerous as they may be, become one whole: vase, [cup,] etc. consequently, when the unity component (that is to say the atoms) of the whole is destroyed, this whole does not exist any more substantially; because if it existed again, one would assert simultaneously several contradictory states (*bhāva*).

[30] Having thus proved that three propositions are not capable of [demonstrating] that the external object is the perceivable object (*ālambana*), [the author says] in conclusion: Since the atoms are not capable of being the perceivable object, therefore, etc.

[31] Having thus refuted the principal doctrines of other schools whose proposed theories could be destroyed by means of well-established reasonings, the author, now, wishing to establish his principal doctrine on the perceivable object, says the following.

[32] The opponent says: If there was no external object, is it not true that there would not be any conditional cause (*pratyaya*) of the perceivable object of consciousness?

[The author replies:] Here, one is not in the error of non-existence of the conditional cause of the perceivable object; for,———.

and appears to us as though it is existent externally, serves as a condition of the actual object (*ālambanapratyaya*) [to consciousness[33]].

6*c-d*. Because[34] consciousness is the essence [of the external object] and that [object essence of which is consciousness] acts as the condition [to consciousness].[35]

The internal consciousness appears as [manifold external] object (*artha*) and also arises from that [objective aspect of its own[36]]. Thus the internal consciousness is endowed with two parts (*i.e.* image and cause) [which circumstance is absent in all the previous propositions] and therefore what exists internally in the consciousness (*i.e.* the objective aspect) is the object-condition (*ālambanapratyaya*) to the consciousness.

If only the objective appearance of consciousness is experienced, [it will be a part of the consciousness and appearing simultaneously with it]. How can a part of

[33] For example, for the eye-diseased person (*taimirika*), appearances of hairs, flies, etc., appear in the perception with the forms of hairs, flies, etc., [real]. Likewise, since the knowable aspect (*grāhyā-bhāga*) is capable of being characteristic of the object (*artha*), one calls it the conditional cause of the perceivable object (*ālambana*).

[34] Ths opponent asks again: Then how could the knowable aspect be the characteristic of the perceivable object? The author answers the following.

[35] And also because, thanks to the maturity of impregnations (*vāsanā*=perfume) frequently repeated of the blue, yellow, etc., the perception (*jñāna*) arises in possessing the characteristic of the blue, yellow, etc., this characteristic is the conditional cause of consciousness.

[36] Mrs. S. Yamaguchi and H. Meyer, probably on the authority of Vinitadeva, translate this passage thus: As consciousness, [through the characteristics] of the object (*artha*) [which exists] internally (*i.e.*, subjectively) (=the knowable aspect) possesses the characteristic of this object, this characteristic existing, the consciousness arises.

consciousness and appearing simultaneously be a condition to the consciousness[37] [itself] ?

7a. [Though[38] the external object] is only a part [of the internal consciousness,] it is a condition (*pratyaya*) [to the consciousness], because it is invariably associated with the consciousness.

[The objective aspect of consciousness,] though arising simultaneously with it, becomes condition to [the consciousness] which is produced by other [conditions]. [39]Logicians (*naiyāyika*) say as below : The possession of existence (*bhāva*) [by existence] and of non-existence (*abhāva*) [by non-existence] is the characteristic sign of successive productions of the cause and result, [this result] possessing the cause.[40]

[37] [The opponent says :] In all cases, one comprehends that what is perceivable internally existent (*i.e.*, subjectvely) in the consciousness, *be thus the appearance itself* (=what appears). But, he will say, if this perceivable object (*ālambana*) appears as an appearance designed (dessinée) by the character of what is perceivable (*jñeyākāra*), this perceivable object will be *what appears at the same time as a part of this* [appearance]. *How could* [such an appearance] *be conditional cause* (*pratyaya*) [of the object perceivable by the consciousness] ?

If it was possible, this would be " oneself made by oneself " or, the knowable aspect (*grāhyabhāga*) would produce the knowable aspect (*grāhyabhāga*) ; horns of the right and left of the ox would themselves produce one by the other ; this would be a formidable error (*atiprasanga*) [there].

[38] [To this objection the author replies the following].

[39] [The opponent says :] By means of discrimination of parts, it would be possible that oneself makes oneself, how would it be possible that it is what possesses the determinate cause (*nimitta*) without the confusion between the being of cause and of its result ? The author replies the following.

[40] That is to say, at the moment when the knowable aspect exists, the perception exists also ; when it does not exist, [the perception] exists no more. Consequently these two [existences] which arise simultaneously are capable of being the cause and its result.

Or,[41]

7b. It becomes condition also in succession by transmitting the force[42] (*s'akti*).

It[43] is also possible successively that the objective appearance of consciousness (*arthāvabhāsa*), in order to give rise to a result homogeneous with itself, makes the force (*sakti*) seated in the [store-house] consciousness, and it is not contradictory[44] [to the reasoning].

[41] Having thus explained that the existence (*bhāva*) of the object (*viṣaya*) and the existence of that which perceives the object (*viṣayin*) exist at the same time, the author, now, explains that the existence of the object (*viṣaya*) and the existence of that which perceives the object (*viṣayin*) arise also successively (*krameṇa*).

[42] When the knowable aspect disposes (*dispose*) the dominant force, it objectivizes itself into a proper being which produces successively [consciousness]; for, while destroying itself, this knowable aspect deposits at this moment its dominant force on the *Ālayavijñāna*. If therefore this dominant force produces accompanying factors (*sahakārin*) at the second moment, it will produce a consciousness homogeneous with [the dominant force], but at this moment only.

If the [dominant force] at this moment, does not produce the accompanying factors, when they arise in the third, fourth, or no matter what instant, this [dominant force], they having matured, will produce the same consciousness as this.

When one has this comprehension, he has no more difficulties "oneself is made by oneself" or "they arise at the same time" and others.

Thus this blue and other [colours], the characteristics of the knowable aspect, which existed in the precedent perception produce the following perception which will have the characteristics of blue, yellow, red and other [colours].

[43] The opponent says: If the dominant force (*s'akti*) produces the perception (*jñāna*), the dominant force will be precisely the object (*viṣaya*), while the precedent knowable aspect will not be the object. [The author replies the following.]

[44] If the dominant force is not determined (*vyavasthita*) [to the action] by the knowable aspect, this dominant force will not produce any more such perception. Consequently, since the perception

[The opponent says:] If only the self of consciousness constitutes the object-condition; how should we explain [the saying that] the visual consciousness arises depending upon the eye and [form [45] (*rūpa*)]?

[The author replies:][46]

7c-d. What is the sense-organ is [nothing but] the force itself [in consciousness] by virtue of its acting simultaneously [with the object] as an auxiliary cause (*sahakārin*) [for raising up of consciousness].

The [47] sense-organs are inferred from [the nature of] their results to be only the forces of consciousness, but never constituted of matters.[48]

which is born of the dominant force, is also product of the knowable aspect, there is no any contradiction (*virodha*).

[The idea that the interior] possesses two modalities is precisely possible according to the former proposition (*pakṣa*), for, the knowable aspect producing the perception similar to itself, [the interior] possesses two modalities.

[45] It is so because, the eye acting simultaneously with the force which had already appeared, had produced [visual] consciousness. But if the interior form had not appeared previously to the eye, how could it produce the visual consciousness in acting simulaneously with the interior form?

[46] If the organs are made by elements, [as the Sarvāstivadins assert,] there will be this difficulty raised by the opponent, but in our opinion, *the proper nature of the dominant force* (*śakti*) *which one believes as the organ itself and which acts simultaneously* [with the object (*viṣaya*)] *is precisely the organ.* Therefore, for us, just as the form is interior, the eye also is an interior proper being.

[47] [The opponent asks:] How could one know that the organ is the proper being of the dominant force? [The author replies the following.]

[48] For, one could infer merely some cause in considering the result, but one could not infer the genus (*viśeṣa*) of the cause. For example, one could infer the fire on merely seeing the smoke, but one could not infer the genus of the fire and say if these are of herbs, of leaves [that burning]; likewise, one could, solely by the

8*a*. That force is not contradictory to the consciousness.[49]

That force be in consciousness, or in its self which is of indescribable nature[50]; there[51] is no difference in production of the result.

8*b-d*. Thus[52] the objective aspect (*viṣayarūpa*) [of consciousness] and the force (*s'akti*) [called

fruit characteristic of consciousness, make inference on the cause, but one could not deduce the genus of the cause, that is to say that which has been made by the elements, etc.

[49] The opponent says: The dominant force (*s'akti*) depends on the possessor of that force (*s'aktimat*); for, without basis (*ādhāra*), the dominant force is not capable to exist. The possessor of the force (*s'aktimat*) is one of the organs; now this [organ] itself has been constituted by the elements.

The author answers: If one considers *the representation* (*vijñapti*) of consciousness, [the conception] of one basis for the dominant force *is not contradictory*. This being admitted, if one basis is necessary, the consciousness (*vijñāna*) itself is capable of being this basis (*ās'raya*); for, in the consciousness, there is a proper being which knows the object (*viṣaya*) and [at the same time] a proper being which knows itself (*svasamvedana*).

[50] The opponent replies: while the dominant force residing in this [organ] made by the elements, produces one fruit different [from that of consciousness] the dominant force residing in consciousness produces [in its turn] one fruit different [from that which a compound of elements would produce]. [Now, you assert that] the organ consists in the dominant force [and] however the fruit of elements and that of consciousness are different: the organ does not reside thus in the dominant force, but it is necessarily composed of the elements, *thus the dominant force would be capable of being sometime in consciousness and sometime in the proper nature inexplicable* (*anirdes'ya*) (that is to say in the organ).

[51] The author replies: There is no any difference in the production of the fruit; for, in all manner (*sarvathā*), to see the form, [to hear the sound,] etc. are simply productions of the dominant force.

[52] [The opponent asks:] Then what is thus the cause of the dominant force of the organ?

The author replies: Just as consciousness arises from the dominant force of the organ, so this dominant force of the

sense-organ] go mutually conditioned from immemorial time.

Depending upon the force (*śakti*) called eye, and the interior form (*antaḥ rūpa*) arises the consciousness which appears as though it is the external object, but it arises undifferentiated from the perceivable object. These [53] two act mutually conditioned without beginning in time (*anādikāla*). Sometime [54] when the force [called *vāsanā*] gets matured, consciousness is transformed into a form of object (*viṣayākāratā*) and sometime [55] the force arises from [the consciousness] endowed with the form of object.[56] The consciousness and force, both may be said to be either different

organ arises equally from the previous consciousness which causes the activity (*āvedha*) of the organ, and this previous consciousness arises from the dominant force of the organ still more anterior. Thus, etc.

[53] The opponent asks: Then wherefrom does this dominant force proceed ?

The author replies: The dominant force proceeds also from the anterior consciousness which causes the activity of the organ; this consciousness in its turn proceeds from a dominant force more anterior, and this same dominant force proceeds from a consciousness still more anterior which has caused the activity of the organ. Thus these two, etc.

[54] Having thus explained that the dominant force of the organ and consciousness are beings (*bhāva*) of the cause (*hetu*) and of the fruit (*phala*), the author, now, in order to explain that the dominant force and consciousness are reciprocally mutual causes and this without commencement in time, says: Sometime, etc.

[55] The translation of this passage is done according to Paramārtha. According to Vinītadeva, French translators have done thus: Sometime, in [the mind which possesses] the form of this [object] it is the dominant force [which is produced].

[56] Then at this moment, the cause and its fruit arising reciprocally in an uninterrupted continuity, one says that the time is without commencement.

MANUSCRIPTS NOTES

THE HĀRĪTA SMṚTI

By A. N. Krishna Aiyangar, M.A., L.T.

(*Continued from p. 26 of the previous issue*)

A few verses after is taken the topic of *Kāmya Japa* of this great *mantra*. The printed version, in dealing with this particular topic has fewer verses and is less explanatory than the manuscript. Verses 206 to 208 are quoted below after which the corresponding portion in the manuscript is also given for a comparison. It will be clear from this that the attempted summarization of the printed text, pointed out earlier has not only failed but has positively held back much valuable information.

vv. 206-208—*Printed version* :

सम्पत्कामी जपेन्नित्यं वत्सरं तु सहस्रशः ।
साज्यैश्च व्रीहिभिः हुत्वा सहस्रं श्रियमाप्नुयात् ॥
राज्यमिन्द्रपदं वापि शिवत्वं ब्रह्मतामपि ।
बहुकालं बिल्वपत्रैः कमलैर्वा जपेन्मनुम् ॥
जुहुयाच्च जपेन्नित्यं तत्तत्प्राप्नोत्यसंशयम् ।
यं यं कामयते चित्ते—

The corresponding text in the manuscript is :

सम्पत्कामी जपेन्नित्यं वत्सरं विजितेन्द्रियः ।
व्रीहिभिः जुहुयान्नित्यं सहस्रं घृतमिश्रितैः ॥
कुबेर इव सम्पन्नो धनवान्यसमृद्धिमान् ।
राज्यकामी तु सततं षडब्दं विजितेन्द्रियः ॥

त्रिसन्ध्यासु स्वयं भक्त्या जपेन्मन्त्रमनुत्तमम् ।
अखण्डैः बिल्वपत्रैश्च जुहुयान्मधुमिश्रितैः ॥
युवराज्यमवाप्नोति दिक्पतित्वमथापि वा ।
नित्यं द्वादशसाहस्रं त्रिंशद्वर्षं शतत्रयम् ॥
जपेच्च जुहुयाच्चैव कमलैर्घृतमिश्रितैः ।
ब्रह्मत्वं वा शिवत्वं वा समाप्नोति न संशयः ॥
नित्यं द्वादश साहस्रं यावज्जीवं समाहितः ।
अर्चयित्वा हृषीकेशं जुहुयाद्घृतमिश्रितैः ॥
तण्डुलैश्चणकैर्वापि नित्यमष्टोत्तरं शतम् ।
अनन्तविहगाधीशसेनेशानसमो भवेत् ॥
द्वादशार्णेन मनुना पक्षे पक्षे द्विजोत्तमः ।
अष्टोत्तरसहस्रन्तु कोमलैस्तुलसीदलैः ॥
द्वादश्यां पूजयेद्विष्णुं शतपत्रैरथापि वा ।
पौर्णमास्यां त्रिसन्ध्यासु वत्सरं नियतेन्द्रियः ॥
हविं हुत्वा विधानेन विष्णुलोकमवाप्नुयात् ।
उपोष्यैकादशीं शुद्धां आज्यै र्हुत्वा यथाविधि ॥
सर्वान्कामानवाप्नोति शाश्वतं चाप्नुयात्पदम् ।
यं यं कामयते—

As a general feature of the manuscript, it may now be mentioned, that the portion dealing with *Japa* or repetition of each mantra for the fulfilment of specific desires *i.e.* *Kāmya Japa* is full while the printed version is defective; and for a complete understanding of the topic, a comparison with *this* manuscript which is fuller, is essential.

The following two lines are found in the manuscript between *vv.* 222 and 223 :

ओंनमो विष्णवे चेति मनुं जप्त्वा विधानतः ।
सारूप्यतां हरेः प्राप्य शाश्वतं पदमाप्नुयात् ॥
एवं महामनुं जप्त्वा— *(Folio—9b)*

The correction found in the manuscript for the latter part of *v.* 224 is more reasonable and in keeping with the trend of the passage and context: The manuscript reads:

ब्रह्माद्या: सनकाद्याश्च ऋषय: संप्रकीर्तिता: ।
छन्दश्च तस्या गायत्री . . . . ॥ (*Folio*—9*b*)

for मुनयश्च जपन्ति हि । छन्दश्च—

A clearer understanding of the meaning of the *Nyāsa* relating to this *mantra* is conveyed by the addition of the two extra lines in the manuscript for the second half of *v.* 227.

Printed version:

मूर्ध्न्यास्ये हृदये बाह्वो: पृष्ठे गुह्ये यथाक्रमम् ।
विन्यस्य चक्रन्यासं च पश्चात् ध्यानं सुखासने ।

Manuscript:

मन्त्राक्षराणिविन्यस्य चक्रन्यासं समाचरेत् ।
पश्चाद्ध्यानं प्रकुर्वीत समासीन: सुखासने ॥ (*Folio* 9*b*)

These two lines are logical to the context as they explain the *aṅganyāsa* which is otherwise incomplete, as distinct from the *karanyāsa* mentioned in the printed text.

The verses that immediately follow, give a beautiful description of how to conjure up the *dhyāna mūrti* for the mantra. This very interesting portion is rather mutilated in the printed text by the omission of several important lines which are supplied by the manuscript. For easy comparison I reproduce below both the versions.

vv. 229-234—*Printed version*:

तस्योपरि च वह्न्यर्कसोमबिम्बानि चिन्तयेत् ।
तत्र रत्नमयं पीठं तन्मध्येष्टदलाम्बुजम् ॥
तस्मिन्कोटिशशाङ्काभं सर्वलक्षणलक्षितम् ।

चतुर्भुजं सुन्दराङ्गं युवानं पद्मलोचनम् ॥
कोटिकन्दर्पलावण्यं नीलभ्रूलतिकालकम् ।
श्लक्ष्णनासं लसद्गण्डं बिम्बितोज्वलकुण्डलम् ॥
शङ्खचक्रगदापद्मं दधानं दोर्भिरुज्वलैः ।
केयूराङ्गदहाराद्यैः भूषणैश्चन्दनैरपि ॥
अलङ्कृतं दिव्यपुष्पैः रक्तहस्ताङ्घ्रिपङ्कजम् ।
मुक्ताफलाभदन्तालिं वनमालाविभूषितम् ॥
श्रीवत्सकौस्तुभोरस्कं दिव्यपीताम्बरं हरिम् ।
तप्तकाञ्चनवर्णाभ—

For these the manuscript reads :

तस्मिन्नध्यासिते बिम्बे सौम्ये श्लक्ष्णतरे शुभे ।
चिन्तयेद्विमले पीठं नानारत्नमयं शुभम् ॥
तन्मध्येष्टदलं पद्मं विद्युत्सदृशकेसरम् ।
तस्मिन्विचिन्तयेदेवं कोटिशीतांशुवर्चसम् ॥
चतुर्भुजं सुन्दराङ्गं युवानं पद्मलोचनम् ।
कन्दर्पकोटिलावण्यं सर्वलक्षणलक्षितम् ॥
स्वच्छत्कलाष्टमीचन्द्र कलङ्कासिद्धकार्ष्णिवत् ।
उद्धृत्य तेनैव कृतं विभ्राणं भ्रूलतायुतम् ॥
श्लक्ष्णनासं लसद्गण्डबिम्बितोज्वलकुण्डलम् ।
सुस्निग्धनीलकुटिलनीलकुञ्चितशीर्ष्णजम् ॥
केयूराङ्गदहाराद्यैः भूषणैरुपशोभितम् ।
दिव्यचन्दनलिप्ताङ्गं दिव्यपुष्पविराजितम् ॥
बन्धूकपुष्पसंकाशं पदहस्तोदराञ्चितम् ।
मुक्ताफलसुशोभाढ्यं दन्तावलिविराजितम् ॥
शङ्खचक्रगदापद्मधारिणं दोर्भिरुज्वलैः ।
दिव्यपीताम्बरधरं वनमालाविभूषितम् ॥

श्रीवत्सकौस्तुभोरस्कं दिव्यपुष्पावतंसकम् ।
तप्तकाञ्चन— (*Folio*—10*a*)

Comment is needless on this obvious omission. Here again the attempt at summarization displayed by the printed version falls flat.

This same process of condensation is exhibited in the printed version in the following places as well of which I append extracts from the printed and manuscript versions which are cited side by side for comparison :

vv. 234—*Printed version* :

तप्तकाञ्चनवर्णाभं पद्मया पद्महस्तया ।
समाश्लिष्टममुं देवं ध्यात्वा विष्णुमयो भवेत् ॥
मनसैवोपचाराणि—

Manuscript :

समाश्लिष्टतनुं देवं चिन्तयेद्धृदि सर्वदा ।
एवं ध्यात्वा हरिं नित्यं साक्षाद्विष्णुमयो भवेत् ॥
मनसैवोपचाराणि— (*Folio* 10*a*)

vv. 257-261—*Printed version* :

मन्त्राधिकारिणस्सर्वे ह्यनन्यशरणा यदि ।
स्नानादिकृतकृत्यः सन् ऊर्ध्वपुण्ड्रः पवित्रधृत् ॥
कृष्णासने सुखासीनः प्राणायामी च न्यासकृत् ।
ध्यायेत्कमलपत्राक्षं जानकीसहितं हरिम् ॥
नैव ध्यानं प्रकुर्वीत विग्रहे सति शार्ङ्गिणः ।
चन्दनागरुकर्पूरवासिते रत्नमण्डपे ॥
वितानैः पुष्पमालाद्यैः धूपैर्दिव्यैर्विराजिते ।
तन्मध्ये कल्पवृक्षस्य छायायां परमासने ॥
नानारत्नमये दिव्ये—

Manuscript :

मन्त्राधिकारिणः सर्वे ह्यनन्य शरणा यदि ।
अनन्यशरणा ये तु तथैवानन्यसाधनाः ॥
अनन्यभोगभोग्या ये तेऽपि सर्वेऽधिकारिणः ।
स्वदारनिरतश्शुद्धो मद्यमांसविवर्जितः ।
नित्यं धर्मरतः शान्तो जितालस्यो जितेन्द्रियः ॥
वैष्णवस्य मनोस्सम्यक् अधिकारी भवेन्नरः ।
प्राप्तमन्त्रस्तु सम्पूज्य गुरुं शक्त्यनुसारतः ॥
जपेन्मन्त्रं सदा मन्त्री यावज्जीवं जितेन्द्रियः ।
स्नात्वा शुक्लाम्बरधरः कृतकृत्यो यथाविधि ॥
धृतोर्ध्वपुण्ड्रदेहश्च पवित्रीकर एव च ।
कृष्णाजिने कुशे वापि समासीनः सुखासने ।
प्राणायामत्रयं कृत्वा पश्चान्न्यासं समाचरेत् ॥
ध्यायेत् कमलपत्राक्षं जानकीसहितं हरिम् ।
सालग्रामशिलायां वा तुलस्यां वा कुशेऽपि वा ॥
नैव ध्यानं प्रकुर्वीत विग्रहे सति शार्ङ्गिणः ।
सौवर्णमण्टपे रम्ये नानारत्नसमन्विते ॥
चन्दनागरुकर्पूरनानागन्धसुवासिते ।
वितानैः पुष्पमालाद्यैः सर्वतः समलङ्कृते ॥
दीपैर्विराजिते रम्ये दिव्यधूपसधूपिते ।
तन्मध्ये कल्पवृक्षस्य छायायां परमासने ॥
नानारत्नमये दिव्ये— (*Folia* 11*a-b*)

vv. 265-267—*Printed version* :

पूर्णचन्द्राननं स्निग्धभ्रूयुगं घननासिकम् ।
रम्भोरुद्वयमानीलकुन्तलं स्मितसुन्दरम् ॥
तरुणादित्य संकाशं—

Manuscript :

रुचिरैः स्निग्धकुटिलैः कुन्तलैरुपशोभितम् ।
तरुणादित्य सङ्काशं—
अनर्घमुक्ताफलाभ दन्तावलिविराजितम् ।
संपूर्णचन्द्रसंकाशविस्मिताननसुन्दरम् ॥
दम्भेभहस्तसङ्काश ऊरुयुग्मविराजितम् ।
मृङ्गावलिनिभस्निग्ध वर्णभ्रूयुग्मराजितम् ।
शुभोन्नतसुनासाढ्यं सुश्रोत्राभ्यां विराजितम् ।
सर्वलक्षणसंपन्नं सर्वाभरणभूषितम् । (*Folia* 11*b*-12*a*)

vv. 268-272—*Printed version* :

पद्माक्षीं पद्मवदनां नीलकुन्तलमूर्धजाम् ॥
सिंहस्कन्धसु (न्धानु) रूपां तां (सां) कम्बुकण्ठीं सुलोचनाम् ।
हरिचन्दनलिप्ताङ्गीं कस्तूरीतिलकाञ्चिताम् ॥
तरुणादित्यसंकाशां ताटङ्कद्वयमण्डिताम् ।
आरूढयौवनां नित्यां पीनोन्नतपयोधराम् ॥
दुकूलवस्त्रसंवीतां भूषणैरुपशोभिताम् ।
भजतां कामदां पद्महस्तां सीतां विचिन्तयेत् ॥

Manuscript :

पद्मपत्रविशालाक्षीं सर्वलक्षणशोभिताम् ।
आरूढयौवनां नित्यां सर्वभूषणभूषिताम् ॥
पूर्णचन्द्राननां सौम्यां नीलकुञ्चितशीर्षजाम् ।
दुकूलवस्त्रसंवीतां पीनोन्नतपयोधराम् ॥
रत्नकुण्डलसम्युक्तां नानारत्नविभूषिताम् ।
भजतां कामदां पद्महस्तां नित्यां विचिन्तयेत् ॥
(*Folio*—12*a*)

In this instance the manuscript omits *ll.* 2 and 3 of the extract from the printed version.

v. 275—*Printed version* :

नीलं नलं चाङ्गदं च ऋषभं दिक्षुपूजयेत् ।
वसिष्ठो वामदेवश्च—

Manuscript :

नीलं नलं चाङ्गदं च ऋषभं च महाद्युतिम् ।
परितश्चिन्तयन् दिक्षु पूजयेच्च विशेषतः ।
वसिष्ठो वामदेवश्च— (*Folio*—12*a*)

v. 278—*Printed version* :

तृतीयावरणं तस्य तत्र चन्द्रादिदेवताः ।
कुमुदाद्याश्च चण्डाद्या विमाने चान्तरायकाः ॥
एवं ध्यात्वा जगन्नाथं पूजयेन्मनसापि वा ।
षट्सहस्रं जपेन्मन्त्रं जुहुयाच्च सहस्रकम् ॥
जुहुयाच्चरुणा वापि शतं पुष्पाञ्जलिं न्यसेत् ।
एवं संपूज्य—

Manuscript :

तृतीयावरणं प्रोक्तं तत्र चेन्द्रादि देवताः ।
ततश्च कुमुदाद्याश्च चण्डादिद्वारपालकाः ॥
विमानपुरुषश्चापि पूजनीयो यथाक्रमात् ।
एवं ध्यात्वा जगन्नाथं पूजयेत्प्रयतात्मवान् ॥
मनसा वापि भक्त्या च पूजयित्वा जपेन्मनुम् ।
षट्सहस्रं जपेन्नित्यं जुहुयाच्च विशेषतः ॥
अष्टोत्तरसहस्रं वा त्रिसन्ध्यासु जपेत्सदा ।
सहस्रं वा शतं वाऽपि जुहुयाच्चरुणैव तु ॥
शतं पुष्पाञ्जलिं दद्यात् तन्मन्त्रेणैव वैष्णवः ।
एवं संपूज्य— (*Folia* 12*a*—12*b*)

(*To be continued*)

MANUSCRIPTS NOTES

By K. Madhava Krishna Sarma, M.O.L.

Some Hitherto-Unknown Works

THE SŪRYASIDDHĀNTAVYĀKHYĀ OF BHŪTIVIṢṆU

Searching for rare astronomical works in the Adyar Library, I happened to come across an old *Srītāla* MS. written in *Grantha* and bearing the shelf-number 21. N. 8. The MS. bore three title-slips giving the contents as below :

(1) *Jyotiṣagranthaḥ*
(2) ,,
(3) *Sūryasiddhāntavivaraṇam*

As these title-slips were not specific with regard to the contents, I was induced to an examination of the MS. On examination I found that No. 1 was the *Pañcabodhagaṇita*, No. 2 a fragment of a commentary on the *Sūryasiddhānta*, by *Bhūtiviṣṇu*, and No. 3 the *Sūryasiddhāntavivaraṇa* of the well known *Parameśvara*, disciple of *Rudra*. Our attention is here arrested by No. 2, namely *Bhūtiviṣṇu's Sūryasiddhāntavyākhyā* which is an hitherto unknown work. There is no notice of the commentary or of the author in either Aufrecht's *C.C.*, Dikshit's *Bhāratīyajyotiṣaśāstra*, or in the catalogues of the various Oriental Manuscripts Libraries. The introductory verses of the commentary inform us that the author belonged to *Hastigiri* (Conjeevaram) and that he was the son of *Devarāja* and the grandson of *Bhūtiviṣṇu*.

He refers to another work of his, namely the *Bhāṭṭapradīpa*, a commentary on the *Āryabhaṭīya*. This work has yet to be discovered. Unfortunately the MS. contains only a fragment of the *Sūryasiddhāntavyākhyā* and there is no clue to the author's date except his references to *Śrīpati* which enable us to assign him to a date later than the beginning of the 11th century A.D. The fragment, so far as it is available, is here presented with the hope

that it will induce manuscriptologists in general and students of Indian astronomy in particular, to a search for further MSS. of this as well as for MSS. of other works of the author who had so long remained unknown to us.

सूर्यसिद्धान्तव्याख्या—भूतिविष्णुकृता

॥ हरिः ओम् ॥

भगवति कुरुत दृढतरां भक्तिं प्रह्वप्रसादकृतदीक्षे ।
करिशिखरिकृतनिवासे देवे श्रीवल्लभे तस्मिन् ॥
गर्गान्वयशिरोरत्नं देवराजो महामतिः ।
भूतिविष्णुसुतः श्रीमानभूद्भूलोकभूषणम् ॥
भूतिविष्णुरभूत्पुत्रो ज्येष्ठस्तस्य सतां मतः ।
प्रतिभानवतां श्रेष्ठो धीमाञ्शब्देन सत्कृतः ॥
व्याचिख्यासा वर्तते सूर्यलब्धे
सिद्धान्ते ऽस्मिंस्तस्य मे भूतिविष्णोः ।
हस्तिक्ष्माभृन्मौलिरत्नं रमेश-
स्तत्साफल्यं कल्पयेदल्पबुद्धेः ॥

अत्र सिद्धान्तलक्षणं श्रीपतिराह—

शतानन्दध्वस्तिप्रभृतित्रुटिपर्यन्तसमय-
प्रमाणं भूधिष्ण्यग्रहनिवहसंस्थानकथनम् ।
ग्रहेन्द्राणां चाराः सकलगणितं यत्र गदितं
स सिद्धान्तः प्रोक्तो विपुलगणितस्कन्धकुशलैः ॥ इति ।

भगवतो भास्करादिष्टदैवतालब्धविद्यो मयस्तु लब्धिप्रकारं वक्तुकामस्ताव-दिष्टदेवतां नमस्करोति—अचिन्त्येति । आत्मनो वरदानकालमाह—अल्पाव-शिष्ट इति । ब्रह्मणः परमायुः शतं तस्य परमायुषो ऽर्धं द्वे । तस्य परार्धद्वयस्य पूर्वं गतम् । द्वितीये ऽर्धे प्रथमे वत्सरे प्रथमे मासि प्रथमे दिने चतुर्दश मनवः ।

तेषां गताः षट्। सप्तमस्य मनोरष्टाविंशे युगे प्रथमे पादे कृतयुगे ऽल्पावशिष्टे सति ज्योतिषां गतिज्ञानस्य कारणं शास्त्रं जिज्ञासुर्विवस्वन्तमाराधयंस्तपस्तेपे। विवस्वत्प्रसादक्रममाह—तोषितस्तपसेत्यादि। ग्रहाणां चरितं ग्रहचरितं ग्रहचरितज्ञानोपायम्। तद्दानप्रकारमाह—विदितस्ते मया भाव इति। दद्यां दापयिष्यामीत्यर्थः। स्वयमनुक्तेः कारणमाह—शृणुष्वेति। कृतावधानस्यैवायमधिकार इति ज्ञापयति—एकमना इति। नाहं स्वयमेव वदामीत्याह—शास्त्रमाद्यमिति। अनेकेषु युगेषु महर्षिभ्य एकप्रकारमेव कथितं भगवता भास्करेण यच्छास्त्रं तदेव मया कथ्यते। युगे युगे कालभेद एव भवति। प्रवहानिलानामनेकप्रकारत्वात् ग्रहाणां प्रतिदिनप्रवृत्ताया मध्यगतेरभेदात्कालभेद इत्युक्ते कालभेदमाह—'भूतानामन्तकृत्काल' इत्यादि 'तया होरात्रसंख्यया' इत्यन्तम्। सर्वभूतानामन्तकृत्कश्चित्कालः स एकः। अन्यः कलनात्मकः। कालज्ञाने ऽस्माभिः ग्रहगणितार्थमिदानीमेतावान्गत इति ज्ञेयात्मको ऽयं कलनात्मकः कालो द्विविधः। एकः स्थूलत्वान्मूर्तः। अन्यः सूक्ष्मत्वादमूर्तः। मूर्तत्वादस्मज्ज्ञानयोग्यत्वम्। तदयोग्यत्वममूर्तत्वम्। तथा च श्रीपतिः—

अक्ष्णोर्निमेषः कथितो निमेषस्त्रिंशद्विभागो ऽस्य च तत्परा स्यात्।
शतांशकस्तस्य त्रुटिर्निरुक्ता सर्वज्ञगम्या यदि हन्त सा स्यात्॥

इति। अत्रामूर्तविभागो नोक्तः। तेषां ज्ञानायोग्यत्वात्। मूर्तानां विभागमाह षड्भिः प्राणैरिति। व्याध्याद्यनुपहतस्य पुरुषस्योच्छ्वासात्मना परिणतैः षड्भिः प्राणैर्नाक्षत्रदिनस्य षष्ट्यंशरूपनाडिकायाः षष्ट्यंशरूपा विनाडी स्यात्। तथा चार्यभटः—

गुर्वक्षराणि षष्टिर्विनाडिकाक्षी षडेव च प्राणाः। इति।

अश्विन्यादीनां नक्षत्राणामन्यतमस्योदयादुदयं नाक्षत्राहोरात्रम्। नाक्षत्रदिनमासवर्षाणि चतुर्दशाध्याये वक्ष्यति।

भचक्रभ्रमणं नित्यं नाक्षत्रदिनमुच्यते। इति।

अर्कस्योदयादुदयमर्कस्य सावनं भवतीत्युक्तम्। एवमन्यग्रहाणामपि सावनाहानि भवन्ति। तथा च **भाट्टप्रदीपे** ऽस्माभिरुक्तम्—

एवं हि तत्तद्ग्रहसंभवानि स्युः सावनान्यत्र तु वासराणि । इति ।

अत्रापि वक्ष्यति—

भोदया भगणैः स्वैः स्वैरूनास्तस्योदया युगे । इति ।

तिथिभिस्तद्वर्त्तिंत्रशतैन्दवो मासः । रवे राशे राश्यन्तरप्राप्तिः संक्रान्तिः । तया संक्रान्त्या सौरमासः । एवमार्क्षादिभिरपि द्वादशभिर्मासैस्तद्वर्षाणि भवन्ति । दिव्यं तदहरिति । तच्छब्देनासन्नतया सौरवर्षं परामृश्यते । न त्वन्यानि वर्षाणि । ऐन्दवं ज्ञापयति—

सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः । इति ।

षष्टिवर्षम् । अतो दिव्यासुरयोरहोरात्रयोरेव भेदाः । न वर्षस्य भेदः । तद्द्वादशसहस्राणि दिव्यं चतुर्युगं भवति । तच्चतुर्युगं सूर्याब्दसंख्ययायुताहतैर्द्वि-त्रिसागरैस्तथेति । खचतुष्करदार्णवैरित्यर्थः । युगपादानामन्योन्यविषमत्वमाह— धर्मपादव्यवस्थयेति । कृतयुगे धर्मश्चतुष्पात् । त्रेतायां त्रिपात् । द्वापरे द्विपात् । अनेन धर्मदृष्टान्तेन पूर्णधर्माणां पूर्णमायुर्भवति । धर्मक्षयसदृशमायुःक्षयोऽपि भवतीति ज्ञापयति । तथा च श्रीविष्णुपुराणे—

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृतत्रेतादिषु त्वेषां वयो ह्रसति पादशः ॥

इति । एवं धर्मानुगुण्येन क्षीयमाणानां कालानां कृतादीनां वर्षसंख्यामाह— युगस्य दशमो भाग इति । एवमुक्तकालस्य तु युगादेरुक्तवर्षस्य षष्ठों ऽशः स्वस्व संध्या च संध्यांशश्च भवति । मन्वन्तरं मनोः कालः । मन्वन्तरस्यान्ते कृतयुगपरिमितः कालो मनुसंधिः । अस्य मनोरयं काल इत्यनिर्धार्यमाणः स कालो जलप्लवः । अस्य जलप्लवत्वं भूमावेव न ग्रहकक्षायाम् । प्रतिमनु चतुर्युगाणां सैकसप्ततित्वाच्चतुर्दशानां मनूनां संहत्य युगसंख्या वेदाङ्कनन्दाः । पञ्चदशानां मनुसंधीनां चतुर्युगप्रमाणानि षट् । अतः संहत्य ब्रह्मणो दिनं सहस्रयुगम् । तदाह—इत्थं युगसहस्रेणेति । एवं युगसहस्ररूपः कालो भूतानामन्तकृत्काल इति पूर्वोक्तः । तस्य शर्वरी च तावती युगसहस्रं ब्रह्मणो रात्रिरित्यर्थः ।

तयाहोरात्रसंख्यया ब्रह्मणः परमायुः शतं वर्षाणि । तस्य परमायुषो युगसंख्या खखशून्यव्योमनेत्रर्षयः । अत्र श्रीपतिः—

प्राणः स्याद्दशभिरिहाक्षैरर्द्रिमात्रैः षट् प्राणैर्भवति विनाडिका हि साक्षीं ।
षष्ट्यासां भवति घटी तदीयषष्ट्याहोरात्रं निगदितमेतदार्क्षमेव ॥
काष्ठा स्मृताष्टादशभिर्निमेषैः कला च काष्ठादशकत्रयेण ।
त्रिंशत्कलाः स्याद्घटिका घटीभ्यां क्षणः क्षणास्त्रिंशदहर्निशं वा ॥
मासः प्रोक्तस्त्रिंशताहर्निशानां द्विघ्नैः षड्भिस्तैश्च वर्षं प्रदिष्टम् ।
. . . . . ॥
सहस्रनिघ्नी रदवेदसंख्या कलिप्रमाणं स्मृतमर्कवर्षैः ।
तद्द्वापरं द्विघ्नमथ त्रिनिघ्नं त्रेता कृतघ्नं कृतमप्युशन्ति ॥
प्रत्येकमेषां कृतपूर्वकाणां संध्या चतुर्णां च तदर्कभागः ।
संध्यांशकस्तत्परिमाण उक्तस्तदन्वितानामियमब्दसंख्या ॥
चतुर्युगं स्यादयुताहतैस्तैर्दन्ताब्धिभिस्तैर्मनुरेकशैलैः ।
द्विसप्तसंख्यैर्मनुभिश्च कल्पं संध्यांशसंध्यासहितैर्वदन्ति ॥
आद्यन्तमध्येषु च संधयः स्युः कृताब्दतुल्या नियतं मनूनाम् ।
तैः पिण्डितैः षट् च चतुर्युगाणि तेषां सहस्रेण ततो हि कल्पः ॥
कल्पो धातुर्दिनमथ निशा तावती तस्य चाहो-
रात्रं कल्पद्वितयमनया संख्ययासौ शतायुः ।
यत्तस्यायुस्तदपि च महाकल्प इत्यूह्यमाद्यैः
कालानन्त्यात्सरसिजभुवो ये गतास्तान्न विद्मः ॥

इति । अथास्य ब्रह्मणो गतकालमाह—आयुषो ऽर्धमितं कस्येति । कस्य ब्रह्मण इतं गतम् । पञ्चाशद्वर्षं गतमित्यर्थः । शेषादायुरुत्तरार्धादादित आदौ । सप्तम्यर्थे तसिः । अयं कल्पः प्रथम इत्यर्थः । अस्मात्कल्पाच्चतुर्दशमनुभोग-रूपात् षण्मनवो गताः । सप्तमस्य मनोर्युगानां त्रिघनो गतः । अष्टसप्त-विंशतिर्गता । अष्टाविंशाच्चतुर्युगादेतत्कृतयुगं गतम् । अत्र श्रीपतिः—

वर्तमानकदिने मनवः षट् सप्तमस्य च चतुर्युगसंख्या ।
भैर्मितानु च युगत्रयमन्यद्धारताद्रुदिनाच्च गतं प्राक् ॥

स्वायंभुवाख्यो मनुराद्य आसीत्स्वारोचिषश्चोत्तमतामसाख्यौ ।
जातौ ततो रैवतचाक्षुषौ च वैवस्वतः संप्रति सप्तमो ऽयम् ॥

अत्र श्रीपराशरः—

स्वायंभुवमनुः पूर्वं स्वारोचिषमनुस्तथा ।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥
षडेते मनवो ऽतीताः सांप्रतस्तु रवेः सुतः ।
अस्य मन्वन्तरं ह्येतत्सावर्णिस्तु ततः परम् ॥
नवमो रत्नसावर्णिर्भविष्यति मुने मनुः ।
दशमो ब्रह्मसावर्णिर्भविष्यति मुने मनुः ॥
एकादशश्च भविता दक्षसावर्णिको मनुः ।
रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो मनुः ॥
त्रयोदशो रौच्यमानो भविष्यति मुने मनुः ।
भौत्यश्चतुर्दशश्चात्र मैत्रेयो भविता मनुः ॥

अथ गणितकर्मारभते—अतः कालमिति । अतः षष्ठ्यर्थे तसिः । एषामित्यर्थः । गतमनूनां वर्तमानस्य वैवस्वतस्य तं गतं कालं प्रसंख्याय ज्ञात्वा संख्यामेकत्र पिण्डयेत् । सृष्टिकाले ग्रहाणामविद्यमानत्वात् तस्य कालः स्यात् क्षेपार्थ इति तस्यापोह्यत्वात् तस्य ज्ञानायाह—ग्रहर्क्षेति । कृताद्रिवेदाः चतुःसप्तत्यधिकचतुः-शतम् । एते दिव्याब्दाः । ते च कीदृशा इत्याह—शतघ्ना इति । एते मानुषा-ब्दत्वे खखाभ्रवेदर्तुखसप्तेन्दवः । अथ ग्रहाणां पश्चाद्व्रजतामपि प्राग्गतित्वस्य दृष्टिसंवादकारणमाह—पश्चाद्व्रजन्त इति । अत ऊर्ध्वस्थितासु स्वस्वकक्षा-संवेगैः प्रवहादिवातैः स्वबलानुरूपं न्यूना अतिजवात् पश्चाद्व्रजन्तो ग्रहा नक्षत्राणि च भवन्ति । तत्र नक्षत्राणि स्वस्वकक्षायां एकमण्डलं पूर्णं भ्रमन्ति । ग्रहास्त्वन्योन्यं न्यूनाधिकशक्तिभिः प्रवहादिभिर्न्यूना स्वस्वकक्षासु लम्बन्ते । तच्च लम्बनं योजनरूपेण सर्वेषां तुल्यम् । अत्र प्रयोजनपरिमाणं श्रीपतिराह—

वेश्मान्तःपतितेषु भास्करकरेष्वालोक्यते यद्रजः
स प्रोक्तः परमाणुरष्टगुणितैस्तैरेव रेणुर्भवेत्

तैर्वालाग्रमथाष्टभिः कचमुखैर्लिक्षा च यूकाष्टभिः
स्यात्ताभिश्च तदष्टकेन च यवो ऽष्टाभिश्च तैरङ्गुलम् ॥
स्यात्तैर्द्वादशाभिर्वितस्तिरुदिता हस्तश्च ताभ्यां पुन-
श्चायं हस्तचतुष्टयेन धनुषां क्रोशः सहस्रद्वयम् ।
एकं क्रोशचतुष्टयेन गदितं सांवत्सरैर्योजनं
कक्षा भूग्रहधिष्ण्यबिम्बपरिधिव्यासादि संचिन्तयेत् ॥

इति । एवं सर्वग्रहाणां प्रतीचीं गच्छतां गमनवेगो ऽतुल्यः स्वस्वकक्षायाः पूरणं प्रति लम्बनमेव योजनरूपेण तुल्यम् । तच्च नन्देषुवसुरुद्रसंख्यम् । तदेव ग्रहाणां प्राग्गतित्वेन कल्प्यते । भगणैर्नक्षत्रगणैर्हेतुभूतैः प्रत्यहं गतिः कल्प्यते । एतदुक्तं भवति—अश्विन्यादिनक्षत्रेषु यो नक्षत्रेण तुल्यो ग्रहः पूर्वदिने दृष्टः तस्माद्दिनाल्लम्बनमुत्तरदिने संभवति । सा तद्दिनभुक्तिरिति सर्वग्रहाणां योजनरूपेण तुल्यत्वे ऽपि कालात्मत्वं तुल्यं प्रतिपादयति ।

परिणाहवशाद् भिन्ना तद्वशाद्भानि भुञ्जते ।

पूर्वोक्ताया गतेर्योजनत्वात्तुल्यत्वे ऽप्यपरिणाहवशात् रा . . त्मना हि संपाद्यते । तथा द्वादशाध्याये ऽपि वक्ष्यति ।

महत्या कक्षया भागा महान्तो ऽल्पास्ततो ऽल्पया । इति ।

तथा चार्यभटः—

अल्पे हि मण्डले ऽल्पा महति महान्तश्च राशयो ज्ञेयाः । इति ।

तद्वशात् कक्षावशात् भानि नक्षत्राणि भुञ्जते ग्रहाः नक्षत्राण्यतिक्रामन्तीत्यर्थः । तेषां नक्षत्राणां परिवर्तने पौष्णान्तः रेवत्यतिक्रमणान्तः भगणो राशिगणः । एतदुक्तं भवति ।

MṚṢISAURA

In a Telugu palm-leaf codex bearing the shelf-number 29. J. 4 in the Adyar Library and containing the *Ṛcakalpa* and the *Taittirīyāraṇyaka*, there are found at the end in the same script

7 leaves of a treatise entitled *Mṛṣisaura* which is a sort of index to *Saurya* hymns. The name of the author does not appear in the MS. No other MS. of the work is known to exist; nor is there any reference to it in the literature so far known to us. The title *Mṛṣisaura* instead of *Ṛṣisaura*, is mysterious. It is written clearly so in the margin of fol. 1*a*. The MS. is incomplete. The available portion is reproduced below, the *Ṛks* being abbreviated.

श्रीरस्तु । अथ सौर्याणां मन्त्राणामृक्संख्या देवताश्च्छन्दांसि पुनर्वक्ष्यामः । पूर्वाचार्यक्रमे चैतत्सर्वं पुरा दृष्टं शौनकादिभिराचार्यैः । जपतां तु प्रत्यक्षार्थमिदानीं तन्मयोच्यते । उदुत्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः । सूर्यो देवता । नवाद्या गायत्री छन्दः । उद्वयं तमसस्परीति चतस्रो ऽनुष्टुभः । उद्यन्नद्येत्ययं तृचो रोगघ्न उपनिषदन्त्यो ऽर्धर्चशो द्वेषं नाशनी ॥ हरिः ओम् ॥

उदुत्यं जातवेदसं०

चित्रं देवानामिति षळर्चस्य सूक्तस्य आङ्गिरसपुत्रः कुत्स ऋषिः । सूर्यो देवता । त्रिषुप् छन्दः ॥

चित्रं देवानां०

बण्महां असीत्येतयोर्द्वयोः भृगुपुत्रो जमदग्निर्ऋषिः । सूर्यो देवता । पूर्वा बृहत्युत्तरा सतोबृहती ॥

बण्महां असि०

नमो मित्रस्येति द्वादशर्चस्य सूक्तस्य सूर्यपुत्रो ऽभितप ऋषिः । सूर्यो देवता । जगती छन्दः । शं नो भवेति त्रिष्टुप् ॥

नमो मित्रस्य वरुणस्य०

सूर्यो नो दिवस्पात्वेति पञ्चदशर्चस्य सूर्यपुत्रश्च ऋषिः । सूर्यो देवता । गायत्री छन्दः ॥

सूर्यो नो दिवस्पातु०

विभ्राड्बृहत्विति चतुष्कर्चस्य सूक्तस्य सूर्यपुत्रो विभ्राडृषिः । सूर्यो देवता । जगती छन्दः । विभ्राड् ज्योतिषेत्यास्तारपङ्क्तिः ॥

बिभ्राड्बृहत्पिबतु०

आयं गौरिति तृचस्य सूक्तस्य स्वायंभूः सर्वराज ऋषिः । सूर्यो देवता । गायत्री छन्दः ।

आयं गौः०

ऋतं च सत्यं चेति तृचस्य मन्त्रस्य अघमर्षण ऋषिः । भाववृत्तो देवता । अनुष्टुप् छन्दः ।

ऋतं च सत्यं चाभीद्धात्०

THE SANDHYĀVANDANABHĀṢYA OF RĀMĀS'RAMA

The Adyar Library possesses a *Devanāgarī* paper MS. of Bhaṭṭoji Dikṣitā's *Gotrapravaranirṇaya*. This bears the shelf-number 41. D. 37. A leaf pasted over the front cover of this contains a fragment of a *Sandhyāvandanabhāṣya* by Rāmās'rama. So far as I am aware, this is the only MS. of the work now known to us and this is the first time that the work receives a notice. Unfortunately there is only a small fragment extending over one page which does not go beyond the introductory portion. The entire fragment will be reproduced in the Descriptive Catalogue of the Library, to be issued in the near future. The authorship of the *Bhāṣya* is known from the following of the introductory verses :

आलोच्याप्यखिलश्रुतिस्मृतिपुराणाद्यर्थनिर्णायकं
भाष्यं वेदवचोऽर्थसंशयसमुच्छेदाय दृष्ट्वा मुहुः ।
विद्वल्लोकहिताय नायतगिरा सारार्थमत्या हितं
सन्ध्यातत्त्वमतिस्फुटं प्रकुरुते रामाश्रमाख्यो यतिः ॥

It is also corroborated by the fact that the leaf containing the fragment is found along with a work of Bhaṭṭoji Dikṣita, father of Rāmās'rama.

The cover of the MS. contains a horoscope dated *Saṃvat* 1712, *Saka* 1577 (A.D. 1655).

THE DATE AND WORKS OF NAIMIṢASTHA RĀMACANDRA

By H. G. Narahari, M.A.

(*continued from p.* 40 *of the previous issue*)

S'ĀNKHĀYANAGṚHYASŪTRAPADDHATIḤ

An Ms. of the *S'ānkhāyanagṛhyasūtrapaddhatiḥ* exists in Berlin and is mentioned by *Weber* on p. 34 of his *Verzeichniss der Sanskrit-Handschriften* (*der Königlichen Bibliothek in Berlin*). This is a commentary on the *Gṛhyasūtra* of S'ānkhāyana by Rāmacandra who is here called *Naimiṣīya Somasud Rāmacandra*. The work consists of *five* Adhyāyas and like the *Navakuṇḍavidhiḥ*, begins with the verse *Sūnoḥ S'rīdhara mālavasya* etc., thereby conclusively proving the identity of its author with that of the *Navakuṇḍavidhiḥ*.

S'ULBAPARIS'IṢṬAVYĀKHYĀ

This is a commentary on Kātyāyana's *S'ūlba Sūtras* by Rāmacandra. A manuscript of this work is noticed under the number 99 by Peterson on pp. 6 ff. of his *fourth* Report. The final colophon of this manuscript gives it the title *S'ulbasūtravṛttiḥ*. The colophon runs: *Iti nimiṣīya somasud rāmacandrācārya-kṛtāyām s'ulbasūtravṛttau ṣaṣṭhī Kaṇḍikā samāptā*.

Here, as well as in the first verse which runs :

रामो नैमिषवास्तव्यः सोमपीथी गुरून्हरिम् ।
प्रणम्य वृत्तिमाधत्ते शुल्बसूत्रेष्वविस्तराम् ॥

we are informed that its author is Rāmacandra, the Soma-sacrificer who lived in the Naimiṣa forest. In the course of the work,[1] it is also stated that the spiritual name of Rāmacandra is

[1] उच्छेत्तुं जनमोहपान(नि)रतं त्रातुं महीदेवता
देवेन्द्राश्रमनामरामउदभूत्तस्यानुकम्पापदम् ।

Devendrāśrama,[1] and that he wrote his *Śulbasūtravṛtti* for the benefit of a pupil of his named Kṛṣṇa.

ŚULBASŪTRAVĀRTIKA

No independent MSS. of this work seem to be available, and the fact that our author wrote a work of this name is known to us through a single reference to it by the author himself in the previous work wherein the second introductory verse runs thus :[2]

उद्धृत्य सारभूतार्थं स्वकृताच्छुल्बवार्तिकात् ।
सूत्रार्थविवृतिद्वारा बालेभ्यः प्रददे स्फुटम् ॥

SAMARASĀRA

Aufrecht seems to think that the *Samarasāra* and the *Samarasārarasaṅgraha* are two different works for, *twice* (CC.I. 513*a*, 697) he separates these two names and makes independent entries under each. But this supposition of his is disproved by the MSS. in the India Office Library which point out clearly that the two titles belong to the same work. There are *five* MSS. of the work in the India Office Library ; *four* (*Eggeling* 3118 to 3120 ; *Keith* 6446) out of these clearly go by the name of *Samarasāra*, while the remaining MS. (*Eggeling* 3117) mentions both the names. This last MS. which contains the text as well as the commentary thereon by the author's brother, Bharata, calls itself *Samarasāra* in so far as its textual portions are concerned. The final colophon of the text runs : *Iti śrī rāmavājapeyaviracitaḥ samarasārākhyo(')yam*

सम्राडन्वयगोपयाज्ञिकसुतश्रीनेयजः कृष्ण इ-
त्यास्ते तस्य कृते कृतेति विवृतिः शुल्बस्य रामः स्फुटम् ॥

(Peterson, *loc. cit.*).

[1] Peterson (V *Report*, p. lix) hence thinks that Naimiṣastha Rāmacandra may be the same as the author of the *Purascaraṇa Candrikā* who is also called Devendrāśrama. MSS. of this work are abundant in Bengal and in N. W. Provinces. A work of this name is quoted by the *Tārābhaktisudhārṇava* of Nṛsimha, an MS. of which exists the India Office Library (*Eggeling* 2596).

[2] Peterson, IV *Report*, p. 6.

grantha(s) samāptaḥ; but the fact that the colophon of some of the chapters of the commentary runs: *Iti samarasārasaṅgrahaṭīkāyām bharataviracitāyām* ..... clearly shows that the work was also called *Samarasārasaṅgrahaḥ*.

Nor is *Aufrecht* right when he seems to think[1] that Naimiṣastha Rāmacandra, the author of the *Samarasāra* wrote also a commentary on his own work. MSS. of the work found in the India Office Library (*Eggeling*, 3117 & 3118; *Keith*, 6446), in the Calcutta Sanskrit College (Nos. 147 & 148)[2], and in Jammu (*Stein* 2775, 2913) mention the commentator Bharata, the younger brother of the author. *Two* of the Kashmir MSS. (*Stein*, 3033, 2799), however, contain different commentaries, but their authors are anonymous.

Regarding the nature of the work, *Aufrecht* (CC.I. 697*a*) says that it consists mainly of 'prognostics derived from mystic circles, particular stellar conjunctions, the turn of the breath, the flight of birds and such like, of success or defeat in warfare etc. .... This topic is generally classed with Jyotiṣa". According to *Colebrooke's* description of the India Office MS. (*Eggeling* 3117), the *Samarasāra (-saṅgraha)* is a versified treatise on supernatural devices (especially by means of the letters of the alphabet) supposed to ensure success in warfare.

The final portion of the text which runs:

वंशे वत्समुनीश्वरस्य शिवदासाख्यादुरुख्यातितः
सम्राडग्निचिदाप यस्य जनकः श्रीसूर्यदासो जनिम् ।
यन्मातुर्यशसा दिशो दश विशालाक्ष्या (वलक्षा व्यधात्)
स प्राज्यस्वरशास्त्रसारविचितिं रामो वसन्नैमिषे ॥
इति श्रीरामवाजपेयिविरचितः समरसाराख्यो(ऽ)यं ग्रन्थः समाप्तः ।

informs us that Rāmacandra Vājapeyin, the author of the *Samarasāra* is the son of Sūryadāsa, and grandson of Śivadāsa of the

[1] *CC.*, I, 513*a*.

[2] *Descriptive Catalogue of MSS.*, IX. 141 ff.

family of Vatsa Munis'vara, and that he is a resident of Naimiṣa forest. The commentary of the work concludes :

ग्रन्थकृतो रामस्य भ्राता भरतो ल(घुं वि)द्वान् ।
टीकामेनामकरोत्तद्ग्रन्थार्थप्रकाशिकां सरलाम् ॥
इति श्रीरामचन्द्रसोमयाजिविरचितसमरसारटीका भरतकृता समाप्ता ।

and from it we learn that the commentator is the author's brother Bharata and that the name of his commentary is *Saralā*.

YANTRAPRAKĀS'AḤ

This is an astrological work. A manuscript of it is noticed by Peterson on p. 54 of his *fourth* Report. The MS. contains the text as well as the commentary thereon by the author himself [1] who is easily identified as Naimiṣastha Rāmacandra for, even in this work, he repeats the same genealogy which he mentions in his other works. The additional information supplied by this work is that his Great-grand-father is *Saṅkramadarpaṇa*, and that he had a preceptor by name *Hīrasvāmin*. The following passages [2] give this information :

आसीन्मालवदेशमण्डनमणिः श्रीश्रीधराचार्य इ-
त्युद्गीतो भुवने समाधिसमये साक्षात्कृतोमापतिः ।
श्रीवत्सान्वयसागरामृतकरः श्रुत्यब्धिकुम्भोद्भवः
कैवल्यावगतेरवाप्तमनुजाल(भ्या)खिलप्रत्ययः ॥
. . . . . .
सूनुः संक्रमदर्पणो गुणगणस्यास्यामवत्कोविदो
विख्यातः शिवदासमिश्र इति तत्पुत्रो विभाति क्षितौ ।
वेदाम्भोनिधिपारगः पृथुयशाः श्रीसूर्यदासाभिधो
वंश्याम्भोरुहवृन्दवासरमणिः श्रौताग्निसेवापरः ॥

[1] This is supported by the final colophon of the work (Peterson, IV, 57, which runs : इति श्रीमहेश्वराचार्यश्रीरामचन्द्रविरचितायां स्वविरचितयन्त्रप्रकाशटीकायां कुतूहलयन्त्रप्रकाशनो नाम षष्ठोऽध्यायः समाप्तः ।

[2] Peterson, *loc. cit.*, pp. 55 ff.

. . . . . .

नत्वा हीरस्वामिनमनुग्रहात्तस्य लब्धविशदमतिः ।
कुर्वे ऽथ विशालाक्षीतनयो यन्त्रप्रकाशमहम् ॥

. . . . . .

वत्सस्यास्ते महर्षेः प्रयततरकुले सर्वविद्याविदग्धः
सद्बुद्धिः शैवदा(सो बु)धनलिनरविर्वीक्षितः सूर्यदासः ।
तत्सूनू रामचन्द्रो गुरुगुरुकृपयाध्यायमेतं तु षष्ठं
वैशालाक्षेय आधाद्बहुलकुतुककृच्चानुयन्त्रप्रकाशे ॥

The source as well as the extent of his learning is pointed out by the author in the following *two* verses :

सावित्री शिशुनैव यच्चिरमभूद्भ्राता मया भक्तितः
काश्यां स्पर्शमदाच्च कश्चन सुरो यच्छ्रीभवान्याः पुरः ।
शैवाजो(ऽ)पि च पर्यचाययदलं यद्दीक्षया श्रीगुरु-
स्तत्तद्दैभवतो ममामलमतौ श्रीभारती भासते ॥
मीमांसाद्वयमूलया फणिपतिप्रोद्गीतभाष्यामृता-
साराभ्युक्षितपाणिनीयधरणौ साहित्यबीजोत्थया ।
सांख्यन्यायपुराणपल्लवितया श्रीरामधी (विद्यया)
वेदाङ्गादिफलैः सदुक्तिकुसुमैः को वा न स(न्तो)ष्यते ॥

NĀḌĪPARĪKṢĀ

This is a medical work by our author. There is an MS. of the work in the Durbar Library, Nepal. It is noticed on pp. 198 ff of the Descriptive Catalogue of MSS. in that Library by Haraprasad Sastri. In the first verse, the author, *Naimiṣa Rāma* or *Rāma-candra Somayāji* mentions his father *Agnicit Sūryadāsa*, which fact proves that he is the same as the author of the works noticed above. The latter-half of the verse at the beginning runs :

सम्राजो ऽग्निचितस्सुतः सुकृतिनः श्री सूर्यदासस्य यो ।
रामो नैमिषमाश्रितः स कुरुते नाड्यादिलक्ष्मोच्चयम् ॥

In the final colophon[1] of the work, the author styles himself *Rāmacandra Somayāji*, a name which, as has been seen above, is used by him in some of his other works also. The work contains the following chronogram :

एकोनतिथिशरमिति . . . . . विक्रमार्कनृपात् ।
विहितं प्रकरणमेतत्कविना रामेण नैमिषारण्ये ॥

Arrangements for the holding of the first meeting of the All-India Oriental Library Conference are complete. The President and the Local Secretary of the next session of the All-India Oriental Conference to be held at Hyderabad in December have both responded sympathetically to the suggestion for holding this first meeting during the session. Promises also have been received for adequate facilities to hold the meeting. It is proposed that the meeting may be held on Sunday the 21st December 1941 at 6-30 p.m. Those Libraries that have agreed to be the initial members of the Conference are requested to nominate their representatives and to send in their names to Dr. C. Kunhan Raja, Adyar Library. The exact place of the meeting will be intimated to the Library representatives at the Oriental Conference. The Libraries may also kindly send in advance, any points or suggestions for consideration at the first meeting, regarding the new organization. This will facilitate the Secretary in preparing a report to be placed before the meeting, so that there will be some concrete proposals when the representatives come together. On behalf of the Libraries, the Director of the Adyar Library desires to place on record his sincere thanks to the President, the Secretaries, the Local Secretary and the Reception Committee of the All-India Oriental Conference for their promised co-operation.

THE OLDEST DATED MANUSCRIPT OF PUÑJARĀJA'S COMMENTARY ON THE SĀRASVATA-PRAKRIYĀ—DATED A.D. 1556 (SAṀVAT 1612)

By P. K. Gode, M.A.

Puñjarāja, the author of two works on *alaṁkāra*[1] composed a commentary on the *Sārasvata-prakriyā*. According to Aufrecht[2] he lived at the end of the 15th and beginning of the 16th century *i.e.*, between *A.D.* 1475 and 1530. Aufrecht[3] records some MSS. of his *Sārasvata-ṭīkā*, some of which are dated ones[4], being copied in *A.D.* 1566, 1587 and 1600.

[1] These works are (1) *Dhvani-pradīpa* and (2) *Kāvyālaṁkāra-Śiśu-prabodha* (Vide p. 301 of Dr. S. K. De's *Sanskrit Poetics*, I, 1923.)

[2] *Ibid.*, 302.

[3] *CC, I*, 700—सरस्वतीसूत्र—Comm. by Puñjarāja IO 859, 1194, W. p. 220.

CC, II, 167—" Fl. 181. Rgb 495. Stein 48 (inc.)
CC, III, 145—" Peters 5, p. 166, 5,240, 6,256 ".

[4] I record below the dates of these MSS. as I find them recorded in the Catalogues. I have examined the MSS. found by me in the Govt. MSS. Library at the B.O.R. Institute and verified the dates recorded in these MSS. only.

A. D.	Saṁvat	Particulars of MS.
1565	1622	सारस्वतटीका—*No. 495 of 1884-87* (B.O.R. Institute).
,,	,,	—Do—*No. 289 of 1880-81.*
1600	1656	—Do—*No. 256 of 1895-98.*
1587	1643	—Do—India Office MS. No. 801 (vide p. 214 of *Cata.* II, 1889). The Chronogram reads "वह्नयब्धिषड्विधु" =Saṁvat 1643= A.D. 1587 (and not 1616 as stated in the Catalogue.)

Subsequent to the publication of Aufrecht's *Catalogus Catalogorum* the B.O.R. Institute published a list of additions to the Govt. MSS. Library in 1925. In these additions two[1] more MSS. of Puñjarāja's commentary were added to the Govt. MSS. Library one of which is dated Saṁvat 1612=*A.D. 1555* as will be seen from the following extract :—

इति श्रीमीलकुलश्रीमालभार श्रीपुंजराजविनिर्मिता सारस्वतटीका संपूर्ण-व्याख्या। विशेष . . . . संगते। श्रीपुंजराजो यदिहाभ्यधत्त अविस्तरं चारुविनिश्चितार्थं सर्वसमूलसमपेकृतंता ॥ २३ ॥

. . . . बलशालनां च वोविस्तरात्ममबभेतिं भारिती।
तेनर्दुर्नयनिवारिणोचिते। पूर्वकोविदमत्ते विलीयते ॥ २४ ॥
गर्वाज्ञानतमो निमीलिततया मालिन्यमर्थेषु ये।
संसुद्वेष्कपितत्वतेन तदधीकार। परीष्याविधौ।
कित्वते गुणदोषयो स (?) मदृशो वैराग्यनिष्ठा इव।
श्रेष्टां हंत परोक्तिनिस्पृहधियसूक्ष्मादमीभ्यो नमः ॥ २५ ॥

ग्रंथाग्रं ॥ ४२०० ॥ श्रीरस्तु संवत् १६१२ वर्षेमार्गसिरसुदि। ७ दिने। बृहस्पतिवारे[2] ॥ श्रीषतरगच्छे। श्रीश्रीश्रीजिनचंद्रसूरिशिष्यश्रीउदयवल्लभमहोपाध्याय तत् शिष्यवाचनाचार्यपद्मसुंदरगणितत्सिष्यभवनशोमे (भे?) न लिपीकृताः ॥ श्रीविक्रमनगरे। श्रीजिनचन्द्र[3]सूरिविजयराज्ये ॥ सुभं भवतु ॥

[1] MSS. *No. 287 of 1899-1915* and *No. 342 of 1895-1902* dated *Saṁvat 1612.*

MS. No. 342 of 1895-1902.

[2] This date corresponds to Thursday, *21st November, 1555* (Vide p. 313 of *Ind. Ephemeris*, Vol. V).

[3] Vide p. 34 of *Kharataragaccha-Paṭṭāvali-Saṁgraha* by Muni Jinavijayaji, Calcutta, 1932—Here one जिनचंद्रसूरि of खरतरगच्छ is mentioned. His dates are as follows :

(1) Born—*A.D. 1539* (*Saṁvat 1595*).
(2) Became *Sūri*—*A.D. 1556* (*Saṁvat 1612*).
(3) Died—in *A.D. 1614* (*Saṁvat 1670*).

॥ श्रीक्षेमराजो महोपाध्यायाः शिष्यवाचनाचार्य श्रीदयातिलकगणिव . . . . णां शिष्यपंडित . . . खेमसोमगणिवराणां शिष्यपंडितात्तमपुण्यतिलकमुनिवराणां शिष्यपं० विनयकीर्त्तिसत्यकीर्त्ति . . . . ।

It appears to me that the MS. of *A.D. 1556* from which I have quoted above is the earliest dated MS. of Puñjarāja's *Sārasvataṭīkā*[1] so far as I can judge from the published Catalogues available to me for reference. The date of this copy *viz.*,

[1] The genealogy of Puñjarāja as recorded by him in his *Sārasvātaṭīkā* is as follows :

सदेपाल (C. 1350)
|
Son
कोर (C. 1375)
|
Son
पाम (C. 1400)
|
Son
गोवा (C. 1425)
|
Son
यांपच (X wife मदी) (C. 1450)
|
Sons

जीवन (X wife मकू)	मेघ (C. A.D. 1475) (got the title of "मफरलमलीक" from "खलचि साहिगयासान्"

|
Sons

पुञ्जराज A.D. 1500	मुञ्ज A.D. 1500

Lane-Poole (*Muhammadan Dynasties*, 1925, p. 311) records only one Khalji King of Malwa *viz.*, *Ghyāth Shāh b. Mahmud* (*A.D. 1475*) who was the patron of Puñjarāja's uncle मेघ.

A.D. 1556 harmonizes with the date assigned to Puñjarāja by Aufrecht and accepted by other scholars *viz.*, "*A.D. 1475 to 1520.*" As Puñjarāja's uncle Megha was patronized by a Muhammadan king of Malwa [1] who flourished in *A.D.* 1475 we can definitely assign Puñjarāja to a period between *A.D.* 1475 and 1520 and consequently the B.O.R.I. MS. of his work dated *A.D.* 1556 is not much removed from the life-time of Puñjarāja. The line of the Khalji rulers of Malwa came to an end in *A.D.* 1531 when Nāsir's successor Mahmūd Khalji was put to death. The kingdom of Malwa was conquered by Humāyūn in *A.D.* 1535. We have no means of determining the fate of Puñjarāja's family, say, after *A.D.* 1531. The patronage to learning and the comparatively peaceful condition of life enjoyed by the family of our author must have ceased after the death of Mahmūd Khalji, the last Khalji ruler of Malwa.

Speaking of Puñjarāja Dr. Belvalkar [2] states that Puñjarāja "was a minister to Ghaisuddin Khilji of Malwa 1469-1500." This statement seems to be wrong because in the

[1] Peterson (5th Report) p. 167—सारस्वतटीका

श्रीविलासवति मंडपदुर्गे स्वामिनः खलचिसाहिगयासान् ।
प्राप्य मंत्रिपदवीं भुवि याभ्यामर्जितोर्जितपरोपकृतिः श्रीः ॥ ९ ॥

Ghias-ud-din Khalji was poisoned on *30th March 1501*. Nāsir-ud-din Khalji succeeded him and ruled till his death on *30th April 1511*—Vide p. 381 of *Imp. Gazetteer*, Vol. II (Oxford, 1928). Puñjarāja may have been the contemporary of both these Kings. These Khaljis were not only patrons of learning but they were men of some literary taste. A work called *Kaṅkāli Grantha* has been attributed to Nāsir Shah Khalji (Vide my paper in the *Annals* B.O.R. Institute, Vol. XII, 289-291). Sardar G. N. Mujumdar has brought to light a Marathi commentary on the *Saṁgītamakaranda*, composed by one Mutoji of the Khalji Dynasty (Vide pp. 1 to 4 of offprint from Vol. IX, 1938 of the *Journal of Music Academy, Madras*).

[2] *Systems of Sanskrit Grammar*, 1916, p, 97.

account of himself and his ancestry given by Puñjarāja in the *praśasti* at the beginning of his commentary on the *Sārasvata* we are only informed that Puñjarāja's father Jīvana and his uncle Megha got the title of मंत्रि from Ghaisuddin Khilji (स्वामिनः खलचिसाहिगयासात् प्राप्य मंत्रिपदवीम् भुवि याभ्याम्). We are also told that Puñjarāja became king (नरेन्द्र) but abandoned the kingdom to his younger brother Muñja (मुंजे . . . उपाहित-राजकार्यभार). Thus while he refers to his father Jīvana and his uncle Megha as ministers (*e.g.* "मेघमंत्री) in v. 11 he styles himself as "पुंजराजो नरेन्द्रः" in verses 13 and 23 of the *praśasti*. We must, therefore, try to verify from contemporary history of Malwa the exact significance of the title नरेन्द्र [1] applied by Puñjarāja to himself but this task must be left to the historians of Malwa for the present.[2]

[1] After the death of Nāsir-ud-din Khalji of Malwa in *A.D.* 1511 there was some scramble for the throne in which Mahmud Khalji succeeded with the help of a Hindu officer Medinī Rao. After a time Mahmud resenting the insolence of Medini Rao, the all-powerful minister, fled to Guzerat. Bahadur Shah captured Malwa and Mahmud and his family were made prisoners. Mahmud was later put to death (in *A.D.* 1531). It remains to be seen if our Puñjarāja became नरेन्द्र during the rule of Medinī Rao, *i.e.* say between *A.D.* 1511 and 1526 or after *A.D.* 1531 when the Khalji dynasty of Malwa came to an end. Humāyun conquered Malwa in 1535. Perhaps our Puñjarāja the son of the ex-minister of the Khalji ruler may have declared independence between *A.D.* 1531 and 1535 as this period was most opportune for this purpose. Medinī Rao, the powerful minister of Mahmūd Khalji between 1511 and 1526 *A.D.* would not have tolerated our Puñjarāja styling himself as independent King (Vide p. 380 of *Imperial Gazetteer*, Vol. II, 1928.)

[2] Vide *Epi. Indo-Moslemica* (1937-38) p. 23ff.—Bhonrasa Inscription (Gwalior State) of Sulṭān *Ghi*yāth Shāh of Malwa dated A.D. *1483* is in Hindi language. It refers to revival of worship and prevention of vandalism to some Hindu temple [Vide also E.I.M. (1936-37)—Dhumeshvar Temple Inscription]. These inscriptions show the religious toleration of Muslim kings (p. 24).

समानीतानां ग्रहणार्थम्। इतरथा समानयनस्य शीतोष्णाभिरद्भिरबर्थमित्यत्र कृतार्थत्वात्तासां ग्रहणमेव न स्यात् गृहीत्वेत्यस्य च नवनीतेन सम्बन्धः स्यात्। तस्मिंस्तु सति आपो नित्याः। नवनीतदधिद्रप्सयोश्च विकल्पः सिद्धयति ॥ (७)

दक्षिणे केशपक्षे त्रीणि त्रीणि कुशपिञ्जूलान्यभ्यात्माग्राणि निदधाति—ओषधे त्रायस्वैनमिति ॥ ८ ॥

दक्षिणो यः केशपक्षः तस्मिन् केशपक्षे त्रीणि[1] कुशपिञ्जूलान्यभ्यात्माग्राणि निदधाति। कारयिष्यमाणस्याभ्यात्माग्राणि निदधाति। स्थापयतीत्यर्थः। ओषधे त्रायस्वैनमित्यनेन मन्त्रेण ॥

दक्षिणग्रहणं विस्पष्टार्थम्। तस्मिन् केशपक्षे त्रीणि त्रीणि कुशपिञ्जूलानि कुमारस्य अभ्यात्माग्राणि स्थापयति मन्त्रेण। वीप्सा बह्वर्था ॥ (८)

स्वधिते मैनं हिंसीः—इति लौहेन क्षुरेण ॥ ९ ॥

स्वधिते मैनं हिंसीरित्यनेन मन्त्रेण लौहेन क्षुरेण निष्पीडयति। अथ लौहेनेति किंथर्थम्। क्षुरो लोके[2] लोहमय एव प्रसिद्धः[3]। तस्माल्लोहग्रहणमपार्थकम्। उच्यते। सिद्धो लोहमयः क्षुरः। अत्र त्वयं लोहशब्दोऽक्षविशेषे वर्तते। ताम्रमयेनेत्यर्थः। कथं गम्यते। शास्त्रान्तरदर्शनात्। लोहशब्दश्चायं रजतादिष्वपि वर्तते। अत्र ताम्रे वर्तते ॥

अनेन मन्त्रेण लौहेन क्षुरेण तानि कुशपिञ्जूलानि निष्पीडयति। तेषु क्षुरं स्थापयतीत्यर्थः। लोके क्षुरो लौह एव प्रसिद्धः। अतोऽत्र तस्यावाच्यत्वात्

[1] L. Omits one त्रीणि.

[2] L. Omits लोके.

[3] A. L. सिद्धः

लोहशब्दस्ताम्रे वर्त्तते। शास्त्रान्तरे विहितत्वाच्च। लोके लोहशब्दश्चायं रजतादिष्वपि वर्त्तते। अत्र तु ताम्रे। तथा दृष्टत्वात्॥ (९)

प्रच्छिनत्ति—येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासत्—इति॥१०॥

येनावपत्सविता क्षुरेणेत्यनेन मन्त्रेण लौहेन क्षुरेण केशान् प्रच्छिनत्ति। प्रशब्दो निपातः। छिनत्तीत्येतदेवोक्तं[1] भवति। अन्ये पुनर्ब्रुवते क्षिप्रार्थमिति॥

ततः अनेन मन्त्रेण तेनैव क्षुरेण प्रच्छिनत्ति। प्रोऽनर्थकः। अनभिप्राय इत्यर्थः। अन्ये क्षिप्रार्थ इत्याहुः॥ (१०)

प्रच्छिद्य प्रच्छिद्य प्रागग्राञ्छमीपर्णैः सह मात्रे प्रयच्छति। तानानडुहे गोमये निदधाति॥ ११॥

केशान् प्रच्छिद्य प्रागग्रान् शमीपर्णैः सह कृत्वा मात्रे प्रयच्छति ददातीत्यर्थः। कस्य मात्रे। कुमारस्य। प्रच्छिद्येति वीप्सा क्रियते। कथम्। अत्र यो धर्म उपदिश्यते स सर्वेषु छेदनेषु यथा स्यात्। प्रागग्रानिति। तेषां कुशपिञ्जूलानां स्थाप्यमानानामपि प्रागग्रता विधीयते। को ददाति। यः करोति। गृहीत्वासौ माता आनडुहे गोमये निदधातीति। तेन केशान् शमीपर्णैः सहितानानडुहे गोमये निदधाति स्थापयतीत्यर्थः। अत्र नियमो नास्ति प्रागग्रतोदगग्रतायाः। तेन यथाभिप्रेतं स्थापयति॥

[1] A. L. छिनत्त्येतदेवोक्तम्.

प्रच्छिद्य प्रच्छिद्येति वीप्सावचनं यो यत्र धर्म उपदिश्यते स सर्व्वेषु छेदेषु यथा स्यादिति । प्रागग्रान् कृत्वा शमीपर्णैः सह एकीकृत्य मात्रे प्रयच्छति ददाति । तानमौ आनडुहे गोमये निदधाति स्थापयति । नात्र प्रागग्रतानियमः ॥ (११)

येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् । तेन ते आयुषे वपामि सुश्लोक्याय स्वस्तये—इति तिद्वीयं । येन भूयश्चरात्यं ज्योक् च पश्याति सूर्यम् । तेन ते आयुषे वमापि सुश्लोक्याय स्वस्तये—इति तृतीयम् ॥

येन धाता इत्यनेन मन्त्रेण द्वितीयं प्रच्छिनत्ति । दक्षिणे केशपक्षे इत्येतद्वर्तते । येन भूय इति । येन भूयश्चरात्यं इत्यनेन मन्त्रेण तृतीयं प्रच्छिनत्ति । द्वितीयं तृतीयमिति मन्त्रान्तोपदेशार्थम् । ननु च इतिना[1] मन्त्रान्तः प्रदृश्यते । नेत्युच्यते । इतिकारो मन्त्रमध्येऽपि क्वचिद्दृश्यते । यथा आसीद सदनं स्वमिति मा हिंसीर्देवप्रेरित इति । अथ क्रमार्थं द्वितीयग्रहणम् ॥

सङ्ख्यावचनं मन्त्रान्तप्रदर्शनार्थम् । मन्त्रमध्येऽपीतिकारो विद्यते इत्युक्तम् । कुशपिञ्जूलनिधानस्याभ्यात्मविधानार्थं भवितुं नार्हति । अभ्यासस्य त्रीणि त्रीणि इति वीप्सयैव सिद्धत्वात् ॥ (१२)

सर्वैर्मन्त्रैश्चतुर्थम् ॥ १३ ॥

पूर्वोक्तैः सर्वैर्मन्त्रैः चतुर्थं छिनति ॥

सर्वैस्त्रिभिर्मन्त्रैश्चतुर्थवारं छिनत्ति ॥ (१३)

[1] A. L. इति.

एवमुत्तरतस्त्रिः ॥ १४ ॥

यथा दक्षिणप्रच्छेदनं कृतं उत्तरत[1] अप्येवमेव करोति । अयं तु विशेषः—त्रिः करोति ॥

यथा दक्षिणे केशपक्षे एवमुत्तरेऽपि केशपक्षे कुर्यात्त्रिः । परिसंख्येयम् । उत्तरे केशपक्षे त्रिरेव । न चतुर्थमिति ॥ (१४)

क्षुरतेजो निमृजेत्—यत् क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान् । शुन्धि शिरो मास्यायुः प्र मोषीः—इति ॥ १५ ॥

क्षुरतेजो निमृजेत् यत्क्षुरेण मर्चयता इत्यनेन मन्त्रेण । तेजः धारेत्युच्यते । निमृजेदिति शोधयेदित्यर्थः ॥

ततः क्षुरधारां निमृजेत् शोधयेत् मन्त्रेण । निमार्जनमवमार्जनम् । न्यवेति विनिग्रहार्थीयाविति वचनात् ॥ (१५)

नापितं शिष्याच्छीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षुण्वन् कुशलीकुर्विति ॥ १६ ॥

उपदिशेदित्यर्थः । किमिति । शीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षुण्वन् कुर्विति । एवं ब्रूयात् । क्रियां वास्य निर्दिशेदिदं कुर्विति ॥

नापितं शिल्पिनं शिष्यात् प्रेष्येत्प्रैषेण । कुशलीकरणवचनं विपरीतलक्षणया वापने वर्त्तते । येन विहितोऽयं मुण्डयति हि श्रूयते ॥ (१६)

[1] A. L. उत्तरा.

यथाकुलधर्मं केशवेशान् कारयेत् ॥ १७ ॥

स्वेन कुलधर्मेण केशवेशाः कर्तव्याः। तत्र पृथुकाचिरकादीनित्यर्थः ॥

एकशिखः त्रिशिखः पञ्चशिखो वा इति बोधायनः। पूर्वशिखः परशिख इति कुलधर्माः। तेषु यो यस्य कुलधर्मः तेन तस्य केशसन्निवेशान् कारयेत्। ततः स्विष्टकृदादि समापयेत्। वेषानित्यपि पाठे स एवार्थः ॥ (१७)

आवृतैव कुमार्य्यै ॥ १८ ॥

कुमार्यै आवृता चौलकर्म कर्तव्यम्। आवृतेति किमुच्यते। समन्त्रकं कर्म। कथं ज्ञायते। येनान्यत्र तूष्णीमित्याहुः। के पुनरिति। अपरद्वारा नित्यया वृतेति उक्त्वा तूष्णीं प्रति प्रसर्पन्तीत्याहुः। तेन ज्ञायते सर्वस्य कर्मण उपदेश इति। यद्येवं स्यात् तेनैवोपदेशं कुर्यात्। कस्मात्। अविशेषाभिधानादुभयोः प्राप्नुयात्। तदेतन्नोपपद्यते। किं कारणम्। कुमाराधिकारात्। कुमारं जातमिति वचनात्। तेन विशेषोपदेशः। यद्येवं कुमार्याश्चेत्येवमस्तु। यत्तस्या न ग्रहणं करोति तेन मन्यामहे—अविशेषेण भवितव्यम्। किंतु एवकारश्चात्र विद्यते। तस्मादावृतैवात्र भवति। न मन्त्रः। यदुक्तं अन्येष्वावृद्ग्रहणेषु[1] मन्त्र इति तन्न विलक्षणत्वान्निर्देशस्य। तत्रावृद्ग्रहणमात्रमेव[2]। अत्र त्वेवकारः क्रमार्थ एव। तस्मात् कर्मणा भवितव्यम्। न मन्त्रेण[3]। एवं ते ब्रुवतो[4]

[1] A. L. अन्येष्वपि ग्रहणेषु.

[2] A. तत्रापि ग्रहणमात्रमेव. L. तत्र पाणिग्रहणमात्रमेव.

[3] A. L. न कर्मणा.

[4] A. L. एवं नैव कुर्वतो.

दोषः[1] प्राप्नोति। तूष्णींभूतस्य तत्रैके प्रतिपन्नाः। भवति होमः अमन्त्रक इति। वयं तु नैवम्। किं कारणम् अदृष्टत्वात्। तस्मात्कर्मैव भवति न होमः। तूष्णीं द्वितीये उभयत्रेति तत्र अमन्त्रकः प्राक्कृतो होमः। इह त्वमन्त्रकस्य प्रवृत्यैव भवितव्यं नोपपद्यते। तस्मादावृन्मात्रं भवति। आवृत्युक्तार्थम्। अत्र तु होमं केचिदिच्छन्ति। होमेन भवितव्यं। कस्मात् अविशेषात्। कर्मग्रहणाच्च। अन्ये आवृद्ग्रहणात् होमं नेच्छन्ति। तूष्णीं होमो नास्ति ॥

आवृता अमन्त्रकमित्यर्थः। कुतः। येनान्यत्र आवृतेत्युत्क्वा तूष्णीमित्याह। अपरया द्वारा निरयावृता सदो द्वारं चाभिमृश्य तूष्णीं प्रतिप्रसर्पन्तीति। नैतदेवम्। एवकारोऽत्रावधारणार्थः। आवृत्तन्त्रमेव भवति न मन्त्र इति। तेनावृतेत्यस्य तूष्णीमित्ययमर्थ इति सिद्धम्। एवञ्चेदोषः। अमन्त्रकं होमः प्राप्नोति। इष्टमेव न एतदिति केचिदाहुः। अन्ये होमो न भवतीत्याहुः। अमन्त्रकस्य होमस्य क्वचिदप्यदृष्टत्वात्। ननु तूष्णीं द्वितीये उभयत्रेत्यत्र दृष्ट इति शङ्का न कार्या। तत्रापि प्रजापतये स्वाहा इति मन्त्रोऽस्त्येव ॥ (१८)

इति प्रथमे सप्तदशी कण्डिका

एतेन गोदानं ॥ १ ॥

एतेनेति चौलकर्मोपदिश्यते। एतेन चौलकर्मणा गोदानं व्याख्यातम् ॥

[1] A. L. होमः for दोषः

व्याख्यातमिति शेषः । एतेनेति कृत्स्नोपदेशः ॥ (१)

तत्र विशेषमाह—

षोडशे वर्षे ॥ २ ॥

विशेषान् वक्ष्यामः ॥

तृतीयस्यापवादः । अत्र मातुरुपस्थोपवेशनं न भवति । अयुक्तत्वात् ॥ (२)

केशशब्दे तु श्मश्रुशब्दान् कारयेत् ॥ ३ ॥

ये तु केशशब्दाः तेषु श्मश्रुशब्दाः कर्तव्याः । तत्र केशशब्दाः अदितिः केशान् वपत्विति । वप्त्रा वपसि केशानिति च । अथ कस्मादयं विलक्षणो निर्देशः । एकत्रैकवचनेन अन्यत्र बहुवचनेन । केशशब्द इत्येकवचनेन श्मश्रुशब्दानिति बहुवचनेन ब्रवीति । अविवक्षितमेवेदं बहुवचनम् । जातिपरत्वान्निर्देशस्य उभयत्रापि भवति । जातिपरो निर्देशः । नेत्युच्यते । लोकप्रसिद्ध एवायं शब्दः । श्मश्रूणि वापयति[1] केशान्निकृन्ततीति । द्वौ वेह केशशब्दौ[2] । विलक्षणनिर्देशं कुर्वन्नेतत् ज्ञापयति । विधिगतस्यापि केशशब्दस्य स्थाने श्मश्रुशब्दः प्रतीयते इति । कः पुनरसौ विधिगतः केशशब्दः । दक्षिणे केशपक्षे इति । तेनेहापि दक्षिणे श्मश्रुपक्षे इत्येतत्सिद्धं भवति[3] ॥

[1] A. L. कारयति.
[2] A. वेह केशशब्दे L. वेहशब्दे.
[3] L. omits भवति.

केशशब्दे त्विति जातावेकवचनम्। श्मश्रुशब्दानिति व्यक्तिपरो निर्देशः। तेन त्रयः श्मश्रुशब्दाः। तत्र अदितिः केशान्वपतु। वप्ता वपसि केशान्। दक्षिणे केशपक्षे। इति त्रिषु ते कार्याः। तन्त्रगतस्य तृतीयस्य केशशब्दस्याभावाद्विधिगतस्य ग्रहणम्। तेन दक्षिणे श्मश्रुपक्षे इति साधितं भवति ॥ (३)

श्मश्रूणीहोन्दति ॥ ४ ॥

इह तु श्मश्रूणां उन्दनेन[1] तु क्लेदनं केशानां दृष्टम्। तदिह श्मश्रूणां विधीयते। तेन नात्र समुच्चयः। इहशब्देन श्मश्रूणामिहोन्दनं भवति न केशानाम् ॥

शिर उन्दनस्यापवादः ॥ (४)

शुन्धि शिरो मुखं मास्यायुः प्रमोषीः—इति ॥ ५ ॥

क्षुरमार्जनेऽधिकारो भवति ॥

क्षुरनिमार्जनेऽयं विशेषः ॥ (५)

केशश्मश्रुलोमनखान्युदक्संस्थानि संग्रव्यति ॥ ६ ॥

अस्य संप्रेषस्य क्व निवेशो भवति। किंमादौ[2] मध्ये अन्त्ये इति। आदौ तावत्प्राप्नोति। यद्यत्पश्चादुपदिश्यते तत्तदादावेव निवेश्यते इति। यथाग्नीध्रस्य तृतीयत्वे प्राप्ते प्रतिप्रस्थाता तृतीयो भवति एवमिहापि भवितव्यम्। तदेतन्नोपपद्यते। संख्याचोदितानामेतदेव भवति। नियम-

[1] A. मुण्डनेन L. मुण्डनं.
[2] A. L. किंवादौ.

स्थानानां वा । तेनोभयोरभावात् अन्ते एव निवेशो भवति । केशश्मश्रु-लोमनखान्युदक्संस्थानि कुर्वित्यन्ते उपदेशकः शब्दः ॥

शीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षुण्वन् कुशली केशश्मश्रुलोमनखान्युदक्-संस्थानि कुर्विति नापितशासनम् ॥ (६)

आप्लुत्य वाग्यतः स्थित्वाहःशेषमाचार्यसकाशे वाचं विसृजेत वरं ददामीति ॥ ७ ॥

आप्लुत्य स्नात्वेत्यर्थः । वाग्यत इति मौनेनाहःशेषं तिष्ठतीति । आचार्यसकाशे वाचं विसृजेत । किमिति वाग्विसर्गो भवति । वरं ददा-मीति ॥

तत आप्लुत्य स्नात्वेत्यर्थः । वाग्यत इत्यमन्त्रयमाणः । स्थित्वेत्युपवेशन-प्रतिषेधः । एवमहःशेषं स्थित्वास्तमिते आचार्यसमीपे वरं ददामीति वाचं विसृजेत् ॥ (७)

वरद्रव्यमाह—

गोमिथुनं दक्षिणा ॥ ८ ॥

ददाति ॥

ननु भिक्षुरयम् । कथमस्य गोमिथुनसम्भवः । उच्यते । यथास्य प्रावर-णादिसम्भवस्तथैतस्यापि ॥ (८)

संवत्सरमादिशेत् ॥ ९ ॥

एतत्कर्म कृत्वा संवत्सरं व्रतमादिशेत्। तत्र कस्मिन्[1] काले व्रतादेशनं कर्तव्यम्। कुतः संशयः। रात्रिरधिकृता[2]। रात्रौ तद्व्रतादेशनाभावः[3]। कस्मात्। अविहितत्वात्। तेन व्रतादेशनं पूर्वं कृत्वा संवत्सरान्ते इष्टं कर्म कुर्वन्ति। एवमेके। तत्र नैवम्। संवत्सरान्ते अन्यस्य कर्मणो विधानात्। तेनेह गौदानिकं कर्म कृत्वा अन्यस्मिन्नहनि व्रतादेशनं कर्तव्यम्॥

एवं गोदानं कृत्वा संवत्सरं व्रतमादिशेत् वक्ष्यमाणेन विधिना चरेत्। रात्रौ व्रतादेशनानुपपत्तेः अपरेद्युः कार्यम्॥ (९)

इति प्रथमे अष्टादशी कण्डिका

अष्टमे वर्षे ब्राह्मणमुपनयेत्॥ १॥

जन्मनः प्रभृत्यष्टमे वर्षे ब्राह्मणस्योपनयनं कर्तव्यम्। कथं ज्ञायते। जाताधिकारात्। कुमारस्य चोपनयनं कर्तव्यम्। कुमाराधिकारः कुमारीनिवृत्त्यर्थः। अनुवर्तते यद्येवं नार्थोऽधिकारेण पुंलिङ्गोपदेशात्। ब्राह्मणमुपनयेदिति कुमारस्यैव प्राप्नोति। नेत्युच्यते। जातिनिर्देशे च लिङ्गवचने अविवक्षिते। तद्यथा। ब्राह्मणो न हन्तव्य इति। एवं[4] ब्राह्मण्यपि

[1] A. L. तस्मिन्.
[2] A. एधिकृता L. संवत्सरोषिकृता.
[3] तत्तातादेशभावः
[4] Before एवं A. has एवं ब्राह्मणो न हन्तव्य इति extra.

न हन्येत । एवमिहापि ब्राह्मण्या अप्युपनयनं प्राप्नोति यद्यधिकारो नानुवर्तते ॥

जन्मप्रभृत्यष्टमे वर्षे ब्राह्मणमुपनयेत् । कुमारमिति वर्तते कुमारीनिवृत्त्यर्थमित्युक्तम् ॥ (१)

गर्भाष्टमे वा ॥ २ ॥

गर्भाष्टमे वा ब्राह्मणस्योपनयनं कर्तव्यम् । स्मृतिदृष्टेन वायमर्थः । पुनः संख्या विधीयते । इह तु जन्मनोऽधिकारात् जातस्यैव संख्या प्राप्नोति । तस्मात् गर्भादित्यारभ्यते ॥

गर्भप्रभृत्यष्टमे वोपनयेत् ॥ (२)

एकादशे क्षत्रियम् ॥ ३ ॥

एकादशे वर्षे क्षत्रियमुपनयेत् । गर्भैकादशे वचनमस्ति । न त्वधिकारात् । गर्भाष्टमे इति गर्भैकादशे इति प्राप्नोति । एवमुत्तरस्यापि विधिः साध्यते ॥

जन्मप्रभृति गर्भप्रभृति वा एकादशे वर्षे क्षत्रियमुपनयेत् ॥ (३)

द्वादशे वैश्यम् ॥ ४ ॥

द्वादशे वर्षे वैश्यमुपनयेत् । गर्भद्वादशे वा । ब्राह्मणादीनामेतेष्वेव कालेषूपनयनं भवति । अन्यस्मिन्नपि लभ्यते इत्यत आह ॥

जन्मप्रभृति गर्भप्रभृति वा द्वादशे वर्षे वैश्यमुपनयेत् ॥ (४)

आ षोडशात् ब्राह्मणस्यानतीतः कालः ॥ ५ ॥

अष्टमाद्वर्षादारभ्य यावत्षोडशवर्षमिति तावदुपनयनं लभ्यते । तत्राकारोऽयमभिविधौ ॥

षोडशवर्षपर्यन्तं ब्राह्मणस्योपनयनकालोऽतीतो न भवति ॥ (५)

आ द्वाविंशात् क्षत्रियस्य । आ चतुर्विंशात् वैश्यस्य । अत ऊर्ध्वं पतितसावित्रीका भवन्ति ॥ ६ ॥

एभ्यः संवत्सरेभ्यः षोडशद्वाविंशचतुर्विंशेभ्य[1] ऊर्ध्वं अनुपनीतास्ते पतितसावित्रीका नाम भवन्ति । संज्ञाप्रयोजनं पतितसावित्रीक उद्दालव्रतं चरेदिति ॥

षोडशद्वाविंशचतुर्विंशपर्यन्तेषु अनुपनीताश्चेत् पतितसावित्रीकाः भवन्ति । संज्ञायाः प्रयोजनं पतितसावित्रीक उद्दालकव्रतं चरेदिति । अत ऊर्ध्वमिति वचनं पूर्वसूत्रेष्वाकारा अभिविधाविति ज्ञापनार्थम् ॥ (६)

नैनानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुः ॥ ७ ॥

नैनानुपनयेदिति । एते पतितसावित्रीका उपनयनादिसंस्कारैर्न संस्कर्तव्याः अचीर्णप्रायश्चित्ताः । तत्र किमर्थं सर्वे एतैः सम्बध्यन्ते । उपनयनप्रतिषेधे सर्वाणि हि प्रतिषिद्धानि[2] भवन्ति । अत्रोच्यते ।

[1] L. omits द्वाविंश.
[2] L. प्रसिद्धानि.

कयाचिद्युक्त्या लोभादज्ञानाद्वोपनीतस्यापि सतः अचीर्णप्रायश्चित्तस्य नैवोत्तराणि कर्तव्यानीत्येवमर्थं सर्वेषामनुक्रमेण क्रियते ॥

अचीर्णप्रायश्चित्तानिति शेषः । उपनयनप्रतिषेधादेव सर्वत्र प्रतिषेधे सिद्धे यदि केनचिल्लोभादज्ञानाद्वोपनीताः स्युः तथापि नैवोत्तराणि कर्माणि पतित-सावित्रीकाणां कुर्यादिति सर्वेषां पाठः क्रियते ॥ (७)

अलङ्कृतं कुमारं कुशलीकृतशिरसमहतेन वाससा संवीतमैणेयेन वाजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यम् ॥ ८ ॥

तत्र कुमारस्य अलंकरणं भूषणादीत्येतदुक्तं भवति । कुशलीकृत-शिरसमिति वापितशिरसमित्यर्थः । अहतेन वाससा संवीतं नवेन वाससा प्रावृतमित्यर्थः । ऐणेयेन वाजिनेन ऐणेयेन वा चर्मणा प्रावृतं ब्राह्मणम् । रौरवेण क्षत्रियं रौरवेण चर्मणा क्षत्रियं प्रावृतम् । आजेन चर्मणा प्रावृतं वैश्यम् । तत्रैतानि चर्माणि वासोभिर्विकल्प्यन्ते । उभयेषां प्रावरणार्थत्वात् ॥

कुशलीकृतशिरसं वापितशिरसमित्यर्थः । अहतं नवम् । अपुराणमनुप-भुक्तमित्यर्थः । तेन वाससा संवीतं प्रावृतमित्यर्थः । ऐणेयेन वा अजिनेन चर्मणा प्रावृतं ब्राह्मणमानीय होमं कुर्यात् । एवमुत्तरत्रापि नेयम् । एतानि चर्माणि वाससा सह विकल्प्यन्ते । उभयेषां प्रावराणार्थत्वात् वाशब्दाच्च ॥ (८)

यदि वासांसि वसीरन् रक्तानि वसीरन् काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्यः ॥ ९ ॥

यदिशब्दोऽयमनित्यार्थः[1] । एवं सति वाससा वसनमनित्यं प्राप्नोति । यदा च प्राप्नुवन्ति तदा रक्तान्येव न शुक्लानि । तेनान्यथा

[1] A. L. यदिशब्दोऽयमित्यर्थः

विन्यासं करिष्यामः । वासांसि वसीरन् । तेन वाससां नियतं वसनम्[1] । यदिशब्देन त्विदं[2] रक्तानामनित्यत्वं ज्ञापयति । यदिशब्दो निदर्शयति । यदि रक्तानि काषायं ब्राह्मण इत्येवमादिविभागः । काषायं ब्राह्मणस्यैव नियम्यते । एवमुत्तरयोः ॥

वासांसि वसीरन्नित्येवं सूत्रच्छेद इष्टः । वासांसि वसीरन् परिदध्युरित्यर्थः । यदीत्युत्तरेण सम्बध्यते । तेन नियमेन परिधानं सिद्धम् । पक्षे शुक्लान्यपि सिद्धयन्ति । यदि रक्तानि वसीरन् काषायं ब्राह्मणः माञ्जिष्ठं क्षत्रियः हारिद्रं वैश्यः । एवं रक्तानां वसनमनित्यं । तथा च गोतमः—वासांसि क्षौमचीरकुतपाः सर्वेषां कार्पासं वाविकृतं काषायमप्येके वाल्कं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः— इति ॥ (९)

तेषां मेखलाः ॥ १० ॥

भवन्ति ॥

उच्यन्ते इति शेषः ॥ (१०)

मौञ्जी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य आवी वैश्यस्य ॥ ११ ॥

ब्राह्मणस्यैव मौञ्जी । नान्यस्य । एवमुत्तरयोः क्षत्रियवैश्ययोः ॥

मौञ्जी ब्राह्मणस्य नान्यस्य । ब्राह्मणस्य तु मौञ्जी वान्या वा । न नियमः । एवमुत्तरयोर्ज्ञेयम् ॥ (११)

[1] A. वाससां नियमो वसने. L. वाससा नियतो वसाने.
[2] A. L. त्वयं

तेषां दण्डाः ॥ १२ ॥

तेषां दण्डा ॥

उच्यन्ते इति शेषः ॥ (१२)

पालाशो ब्राह्मणस्य । औदुम्बरः क्षत्रियस्य । बैल्वो वैश्यस्य । केशसंमितो ब्राह्मणस्य । ललाटसंमितः क्षत्रियस्य । प्राणसंमितो वैश्यस्य ॥ १३ ॥

दण्डादिनियमो मेखलाभिर्व्याख्यातः ॥

दण्डनियमो मेखलाभिस्तुल्यः ॥ (१३)

इति प्रथमे एकोनविंशतितमा कण्डिका

सर्वे वा सर्वेषां ॥ १ ॥

सर्वे वा दण्डाः[1] सर्वेषां विकल्पेन भवन्ति । पालाशो ब्राह्मणस्येत्येवमादयः ॥

सर्वे दण्डाः सर्वेषां भवति पालाशादयः ॥ (१)

[1] A. repeats सर्वे वा दण्डाः

समन्वारब्धे हुत्वोत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते ॥ २ ॥

समन्वारब्धे जुहोति आचार्यः । कस्मिन्[1] समन्वारब्धे । कुमारे । कस्मात् । अधिकृतत्वात् । हुत्वा उत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते ॥

आज्यस्य बर्हिष्यासादनान्तं कृत्वा समन्वारब्धे ब्रह्मचारिणि इध्माधानाघारान्तं कृत्वा पूर्वोक्ताज्याहुतीर्हुत्वा उत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते । ब्रह्मचारी तु तीर्थेन प्रविश्य आचार्यस्य दक्षिणत उपविशेत् । तीर्थं नाम प्रणीतानां पश्चिमो देशः । सर्वत्र तीर्थेनैव प्रविश्य कर्म कुर्यात् ॥ (२)

पुरस्तात् प्रत्यङ्मुख इतरः ॥ ३ ॥

पुरस्तादाचार्यस्य प्रत्यङ्मुखोऽवतिष्ठते इतरः कुमारः ॥

आचार्यस्य पुरस्तात् प्रत्यङ्मुखो ब्रह्मचारी अवतिष्ठते ॥ (३)

अपामञ्जली पूरयित्वा—तत् सवितुर्वृणीमहे—इति पूर्णेनास्य पूर्णमवक्षारयत्यासिच्य—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पुष्णो हस्ताभ्यां हस्तं गृह्णाम्यसौ—इति तस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयात् ॥ ४ ॥

स्थित्वा अपामञ्जली पूरयित्वा आचार्य आत्मनः कुमारस्य च । तत्रार्थादाचार्यस्यान्यः पूरयति । तत्सवितुर्वृणीमहे इत्येतयर्चा पूर्णेनाञ्जलिना आचार्यः पूर्णमञ्जलिमवक्षारयति कुमारस्य आसिच्य । देवस्य त्वेत्यनेन मन्त्रेण तस्य कुमारस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयान् । अथोदासेचने

[1] A. L. omit कस्मिन्.

सिद्धे किमर्थमासेचनग्रहणं पुनः क्रियते । तत्रेदं प्रयोजनम् । कथमाचार्य आसेचनं कुर्यात् । असाविति सर्वनामनिर्देशस्थाने विभक्त्यर्थः ॥

अपामुभयोरञ्जली पूरयित्वा स्वस्य पूर्णेनाञ्जलिनास्य पूर्णमञ्जलिमवक्षारयति तत् सवितुर्वृणीमहे इति मन्त्रेण । ब्रह्मचारिणोऽञ्जलौ आत्मनोऽञ्जलिमवसिञ्चतीत्यर्थः । ततो देवस्य त्वेति मन्त्रेण तस्य पाणिं साङ्गुष्ठं गृह्णीयात् । आचार्याञ्जलिमर्थादन्यः पूरयति । आसिच्येति वचनं कथं आचार्योऽवक्षारणं कुर्यात् न कुमार इत्येवमर्थम् । इतरथा पूर्णेनास्य पूर्णमवक्षारयतीत्युक्ते कस्याञ्जलिं कोऽवक्षारयतीति सन्देहः स्यात् । आसिच्येति वचने तूच्यमाने समानकर्तृकत्वनिर्देशात् यः पाणिं गृह्णाति सोऽवसिञ्चतीति ज्ञायते । तेनाचार्योऽवक्षारयतीति सिद्धम् । असावित्यस्य स्थाने सम्बुड्या ब्रह्मचारिनाम ब्रूयात् ॥ (४)

सविता ते हस्तमग्रभीदसौ—इति द्वितीयम् । अग्निराचार्यस्तवासौ—इति तृतीयम् ॥ ५ ॥

सविता ते इत्यनेन मन्त्रेण द्वितीयं पाणिं गृह्णाति । अग्निराचार्यस्तव इति तृतीयं पाणिं गृह्णाणि ॥

सङ्ख्यावचनं प्रथमहस्तग्रहणदृष्टाञ्जलिपूरणादिधर्मप्राप्त्यर्थम् ॥ (९)

आदित्यमीक्षयेत—देव सवितरेष ते ब्रह्मचारी । तं गोपाय । स मामृता—इत्याचार्यः ॥ ६ ॥

आदित्यमीक्षयेत् देव सवितरित्यनेन मन्त्रेण । आचार्य इमं मन्त्रं ब्रूते[1] । तत्रैके द्विधैनं[2] मन्त्रं कुर्वन्ति । देवसवितरेष ते ब्रह्मचारी । तं गोपाय

[1] A. ब्रवते.
[2] A. तत्रैके द्वि (ब्रूते तत्र केचि)च्चैनं.

इति आचार्यस्य भवति । स मामृतेति ब्रह्मचारिण इति । अनेन मन्त्रेण आचार्यमीक्षते इति । एवमेके कर्मेदं प्रतिभाष्यन्ते विप्रतिपन्नाः । तदेतन्नोपपद्यते द्विधाकरणम् । मन्त्रस्याविभक्तत्वान्मन्त्रविभागकरणं नास्ति । न मन्त्रविभागः स्यात् । ननु च अनितिका[1] अपि मन्त्रा भवन्ति । रथारोहे[2] चक्रयोरधिष्ठानस्य च यथा[3] भिन्न इति । नास्ति । एवमिहापि । तदेतन्नोपपद्यते । कस्मात् । तुल्यत्वात्तत्र । स एव प्रयोक्ता उभयोर्मन्त्रयोः । इह तु कर्त्रन्तरम्[4] । तस्मात्[5] एकमिच्छन्ति[6] । ननु च येऽप्येकमिच्छन्ति[7] तेषामप्याचार्यग्रहणमकर्तव्यम्[8] । कस्मात् । आचार्यस्यैवायं[9] मन्त्रो भविष्यतीति यथान्येषु[10] मन्त्रेषु । तत्तु क्रियते ज्ञापकार्थम् । अन्यत्र कृण्वन्तीक्षितुं मन्त्रो यथा स्यात् । भुक्तवन्तमपामञ्जलिपूर्णमादित्यमुपस्थापयेत् त्वं व्रतानाम्—इत्ययम् । तस्मादाचार्यग्रहणमपि कर्तव्यम् । आचार्यस्यैवायं मन्त्रो भवतीति साधितम् ॥

ततो ब्रह्मचारिणमादित्यमीक्षयेत् मन्त्रेणाचार्यः । आचार्यग्रहणं ज्ञापनार्थम् । अन्यत्रेक्षणे ब्रह्मचारिणो मन्त्रो नाचार्यस्येति । तेनादित्यमीक्षयेत् । मित्रस्य त्वा चक्षुषा प्रतीक्षे इत्यत्र ब्रह्मचारिणो मन्त्रः सिद्धः ॥ (६)

[1] A. अनतिका. L. अनत्तिका.
[2] L. यथा रोगे.
[3] L. बयवा.
[4] L. कर्मान्तरम्.
[5] A. L. य for तस्मात्.
[6] A. L. एवमिच्छन्ति.
[7] L. omits ननु च up to इच्छन्ति.
[8] A. L. तेषामाचार्यग्रहणं कर्तव्यम्.
[9] L. omits एव.
[10] A. L. यथा पुनरेषु.

कस्य ब्रह्मचार्यसि । प्राणस्य ब्रह्मचार्यसि । कस्त्वा कमुपनयते । काय त्वा परिददामि । इति ॥ ७ ॥

कस्य ब्रह्मचार्यसि इत्ययं चाचार्यस्यैव भवति मन्त्रः । कस्मात् । अधिकृतत्वात् । प्रदानसंयोगाच्च[1] । प्रजापतयेऽसौ ब्रह्मचारी प्रदीयते प्रजापतिना[2] उपनीतोऽसाविति । एतदुक्तं भवति ॥

जपेदितिशेषः मन्त्रलिङ्गात् । प्रजापतये ब्रह्मचारी प्रदीयते । तेनाचार्यस्यायं मन्त्रः ॥ (७)

युवा सुवासाः परिवीत आगादित्यर्द्धर्चेनैनं प्रदक्षिणमावर्तयेत्॥८॥

युवा सुवासा इत्यर्धर्चेनैनं प्रदक्षिणं ब्रह्मचारिणमावर्तयेत्[3] । एनमिति प्राप्नोति[4] । कस्मात् । अधिकृतत्वात् । तन्न प्रारभ्यते कथमावर्तयितुर्मन्त्रः स्यान्नावर्त्यमानो ब्रूयात् कुमारः[5] ॥

अनेनार्द्धर्चेन एनं ब्रह्मचारिणं प्रदक्षिणमावर्तयेत् । एनमिति वचनं कथं आवर्तयितुर्मन्त्रः स्यान्नावर्त्यमानो ब्रूयात् कुमार इत्येवमर्थम् । अर्द्धर्चग्रहणमृङ्निवृत्त्यर्थं । अन्यथा ऋचं पादग्रहणे इत्यृक् स्यात् ॥ (८)

तस्याध्यंसौ पाणी कृत्वा हृदयदेशमालभेतोत्तरेण ॥ ९ ॥

[1] L. omits प्रदानसंयोगाच्च.
[2] A. L. प्रजापतिनासौ.
[3] L. omits णं ब्रह्मचारिण.
[4] A. L. न प्राप्नोति.
[5] A. मन्त्रं न आनम्यान्नावर्तमानो ब्रूयात् तं कुमारम् .

तस्य ब्रह्मचारिणः अध्यंसौ । अधीत्युपरिभावे । अंसयोरुपरि[1] पाणी कृत्वा अंसयोः हृदयदेशमालभेतोत्तरेणार्धर्चेन या प्रकृता ऋक् । आलभेतेत्युक्तं भवति ॥

अधीत्युपरिभावे । ब्रह्मचारिणोऽसयोरुपरि स्वस्य पाणी कृत्वा तस्य हृदयदेशं स्पृशेदुत्तरेणार्द्धर्चेन ॥ (९)

अग्निं परिसमूह्य ब्रह्मचारी तूष्णीं समिधमादध्यात् तूष्णीं वै प्राजापत्यम् । प्राजापत्यो ब्रह्मचारी भवति इति विज्ञायते ॥ १० ॥

तत्र परिसमूह्येत्येतदपार्थकम् । कस्मात् । प्रकृतत्वात् । अग्नेः संस्कारार्थं परिसमूहनं क्रियते । संस्कृतश्चायमग्निः तेनाग्निं परिसमूहेति । सकृन्मन्त्रमारब्धम्[2] । तदिदमारम्भप्रयोजनं भवति । अन्यार्थमारभ्यते । कस्मात् । तत्रैवारभ्यते[3] यत्र प्रयोजनमिति । प्रकरणमुपजीवन्नाचार्य इहारभते[4] । प्रथमं चेदं समिदाधानम् । तस्मादत्रापि प्रारब्धम् । किं पुनः प्रयोजनमिति । सायं प्रातः समिधमादध्यादित्यत्र । ब्रह्मचारिग्रहणमाचार्यनिवृत्त्यर्थम्[5] । अतश्च ज्ञापितं भवति ब्रह्मचारिग्रहणात् यथा आचार्यस्यैव पूर्वमन्त्रा भवन्तीति । तूष्णीं यत्कर्म क्रियते तत् प्राजापत्यम् । विज्ञायते इति ब्राह्मणम् । यस्मात् प्राजापत्यो ब्रह्मचारी तस्मात् तूष्णीं समिधमादधाति । कथं पुनः प्राजापत्यो ब्रह्मचारी भवतीति विज्ञायते । यस्मादयं

[1] A. L. here only न instead of अंसयोरुपरि.

[2] A. L. सकृन्मन्त्रारब्धम्.

[3] A. तत्रैव नारभ्यते । L. तत्रैवमारभ्यते.

[4] A. इहारभ्यते L. मारभ्यते for इहारभते.

[5] L. अपार्थकं extra before आचार्य.

परिदत्तः[1] । कस्त्वा कमुपनयते । काय त्वा परिददामीत्यनेन प्राजापत्यः संवृत्तः । सर्वत्र च प्राजापत्याहुतिषु तूष्णीमेवोपदेशः । तेनोपपद्यते तेषां[2] प्राजापत्या ब्रह्मचारीति ॥

अत्र परिसमूहनमनर्थकं संस्कृतत्वादग्नेः । उच्यते । सायंप्रातः समिदाधाने पर्युक्षणपरिसमूहने यथा स्यातामिति परिसमूहनवचनम् । अत्र तु परिसमूहनाद्यकृत्वैव तस्मिन्नेवाग्नौ ब्रह्मचारी तूष्णीं समिधमादध्यात । ब्रह्मचारिवचनमाचार्यनिवृत्त्यर्थं । यस्मात् यत् प्राजापत्यं तत् तूष्णीम् । ब्रह्मचारी च प्रजापत्यः इति श्रूयते । तस्मात् तूष्णीं समिधमादध्यात् ॥ (१०)

इति प्रथमे विंशतितमा कण्डिका

मन्त्रेण हैके—अग्नये समिधमाहार्षं बृहते जातवेदसे तया त्वमग्ने वर्द्धस्व समिधा ब्रह्मणा वयं स्वाहा—इति ॥ १ ॥

एके आचार्याः समिदाधानं मन्त्रेणेच्छन्ति । तत्र हकारोऽभिमतपक्षप्रदर्शनार्थः । पूर्वपक्षस्य श्रुतिसंयोगात बलीयस्त्वं दृष्ट्वा इह हकारः प्रयुज्यते । तस्मात्तुल्यबलीयस्त्वं भवति[3] । तुल्ययोगे च विकल्प उपपद्यते । अग्नये समिधमाहार्षम्—इत्यनेन मन्त्रेण ॥

[1] A. परिधत्तः L. परिदधत्तः

[2] L. येषां.

[3] L. सिध्यति.

एके मन्त्रेण समिदाधानमिच्छन्ति । हशब्दोऽभिमतज्ञापनार्थः । तेन पूर्वस्य श्रुत्याकृष्टत्वेऽपि उभयोस्तुल्यत्वं सिद्धम् ॥ (१)

स समिधमाधायाग्निमुपस्पृश्य मुखं निमार्ष्टि त्रिः तेजसा मा समनज्मीति ॥ २ ॥

स ब्रह्मचारी । समिधमाधाय अग्निमुपस्पृश्य मुखं निमार्ष्टि त्रिस्तेजसा मा समनज्मि—इत्यनेन मन्त्रेण । तत्र स[1] इत्यनर्थकम् । कस्मात् । प्रकृतत्वात् । तत्रारभ्यते नियमार्थम् । अन्यत्र[2] समिदाधाने न ब्रह्मचारी[3] प्रसज्येत । समिधौ वा जपेद्वेत्यत्र मा भूदिति । समिद्ग्रहणं न[4] कर्तव्यं प्रकृतत्वात् । तत्क्रियते उभयोरपि पक्षयोर्यथा स्यादिति । तदेतन्नोपपद्यते । तत्र समिद्ग्रहणस्य[5] प्रत्यक्षोपदेशात् । तत्क्रियते कथमयं विधिः कृत्स्न उभयत्र स्यादिति । आधायग्रहणं किमर्थम् । सायं प्रातः समिधमादध्यादित्यत्र सायं प्रातः यथा स्यादुत्तरो विधिरिति ॥

ब्रह्मचारी समिधमाधायाग्निमुपस्पृश्य मुखं निमार्ष्टि मन्त्रेण त्रिः । मन्त्रावृत्तिरुक्ता । सग्रहणं समिधौ वा जपेद्वेत्यत्र वक्ष्यमाणो विधिर्माभूत् समिद्ग्रहणमुभयोरपि पक्षयोरुत्तरो विधिर्यथा स्यात् इति । आधायग्रहणं सायं-प्रातः समिधमादध्यात् इत्यत्रापि यथा स्यात् ॥ (२)

तेजसा ह्येवात्मानं समनक्ति इति विज्ञायते ॥ ३ ॥

[1] A. L. मन्त्र instead of तत्र स.

[2] A. अयमत्र and L. अमन्त्र for अन्यत्र.

[3] A. ब्रह्म चात्र इत्यनेन चारी.

[4] A. L. omit न.

[5] L. समिद्ग्रहणे.

अथ श्रुत्याकर्षः कस्मात् क्रियते । यथाग्नेरत्प्युपस्पर्शनं त्रिः स्यादित्येवमर्थम् ॥

श्रुत्याकर्षः कथमग्न्युपस्पर्शनमपि त्रिः स्यादिति ॥ (३)

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्रं इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् । यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासम् । यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम् । इत्युपस्थाय जान्वाच्योपसंगृह्य ब्रूयात् अधीहि भोः सावित्रीं भो अनुब्रूहि—इति ॥ ४ ॥

मयि मेधां इत्यनेन मन्त्रेणोपस्थाय जान्वाच्योपसंगृह्य ब्रूयात् । किमिति अधीहि भोः सावित्रीं भोः अनुब्रूहि इति[1] ॥

षड्भिरुपस्थाय दक्षिणं जान्वाच्य विधिवदुपसंगृह्याचार्यं ब्रूयात् अधीहीति प्रैषेण ॥ (४)

तस्य वाससा पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोर्ध्वर्चशः सर्वां ॥ ५ ॥

तस्य ब्रह्मचारिणः वाससा पाणिभ्यां च पाणी संगृह्णाति । कतरेण वाससा पाणी संगृह्णातीत्येतत्संदिह्यते । ब्रवीति । यदुत्तरं वास आचार्यस्य तेन गृह्णाति । अत एवास्याधिकारात् । अधिकार आरभ्यते ।

[1] A has पच्छोऽर्धर्चशः सर्वाम् here as well as at the end of the next sūtra.

कथम् । ब्रह्मचारिणो यद्वासस्तेन पाणी संगृह्णीयादिति । संगृह्य सावित्री-मन्वाह पच्छः अर्धर्चशः सर्वामिति ॥

तस्य ब्रह्मचारिणः परिहितेन वाससा प्रावरणस्यानित्यत्वात् स्वस्य पाणिभ्यां च तस्य पाणी गृहीत्वा सावित्रीमन्वाह ॥ (५)

यथाशक्ति वाचयीत ॥ ६ ॥

यथाशक्ति वाचयीत पच्छस्तथार्धर्चशः तथा सर्वाः । एवं पच्छ इत्युच्यमाने तथा सर्वा वाचयति यथा शक्तिर्भवति ॥

अयं पादं पादमुक्त्वा तेन वाचयति । यदि ब्रह्मचारी पादं वक्तुं न शक्नोति ततस्तेन यथाशक्ति वाचयीत । एवमर्द्धर्चशः । एवं सर्वाम् ॥ (६)

हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति मम——व्रते हृदयन्ते दधामि मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्——इति ॥ ७ ॥

वाचयित्वा हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति । मम व्रते इत्यनेन मन्त्रेण । हृदयदेशे[1] हृदयदेशसमीपे उपदधाति स्थापयतीत्यर्थः ॥

ब्रह्मचारिणो हृदयदेशसमीपे स्वस्य पाणिमूर्ध्वाङ्गुलिं उपदधाति स्थापयति मन्त्रेण ॥ (७)

इति प्रथमे एकविंशतितमा कण्डिका

---

[1] L. omits this.

किञ्च, भक्त्या तं घटयित्वा चतुरोऽपि पुमर्थांस्तस्य साधयितुं किलायमपरो यत्नः ; तत्रापि प्रतिविधास्यते ।

कर्णमूलः—(सप्रश्रयम्) देव, युगविगमसमयसमसमुदितमार्तण्डमण्डलस्येवाखण्डितप्रतापस्य तवापि कियान् स रसः, शोषणे वा तस्य तव किं न महिमातिशयः । तथाहि—

वर्धनपूर्वकं देहहितकार्याहारादिसेवनप्रकारम् । विना । सः-रस एव । जिह्वाचापलं-विविधरसविशिष्टाशनजातानाम् आस्वादने रसनाया लौल्यम् । उद्भाव्य-समुत्पाद्य । ध्वंसयिष्यते-शरीरस्य विनाशं विधास्यति । रससेवनावसरे पथ्याहारस्य परिपालनावश्यकतामालोच्यैव रसरत्नसमुच्चये एकादशेऽध्याये "कण्टारीफलकाञ्जिकं च कमलं तैलं . . " इत्यादिभिः पथ्याहारा बहवः सन्ति प्रतिपादिताः ॥२१॥

न केवलं ऐहिकस्यासाधारणफलस्य प्रदातू रसस्य सिध्यर्थं स मन्त्री यतते, अपि तु पुमर्थानाम् आमुष्मिकसिद्धिसम्पादकानाम् अस्मद्यूथमूलच्छेदहेतूनां साधनाय स जीवं संधुक्षयतीत्याह **किञ्चेत्यादिना** । भक्त्या-परमेश्वरविषयक्या । तं-जीवम् । घटयित्वा-योजयित्वा । प्रतिविधास्यते-पुमर्थसाधकोद्यमानां विघाताय यतिष्यत इति यावत् । **देवेति** । युगविगमसमयः-युगान्तकालः, प्रलयकाल इति यावत; तस्मिन्, समसमुदितानां-एककालेनोदयमधिगतवताम्, मार्तण्डानां-द्वादशादित्यानाम्, मण्डलं-व्यूहः, तस्येव । अखण्डितप्रतापस्य-अप्रतिहतपराक्रमस्य ; सूर्यपक्षे संवर्तमेघादिभिरपि कथंचिदप्यसंशमनीयसन्तापसंयुतातपस्येत्यर्थः । तवापि । सः रसः कियान् । तस्य-रसस्य । शोषणे-नीरसीकरणे । तव । महिमातिशयः-अनितरसाधारणः प्रभावः । किं न । अस्त्येवेत्यर्थः । रस इत्यस्य सलिलमित्यपि पाक्षिकार्थः ; अपां शोषणे मार्तण्ड इव रसशोषणे भवानपि प्रभवति सर्वथेति भावः । तामेव शक्तिं निरूपयति तथाहीति ।

दृष्ट्वा वैरिचमूसमूहमवशादुद्वेलमुज्जृम्भित-
क्रोधात् सङ्गररङ्गसीमनि भवत्युद्दामबद्धादरे ।
जीवः क्व क्व च तस्य मन्त्रिहतको विज्ञानशर्मा पुन-
र्दृश्येरन् क्व तृणाग्नितुल्यमहसस्तस्याल्पसारा रसाः ॥ ३२ ॥

पाण्डुः—आः, अस्त्वेतत् । भद्र, कथय कीदृशी प्रकृतीनां प्रवृत्तिः ।

दृष्ट्वेति । वैरिचमूसमूहं-शत्रुसेनानिवहम् । दृष्ट्वा । अवशात्-स्वयमेव निर्नि-रोधं यथा तथेत्यर्थः । किञ्च उद्वेलं-निर्मर्यादं यथा तथा । उज्जृम्भितक्रोधात्-अभिवृद्धप्रकोपात् हेतोः । भवति-त्वयि । सङ्गररङ्गसीमनि-रणाङ्गणभूमौ । उद्दामबद्धादरे-बलवदाहितश्रद्धे सति । (अद्धा निबद्धादरे इति पाठे-सत्यं आहितश्रद्धे सतीत्यर्थः) जीवः क्व-जीवराजः कुत्र तिष्ठेदित्यर्थः । (जीवः कः इति पाठे जीवः कीदृशः, त्वत्समक्षं स क्षुद्रः स्यादित्यर्थः) तस्य मन्त्रिहतकः-तदीयो दुष्टः सचिवः । विज्ञानशर्मा च क्व दृश्येत । यत्र क्वचित् पलायनमेव तयोर्गतिरिति भावः । तस्य-जीवस्य विज्ञानशर्मणो वा । तृणाग्नेः-आश्रितशुष्कयवसस्य आश्रया-शस्य, तुल्यं-दौर्बल्यतस्तत्सदृशम्, महः-तेजः, वीर्यमिति यावत्, येषां ते । अत एव अल्पसाराः-बलेनातिलघिष्ठाः । रसाः-विविधाः पारदादयः पुनः । "रसो रसेन्द्रः सूतश्च पारदो मिश्रकस्तथा । इति पञ्चविधो जातः क्षेत्रभेदेन शम्भुजः" इति रसस्य पञ्चविधत्वं प्रसिद्धम् । रसोपरसादिभिः सिद्धानि विवि-धान्यौषधानि वा । क्व दृश्येरन्-प्रकुपितस्य दुस्सहतेजसस्तव पुरस्तात् रसोऽयं नीरसो भूत्वा क्वापि निलीयेतेति भावः । तव पुरतो न केवलं जीवराजः, तत्सचिवो विज्ञानशर्मा च, परं तु पारदादयस्तत्साधिता रसाश्च स्युरकिञ्चित्करा इति कर्णमूलः पाण्डोरुत्साहमभिवर्धयत्यनेन वाक्येन ॥ ३२ ॥

आः इति कर्णमूलोक्त्या आमोदनपूर्वकक्रोधसूचकः शब्दः । अस्त्वेतत्-प्रासङ्गिकागतोऽयमास्तां विचार इत्यर्थः । प्रकृतीनां-पौरजनानाम् । प्रकृति-शब्देन वातादिदेहप्रकृतयश्चार्थाल्लभ्यन्ते ।

के स्वामिनि दृढभक्ताः के प्रबलाः के च दुर्बला नगरे ।
अरिमित्रोदासीनाः के पुनरङ्ग त्वया दृष्टाः ॥ ३३ ॥

कर्णमूलः—कथयामि, देव श्रूयताम् ।

तत्र प्रकृतयस्तिस्रो वातपित्तकफात्मकाः ।
तत्र यः प्रबलो वातः स तु स्नेहैर्वशीकृतः ॥ ३४ ॥

के स्वामिनीति । अङ्गेति सप्रेमामन्त्रणम् । नगरे-शरीराख्ये पुरे । स्वामिनि-जीवराजे । दृढभक्ताः-अत्यन्तप्रीतिमन्तः । के । प्रबलाः-बलिष्ठाः । के । दुर्बलाश्च-तथा दृढभक्तिमत्सु हीनबलाश्च । के । स्वामिनि निरवधिकभक्तियुक्तैरपि दुर्बलैः कातरैश्च तैर्न किमपि स्यात् फलम् ; वीर्यबलादिविशिष्टैरपि तैर्भक्तिरहितैश्च न किमपि स्यात् प्रयोजनम् ; इति प्रथमाङ्कव्याख्याने निर्दिष्टा नीतिरत्राप्यनुसन्धेया (दृश्यतां प्रथमाङ्के २९ पद्यव्याख्यानम्) । पुनः-किञ्च । अरिमित्रोदासीनाः के-के तस्य जीवस्य प्रकृतिषु शत्रवः, के तस्य सुहृदः, के च मध्यस्थाः । त्वया । दृष्टाः-तत्रावलोकिताः ॥ ३३ ॥

तत्रेति । तत्र-पुरे । प्रकृतयः-जननकाले जायमानाः स्वभावाः प्रजापर्यायत्वेन अत्र निर्दिश्यन्ते । तिस्रः-त्रिविधाः प्रकृतयो दृष्टा इति यावत् । ताश्च वात-पित्त-कफात्मकाः । 'शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयान्तरे । यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता' इति द्वन्द्व-सान्निपातिकसङ्कलनेन यद्यपि सप्त प्रकृतयः प्राक्तनैः सुश्रुतादिभिः सन्त्यभिहिताः, तथापि सर्वासां दोषत्रयान्तर्गतत्वात् 'शुक्रार्तवस्थैर्जन्मादौ विषेणेव विषक्रिमेः । तैश्च तिस्रः प्रकृतयो हीनमध्योत्तमाः पृथक्' इत्यानन्तरिककालजैः वाग्भटाद्याचार्यैः सूचितां रीतिमनुसृत्य तिस्रः प्रकृतयोऽत्र प्रतिपादिताः । शरीराख्ये पुरे वात-पित्त-कफात्मकास्त्रिविधाः प्रकृतयः, त एव प्रकृतयः—राज्याङ्गभूताः प्रजा इत्यर्थः । तासां तादात्विकीमवस्थामपि विशदयत्युत्तरार्धेन तदानन्तरिकश्लोकेन च । तत्र-तासु प्रकृतिषु । प्रबलो यो वातः-

किञ्च—

तदनुगतं यत् पित्तं मधुरमयैस्तद्विजेयमुपचारैः ।
षड्गुर्यस्तत्र कफस्तीक्ष्णोपायैर्वशं स चानीतः ॥ ३५ ॥

वायुनामा दोषः । अतिबलवत्त्वं च वायोः सर्वैरायुर्वेदाचार्यैश्चरकादिभिर्विवृतमस्ति । यथा—'प्राणादिभेदेन पञ्चात्मा वायुः प्रवर्तकश्चेष्टानामुच्चावचानां नियन्ता प्रणेता च मनसः । सर्वेन्द्रियाणामुद्योगकरः । सर्वेन्द्रियार्थानामभिवोढा । सर्वशरीरधातुव्यूहकरः सन्धानकरः शरीरस्य । प्रवर्तको वाचः । स्थूलाणुस्रोतसां भेत्ता । कर्ता गर्भाकृतीनाम् ।' इत्यादीनि बहूनि प्राकृतानि विकृतानि च कर्माणि स्वबलेन महता निर्वर्तयितुं प्रभवति वातः । सः-तादृशो वातस्तु । स्नेहैः—घृत-तैल-वसा-मज्जाख्यैश्चतुर्भिः शुद्धैः संस्कृतैर्वा स्नेहौषधैः । वशीकृतः-स्वायत्तीकृतः ; यथा कुपितः सन् शरीरे कमपि सङ्कटं विकारं वा नोपजनयेत् तथा प्रकृतिभावं वातो नीत इत्यर्थः । 'वातस्योपक्रमः स्नेहः' इत्युक्तप्रकारेण प्रकृतिष्वन्यतमो वातः प्रकोपावस्थामनधिगत्यैव समुपशमित इत्यर्थः । अन्यत्र प्रबलरिपुपक्षे "प्रबलेऽरौ सामदाने" इति राजनीतिमनुरुध्य बलेन दुर्दमो वाताख्यः शत्रुः स्नेहैः-सामप्रयोगैः दानादिभिश्च स्नैग्ध्यमाविष्कृत्य वशीकृतः-स्वानुकूलो विहित इति च सरसः श्लेषार्थः ॥ ३४ ॥

प्रबलस्य वातस्य स्नेहेन वशीकरणानन्तरं किमुपनतमवशिष्टस्य प्रकृतिद्वयस्येति प्रश्ने प्रवृत्ते तत्र ब्रूते **किञ्चेति** । तीक्ष्णगुणः पित्ताख्यो दोषश्च किञ्चिदुच्चावचतया वातवद्दुर्जयः । वातेन संधुक्षितो हुतवह इव देहाख्यं पुरं वातानुसृतं पित्तं विदह्य विनाशयेत् । अतः कथं सा प्रकृतिः पित्ताख्यापि जीवस्यानुकूल्यमाचरेदिति पृष्टे, तत् समाधीयते **तदनुगतमिति** । तदनुगतं-तेन वातेन अनुगतं-अनुसृतम् । तं वातम् अनुगच्छतीति तदनुगतमिति वा । यत् पित्तम् । वायुवह्न्योरिव वात-पित्तयोः साहचर्यं तु सहजमेव । अतस्तस्य वीर्यं क्रौर्यं च विपरीतफलमुत्पादयेदिति विभाव्य, तत्संशयं परिहरति मधुरेति । मधुरमयैः-स्वादुप्रायैः । उपचारैः-उपशमोपायैः । विजेयं-जेतुं शक्यमिति निर्णीतं

पाण्डुः—अथ कीदृशो मनसो वृत्तान्तः ।

कर्णमूलः—

उद्दामबुद्धिविभवेन मनस्तु तत्र
विज्ञानशर्मसचिवेन वशीकृतं सत् ।
कार्ये महत्यधिकृतं हितकारि राज्ञः
सर्वात्मनाप्यनुसरत्यधुना तमेव ॥ ३६ ॥

जीवराजादिभिरित्यर्थः । "पित्तस्य सर्पिषः पानं स्वादुशीतैर्विरेचनम् । स्वादुतिक्तकषायाणि भोजनान्यौषधानि च । सौम्या भावाः पयः सर्पिः" इति पित्तविजयार्थं स्वादुशीतप्रायाः सदुपचाराः समभिहिताः । प्रबलानां साहाय्यमधिगतानां क्रूराणां च लोके वशीकरणं मधुरमयैः-हृदयङ्गमैः उपचारैः प्रकल्प्यते । पङ्गुः-सर्वथा सहायान्तरं विना प्रचलितुमशक्तः, सुतरां मन्दस्वभाव इत्यर्थः । यः कफः-तृतीया प्रकृतिः । स च । तीक्ष्णोपायैः-कटुतिक्तरूक्षप्रायैरुपचारैः । वशं-आनुकूल्यम् । नीतः-प्रापितः । "श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम् । अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम्" इति कफस्य तीक्ष्णोपायसाध्यत्वं शास्त्रज्ञविदितम् । अपि च मन्दवीर्याः शत्रवोऽपि वित्रासनताडनादिभिस्तीक्ष्णोपायैरेव लोके नृपैरपरैश्च वशीक्रियन्ते । एवं वैद्यशास्त्रोक्तान् विधीननुरुध्य वातादिदोषरूपाणां प्रकृतीनां संक्षिप्तान् संशमनोपायान्, राजनीतिमनुसृत्य प्रबलानां दुर्बलानां च प्रतिपन्थिभूतानां प्रकृतिमण्डलानां सामदानदण्डादिरूपोपायैः स्वायत्तीकरणप्रकारांश्च श्लेषोक्त्या साधु समर्थितवान् कविः ॥ ३५ ॥

अथ कीदृश इति । मनसो वृत्तान्तः कीदृशः— मनसश्चेष्टा किमध्यात्मपरा भवति, अथ काम-क्रोध-मदादीनामधीना सती उन्मादादीनामस्मदीयानामनुकूला वर्तते वा इत्याकाङ्क्षा ।

उद्दामेति । तत्र-शत्रुपुरे । मनस्तु । उद्दामः-अतिबलीयान्, अनियन्त्रितप्रसर इति यावत्; बुद्धेर्विभवः-मतिविकासविशेषः यस्य तेन । विज्ञानशर्म-

पाण्डुः—अथ विज्ञानशर्मस्पर्धिनो ज्ञानशर्ममन्त्रिणः कीदृशः प्रकारः ।

कर्णमूलः—

विज्ञानमन्त्रिमन्त्रैर्विविधैरसकृद्विधूतनिजशक्तिः ।
स ज्ञानशर्ममन्त्री तिष्ठति केवलमसौ स्वरूपेण ॥ ३७ ॥

सचिवेन । वशीकृतं-तत्प्रतिभाविशेषेण बलादाकृष्य तदायत्तीकृतं सत् । महति-प्रभाषेण प्रथिम्नि । कार्ये-आधिपत्ये । सर्वेषामपीन्द्रियाणां निग्रहपूर्वकं निखिल-लोकनियन्तुः परमेश्वरस्य प्रसादलाभाय समुचिते निरवधिकानन्ददायिनि निदि-ध्यासनाख्ये कर्मणीति भावः । अधिकृतं-तत्कार्यनिर्वहणधुरन्धरत्वेन नियोजितं सत् । राज्ञः-जीवराजस्य । हितकारि-आनुकूल्यं संपादयत् सत् । तं-जीवमेव । अधुना । सर्वात्मना-अशेषेणापि प्रकारेण । अनुसरति । विचित्रेण विज्ञानशर्मणो मतिप्रभावेण सुतरामावर्जितं मनश्च बाह्यैरान्तरैश्चोद्यमैः सर्वथा जीवराजस्य श्वःश्रेयसायैव प्रवृत्तमिति भावः ॥ ३६ ॥

प्रकृतयः प्रभोर्जीवराजस्य वशंवदाः समभवन्; पक्षद्वयेऽपि मध्यस्थ-भावमवलम्बमानं मनश्च बलवदद्य जीवासक्तमभवत्; अथ सयूथ्यैरन्तःकलह-माचरद्भिः स्याद्राज्यस्य बलवत्पालितस्यापि कदाचित् सङ्कटे पतनम् इति विचार्य तद्विषयं पृच्छति अथेति । अथ-एवममीषु सर्वथास्माकं प्रतिकूलतामधिगतेषु सत्स्वित्यर्थः । विज्ञानशर्मणा स्पर्धिनः-प्रतिद्वन्द्वीभवतः । ज्ञानशर्मणः-मुक्त्यनु-कूले मार्गे एवैकान्तप्रवृत्तिमतस्तदाख्यस्य जीवसचिवस्य । "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" इत्यमरः । प्रकारः-रीतिः । कीदृशः ।

विज्ञानमन्त्रीति । सः-त्वत्कूटमन्त्रोपयोगित्वेन त्वयालोच्यमानः असौ ज्ञानशर्माख्यो मन्त्री । विविधैः-ऐहिकानां नैकविधानां श्रेयसाम् आपादकैः; त्रिवर्गसाधनोचितैरिति भावः । विज्ञानमन्त्रिणः मन्त्रैः-विमर्शपूर्वकयुक्तिविशेषैः । असकृत्-अनुपदम्, बहुवारमित्यर्थः । विधूता-तिरस्कृता, निजशक्तिः-स्वसामर्थ्यं

एवंविधविविधविचित्रचरित्रविस्मापितसकललोकस्य स्वामिहितकरणैकतानस्य तस्य मन्त्रिणः पारे खलु वाङ्मनसयोश्चरिताद्भुतानि । तथा हि—

तत्तद्दुर्घटराजकार्यघटनाव्यापारपारीणया
शक्त्या दुष्प्रसहस्य तस्य वचनैर्नानोपपत्त्यन्वितैः ।
निर्द्वन्द्वोऽपि स निर्गुणोऽपि च निराकारोऽपि निर्लेपनो-
ऽप्यायः कष्टं प्रतिपक्षतामुपगतो जीवो विचेष्टेत नः ॥ ३८ ॥

यस्य सः; तथाभूतः सन् । स्वरूपेण केवलं-ज्ञानाख्यं स्वकीयं रूपमनपहाय स्थितः सन्, स्वोचितनिश्रेयसमार्गे जीवं प्रवर्तयितुं सर्वथा चासमर्थो भूत्वेत्यर्थः । तिष्ठति-ज्ञानाख्यनाममात्रावशिष्टः सत् क्वचित् कोणे लीन एवास्त इति भावः ॥ विज्ञानशर्मणो निसर्गसिद्धैस्त्रिवर्गसाधनोपायैर्विवशीकृते जीवे ज्ञानशर्मा तत्पुरतः संप्रत्यकिञ्चित्करः स्वयं क्वचिज्जोषमास्त इति भावः ॥ ३७ ॥

एवंविधेति । एवंविधानि-पूर्वोक्तरीत्या प्रकृति-मनो-बुद्धि-ज्ञानशर्मप्रभृतीनां वशीकरणसमर्थानि, विविधानि-नानाप्रकाराणि, तथा विचित्राणि-अद्भुतानि यानि चरित्राणि-प्रख्यातकृत्यानि तैः विस्मापिताः सकललोकाः येन तस्य । स्वामिहितस्य करणे एकतानस्य-स्वप्रभोरनुकूलाचरणैकनिरतस्य । तस्य-तथाविधप्रभाववतः । मन्त्रिणः । चरिताद्भुतानि-आश्चर्यावहानि कर्माणि । वाङ्मनसयोः पारे खलु-अवाङ्मनसगोचराणीत्यर्थः । तथा हीति तान्येवोपपादयति ।

तत्तदिति । तत्तद्दुर्घटराजकार्याणां-अनितरदुस्साध्यानामनेकविधानां राज्य-निर्वहणकृत्यानाम्, घटनाव्यापारे-साधनोद्यमे, पारीणया-प्रभवत्या । शक्त्या-स्वसामर्थ्येन । दुष्प्रसहस्य-आक्रमणानर्हस्य । तस्य-मन्त्रिणः । नानोपपत्त्यन्वितैः-विस्तम्भणीयविविधहेतूपसृष्टैः । वचनैः-वाचोयुक्तिभिः । सः-जीवः-इति जीवराज अत्र जीवात्मा व्यवहृतः । निर्द्वन्द्वोऽपि-सुख-दुःख जन्म-मरणादिभिः द्वन्द्वदोषैर्विरहितोऽपि । निर्गुणोऽपि-रजस्तमःप्रभृतिभिर्गुणैरस्पृष्टोऽपि । निराकारोऽपि-स्थूल-

तस्मादेवंस्थिते प्रकृतिमण्डले दुर्भेद्ये च शत्रुपक्षे महदत्याहितमापतिष्यति । (इति भयं नाटयति ।)

पाण्डुः—(विचिन्त्य) मा बिभेहि । तत्रापि काचिदस्त्यबाधिता नीतिः ।

कर्णमूलः—कीदृशी ।

पाण्डुः—श्रूयताम् ।

यच्चञ्चलं प्रकृत्या विषयेषु मनो निसर्गदुर्दान्तम् ।
तत्कामादिभिरेतैर्भेदयितुं शक्यते शनकैः ॥ ३९ ॥

सूक्ष्म-श्वेत-रक्तादिरूपैः स्वरूपैरनन्वितोऽपि । निर्लेपनोऽपि-संसृतिसंबन्धादिवासनादोषादिभिरस्पृष्टोऽपि । "तेजस्स्वरूपो निर्द्वन्द्वो निराकारो निराश्रयः । निर्लिप्तो निर्गुणः साक्षी" इत्येवमादिप्रमाणनिर्दिष्टलक्षणविशिष्टो जीवात्मेति भावः । तथाविधोऽपि जीवः । नः-यक्ष्मपक्षीयाणाम् । प्रतिपक्षतां-शत्रुभावम् । उपगतः-प्राप्तः सन् । विचेष्टेत-प्रवर्तेत । स्वेषाम् उन्मूलनकर्मणि महामतेरघटनघटनापटीयसो मन्त्रिणो मन्त्रबलात् समुद्युक्तः स्याज्जीव इति सम्यगवगत्य महान्तं मनःक्लेशं समुद्वेगं च सूचयति आः कष्टमिति ॥ ३८ ॥

तस्मादिति । प्रकृतिमण्डले-राज्याङ्गभूते प्रकृतीनां समूहे । "राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च" इत्यमरः । वातादिप्रकृतिसमवाये च । एवंस्थिते-पूर्वनिर्दिष्टरीत्या विज्ञानशर्ममन्त्रविवशस्य जीवराजस्य सर्वात्मना स्वाधीनत्वं समधिगते सति । शत्रुपक्षे । दुर्भेद्ये-दुर्जये च सति । अत्याहितं-जीवितापोहहेतुकं महद्भयम् । तत्रापीति—तादृशे समुपनतेऽप्यवस्थान्तर इत्यर्थः । अबाधिता-अमोघा । नीतिः-परिहारपद्धतिः ।

तमेव नीतिप्रकारं विशदयति **यच्चञ्चलमिति** । यत्-यस्मात् कारणात् । मनः-अन्तःकरणाख्यमाभ्यन्तरमिन्द्रियम् । प्रकृत्या-स्वभावत एव । चञ्चलं-अती-

